श्री तिलकाचार्य-समयसुंदरगणि-सुमतिसाधुसूरि
विरचित टीकात्रिकयुतम्

# श्री दशवैकालिक सूत्रम्

## श्री दशवैकालिक सूत्रम्


प्रथमं अध्ययनम् द्रुमपुष्पिका

द्वितीयं अध्ययनं श्रामण्यपूर्वकम्

तृतीयं अध्ययनं क्षुल्लिकाचारकथा

चतुर्थ अध्ययनं षड्जीवनिकायिका

पञ्चमं अध्ययनं पिण्डैषणा

षष्ठं अध्ययनं महाचारकथा

सप्तमं अध्ययनं-वाक्यशुद्धि

अष्टमम् आचारप्रणिध्यध्ययनम्

नवमं अध्ययनं-विनयसमाधिः

प्रथमा रतिवाक्या चूलिका

द्वितीया विविक्तचर्या चूलिका

दशमं अध्ययनं-सभिक्षु





: संशोधक:
पू.आ.श्री जिनप्रभसूरिजी शिष्यरत्न
पू.मुनिराजश्री तत्त्वप्रभविजयजी गणिवर




नमोत्थु णं समणस्स भगवओ वद्धमाणस्स

।। अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ।।

पू. श्रीदान-प्रेम-रामचन्द्र-भद्रङ्कर-राजतिलक-महोदय-
जिनप्रभ-पुण्यपाल-हेमभूषणसूरि गुरुभ्योनमः

श्री तिलकाचार्य-समयसुंदरगणि-सुमतिसाधुसूरि
विरचित टीकात्रिकयुतम्

# श्री दशवैकालिकसूत्रम्

❖ मूलकर्ता ❖

श्रुतकेवलीश्री शयंभवसूरि महाराज

❖ संशोधक ❖

पू. आ. श्री जिनप्रभसूरिजी शिष्यरत्न
पू. मुनिश्री तत्वप्रभविजयजी गणिवर

❖ प्रकाशक ❖

पू. आ. श्री जिनप्रभसूरि ग्रंथमाला
C/O रसीकभाई एम. शाह
A/८ धवलगीरी फ्लेट
खानपुर, ब्हाई सेन्टर, अमदावाद
मो. ९९०४५०१२२१

| | | |
|---|---|---|
| ग्रन्थनाम | : | दशवैकालिकसूत्रम् |
| ग्रंथकार | : | श्रुतकेवली श्री शय्यम्भव महाराज |
| टीकाकार | : | आ. श्री तिलकाचार्यजी |
| | | आ. श्री सुमतिसाधुसूरिजी |
| | | उपा. श्री समयसुंदर गणि |
| प्रकाशन वर्ष | : | वि. सं. २०७१, इ. स. २०१४ |
| आवृत्ति | : | प्रथमा |
| प्रकाशक | : | पू. आ. श्री जिनप्रभसूरि ग्रंथमाला |
| संपादक | : | पू. मुनिश्री तत्त्वप्रभविजयजी गणिवर |
| सह संपादक | : | श्री अमृतभाई पटेल |
| मुद्रक | : | भरत ग्राफीक्स, अहमदाबाद |
| | | फोन : ०७९-२२१३४१७६, मो. ९९२५०२०१०६ |
| प्रत संख्या | : | ५०० नकल |

❖ प्राप्तिस्थान - प्रकाशक ❖

पू. आ. श्री जिनप्रभसूरि ग्रंथमाला
C/o रसीकभाई एम. शाह
A/८ धवलगीरी फ्लेट
खानपुर, ब्हाई सेन्टर, अमदावाद
मो. ९९०४५०१२२१

# શ્રુતભક્તિની અનુમોદના

પૂ. મુનિશ્રી તત્ત્વપ્રભવિ. ગણિવરના
સદુપદેશથી
આ ગ્રંથનો લાભ લેનાર

૧. શ્રી દાંતરાઈ (રાજસ્થાન) શ્વે. મૂ. જૈન સંઘે
જ્ઞાનખાતાની રકમમાંથી
સુંદર લાભ લીધો છે.

૨. શ્રી સિદ્ધિપદ આરાધના ભવન
ખાનપુર-અમદાવાદ
જ્ઞાનખાતાની રકમમાંથી
સુંદર લાભ લીધેલ છે.

# સંપાદકીયમ્

**દશવૈકાલિકસૂત્ર** - પ્રાકૃતમાં 'દસવેયાલિય/દસકાલિયસુત્ત' માં શ્રમણ જીવનમાં મહત્વનો-આહારચર્યા-અહિંસા-બ્રહ્મચર્ય અને વિહાર ચર્યાનો 'મૂલમંત્ર' સમાન ઉપદેશ છે.

શ્રુતકેવલિ શ્રી શય્યંભવસ્થવિરે - [પ્રાયઃ વિક્રમપૂર્વે ૩૯૫ થી ૩૯૨ દરમિયાન] દશવૈકાલિકસૂત્ર (૭૦૦ ગ્રં.)ની રચના/નિર્યૂહણા પૂર્વોમાંથી ઉદ્ધાર કરીને કરી છે. જેનો અભ્યાસ કરીને - તેમનાં પુત્ર-શિષ્ય મનકમુનિ આત્મકલ્યાણ સાધી ગયા. અને પંચમઆરા પર્યન્ત સાધી જશે.

**દશવૈકાલિકસૂત્ર વ્યાખ્યા સાહિત્ય** -

દ. વૈ. ઉપર નિર્યુક્તિ - શ્રીભદ્રબાહુ સ્વામિ, ચૂર્ણિ (૧) જિનદાસ ગણિ મહત્તર ચૂર્ણિ (૨) અગત્સ્યસિંહ (વૃદ્ધ વિવરણ), બૃહદ્વૃત્તિ શ્રી હરિભદ્રસૂરિ આ વ્યાખ્યા ગ્રંથો મૌલિક છે તેની પછી તેનાં અનુકરણરૂપે કે લઘૂકરણ રૂપે વિવિધ ટીકાઓ રચાઈ છે.

૧. ચંદ્રગચ્છે શ્રી શિવપ્રભસૂરિના શ્રી તિલકાચાર્યે વિ. સં. ૧૩૦૪માં 'ભવ્યજીવોને 'શ્રુતરત્નસાગર' દ. વૈ. સુગ્રાહ્ય બને એ માટે કાવ્યમય કથાપ્રચુર વૃત્તિની રચના કરી છે - તેનું સૌ પ્રથમ સંશોધન-સંપાદન શાસનસમ્રાટ્ શ્રીનેમિસૂરિજીનાં સમુદાયવર્તી શ્રી સોમચંદ્રસૂરિજીએ ૧૨-૧૨ હસ્તપ્રતોને આધારે કરેલ છે. તેનું પ્રથમ પ્રકાશન વિ. ૨૦૫૮માં થયું છે.

૨. સુમતિસૂરિ/સુમતિસાધુસૂરિએ - યાકિનીમહત્તરાસૂનુ શ્રી હરિભદ્રસૂરિજીની બૃહદ્વૃત્તિનાં ઉદ્ધાર રૂપે 'લઘુવૃત્તિની રચના વિ. ૧૫૧૬ પૂર્વે કરી છે. તેનું પ્રથમ પ્રકાશન દે. લા. ફંડનાં ૧૦૩માં પુસ્તક રૂપે વિ. ૨૦૧૦ માં થયું છે. તેનું સંશોધન-સંપાદન આગમોદ્ધારક શ્રી આનંદસાગરસૂરિજીનાં (૧) ઉપસંપદા પ્રાપ્ત શિષ્ય કંચનવિજય (૨) તથા પ્રશિષ્ય ક્ષેમંકરસાગરે કર્યું છે.

૩. વિ. સં. ૧૬૯૧માં શ્રી સમયસુંદરગણિ સ્તંભતીર્થે 'શબ્દાર્થ વૃત્તિ' ની રચના કરી જેનું પ્રથમ પ્રકાશન-વિ. ૧૯૭૫માં પં. ઋદ્ધિમુનિનાં ઉપદેશથી

ખંભાત જૈન બંધુ સમાજે કર્યું. બૃહત્ ખરતરગચ્છીય જિનયશસૂરિના ઉપદેશથી છપાયેલ છે તેનું પુનઃ પ્રથમ પ્રકાશન જિનશાસન આરાધના ટ્રસ્ટે વિ. ૨૦૪૬માં કરેલ છે.

**પ્રસ્તુત સંપાદન - ત્રણેય વૃત્તિઓનું એકત્રીકરણ અને તેનો હેતુ -**

પ્રસ્તુત સંપાદનમાં ત્રણેય વૃત્તિઓનો પૂર્વ પ્રકાશકો સંશોધક-સંપાદક વિદ્વત્ આચાર્ય ભગવંત મુનિવર્યનો સહૃદયતા પૂર્વક આભાર માનીએ છીએ કે તેઓએ અતિ પરિશ્રમ કરીને આ ત્રણ વૃત્તિઓ પઠન સુલભ બનાવી છે.

**ખાસનોંધ :** મૂળગાથાઓનાં અર્થોમાં સાતત્ય જળવાય અને અર્થો સરળતાથી સમજાય એટલા માટે દીર્ઘકથાઓનો વિભાગ અમે આ સંપાદનમાં રાખ્યો નથી. પરંતુ પ્રસ્તુત પુનઃ સંપાદનમાં તિલકાચાર્ય સ્વીકૃત મૂલપાઠ ને અમે માન્ય રાખ્યો છે. તિલકાચાર્યની વૃત્તિમાં પ્રથમ સંપાદક આચાર્યશ્રીએ જે ૧૨ હ. પ્ર. નો ઉપયોગ કર્યો છે. તેની સંજ્ઞા યથાવત્ રાખી છે, પરંતુ વિવિધ ચિહ્નોને બદલે સળંગ ટિપ્પણી અંક આપ્યા છે. પાઠભેદ જણાયાં ત્યાં ચૂર્ણિ સંમત પાઠ અમે ટિપ્પણમાં ચતુષ્કોણ કોષ્ટક [ ] માં આપેલ છે. તિલકાચાર્યવૃત્તિનાં સંપાદનમાં જે પ્રસ્તાવના પ્રથમ સંપાદકશ્રીએ આપી છે તેનો સાર તેઓશ્રીની ભાષામાં **'પ્રસ્તાવનાસાર'** શીર્ષકથી અમે અલગ આપ્યો છે.

આ ત્રણ વૃત્તિઓને પ્રતિગાથા દીઠ વિભક્ત કરીને પુનઃ પ્રકાશન કરીએ છીએ. તેનો મુખ્ય હેતુ તો ટીકાકાર ભગવંતોએ જે જે અર્થવૈવિધ્ય અને અર્થવૈશદ્ય આપ્યા છે. તેનો વિવિધ નયથી અભ્યાસ સરળ બને તે છે.

**ભવોદધિતારક**
**પૂ. આ. ભ. શ્રીમદ્ વિજય**
**જિનપ્રભસૂરિચરણચંચરિક**
**તત્વપ્રભવિજય ગણિવર**
**શ્રી સિદ્ધિપદ આરાધના ભવન**
**ખાનપુર, બ્હાઈ સેન્ટર**
**વિ. સં. ૨૦૭૦, પોષ વદ-૧૦**

# પ્રસ્તાવિકમ્

**અમૃત પટેલ**

પ્રતિગાથાદીઠ ત્રણેય ટીકાના અભ્યાસથી મૂળગ્રંથમાં રહેલ અર્થગાંભીર્ય સમજાય અને પૂર્વાચાર્યોના નિર્યુક્તિ-ભાષ્ય-ચૂર્ણિ-બૃહદ્ ટીકા વગેરે ગહન વ્યાખ્યા ગ્રંથોના અભ્યાસ દરમિયાન કેવો અભિગમ રાખવો તેનો ખ્યાલ આવે છે. - દૃષ્ટાંત તરીકે **ધમ્મો** પદનો અર્થ ચૂર્ણિકારે **'પરમનિસ્સેયં'** કર્યો છે. અહીં ધર્મ = શુદ્ધધર્મક્રિયા અર્થ કરીએ અહિંસા-સંયમ અને તપ તો તે પરમનિઃશ્રેયસ્ = મોક્ષનું કારણ છે, અને ધર્મ = આત્મધર્મ [વત્થુસહાવો] કહીએ તો અહિંસા-સંયમ અને તપદ્વારા વસ્તુધર્મ = પરમનિઃશ્રેયસ્ પ્રગટે છે. તો ધર્મ અને નિઃશ્રેયસ્ પર્યાય વાચક બને. ચૂર્ણિકારે ['ણવ ધમ્મસ્સ અસંમોહત્થં ધમ્મો પસંસિજ્જતિ. સો ઇહેવ જિણસાસણે =] **જિનશાસનમાં** ધર્મ જણાવ્યો. ટીકાકારે **શ્રામણ્ય** માં ધર્મ જણાવ્યો. શ્રામણ્ય અને જિનશાસન ભાવથી તો એક જ છે આમ એક જ ગાથા કે પદનો વિવિધ અર્થ ઘટનનો બોધ વિવિધ વ્યાખ્યાગ્રંથોના અભ્યાસથી થાય છે અને એથી જ શ્રી જિનશાસનના સ્યાદ્વાદ ને સમજવા માટે આપણી દૃષ્ટિ સક્ષમ બને છે. આ દૃષ્ટિકોણથી પૂ. મુનિરાજ શ્રી તત્ત્વપ્રભવિજય ગણિવરે પ્રસ્તુત સંપાદન કરેલ છે. તેથી 'અભ્યાસ' કઇ રીતે કરવો, તે બાબત અમે અમારી મતિ પ્રમણે આપીએ છીએ.

પ્રસ્તુત વૃત્તિઓમાં 'મૂળમાં તથા અર્થઘટનમાં જ્યાં પ્રાથમિક દૃષ્ટિએ વૈવિધ્ય નજરે પડ્યું ત્યાં ચૂર્ણિપાઠ અને ચૂર્ણિઅર્થ સાથે ૧ થી ૪ અધ્યયનનાં કેટલાક શબ્દોની ટૂંકી યાદી આપીએ છીએ. પહેલાં અધ્યયન અંક અને ગાથા અંક અને પછી સંજ્ઞા રાખેલ છે. (તિ) = તિલકાચાર્ય ટીકા, (સ) સમયસુંદર ટીકા, (સુ) સુમતિસૂરિ ટીકા, (અ.ચૂ.) અગત્સ્યસિંહ ચૂર્ણિ, સંજ્ઞા રાખેલ છે. ચૂર્ણિપાઠો - મુનિશ્રી પુણ્યવિજયજી મ. સંપાદિત, પ્રાકૃતટેક્સ સોસાયટી પ્રકાશિત (ઇ. સ. ૨૦૦૩) માંથી લીધા છે.

(૧) ૧.૧. धम्मो - (ति) धर्मः दुर्गतिपतज्जन्तुधारणालक्षणः । (सु) दुर्गति प्रसृतान् जीवान् धारयति. (अ.चू.) (१) धारेति संसारे पडमाणं... (२) धारेति दुग्गतिमहापउणे पतंतमिति । = सार - धर्म संसारमां 'दरेक प्रकारना पतन'थी बचावे छे.

(२) १.१. अहिंसा (ति) प्राणिदया । (स) न हिंसा अहिंसा जीवदया

प्राणातिपातविरतिः । (सु) प्राणातिपातविरतिः । (अ.चू.) पमत्तजोगस्स पाणववरोवणं हिंसा, ततो अकारेण पडिसेहणं (तुलना - प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा. तत्वार्थ. ७.८) । सार = अहिंसानुं वास्तविक पालन 'प्रमाद = प्रमत्त दशा'नां त्यागथी आवे.

१.१. संजमो - (ति) भवभ्रमणहेतुषु विषयेषु प्रवर्त्तमानामिन्द्रियाणां संयमनम् उवरमणम् वालनं = [दृश्य. वाळवुं] । (स) पञ्चाश्रवविरमणं, पञ्चेन्द्रियनिग्रहः, चतुःकषायजयः दण्डत्रयविरतिः । (सु) संयम आश्रवद्वारोपरमः । (अ.चू.) संजमो (१) समिति-गुत्तीसु उवरमो (२) संजमो सत्तरसविहो. । सार = 'अहिंसा' ना पालननुं प्रबळ प्रेरक परिबळ प्रमादत्याग. ए प्रमादत्यागनो 'आचरणात्मक उपाय एटले संयम. आ रीते अर्थ - अनुसंधान माटे यथा अनुभव, यथामति प्रयास करवो जोईए. बीजा उदाहरणो जोईए -

१.२. रसं - (ति) रसः आहारलेशः । (स) रसं मकरन्दम् । (सु) मकरन्दमिति। (अ.चू.) रसो सारो ।

१.३. समणा (ति.) तपोधनाः । (स) तपस्विनः । (सुं.) श्राम्यन्ति इति श्रमणाः तपस्विनः । (अ.चू.) समणा तपस्सिणो, 'श्रमू तपसि' [ ]

१.५. नाणापिंडरया (ति.) रताः । (स.) रता उद्वेगं विना स्थिताः । (सु.) रताः अनुद्वेगवन्तः । (अ.चू.) अंत-पंत विगतिवज्जेसु वा सरीरधारणमुद्देस -रतिगता ।

२.९ हढो - (ति) हठः, (स) । हडः । (सु) हतः = वनस्पतिविशेषः । (अ.चू.) हठो जलरुहो वणस्सतिविसोसो ।

२.११. संबुद्धा - (ति) ज्ञान(त)विषयस्वरूपाः । (स) बुद्धिमन्तः अथवा सम्यग्दर्शनसहितेन ज्ञानेन ज्ञातविषयस्वभावाः सम्यग्दृष्टयः । (सु) बुद्धिमंतो बुद्धाः । (अ.चू.) मूलपाठः - 'संपण्णा.' (चू. अर्थ) पण्णा बुद्धी, सह पण्णाए संपण्णा, सद्बुद्धयः ।।

३.४. नालीय = नालिका (ति) नालाच, (नळी) भूंगळी. । (स)/(सु) नालिकया पाशकपातनम् । (अ.चू.) या इच्छितं पाडेहिति'त्ति णालियाए पासका दिज्जंति.

३.५. आसंदी - (ति) आस्यंदकः मञ्जकः [= मांचो] । (अ.चू.) उपविसणं

पलिअंक - (ति) पर्यङ्कः [=पल्लंग] पटिकादिव्यूता खट्वा [खाटलो] । (अ.चू.) सयणिज्जं,

३.१५. सिद्धिमग्गं - (ति) सिद्धिम् अग्र्याम् । (स)/(सु) सिद्धि मार्गं सम्यग् दर्शनादिलक्षणम् । (अ.चू.) सिद्धिमग्गं दरिसण-ज्ञान-चरित्तमतम् ।

४ सू. १०. भित्तिं - नदीतटी । (अचू) णदि-पव्वतादितडी -

लेलुं - (ति) लोष्टः मृन्मयो दृषन्मयो वा । (स) लेष्टुः प्रसिद्धः । (अ.चू.) लेलू मट्टियापिंडो.

कट्ठेण वा किलिंचेण वा अंगुलियाए सिलागाए वा - टीकापाठः

अंगुलियाए वा सलागाए वा कट्ठेण वा किलिंचेण वा इति अ.चू. पाठः । टीकाः-अत्र काष्ठेन वा. कलिंचेन वा, अङ्गुल्या वा शिलाकया वा अयोमय्या

अ.चू. - सलागा कट्ठमेव घडितगं, अघडितगं कट्ठं, कलिंचं तं चेव सण्हं...।

४.११. कल्लाणं - कल्याणं । (स)/(सु) कल्याणं दयाख्यं संयमस्वरूपम् । (अचू) कल्लाणं - संसारातो विमुक्खकरणम्

४.२५. सिद्धो - (टीकाः) सिद्धः । (अचू) सिद्धो कतत्थो.

४.२६. सुहसायगस्सः सुखास्वादकस्य, चू.पा. - सुह सीलगस्स । चू. - सुतं सीलेति अणुट्ठेति सुहसीले. केति पढंति'सुहसातगस्स - सुखं आस्वादयति चक्खति ।

આવા અધ્યયનની સફળતા - ૮.૪૮ ગાથામાં वियं जियं એમ બે સ્વતંત્ર પદો છપાયા છે. સ/સુ ટીકાઓમાં 'व्यक्ताम् અને जिताम्' એવા બે અર્થો આપે છે - તો વૃદ્ધવિવરણમાં वियंजियं [व्यञ्जितम्] એક જ પદ છે. અને તિલકાચાર્યશ્રી વૃત્તિમાં व्यक्ताम् એવો એક જ અર્થ આવે છે. - આમ ગહન અધ્યયન કરાય તો શાસ્ત્રબોધ 'સમ્યગ્' બને. આવી અંતરની અભિલાષા સહ.

અમૃત પટેલ

# પ્રસ્તાવનાસાર

**કૃપા પૂજ્ય ગુરુદેવની :** પરમ પૂજ્ય પાદ ગુરુદેવ આચાર્ય **શ્રી વિજયચંદ્રોદયસૂરીશ્વરજી** મહારાજ સાહેબ તથા પરમ પૂજ્ય ગુરુદેવ આચાર્ય **શ્રી વિજયઅશોકચંદ્રસૂરીશ્વરજી** મહારાજ સાહેબ, કાયમ અંતરના આશિષપૂર્વક પ્રેરણા કરે, બીજા કાર્યો ગૌણ કરી પ્રાચીન ગ્રંથોનું સંશોધન કરી પ્રકાશન કરો, કહે પણ ખરા "પાનું ફરે સોનું ખરે" કંઈક પાના ફેરવશો તો નવું પ્રકાશન મળશે, [નવો પ્રકાશ] તમારી શક્તિનો આ ક્ષેત્રમાં ઉપયોગ કરો, જરૂર સફળતા મળશે જ અને તેઓ પૂજ્યશ્રીની પૂર્ણકૃપાથી જ અથ થી ઇતિ સુધી આ ગ્રંથનું કાર્ય થયું છે.

**પૂજ્યપાદ મુનિરાજ શ્રીજંબૂવિજયજી મહારાજ :** જેમની આંતરિક શક્તિનો ખ્યાલ પંક્તિના એક એક શબ્દોના ઉકેલ વખતે જ આવી શકે એવી દૃષ્ટિસૂઝ ધરાવતા નિઃસ્પૃહી, દર્શનપ્રભાવક, શ્રુતસ્થવિર પૂજ્યપાદ મુનિરાજ **શ્રીજંબૂવિજયજી મહારાજ** સાહેબની અંતરની લાગણીથી જ આ સંશોધન શક્ય બન્યું છે, જો તેઓશ્રીએ જેસલમેર/ખંભાત કે પાટણના ભંડારમાં રહેલ આ પ્રતોનો ખ્યાલ ન આપ્યો હોત, તો આ પ્રત અમારા હાથમાં આવત જ ક્યાંથી ? **શ્રી લક્ષ્મણભાઈ ભોજક** પાસે પ્રાચીન લિપિ પદ્ધતિથી જાણકારી મેળવી વિશેષજ્ઞાન પૂજ્યશ્રી પાસેથી જ મેળવ્યું. સાધુઓ આ કાર્યમાં તૈયાર થાય તેવી તેમની ભાવના એટલે કલાકો સુધી સાથે બેસાડી માર્ગદર્શન આપ્યું. ઘણી એવી પંક્તિઓ હતી, તેનો ઉકેલ પાનું હાથમાં લેતા જ તેઓશ્રી પાસે મળી જતો. તેઓશ્રીને સ્મૃતિપથમાં ન લાવીએ તો સંશોધનની જ એક ત્રુટિ ગણી શકાય. કેટલાક શ્લોકોની અર્થ સંગતિ વિદ્વદ્વર્ય પંડિતજી **શ્રી રજનીકાંતભાઇ** તથા પંડિતજી **શ્રીવિષ્ણુકાંતજી** ઝા પાસે કરાવી છે.

**મુનિશ્રી જિનેશચંદ્રવિજયજી :** નાની ઉંમરમાં પૂજ્ય દાદીમા સાધ્વીજી શ્રી ઉદ્યોતયશાશ્રીજી, પૂજ્ય માતુશ્રી સાધ્વીજી શ્રી તરુણયશાશ્રીજીના પગલે પગલે સંયમ સ્વીકારી પૂજ્યશ્રીના શિષ્યરત્ન પરમવિનયવંત ગણિવર્ય શ્રીનિર્મળચંદ્રવિજયજીના શિષ્ય બન્યા. ધગશ ઉત્સાહ, ખંત, દરેક વાતમાં મૂળ સુધી જવાની વૃત્તિ, જ્ઞાન મેળવવાની ઝંખનાની સાથે ગુરુકૃપાબળે આગળ વધી રહ્યા છે. આ ગ્રંથના સંશોધન વખતે કલાકો, દિવસો સુધી સાથે બેસી જુદી જુદી ૧૨-૧૨ પ્રતો વાંચી, અક્ષરે અક્ષર મેળવતા, આળસ વગર પહેલા પોતાની રીતે કોપી કરે, મેળવ્યા પછી પાછી કોપી કરી, મેટર તૈયાર કરે. આ રીતે હમણા ભલે કોઈની સંગાથે, પણ પછી ધગશથી કામ કરે તો આવા અનેક

ગ્રંથોનું સંશોધન સ્વયં પણ કરી શકે, તેવી અંતરની ભાવના.

**સૌનો સહકાર :** વિદ્વદ્વર્ય ગણિશ્રી શ્રીચંદ્રવિજયજીએ પણ અનેકવાર શબ્દો ઉકેલવા, મેટર વ્યવસ્થિત કરવા પોતાની જ્ઞાન શક્તિનો સદુપયોગ કર્યો છે. વિશેષતઃ સહવર્તી ગણિ શ્રીશ્રમણચંદ્રવિજયજીએ તેમજ પં. શ્રી સ્થૂલિભદ્ર વિ., પં. શ્રી પુષ્પચંદ્ર વિ., ગણિ શ્રી રાજચંદ્ર-કૈલાસચંદ્ર-નિર્મળચંદ્ર-કુલચંદ્ર-પ્રશમચંદ્ર વિ., પ્રવર્તક કલ્યાણચંદ્ર-કુશલચંદ્ર વિ., મુનિ શ્રી બલભદ્ર વિ., શ્રી અમરચંદ્ર વિ., પ્રકાશચંદ્ર-સુધર્મચંદ્ર-શશીચંદ્ર-પ્રિયચંદ્ર-સંઘચંદ્ર-સિદ્ધચંદ્ર-શ્રેયચંદ્ર-શ્રુતચંદ્ર-સુજ્ઞાતચંદ્ર-સંવેગચંદ્ર-નિર્વેદચંદ્ર-નિરાગચંદ્ર-સુયશચંદ્ર-ઋષભચંદ્ર-સંયમચંદ્ર-લબ્ધિચંદ્ર-સત્યચંદ્ર-સુજસચંદ્ર-સુનયચંદ્ર-કલ્પચંદ્ર-ભક્તિચંદ્ર વિ. આદિ મુનિઓએ યથાશક્ય યથાસમય સહાયતા કરી છે. શ્રીજગદીશભાઈ બી. જૈને સંપૂર્ણ ટાઈપ સેટિંગ અતિખંતથી કર્યું છે. રાજારામ-શાન્તરામ તથા પ્રેમજીએ પણ દોડધામમાં ક્યારેય પણ ખામી રાખી નથી. નેહજ એન્ટરપ્રાઈઝવાળા જયેશભાઇ તો અમારી સાથે જાણે એકમેક થઇ ગયા, પોતાનું કામ સમજી જ બધુ કામ કર્યું છે.

પ્રાન્તે શ્રીદશવૈકાલિકસૂત્રની વૃત્તિનું વાંચન અંતરંગ મનોવૃત્તિથી કરતા કરતા બાહ્યવૃત્તિને છોડી, અંતરવૃત્તિ સન્મુખ બની, શ્રીમનકમુનિની જેમ મનાક્-થોડાક સમયમાં જ મોક્ષસુખના ભાગી બનો તેવી અભ્યર્થના.

પૂ. આ. શ્રી વિ. ચંદ્રોદયસૂરિ મ. સા. ના ગુરુબંધુ પૂ. આ. શ્રી વિ. અશોકચંદ્રસૂરિ મ. સા. ના ચરણકિંકર

**સોમચંદ્ર વિ.**

વિ. સં. ૨૦૫૮, પોષ વદ-૧૦, બુધવાર,

સાચાદેવ શ્રી સુમતિનાથ વિજ્ઞાન-કસ્તૂર-જિનાલય. મકનજી પાર્ક, સુરત

# પ્રસ્તાવનાસાર-અમારી સંશોધન પદ્ધતિ

સંશોધન માટે અમોને ૧૨ પ્રતિઓ પ્રાપ્ત થઇ છે, તેમાં ૧૦ પ્રતિઓ સંપૂર્ણ છે અને બે પ્રતિઓ કથાનકવગરની ફક્ત ટીકા છે. જેનું લઘુટીકા એવું નામ આપેલ છે.

સંશોધન માટે મળેલ પ્રતોમાં વાંચનારે કઠીન શબ્દોની ટિપ્પણીઓ લખેલ છે. ક્યાંક અમે પણ કઠીન શબ્દોની ટિપ્પણીઓ કરી છે.

ટિપ્પણીઓ અને પાઠાંતર છૂટા પાડવા અમે જ્યાં જ્યાં ટિપ્પણીઓ કરી છે, ત્યાં ત્યાં નંબરો મૂકેલ છે અને પાઠાંતર આવે ત્યાં ચિહ્નો મુકેલ છે. તથા વીસસ્થાનકના નામ વગેરેની ગણતરી માટે અંગ્રેજીમાં નંબર આપેલ છે.

અમોને જે પ્રતિઓ પ્રાપ્ત થયેલ છે, તેના નામો ન લખતા તેને નંબર આપેલ છે, તેમાં ત્રણ પ્રતિઓ તાડપત્રીય છે, બાકીની કાળની છે. તે આ પ્રમાણે

**પ્રતિ-૧.** જેસલમેર, શ્રીજિનભદ્રસૂરિ જ્ઞાનભંડાર. નં. ૮૨/૧ તાડપત્રીય, પાના ૧૮૬ છે. જે ૧૪મી શદીના ઉત્તરાર્ધમાં પ્રાયઃ લખાયેલ છે.

**પ્રતિ-૨.** ખંભાત, શાંતિનાથ તાડપત્રીય જૈન જ્ઞાનભંડાર.

નં. ૮૦ તાડપત્રીય, પાના ૨૭૨ છે, જે ૧૩૧૪માં લખાયેલ છે. છેલ્લે ગ્રંથ લેખન પ્રશસ્તિના ૩૧ શ્લોક લખ્યા છે. તેમાં ગ્રંથ લખાવનારના પૂર્વજોનું વર્ણન છે, આમણગ નામના શ્રાવકે પોતાની ધર્મપત્ની આમશ્રીના કલ્યાણને માટે લખાવી છે. સંઘ સમક્ષ તેની વ્યાખ્યા કરાવેલ છે. શ્રીપ્રજ્ઞાતિલકસૂરિજીનું આ દશવૈકાલિક પુસ્તક પં. માણિક્ય તિલકજી એ સંશોધિત કરેલ છે.

**પ્રતિ-૩.** પાટણ, શ્રીહેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિર.

સંઘ ભંડારની પ્રતિ છે. ડાભડા નં. ૨૫, પ્રતિ. નં. ૨૫ તાડપત્રીય, પાના ૧૧૫ છે.

**પ્રતિ-૪.** પાટણ, શ્રીહેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિર.

ડાભડા નં. ૩૧૦, પ્રતિ નં. ૧૪૯૨૬ કાગળની પ્રતિના પાના ૧૮૪ છે.

**પ્રતિ-૫.** અમદાવાદ, એલ. ડી. ઇન્સ્ટિટ્યુટ

નં. ૪૫૪ કાગળની પ્રતિના પાના ૧૭૬ છે, કમલપ્રભસૂરિજીના શિષ્ય પુણ્યપ્રભસૂરિજીના ઉપદેશથી પાટણ વા. શ્રીમાળીજ્ઞાતીય ઢંઢેર કુટુંબના દોશી હરિચંદની

ભાર્યા રત્ના પુત્ર દોશી સૂરદો તથા શ્રીવછદો તથા રત્ના પુત્ર, પૌત્ર સહિત ઢંઢેર કુટુંબે ૧૫૯૦ના વૈ. સુ. ૫ના શુક્રવારે લખાવી છે.

**પ્રતિ-૬.** અમદાવાદ, એલ. ડી. ઇસ્ટિટ્યુટ. ડાભડા નં. ૫ પ્રતિ નં. ૧૩૨ (૨૩૦૮૫), કાગળની પ્રતિના પાના ૨૮૩ છે, તપા. શ્રીહીરવિજયસૂરિ રાજ્યે દેવવિજય વાચક માટે વૈરાટનગરે શ્રીમાળી વંશના રાકિયાણ ગોત્રીય ભારમલ્લનાપુત્ર અજયરાજે ૧૬૫૧ના ફાગણ સુદ ૫ના લખાવી છે.

**પ્રતિ-૭.** અમદાવાદ, એલ. ડી. ઇન્સ્ટિટ્યુટ.

ડાભડા નં. ૫ પ્રતિ નં. ૨૩૦૮૮ કાગળની પ્રતિના પાના ૧૭૮ છે. ૧૬૮૩ના ફા. સુ. ૧૧ ના શુક્રવારે જોશી ગોપાલે લખી છે.

**પ્રતિ-૮.** સુરત, મોહનલાલજી જૈન જ્ઞાનભંડાર.

પોથી નં. ૧૧ પ્રતિ નં. ૧૬૭ કાગળની પ્રતિના પાના ૧૨૦ છે. ૧૬૬૯ વર્ષે વૈ. સુ. ૩ના ગુરુવારે રોહિણી નક્ષત્રે ઉન્વ નગરે લખાયેલ છે.

**પ્રતિ-૯.** વડોદરા, આત્મારામજી જૈન જ્ઞાનભંડાર.

પ્રવર્તક મુનિ કાન્તિવિજય શાસ્ત્ર સંગ્રહ નં. ૪૧૦ કાગળની પ્રતિના પાના ૧૨૧ છે. બૃહદ્ગણવાસી રત્નશાલીસૂરિરાજ્યે ભાવદેવ વાચકના શિષ્ય મુનિ રત્નદેવના શિષ્ય ધનદેવમુનિએ ૧૬૩૨ વર્ષે ચૈત્ર, સુદ ૨ના સોમવારે લખી છે.

**પ્રતિ-૧૦.** વડોદરા, આત્મારામજી જૈન જ્ઞાનભંડાર.

મુનિ હંસવિજયજી જ્ઞાનભંડાર નં. ૩૬૬ કાગળની પ્રતિના પાના ૧૫૮ છે વિજયાનંદસૂરિના પ્રશિષ્યએ ૧૯૪૯ વૈ. સુદ ૨ના મંગળવારે લખાવી છે.

**પ્રતિ-૧૧.** પાટણ, શ્રીહેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિર.

વાડી પાર્શ્વનાથ જ્ઞાનભંડારની પ્રતિ છે. ડાભડા નં. ૧૮૪ પ્રતિ નં. ૭૧૧૦. આ લઘુટીકાના પાના ૪૫ છે.

**પ્રતિ-૧૨.** અમદાવાદ, એલ. ડી. ઇન્સ્ટિટ્યુટ.

નં. ૧૭૧૬૫ કાગળની પ્રતિ ચે. આ લઘુટીકાના પાના ૨૬ છે. આ બધી પ્રતિઓમાં મુખ્યતયા બે વાંચના છે. તેમાં ૧,૩,૪,૫ નંબરની પ્રતિઓની એક વાંચના તથા ૨,૬,૭,૮,૯,૧૦ પ્રતિઓની બીજી વાંચના છે. તેમાં ૧૦ નં. ની પ્રતિમાં બન્ને પ્રકારના પાઠો મળે છે. ૧,૨,૩,૬,૭,૮,૯,૧૦ આ આઠ પ્રતિઓમાં કઠીન શબ્દોના અર્થોની ટિપ્પણી કરેલ છે.

# અનુક્રમ


સંપાદકીયમ્ ........ ૪

પ્રસ્તાવિકમ્ ........ ૬

પ્રસ્તાવનાસાર ........ ૯

પ્રસ્તાવનાસાર-અમારી સંશોધન પદ્ધતિ ........ ૧૧

प्रथमं अध्ययनम् द्रुमपुष्पिका ........ ३

द्वितीयं अध्ययनं श्रामण्यपूर्वकम् ........ ८

तृतीयं अध्ययनं क्षुल्लिकाचारकथा ........ २१

चतुर्थं अध्ययनं षड्जीवनिकायिका ........ ३५

पञ्चमं अध्ययनं पिण्डैषणा - प्रथमोद्देशकः ........ ८३

पिण्डैषणाध्ययने द्वितीयोद्देशकः ........ १४१

षष्ठं अध्ययनं महाचारकथा ........ १६९

सप्तमं अध्ययनं-वाक्यशुद्धि ........ २१०

अष्टमम् आचारप्रणिध्यध्ययनम् ........ २४६

नवमं अध्ययनं-विनयसमाधिः तत्र प्रथमोद्देशकः ........ २८५

विनयसमाध्यध्ययने द्वितीयोद्देशकः ........ २९८

विनयसमाध्यध्ययने तृतीयोद्देशकः ........ ३१४

विनयसमाध्यध्ययने चतुर्थोद्देशकः ........ ३२५

दशमं अध्ययनं-सभिक्षु ........ ३३५

अथ प्रथमा रतिवाक्या चूलिका ........ ३५१

अथ द्वितीया चूलिका विविक्तचर्या ........ ३७४

प्रशस्तिः ........ ३९२

खम्भाततताडपत्रीयप्रतलेखनप्रशस्तिः ........ ३९३

# श्री
# दशवैकालिकसूत्रम्

नमोत्थु णं समणस्स भगवओ वद्धमाणस्स

।। अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ।।

**पू. श्रीदान-प्रेम-रामचन्द्र-भद्रङ्कर-राजतिलक-महोदय-**
**जिनप्रभ-पुण्यपाल-हेमभूषणसूरि गुरुभ्योनमः**

**श्री तिलकाचार्य-समयसुंदरगणि-सुमतिसाधुसूरि**
**विरचित टीकात्रिकयुतम्**

# ।। श्री दशवैकालिकसूत्रम् ।।

**तिलका.-** अर्हन्तः प्रथयन्तु मङ्गलममी, शृङ्गारयन्तः सदा,
पादाम्भोजरजःकणैः क्षितिवधूं, [१]काश्मीरलेशैरिव ।
तत्त्वार्थैकविदां सुवर्णरचनामाकर्ण्य येषां मुखात्,
तत्तद्भावनया रसेन लभते, [२]कल्याणकोटिं जनः ।।१।।

शार्दूलविक्रीडितम्

देवः केवलसम्पदे भवतु वः, श्रीनाभिराजाङ्गभू—
र्जित्वा योऽत्र जगत्त्रयीविजयिनं, [३]श्रीकामराजेश्वरम् ।
आदत्ताऽऽतपवारणत्रयमिदं केनाप्यवार्यं ततस् —
[४]तन्मूर्तेरपि मूर्ध्नि सर्वविदितं निर्मीयतेऽद्यापि [५]तत् ।।२।।

शार्दूलविक्रीडितम्

यज्जन्मस्नात्रकाले [६]विमलजलभरेष्वासमन्तात् पतत्सु,
[७]स्वर्णाद्रियोजनास्योज्ज्वलकलशमुखान्निर्गतेष्वन्तरस्थः ।
भ्रेजे भ्राजिष्णुर्[८]दभ्राऽभ्रक[९]गृहकलसद्दीपवद्दीप्यमानः,
स स्वामी वीरनामा [१०]किंशलयतुतमामङ्गिनां मङ्गलानि ।।३।। स्रग्धरा

---

१. केशरैरिव ६.८. टि. ।। २. कल्याणं शिवं कनकं च, तस्य कोटिं ३. कन्दर्पम् ।। ४. जिनमूर्त्तेरपि, ५. छत्रत्रयम् ।। ६. अमलजलपटले० ।। ७. योजनप्रमाणनालचवाला, २५ योजनऊंचा, १२ योजनविस्तारवाला, १.६०.००.००० सङ्खयकउज्ज्वलकलश १० ।। ८. ०शुभ्रा. ११ दभ्र = पतलो मोडलरो [अबरखनुं] घर तिनके विषे गत ८ टि., मुद्रित १० टि. ।। ९. गृहगतसद् २.५-११ ।। १०. पल्लवयतुतमाम्.६ टि. ।।

[१]अङ्गानां क्रमतः स्थितिं [२]गुरुतया, विज्ञाय चि[३]च्चक्षुषा,
वृद्धायाः श्रुतसम्पदोऽनुसमयं, यान्त्याः प्रभोराज्ञया ।
यावद् [४]**दुःप्रसभा**भिधं गुरुमतो हस्तावलम्बं ददौ,
यः कृत्वा **दशकालि**कं मुनिपतिः **शय्यम्भवः** सोऽवतात् ।।४।।
शार्दूलविक्रीडितम्

शय्यम्भवस्य श्रुतरत्नसिन्धोः, [५]सर्वस्वभूतं दशकालिकं यत् ।
[६]उत्पाद्य बह्वर्थ-सुवर्णकोशं, तद्भव्यसुग्राह्यमहं करोमि ।।५।। [७]इन्द्रवज्रा

इह सर्वेऽपि शास्त्रकाराः सुविदितसुकविसमयसमाचाराः शास्त्रादौ दर्शिताखिल-[८]प्रबलप्रत्यूहव्यूहापहारसमुचितेष्टदेवतानमस्काराभिधेयसम्बन्धप्रयोजनो[९]ल्लेखं निर्मापितानेकमङ्गलशतसहस्राश्लेषमभिमुखीकृतसकलश्रोतृलोकं श्लोकं लिखन्ति, परं क्रियमाणेष्वपि [१०]शतकृत्वोऽपि मङ्गलेषु यदि कर्ता न प्राग्भवे प्रशमितकर्मधर्मः शुद्धो धर्मः कृतः स्यात् तत्तन्मनोरथः प्रमाणपदवीमदवीयसीमधिरोहति । धर्मस्यैव निखिलमङ्गलाभ्युदयहेतुत्वात् ।

अत एव पूज्यश्री**शय्यम्भव**सूरिमि[११]श्रा अपि **दशवैकालिक**श्रुतस्कन्धप्रारम्भेऽभिधेय-सम्बन्धप्रयोजनानुगं मङ्गलार्थं धर्ममेवोपश्लोकयन्ति स्म ।।

तथा हि -

---

१. अङ्गारी स्थित गुरुत्वं विज्ञाय [अङ्गोनी स्थिति सारी रीते जाणीने] इति कृतं=एतत् दशकालिकं कृतं शय्यम्भवः सूरिवृद्धश्रुतसम्पदः प्रति समृद्धं याति ८ टि. ।। २. गरिष्टतया ६ टि. ।। ३. ज्ञानचक्षुषा ६ टि. ।। ४. दूपसहाचार्यनामानं गुरुं विज्ञाय ६ टि., दुपसहसूरितांई [सुधी] दशवीकालिक रहसी ८ टि. ।। ५. सर्वसारभूतं वर्तते ६ टि., सर्व आगम सारांस वागमस्य प्रमाणनीयं एतत्-अर्थ भलो सुग्राह्यमहं करोमि ८ टि. ।। ६. उद्वाच्य ८, उद्वात्य १० ।।
७. दूषणोर्मिबहिर्भूतैर्गुणरत्नगणैःश्रितम् । संसारवारिधेस्तीरं, वीरजिनमुपास्महे ।। हस्तः शस्तः सदा येषां, भास्वद्योगप्रभावतः । कल्पितार्थफलस्तेभ्यः, श्रीगुरुभ्यो नमो नमः ।। ३ प्रतौ टिप्पण्यां एतौ द्वौ श्लोकावधिकौ ।। ८. प्रबल = घणो प्रत्यूह = विघ्न तस्य व्यूह=समूह तस्यापहारं=दुरं करणो तस्य हेतो इष्टदेवतानमस्कारकृतवान् तदनन्तरमभिधेयादिज्ञापनम् ८ टि. ।। १३. ०रि ५-११ ।। ९. प्रकाशनम् २ टि., कथनम् ६ टि. ।। १०. शतेषु मङ्गलेषु कृतेषु अपि, यदि पूर्वभवे प्रशमितकर्मतापः एतादृशः शुद्धो धर्मः न कृतः, तदा मनोरथप्रमाणपदवी न घणी पामे धर्मात् एव मनोरथानि सम्पूर्णान् प्राप्नोति ९ टि. ।। ११. पूज्या ८ टि. ।।

# प्रथमं अध्ययनम् द्रुमपुष्पिका

**धम्मो मंगलमुक्कट्ठं, अहिंसा संजमो तवो ।**
**देवा वि तं नमंसंति, जस्स धम्मे सया मणो ।।१.१।।**

**(ति.)** धर्मो [1]**मङ्गलमुत्कृष्ट**मित्यनेन मङ्गलमुक्तं । **अहिंसा संयमस्तपः** । **अहिंसा**-प्राणिदया । **संयमः**-भवभ्रमणहेतुषु विषयेषु प्रवर्तमानानामिन्द्रियाणां संयमनं, [2]उपरमणं वालनं । **तपः**-अनशनादि द्वादशभेदम् इत्यनेनांशेना[3]भिधेयमभिदधे । अस्मिन्नहिं[4]सादेरेव व्याख्येयत्वात् । **देवा अपि तं नमस्यन्ति, यस्य धर्मे सदा मनः** । इत्युत्तरार्धेन प्रयोजनं फलभूतं[6]मुद्भावितम् । इह चैतत्[7]सांदृष्टिकं फलं, आयति फलं तु निःश्रेयसमेव, सर्वेषामपि धर्मशास्त्राणां निःश्रेयसफलत्वात् । सम्बन्धश्चाऽनुक्तोऽपि वाच्य-वाचकरूपः [8]प्रतीत एव । [9]घटशब्दाद् वाचकान्मृन्मयं वर्तुलाकारं जलाधारं वाच्यं । [10]गोशब्दात् खुर-ककुद-विषाणादिमन्तं पदार्थमबलाबालगोपालादयोऽप्यं[11]वबुध्यन्त एव ।।१।।

**(स.)** स्तम्भनाधीशमानम्य गणिः **समयसुन्दरः** ।
दशवैकालिके सूत्रे शब्दार्थं लिखति स्फुटम् ।।१।।

धर्म्म इति-**धर्मो** दुर्गतिप्रपतज्जन्तुधारणालक्षणः, **उत्कृष्टं** प्रधानं **मङ्गलं** वर्तते, को धर्म इत्याह-**अहिंसा**, न हिंसा अहिंसा जीवदया प्राणातिपात-विरतिरित्यर्थः, पुनः **संयमः** पञ्चाश्रवविरमणं, पञ्चेन्द्रियनिग्रहः चतुःकषायजयः, दण्डत्रयविरतिश्चेति सप्तदशभेदः, इत्येवंरूपः, पुन**स्तपः**

"अणसणमूणोअरिआ वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होई ।।१।।
पायच्छित्तं विणओ वेआवच्चं तहेव सज्झाओ ।
झाणं उस्सग्गो वि य अब्भिंतरिओ तवो होई ।।२।।" इति

---

१. प्रधानम् ६ टि., ।। २. निवर्त्तनम् ६ टि. ।। ३. मूलकारणं कथितम् ६ टि, ०धेयम् ५-१० ।। ४. जन्मदिनादपि श्रीवज्रस्वामिन इव ३ टि. ।। ६. कथितम् ६ टि. ।। ७. तत्कालिकं २.६ टि. ।। ८. विख्यात एव ६ टि. ।। ९. घटशब्दकथनात् वर्तुलाकारं स्वयमेव ज्ञातव्यम् ८ टि. ।। १०. गोशब्दकहणै सति खुरककुदगलोलटके ८ टि., वाचकात् ६ टि. ।। ११. ०प्येवं ६.८ ।।

बाह्याभ्यन्तररूपं द्वादशधा. अथ धर्मकरणे माहात्म्यमाह-देवा अपि, अपिः संभावने, तं धर्मकारकं जीवं नमस्यन्ति, मनुष्यास्तु सुतरां, तं कं ? यस्य धर्मे धर्मकरणे सदा मनोन्तःकरणम् इति प्रथमगाथार्थः ।।१।।

**(सु.)** ए नमः ।। जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान् ।

विमलस्त्रासविरहितस्त्रिलोकचिंतामणि**र्वीरः** ।।१।।

इहार्थतस्त(तोऽर्ह)त्प्रणीतस्य सूत्रतो गणधरोपनिबद्धपूर्वगतोद्धृतस्य शारीरमान-सातिकटुकदुःखसन्तानविनाशहेतोः **दशवैकालिका**भिधानस्य शास्त्रस्यातिसूक्ष्म-महार्थगोचरस्य व्याख्या प्रस्तूयते, तत्र प्रस्तुतार्थप्रतिपादनार्थमेव धर्म्मस्य नमस्कार-द्वारेणाशेषविघ्नविनायकोपशांतये भगवान् **शय्यंभवाचार्यो** भावमंगलमाह—'धम्मो मंगल'मित्यादि, मङ्गयते हितमनेनेति **'मङ्गलं', 'उत्कृष्टं'** प्रधानं, न हिंसा **अहिंसा**-प्राणातिपातविरतिरित्यर्थः, दुर्गतिप्रसृतान् जीवान् धारयतीति धर्मः, स मङ्गलं, 'संयमः' आश्रवद्वारोपरमः, तापयत्यनेकभवोपात्तमष्टप्रकारं कर्म्मेति 'तपः' अनशनादि, 'देवाऽऽवि तं नमंसंति'ति (देवा अपि तं नमस्यन्ति) यस्य किं ? - धर्मे 'सदा' सर्वकालं 'मनः' अन्तःकरणमिति ।।१।।

**जहा दुम्मस्स पुप्फेसु, भमरो आवियइ रसं ।**
**ण य पुप्फं किलामेइ, सो [१]ह पीणेइ अप्पयं ।।१.२।।**

**(ति.)** अथैवंविधधर्मविधायिनां साधूनां प्रथमं श्लोकचतुष्टयेन माधुकरीं वृत्तिमाह—यथा द्रुमस्य पुष्पेषु भ्रमरो रसम्-मकरन्दमापिबति । आ-मर्यादया । न च-नैव । पुष्पं क्लमयति-ग्लानिं नयति । आत्मानं च प्रीणयति इत्यक्षरार्थः । अत्र [२]चोपमेयं व्यङ्ग्य । भ्रमरवत् साधुः । पुष्पाणि गृहस्थगृहाणि । रस आहारलेशः, तं गृह्णाति, न तं गृहस्थं पीडयति । आत्मानं च तर्पयति ।।१.२।।

**(स.)** अथ यतीनामाहारग्रहणे विधिमाह—जहेति—यथा येन प्रकारेण द्रुमस्य वृक्षस्य पुष्पेषु भ्रमरो रसं मकरन्दमापिबति, परं न च नैव पुष्पं क्लामयति पीडयति स च भ्रमर आत्मानं प्रीणयति रसेनात्मानं सन्तोषयति, ।।१.२।।

**(सु.)** 'जहा दुमस्से'ति 'यथा'-येन प्रकारेण द्रुमस्य पुष्पेषु भ्रमरः-चतुरिन्द्रियः,

१. प्रसिद्धः पाठस्तु 'सो य' अस्ति वृत्तिकृद्भिरन्यैश्च विवृत्तस्तथैव 'स च' इति. २. चायमर्थो व्यङ्ग्यः ५-१० । ज्ञेयं २ टि., व्यङ्ग्य = प्रकटनीयः ६ टि. ।।

किं ?-आपिबति, कं ?, रसं मकरन्दमिति 'न च' नैव पुष्पं 'क्लामयति' पीडयति, 'स च' भ्रमरः 'प्रीणाति' तर्पयत्यात्मानमिति ।।२।।

**एमेए समणामुत्ता, जे लोए संति साहुणो ।**
**विहंगमा व पुप्फेसु, दाणभत्तेसणे रया ।।१.३।।**

**(ति.)** तथा – एवं पूर्वोपवर्णितसाधुवत् । एते **श्रमणाः**-तपोधनाः । **मुक्ताः**-बाह्येन वसत्युपकरणादिना, आभ्यन्तरेण च क्रोधादिना परिग्रहेण रहिताः । **ये लोके**-मनुष्यलोकरूपे **साधवः सन्ति** । **दानभक्तैषणे रताः** । [1]दात्र्या दानायानीतस्य [2]भक्तस्य एषणे-शुद्धत्वान्वे[3]षणे रताः । विहङ्गमा इव-भ्रमरा इव पुष्पेषु । अत्र निषेधो व्यङ्ग्यः । न पुनर्लौल्यादाधाकर्मादिदुष्टेषु विशिष्टेष्वपि मोदकादिषु । भ्रमरा अपि पुष्पेष्वेव रताः, न तूत्कृष्टफलादिषु ।।३।।

**(स)** अयं दृष्टान्त उक्तः, दार्ष्टान्तिकमाह-एवमनेन प्रकारेण एते श्रमणास्तपस्विनः ते च न तापसादयः, अत आह-कीदृशाः श्रमणाः ? - मुक्ताः बाह्यपरिग्रहेण आभ्यन्तरपरिग्रहेण च, मुक्ताः, तत्र बाह्यपरिग्रहो धनधान्यादिरूपो नवविधः, आभ्यन्तरपरिग्रहश्च-

"मिच्छत्तं वेअतिगं हासाइयं छक्कगं च नायव्वं ।
कोहाईण चउक्कं चउदस अब्भिंतरा गंठी १."

इत्यादिरूपस्ताभ्यां रहितः, एते के ? - ये श्रमणा लोकेऽर्धतृतीयद्वीपसमुद्रपरिमाणे सन्ति विद्यन्ते. पुनः कीदृशाः श्रमणाः ? - साधवो ज्ञानादिसाधकाः, पुनः कीदृशाः ? **विहङ्गमा इव** भ्रमरा इव **पुष्पेषु दानभक्तैषणे रताः,** दानग्रहणाद् गृहस्थैर्दत्तं गृह्णन्ति परं नादत्तं, **भक्त**ग्रहणात् तदपि दत्तं प्रासुकं गृह्णन्ति, न आधाकर्मादि, **एषणा**ग्रहणेन गवेषणादित्रयपरिग्रहः, एषु त्रिषु स्थानेषु रताः सक्ताः ३. (१.३)

**(सु.)** 'एमेए' इत्यादि, 'एवं' अनेनैव प्रकारेण एते ये परिभ्रमन्तो दृश्यन्ते, श्राम्यन्तीति श्रमणाः तपस्यन्तीत्यर्थः, ते च तापसादयो भवंत्यत आह-'मुक्ताः'-सबाह्याभ्यत्तरेण ग्रन्थेन ये **लोके** अर्धतृतीयद्वीपसमुद्रपरिमाणे **सन्ति** विद्यन्ते, साधयन्तीति **सावधः** किं साधयन्ति?-ज्ञानादीति-इति गम्यते, **विहंगमा** इव भ्रमरा इव पुष्पेषु

१. स्त्रिया [इति ज्ञेयम्] ६ टि. ।। २. अन्नस्य ६ टि. ।। ३. विचारणे

दानभक्तैषणासु **रताः** दानग्रहणाद् दत्तं गृह्णन्ति, नादत्तं भक्तग्रहणात् तदपि प्रासुकं, नाधाकर्मादि, एषणाग्रहणेन गवेषणादित्रय परिग्रहः, तेषु स्थानेषु **रताः** आसक्ताः इति ।।३।।

**वयं च वित्तिं लब्भामो, न य कोइ उवहम्मई ।**

**अहागडेसु रीयंते, पुप्फेसु भमरा जहा ।।१.४।।**

**(ति.)** एवं तर्हि कथं यूयं वर्तिष्यथेति, केनाप्युक्ते, साधवो ब्रुवते-वयं च वृत्तिं लप्स्यामहे न कोऽपि-प्राणी पृथ्वीकायादि[1]रूपहनिष्यते । [2]यतो यथा कृतेषु-स्वार्थप्रगुणितेषु आहारेषु विषये साधवो ग्रहणबुध्या [3]रीयन्ते-विचरन्ति । यथा भ्रमराः स्वयं सिद्धेषु पुष्पेषु रसार्थं व्रजन्ति । न पुनर्भ्रमरार्थं वृक्षाः पुष्यन्ति । [4]तथा च-

वासइ न तणस्य कए, न तणं वड्ढइ कए मयकुलाणं ।

न य रुक्खा न च साहा, फुल्लंति कए महुअराणं ।।१।। [ ]

मेघः तृणस्य कृते न वर्षति, तृणं मृगकुलानां कृते न वर्धते, न च वृक्षाः न च शाखाः भ्रमराणां कृते पुष्पन्ति ।।४।।

**(स.)** अत्र को प्याह ननु **साधवो दानभक्तैषणे रता** इत्युक्तं, यतश्चैवं तत एव लोको भक्त्याकृष्टचित्तस्तेभ्यः साधुभ्य आधाकर्मादि ददाति, तस्य ग्रहणे जीवानां हिंसा स्यात् आहारस्याग्रहणे तु स्ववृत्तेरलाभेन स्वदेहधारणं न स्यात्. अत्रोच्यते-**वयमिति वयं च वृत्तिं लप्स्यामः** प्राप्स्यामस्तथा यथा **न कोऽप्युपहन्यते,** तथा **यथाकृतेषु** गृहस्थैरात्मार्थं निष्पादितेष्वाहारादिषु साधवो **रीयन्ते** गच्छन्ति **पुष्पेषु यथा भ्रमराः** ।।४।।

कश्चिदाह-**'दाणभत्तेसणे रया'** इत्युक्तं, यत एव चैवमत एव लोको भक्त्याकृष्ट-मानसस्तेभ्यः प्रयच्छत्याधाकर्मादि, तस्य ग्रहणे सत्त्वोपरोधः, अग्रहणे च स्ववृत्त्यलाभ इति, अत्रोच्यते-'वयं च वित्ति'मिति वयं च वृत्तिं '[5]लप्स्यामः'-प्राप्स्यामस्तथा यथा न कश्चिदुपहन्यते, तथाहि-एते साधवः सर्वकालमेव 'यथाकृतेषु' आत्मार्थमभिनिर्वर्त्तितेषु आहारादिषु 'रीयंते' गच्छन्ति-वर्तन्ते इति, 'पुष्पेषु भ्रमरा यथा' इति ।।४।।

**महुका(गा)रसमा बुद्धा, जे भमंति अणिस्सिया ।**

**नाणा पिंडरया दंता, तेण वुच्चंति साहुणो ।।१.५।। त्ति बेमि**

**(ति.)** तथा—महुकार त्ति-आर्षत्वादाऽऽकारः, **मधुकरसमाः** । यथा मधुकराः **अनिश्रिताः**-आरामादिष्वप्रतिबद्धाः । तथा **बुद्धाः**-ज्ञाततत्त्वाः साधवोऽनिश्रिताः-

१. ०रूपो ५.६.८-११ ।। २. ततो ६.८-१० ।। ३. री गतौ ३ टि. ।। ४. यथा ६.९ ।।

५. लप्स्यामह इति वक्तव्येपीदं मूलस्थं पदमिति मन्तव्यम् ।

कुलादिष्वप्रतिबद्धा **भवन्ति भ्रमन्ति वा । नानापिण्डरताः**-नानागृहेभ्योऽल्पाल्पपिण्डग्रहणे रताः । नानाप्रकारा वा संसृष्टाऽसंसृष्टाद्यभिग्रहविशेषात् पिण्डास्तेषु रताः । **दान्ताः**-दमितेन्द्रियाः, न तु लोल्यादेकस्मिन्नेव गृहे संपूर्णग्राहिणः । **तेन** एवंविधाचारेण **साधव उच्यन्ते । इति**-समाप्तौ, **ब्रवीमि** । तीर्थकृद्गणधरोपदेशेन न तु स्वमत्या । अत्र श्लोकचतुष्के ऽपि मधुकरदृष्टान्तस्य भङ्ग्यन्तरेणोक्तत्वान्न पौनरुक्त्यामाशङ्कनीयम् ।। **तिलकाचार्यवृत्तौ संपूर्णं प्रथमं द्रुमपुष्पिकाध्ययनं**

**(स.)** अथ येन प्रकारेण साधवस्तथा चाह--महुगारेति-यतश्चैवमतस्ते **मधुकरसमाः** भ्रमरतुल्याः **साधवः,** पुनः किंभूताः ? **बुद्धा** ज्ञाततत्त्वाः, एवंभूता ये **भवन्ति भ्रमन्ति** वा, पुनः किम्भूताः ? **अनिश्रिताः,** कुलादिष्वप्रतिबद्धाः, पुनः किम्भूताः ? **नानापिण्डरताः,** नाना नानाप्रकाराऽभिग्रहविशेषात् प्रतिग्रहमल्पाल्पग्रहणाच्च पिण्ड आहारादिरन्त-प्रान्तादिर्वा, तस्मिन्नानापिण्डे रता उद्वेगं विना स्थिताः, पुनः किम्भूताः? **दान्ता** इन्द्रिय[1]—नोइन्द्रियदमनेन, उपलक्षणत्वादीर्यादिसमिताश्च. ततश्चायमर्थः-यथा भ्रमरोपमया एषणासमितौ यतन्ते, तथेर्यादिष्वपि त्रसस्थावरभूतहितं यतन्ते, तेन साधवः परमार्थतः साधव इत्युच्यन्ते. इतिशब्दः समाप्तौ. ब्रवीम्यहं, परं न स्वबुद्ध्या, किन्तु तीर्थकरगणधराणामुपदेशेन. ।।५।।

**इति श्रीदशवैकालिकशब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां द्रुमपुष्पिकाख्यं प्रथममध्ययनं समाप्तम्.-**

**(सु.)** यतश्चैवमतो-**'मधुकरसमा'** इति मधुकरसमा-भ्रमरतुल्याः, बुध्यन्ते स्म 'बुद्धा'-अवगततत्त्वाः, एवंभूता **'ये भवन्ति भ्रमन्ति** वा **'अनिश्रिताः'** कुलादिष्वप्रतिबद्धा इत्यर्थः, **'नानापिण्डरता'** नाना-अनेकप्रकाराभिग्रहविशेषात् प्रतिगृहमल्पाल्पग्रहणाच्च **पिण्डः**-आहारादिपिण्डः, नाना चासौ पिण्डश्च अन्तप्रान्तादिर्वा, तस्मिन् रताः-अनुद्वेगवन्तः, 'दान्ता' इन्द्रियदमेन, दान्ता इति पदेऽसौ वाक्यशेषो द्रष्टव्यः, ईर्यादिस-मिताश्च, ततश्चार्थोऽयं यथा भ्रमरोपमया एषणासमितौ यतन्ते, तथा ईर्यादिष्वपि त्रसस्थावरभूतहितं यतन्ते, सांद्भाविकं-पारमार्थिकं, ते च साधव इति, पाठान्तरं वा, 'तेनोच्यन्ते साधव' इति येन कारणेन मधुकरसमाना उक्तन्यायेन भ्रमरतुल्याः ।।५।। इतिः परिसमाप्तौ, ब्रवीमीति न स्वमनीषिकया, किन्तु तीर्थकरगणधरोपदेशेनेति ।।

**।। सुमतिसाधुसूरिवृत्तौ द्रुमपुष्पिकाध्ययनं समाप्तम् ।।**

१. इन्द्रियाणि च नोइन्द्रियं चेति विग्रहः ।

# ।। द्वितीयं अध्ययनं श्रामण्यपूर्वकम् ।।

**कहं नु कुज्जा सामण्णं, जो कामे न निवारए ।**
**पए पए विसीयंतो, संकप्पस्स वसं गओ ।।२.१।।**

**(ति.)** अस्यायमभिसम्बन्धः, अनन्तराध्ययने[1] धर्मः प्रशंसितः । स च [2]श्रामण्ये सति स्यात्, अतः श्रामण्यमिह वाच्यमित्याह – कथं नु कर्यात् श्रामण्यम् । यः कामान्-शब्दादिविषयान् । न निवारयति-न निषेधयति । संकल्पस्य-अप्रशस्तविषया-ध्यवसायस्य । वशं गतः, पदे पदे-एकैकस्मिन्नपि शब्दादिविषये स्वस्वेन्द्रियविषयमागच्छति सति । विषीदन्-श्रामण्ये श्लथी[3]भवन् । नुः क्षेपे, [4]कुश्रामण्यकृत् भवतीत्यर्थः ।। क्षान्त ! न शक्नोमीत्यादिवाक् [5]क्षुल्लकवत्। एवं पदे पदे सीदन् साधुर्यथोक्त क्षुल्लकवत् चारित्रे श्लथीभवन् सङ्कल्पस्य दुष्टविषयाध्ययवसायस्य वशं गच्छति,तस्मात् कामाः साधुना निवारणीयाः ।।२.१।।

**(स.)** प्रथमाध्ययने धर्मप्रशंसा उक्ता, सा चेहैव जिनशासने. इह तु अध्ययने जिनशासनेऽङ्गीकृते सति मा भून्नवदीक्षितस्य संयमेऽधृतिरतो धृतिमता भाव्य-मित्येतदुच्यते, इत्यनेन सम्बन्धेनायातमिदमध्ययनं व्याख्यायते–**कहमिति**-कथं केन प्रकारेण, 'नु' इति क्षेपे, यथा कथं नु स राजा यो न रक्षति प्रजां, कथं नु स वैयाकरणो योऽपशब्दं प्रयुङ्क्ते, तथा कथं नु कुर्यात् श्रामण्यं श्रमणभावं, यः कामान् न निवारयति ? कारणमाह-श्रामण्यस्याऽकरणे पदे पदे स्थाने स्थाने विषीदन् विषादं प्राप्नुवन् संकल्पस्य वशं गतः, ।।२.१।।

**(सु.)** व्याख्यातं द्रुमपुष्पिकाध्ययनम्, अधुना श्रामण्यपूर्विकाख्यमारभ्यते, अस्यैवमभिसम्बन्धः इहानन्तराध्ययने धर्मप्रशंसोक्ता, सा चेहैव जिनशासन इति, इह तु तदभ्युपगमे सति मा भूदभिनवप्रव्रजितस्याधृतेः संमोह इत्यतो धृतिमता

---

१. पश्चादध्ययने ६ टि. ।। २. चारित्रे ६ टि. ।। ३. चारित्रे शिथीलीभवन् ०भवेत् ६.।। ४. कुत्सितचारित्रकृत् ६ टि. ५. अन्यत्र द्रष्टव्यो ।।

भवितव्यमित्येतदुच्यते, अनेन सम्बन्धेनायातमिदमत्राध्ययनम्—'कहण्णु' इति कथं नु कुर्यात् श्रामण्यं-श्रमणभावं यः कामान् न निवारयति, 'कथं' केन प्रकारेण, नुः क्षेपे, यथा कथं नु स राजा ? यो न रक्षति प्रजां, कथं नु स वैयाकरणो योऽपशब्दं प्रयुङ्क्ते ?, एवं कथं नु कुर्यात् श्रामण्यं-श्रमणभावं यः कामान् न निवारयति ?, कारणमाह-'पदे पदे विषीदन् सङ्कल्पस्य वशङ्गतः' कामानिवारणेन्द्रियाद्य-पराधपदापेक्षया पदे पदे विषीदनात् सङ्कल्पस्य वशं गतत्वाद्, अप्रशस्ताध्यवसायः सङ्कल्प इति सूत्रसमासार्थ इति ।।२.१।।

**वत्थगंधमलंकारं, इत्थीओ सयणाणि य ।**
**अच्छंदा जे न भुंजंति, न से चाइ त्ति वुच्चइ ।।२.२।।**

**(ति.)** किञ्च—वस्त्रं-चीनांशुकादि । गन्धः-कर्पूरकस्तूरिकादिः । [1]मकारोऽ-लाक्षणिकः । अलङ्कारः-कटककेयूरादिः । स्त्रियः-अनेकप्रकाराः । शयनानि-पल्यङ्कादीनि । चशब्दाद् [2]गब्दिकादीन्यासनानि । अच्छंद त्ति अच्छन्दान्-अनात्मवशान्, अविद्यमानान् ये न भुञ्जन्ते-आजीविकामात्रनिमित्तं गृहीतव्रताः । भोक्तुकामाः अप्यसम्पत्तितो नासेवन्ते। 'न से चाइ' त्ति वुच्चइ । प्राकृतत्वाद् बहुवचनस्थाने एकवचनम् । ततो न ते त्यागिनो, न ते श्रमणा उच्यन्ते । ये च सतो पि भोगान् भोगान्तरायवशादौषधादिभिः [3]प्रतिहतवीर्याः, यदि भुञ्जते ततो म्रियन्ते, अतो जीवितार्थिनो भोक्तुमनसोऽपि सन्तो न भुञ्जते । साधुसामा[4]चार्या अवतिष्ठन्ते । [5]नन्दामात्यसुबन्धुवत्, न ते त्यागिनः श्रमणा उच्यन्ते। कः पुनः सुबन्धुरिति ।

**(स.)** न केवलमयमधिकृत्यसूत्रोक्तो यथोक्तश्रामण्याभावेनाश्रमणः, किन्तु आजीविकादिभावेन प्रव्रजितः सङ्क्लिष्टचित्तो द्रव्यक्रियां कुर्वन्नप्यश्रमण एव. अयोग्य एव कथं ? यत आह-वच्छे(त्थे)ति-वस्त्राणि चीनांशुकादीनि, गन्धाः कोष्ट(ष्ठ)पुटादयः, अलङ्काराः कटकादयः, अनुस्वारोऽलाक्षणिकः, स्त्रियोऽनेकप्रकाराः, शयनानि पर्यङ्कादीनि, चशब्दादासनादीनि. एतानि वस्त्रादीनि किम् ? **अच्छंदा** अस्ववशा ये केचन न भुञ्जते नासेवन्ते, न स त्यागीत्युच्यते, न स श्रमण इति. (अत्र सूत्रगतेर्विचित्रत्वाद् बहुवचनेऽप्येकवचननिर्देशः.) ।।२.२।।

---

१. अनुस्वारोऽलाक्षणिक इति हारि. ।। २. गिदीका = गादी ५.६.८-१० ।। ३. दूरीकृतप्रभावाः ६ टि. ।। ४. चार्यां ५-११ ।। ५. कः पुनः सुबन्धुः ? इति, तत्कथानकमुच्यते, [अन्यत्र द्रष्टव्यम्] ।।

(सु.) न केवलमयमधिकृतसूत्रोक्त एव श्रामण्याकरणाद् अश्रमणः, किन्त्वा-जीविकादिभयप्रव्रजितः सङ्क्लिष्टचित्तो द्रव्यक्रियां कुर्वन्नप्यश्रमण एव-अयोग्य एव, कथं ?, यत आह सूत्रकारः—'वत्थगंधमलंकारं' इति वस्त्रगन्धमलङ्काराणि, तत्र वस्त्राणि-चीनांशुकादीनि, गन्धाः-कोष्ठपुटादयः, अलङ्काराः-कटकादयः, अनुस्वारोऽलाक्षणिकः, स्त्रियोऽनेक-प्रकाराः, शयनानि-पर्यङ्कादीनि, चशब्दादासनादिपरिग्रहः, एतानि वस्त्रादीनि किं? 'अच्छन्दाः'-अस्ववशा ये केचन 'न भुञ्जते' न सेवन्ते, किं बहुवचनोद्देशेऽप्येकवचननिर्देशः?, विचित्रत्वात् सूत्रगतेर्विपर्ययश्च भवत्येवेतिकृत्वा आह-नासौ त्यागीत्युच्यते, सुबन्धुवत् (दश० चू०) नासौ श्रमण इति ।।२.२।।

**जे हुं कंते पिए भोए, लद्धे वि [१]प्पिट्ठि कुव्वइ ।**
**साहीणे चयइ भोए, से हु चाइ त्ति वुच्चई ।।२.३।।**

(ति.) यस्तु त्यागी श्रमणो भवति तमाह—हुरे[२]वकारार्थे । यः-साधुः, एव कान्तान्-कमनीयान् । प्रियान्-इष्टान् । भोगान्-शब्दादिविषयान् लब्धान् । विविधैः-नानाप्रकारैः शुभभावनादिभिः । [३]पृष्ठतः क[४]रोति-पश्चात् पातयति । स्वाधीनान्-स्वायत्तान् भोगान् । अत्र पुनर्भोगग्रहणं सम्पूर्णग्रहणार्थम् । सम्पूर्णानपि भोगान् त्यजति । स एव त्यागी-श्रमण उच्यते । भरतेश्वर-धन्य-शालिभद्र-जम्बूस्वाम्यादिवत् ।

अत्राह परः-ये केचिदर्थहीना [५]द्रमकादयः, परिव्रज्य भावतोऽहिंसादिगुणयुक्ते श्रामण्येऽभ्युद्यता भवन्ति । ते किं न परित्यागिनः?

आचार्य आह । अत्र सकललोकसाराणि त्रीणि रत्नानि-अग्नि-रुदकं स्त्री च, एतानि च प्रत्येकं कोटिरत्नमूल्यानि । द्रमकोऽपि च तानि परित्यज्य[६] भावतो ज्ञानदर्शनचारित्राणि प्रतिपद्यमानस्त्यागी भणनीय एव[७] ।।२.३।।

(स.) यथा च श्रमणो भवति तथा कथयितुमाह—जे इति-य एव कान्तान् शोभनान् प्रियान् इष्टान् भोगान् शब्दादिविषयान् लब्धान् सतः, 'विपिट्ठि कुव्वइ त्ति' कोऽर्थः ? विविधमनेकप्रकारैः शुभभावनादिभिः पृष्ठतः करोति परित्यजति, न बन्धनेन बद्धः प्रोषितो वा, किन्तु स्वाधीनः, न परायत्तः, स्वाधीनानेव परित्यजति

१. प्पट्ठी ८ ।। २. ०रविकारार्थो ९ ।। ३. पृथून् ८ ।। ४. दूरीकरोति ८ टि. ।। ५. प्रथमरङ्कादयः ८ टि. ।। ६. ०ज्य च भा. ५-९ ।। ७. अत्र दृष्टान्तः [अन्यत्र द्रष्टव्यः]

भोगान्. ततश्च य ईदृशः, हुशब्दोऽवधारणार्थे, स एव त्यागीत्युच्यते, भरतादिवत्. ।।२.३।।

(सु.) यथा चोच्यते, तथाभिधातुकाम आह—'जे य कंते पिए' इति-य एव कान्तान्-कमनीयान् शोभनानित्यर्थः, प्रियान्-इष्टान्, भोगान्-शब्दादिविषयान्, लब्धान्-प्राप्तान्, उपनतानितियावत्, 'विपिट्ठिकुव्वइ'त्ति विविधं-अनेकैः प्रकारैः शुभभावनादिभिः पृष्ठतः करोति, परित्यजतीत्यर्थः, स च न बन्धेन बद्धः प्रोषितो वा, किन्तु स्वाधीनं(नः)-अपरायत्तः, स्वाधीनानेव परित्यजति भोगान् पुनस्त्यागग्रहणं प्रतिसमयं त्यागपरिणाम-वृद्धिसंसूचनार्थं, भोगग्रहणं तु सम्पूर्णभोगग्रहणार्थं त्यक्तोपनतभोगसंसूचनार्थं वा, ततश्च ईदृशः, हुशब्दस्यावधारणार्थत्वात्, स एव त्यागीत्युच्यते, भरतादिवद्, इति ।।८।।

**समाए[1] पेहाए[1] परिव्वयंतो, सिआ मणो निस्सरई बहिद्धा ।**
**न सा महं[2] नो वि अहं पि तीसे, इच्चेव ताओ विणइज्ज रागं ।।२.४।।**

(ति.) अथ विद्यमानभोगत्यागिनः इतरस्यापि च स्खलतः शिक्षामाह—समया प्रेक्षया-आत्मपरतुल्यया दृष्ट्या । परिव्वयंतो-अत्र प्राकृतत्वात् षष्ठीस्थाने प्रथमा, परिव्रजतः संयममार्गे सञ्चरतः, स्यात् कदाचित् कर्मवशात् भुक्तभोगस्य पूर्वक्रीडितस्मरणात्, इतरस्य तु कुतूहलादिना संयमगृहात् बहिद्धा-बहिस्तात् । कामकाम्यया मनो निःसरति-ततो यां प्रति रागः सञ्जातो भवति, तां प्रति चिन्तनीयम् । न सा मम, अहमपि न तस्याः । स्वस्वकर्मवशात् संसारे संसरतां जन्मिनां कः कस्य सक्तः ? इत्येवं तस्याः सकाशात् रागं विनयेत्[3] ।।२.४।।

(स.) समाइ' त्ति-समया आत्मपरतुल्यया प्रेक्षया दृष्ट्या परिव्रजतः, परि समन्ताद् व्रजतो गच्छतः, गुरोरुपदेश[4]दानेन संयमयोगेषु वर्तमानस्य, एवंविधस्य त्यागिनोऽपि स्यात् कदाचिदचिन्त्यत्वात् कर्मगतेर्मनोऽन्तःकरणं निस्सरति बहिर्धावति, केन ? भुक्तभोगिनः पूर्वक्रीडितस्मरणादिना, अभुक्तभोगिनश्च कुतूहलादिना, बहिर्धा संयमगेहाद् बहिरित्यर्थः, तदा सोऽशुभोऽध्यवसायः, प्रशस्ताध्यवसायेन स्थगनीयः, केनालम्बनेन

१. ०य, अन्यत्र मुद्रिते २. ०ह।। ३. अत्रोदाहरणम्-[अन्यत्र द्रष्टव्यम्] ४. लोभेनेति भावः

इति ?-आह-यस्यां राग उत्पन्नस्तां प्रति चिन्तनीयं-'न सा मम मदीया, नाप्यहं तस्याः, **पृथक्कर्मभुजो हि प्राणिन**' इत्येवं, ततस्तस्याः सकाशाद्व्यपनयेद् रागं, **तत्त्वदर्शिनो हि संनिवर्तन्त एव** ।।२.४।।

**(सु.)** 'समाइ पेहाइ' इति, तस्यैवं त्यागिनः समया-आत्मपरतुल्यतया प्रेक्षते अनयेति प्रेक्षा-दृष्टिस्तया प्रेक्षया-दृष्ट्या परि-समन्तात् व्रजतो-गुरूपदेशादिना संयमयोगेषु वर्तमानस्येत्यर्थः, स्यात्-कदाचिदचिन्त्यत्वात् कर्मगतेर्मनो निःसरति बहिर्धा भुक्तभोगिनः पूर्व्वक्रीडितस्मरणादिना, अभुक्तभोगिनश्च कुतूहलादिना, मनः-अन्तःकरणं निस्सरति-निर्ग्गच्छति बहिर्धा-संयमयोगाद् बहिरित्यर्थः, तदा प्रशस्ताध्यवसायेनासौ अशुभसङ्कल्पः परिस्थगनीयः, केनालम्बनेनेति ? यस्यां रागः सम्पन्नस्तां प्रति चिन्तनीयं—'न सा मम, नाप्यहं तस्याः, **पृथक्कर्म्मफलभुजो हि प्राणिन**' इति, एवं ततस्तस्याः सकाशाद् व्यपनयेत रागं, **तत्त्वदर्शिनो हि स निवर्तत** एवेति ।। अत्रोदाहरणं (दृ० १) —

यथैको वणिक्पुत्रः सञ्जातपरमवैराग्यो, विचिन्त्य संसारासारतां, नवे वयसि वर्तमानो, विहाय यौवनश्रिया समलङ्कृतां स्त्रियं प्रव्रज्यामग्रहीत् । स च कैश्चिद्वासरैः समतिक्रान्तैः विधिना विहितसूत्रप्रणिधान इदं सूत्रमुद्घोषयामास-"न सा महं नोऽवि अहं पि तीसे" तेन च पठता समचिन्ति-यथा सा मम अहमपि तस्याः, यतोऽसावत्यन्तं ममानुरक्ता, ततः कथमहं तां प्राणात्ययेऽपि परित्यजामीति सम्प्रधार्य चेतसि, गुरूणां किंवदतीमात्मीयामनिवेद्य गृहीतपात्राद्युपकरण एव गतस्तं ग्रामं यत्रासावास्ते, प्राप्तस्य तं ग्रामं जलानयनाय बहिर्ग्रामवाप्यामत्रान्तरे तस्यासौ प्रियतमा समायाता, विलोकितोऽसौ तया, तत्र दृष्टमात्रः प्रत्यभिज्ञातः, न च तेन सा प्रत्यभिज्ञाता, कृते च वन्दने परिपृष्टाऽसौ, यथा-भद्रे ! जानासि त्वममुकस्य वणिजः सुतां, सा च तस्मिन् प्रव्रजिते समाकर्णितधर्म्मा सञ्जातपरमवैराग्या संयोगानां दुःखबहुलतां परिकल्पयन्ती प्रव्रजितुकामा परिचिन्तितवती-यादृशान्यस्य चिह्नानि समवलोक्यन्ते तादृशो विषयोन्मुखमस्य चेतः समभिलक्ष्यते, ततश्च विषयासक्तयोरावयोरवश्यं भविष्यति दुर्गतिपातः, तदयमात्मा च, ततो मया परिरक्षणीय इति सम्प्रधार्य तं प्रति जगाद-भो साधो ! सा मातापितृभिरन्यस्मै दत्ता, तत् श्रुत्वाऽसौ समचिन्तयत्, यथा-सत्यमहं भगवद्भिः साधुभिः पाठितो-"न सा महं नोऽवि अहंपि तीसे," इति परिभावयन् परमसंवेगं गतः, तां जगाद-भद्रे ! तस्याः कारणेन जन्मान्तरकोटिभिरपि दुरापं भगवतामाचार्याणां पादपद्मं विहाय

विषयाभिलाषी समागतोऽहं तत्पार्श्वे, दुष्टं चेष्टितमत इतः स्थानादेव व्रजाम्यहं गुरूणामन्तिके, ततः सा तं प्रत्यवादीत्-मुने ! शोभनमुक्तवानसि, यतः असारा विषयाभिलाषाः, करिकलभश्रवणमिव चञ्चलमायुः, प्रतिक्षणध्वंसी देहः, अकृतधर्म्माणां ध्रुवो नरकपात इत्यादि तमनुशिष्य, कथयित्वा चात्मानं, सञ्जातवैराग्यं तं प्रेषयामास गुरूणामन्तिके, स्थिरीभूतश्च कृतवान् प्रव्रज्यां, एवमात्मा सन्धारणीयो यथा तेनेति ।।२.४।।

**आयावयाहि, चय सोगमल्लं, कामे कमाहिं[१] कमिअं खु दुक्खं ।**
**छिंदाहिं[२] दोसं विणइज्ज रागं, एवं सुही होहिसि संपराए ।।२.५।।**

(**ति.**) किञ्च—मनसो बहिरनिर्गमार्थं आतापय-आतपे कायोत्सर्गं कुरु । न्यूनोदरतादितपसा वा आतापनां कुरु, त्यज सौकुमार्यम् । कामान्-शब्दादिविषयान् । क्राम[३]-उल्लङ्घय। तैः क्रान्तैरुल्लङ्घितैः [४]क्रान्तमेव-निवर्त्तितमेव विषयाप्राप्तिजनितं दुःखं, छिन्द्धि द्वेषं-[५]विरूपशब्दादिषु । विनयेथाः रागं-प्रियङ्करशब्दादिकामविषय । एवं रागद्वेषादि-विजयात् सुखी भविष्यसि[६] । सम्पराये-संसारेऽपि [७]सन् अथवा सम्पराये-परीषहोपसर्गसङ्ग्रामे । एते गुरोः शिष्यं प्रत्युपदेशाः ।।२.५।।

(**स.**) एवं तावदान्तरो मनोनिग्रहाविधिरुक्तः, न चायं विधिर्बाह्यमंतरेण कर्तुं शक्यते, अतो बाह्यविधिविधानार्थमाह—आयावयाहीति-'आयावयाही' त्वं संयमगृहान्मनसोऽनिर्गमनार्थमातापय? आतापनां कुरु ? उपलक्षणत्वाद्यथानुरूप-मूनोदरिकादितपोऽपि कुरु ? तथा त्यज सौकुमार्यं सुकुमारत्वं परित्यज ? यतः सुकुमारत्वात् कामेच्छा प्रवर्तते, योषितां च प्रार्थनीयो भवति, एवमुभयाऽसेवनेन कामान् क्राम उल्लङ्घय ? यतस्तैः कामैः क्रान्तैर्दुःखं क्रान्तमेव भवति, **अत्र वणिज उदाहरणं ज्ञेयं वृत्तितः**, अथान्तरकामक्रमणविधिमाह-छिन्धि द्वेषं ? व्यपनय रागं ? सम्यग्ज्ञानबलेन विपाकालोचनादिना, एवं कृते फलमाह-एवमनेन प्रकारेण प्रवर्तमानः सन् सुखी भविष्यसि, क्व ? संपराये संसारे यावन्मोक्षं न प्राप्स्यसि तावत्सुखी भविष्यसि ।।२.५।।

(**सु.**) एवं तावदान्तरो मनोनिग्रहविधिरुक्तो, न चायं बाह्यमन्तरेण कर्तुं शक्यते,

---

१. ०हि ७.१२, ही ८-१० ।। २. ०हि ५-१२ ।। ३. क्रम २, क्रामय ६-१० ।। ४. उल्लङ्घितमेव विषयजं दुःखम् ८ टि. ।। ५. विनयस्व ५-१० ।। ६. ०ति १.४ ।। ७. च ८ ।।

अतस्तद्विधानार्थमाह—'आयावयाही'ति संयमगेहान्मनसोऽनिर्गमार्थमातापय-आतापनां कुरु, एकग्रहणे तज्जातीयग्रहणमिति न्यायात् यथानुरूपमूनोदरतादेरपि विधिः, अनेनात्मसमुत्थ-दोषपरिहारमाह-तथा त्यज सौकुमार्यं-परित्यज सुकुमारत्वं, अनेन तूभयसमुत्थदोष-परिहारमाह, तथाहि-सौकुमार्यात् कामेच्छा प्रवर्तते योषितां च प्रार्थनीयो भवति, एवमुभयासेवनेन कामान् क्रम-उल्लङ्घय, यतस्तैः क्रान्तैः क्रान्तमेव दुःखं भवतीति शेषः, खुशब्दोऽवधारणे, कामनिबन्धनत्वाद् दुःखस्य, अधुना अनन्तरं कामक्रमणविधिमाह-छिन्धि द्वेषं-व्यपनय रागं सम्यग्ज्ञानबलेन विपाकालोचनादिना, एवं कृते फलमाह-एवं-अनेन प्रकारेण वर्तमानः किं-'सुखमस्यास्तीति सुखी भविष्यसि, क्व ?, संपराये-संसारे यावदपवर्गं न प्राप्स्यसि तावत् सुखी भविष्यसि, संपराये-परीषहोपसर्गसङ्ग्राम इत्यन्यः ।।२.५।।

**पक्खंदे जलियं जोइं, धूमकेउं[1] दुरासयं ।**
**निच्छंति वंतयं भुत्तुं[2] कुले जाया अगन्धणे ।।२.६।।**

**(ति.)** किञ्च मनसः संयमगृहाद् बहिरनिर्गमार्थं पुनरिदं विचिन्तयेत्—प्रस्कन्दन्ति-आक्रा[3]मन्ति[4] । ज्वलितं ज्योतिषं-[5]वह्निम् । धूमकेतुं-धूमचिह्नम् । [6]दुरासदं दुराक्रमं। नेच्छन्ति वान्तं भोक्तुं [7]कुले जाता अगन्धने । इह सर्पा द्विधा गन्धना अगन्धनाश्च । तत्र ये गन्धनास्ते स्वयं दष्टस्यापि प्रकृष्टमान्त्रिकेणाऽऽकृ[8]ष्यादिष्टास्तत्[9] स्ववान्तमपि विषमापिबन्ति । अगन्धनास्तु वरं म्रियन्ते, न पुनः स्ववान्तविषमापिबन्ति अयं च राजीमत्याः स्वामिनि श्रीनेमिनाथे गृहीतव्रते स्वस्मिन्ननुरागमावहन्तं रथनेमिं प्रत्युपदेशः[10] ।

**(स.)** संयमगृहान्मनस एवाऽनिगमार्थमिदं विचिन्तयेत्—'पक्खंद' इति-प्रस्कन्दन्ति आश्रयन्ति, कं ? ज्योतिषमग्निं, किंविशिष्टं ज्योतिषं ? ज्वलितं ज्वालामालाकुलं, न तु मुर्मुरादिरूपं, पुनः किंविशिष्टं ज्योतिषं ? धूमकेतुं, धूमचिह्नं धूमध्वजम्, न उल्कादिरूपं, पुनः किंविशिष्टं ज्योतिषं ? दुरासदं दुरभिभवं, चशब्दलोपान्न च इच्छन्ति वान्तं भोक्तुं परित्यक्तं विषमिति शेषः, के ? नागा इति शेषः, **ते** किंविशिष्टा नागाः ? कुले जाताः समुत्पन्नाः, किंभूते कुले ? अगन्धने, नागा द्वेधाः गन्धना

१. ०उ १ ।। २. ०त्तं ७-९ ।। ३. ०क्र. ८ ।। ४. ०न्ति प्रविशन्ति ज्व. १२ ।। ५. अग्निः १२ ।। ६. दुरासयं दुरश्रयं दुराकलनीयं १२ ।। ७. अग्न्धने कुले जाता सर्पा वान्तं विषं भोक्तुं नेच्छन्ति, तत्र गन्धनाः मान्त्रिकादिष्टाः स्वयं दृष्टस्यापि वान्तमपि विषमापिबन्ति । श्रीनेमिनाथे गृहीतव्रते रथनेमिनं प्रति राजीमत्या उपदेशः-पक्खंदे...० १२ ।। ८. कृष्टादिष्टास्तत् २ ।। ९. ०त्र ८ ।। १०. तदत्र प्रस्तावादायातं श्रीनेमिनाथचरितं मूलतः प्ररूप्यते, [चरितं तु अन्यत्र द्रष्टव्यम्]

अगन्धनाश्च. तत्र ये गन्धनास्ते-डसिए मंतेहिं आकड्ढिआ, तं मुहओ आपिअंति. अगंधणा पुण अवि मरणमज्झवस्संति, न य वंतं आपिअंति. उपसंहारस्तु-यदि तावत् तिर्यञ्चोऽप्यभिमानाज्जीवितं परित्यजन्ति, न च वान्तं भुञ्जते, तत्कथमहं जिनवचनाभिज्ञो विपाकदारुणान् विषयान् वान्तानपि भोक्ष्य इति. अत्रार्थे **रथनेमिदृष्टान्तस्तथाहि–** जया किल अरिट्ठनेमी पव्वइओ, तया रहनेमी तस्स जिट्ठभाओ **राईमइं** उवयरइ, जइ नाम एसा मम होइ, सा य भगवई निव्विन्नकामभोगा, नायं च तीए, जहा एसो मम अज्झोववण्णो, अण्णया य तीए. महुवयसंजुत्ता पेज्जा पीआ, रहनेमी आगओ, मयणफलं मुहे काऊण तीए वंतं भणियं च, पेज्जं पियाहि, तेण भणियं—कहं वंतं पिज्जइ. तीए भणिओ—जइ न पिज्जइ, तओ अहं पि अरिट्ठनेमिसामिणा वंता, कहं पिविउमिच्छसि. ।।२.६।।

(सु.) किंच—संयमगेहान्मनस एवानिर्गमार्थमिदं चिन्तयेत्—'पक्खंदे'इत्यादि, प्रस्कन्दन्ति-अध्यवस्यन्ति ज्वलितं-ज्वालामालाकुलं, न मुर्म्म(मुर्मु)रादिरूपं, कं ? ज्योतिषं-अग्निं धूमकेतुं-धूमध्वजं नोल्कादिरूपं, दुराशयं-दुःखेनासाद्यते-अभिभूयत इति दुरासदस्तं, दुरभिभवमित्यर्थः, चशब्दलोपात्, 'न चेच्छन्ति वान्तं भोक्तुं' परित्यक्तमत्तुं, विषमिति गम्यते, के ?, नागा इति गम्यते, एवं किंविशिष्टाः?, कुले जाताः-समुत्पन्ना अगन्धने, नागानां हि भेदद्वयं-गन्धना अगन्धनाश्च, तत्र गन्धना नाम—डसिए मंतेहिं आयड्ढिया तं विसं वणमुहाओ आवियन्ति, अगन्धणा उण अवि मरणमज्झवसन्ति न य वंतमावियंति, उपसंहारस्त्वेवं भावनीयः-यदि तावत् तिर्यञ्चोऽप्यभिमानमात्राद् अपि जीवितं परित्यजन्ति, न च वान्तं भुञ्जते, तत्कथमहं जिनवचनाभिज्ञो विपाकदारुणान् विषयान् वान्तानपि भोक्ष्य इति ।।

अस्मिन्नेवार्थे द्वितीयमुदाहरणं (दृ० २) –

जया किल अरिट्ठनेमी पव्वइओ, तया रहनेमी तस्स जेट्ठभाऊओ रायमइं उवयरइ, जइ नाम एसा ममं इच्छिज्जा, सावि भयवई निव्विन्नकामभोगा, नायं च तीए-जहा एसो मज्झं अज्झोववन्नो, अन्नया य तीए महुघयसंजुत्ता पेज्जा पीया, रहनेमी आगओ, मयणफलं मुहे काऊण तीए वंतं, भणियं च-एयं पेज्जं पियाहि, तेण भणियं-कहं वंतं पिज्जइ ? तीए भणियं-जइ न पिज्जइ, तओ अहंपि अरिट्ठनेमिसामिणा वंता कहं पिबिउमिच्छसि ?,

**धिरत्थु ते जसोकामी, जो तं जीवियकारणा ।**
**वंतं इच्छसि आवेउं, सेयं ते मरणं भवे ।।२.७।।**

(ति.) धिक्शब्दः कुत्सायां, धिक् ते-पौरुषं इति गम्यते । हे अयशःकामिन् ! यस्त्वं जीवितकारणात्-असंयमजीवितहेतोः । वान्तम् इच्छसि आपातुम्-वान्ताः-परित्यक्ताः भवता व्रतं गृह्णता भोगाः, ततस्तान् वान्तान् भोगानभिलषसि भोक्तुम् । अतोऽतिक्रान्तमर्यादस्य श्रेयः-शोभनतरम् । ते मरणम्-न पुनरिदमकार्याचरणम् ।।२.७।।

(स.) अथाधिकारापन्नमेवार्थमाह—**धिगत्थु** इति-तत्र राजिमती किल एवमुक्तवती रथनेमिं प्रति-धिगस्तु भवतु ते तव पराक्रममिति शेषः. हे यशःकामिन् ! कीर्तेरभिलाषिन् ! इति रोषेण क्षत्रियामन्त्रणम्. अथवा अकारप्रश्लेषात् हे अयशःकामिन् ! धिगस्तु भवतु तव, यस्त्वं जीवितकारणादसंयमजीवितहेतोर्वान्तमिच्छसि आपातुं भगवता परित्यक्तां भोक्तुमिच्छसि, अतः श्रेयस्ते तवातिक्रान्तमर्यादस्य मरणं भवेत्, शोभनतरं तव मरणं, न पुनरिदमकर्मासेवनं, — तओ धम्मो से कहिओ, संबुद्धो पव्वइओ अ, राइमई वि तं बोहिऊण पव्वइआ, अन्नया कयाइ सो रहनेमी बारवइओ भिक्खं गहिऊण सामिसगासं आगच्छंतो वास-वद्दलएण अब्भाहओ एगं गुहं पविट्ठो, राइमई वि सामिणो वंदणाए गया, वंदित्ता पडिस्सयमागच्छंती य अंतरा वरिसिएण तिन्ना अयाणंती तमेव गुहं अणुपविट्ठा जत्थ सो रहनेमी, दिट्ठा य तेण सोहणा एसा वत्थाणि अपसारिआणि, ताहे तीसे अंगपच्चंगाणि दिट्ठाणि, सो रहनेमी तीए अझोववन्नो दिट्ठो, अणाए अं(इं)गिआगारकुसलाए णाओ अ असोहणो भावो एअस्स. ।।२.७।।

(सु.) तथा ह्यधिकृतार्थसंवाद्येवाह—**'धिरत्थु'** इत्यादि, तत्र राजीमती किलैवमुक्तवती-'धिगस्तु' धिक्शब्दः कुत्सायां, अस्तु-भवतु ते-तव पौरुषस्येति गम्यते, हे यशःकामिन्-कीर्त्यभिलाषिन् !, सासूयं क्षत्रियामन्त्रणं, अथवा अकारप्रश्लेषात् **'अयशःकामिन् !**, धिगस्तु-भवतु तव, यस्त्वं 'जीवितकारणात्' असंयमजीवितहेतोर्वान्त-मिच्छस्यापातुं-परित्यक्तां भगवता-ऽभिलषसि भोक्तुमिति, अतः अतिक्रान्तमर्यादस्य 'श्रेयस्ते मरणं भवेत्' शोभनतरं तव मरणं, न पुनरिदं अकार्यासेवनमिति । — ततो धम्मो से कहिओ, सम्बुद्धो, पव्वइओ य, रायमई वि तं बोहिऊण पव्वइया, अन्नया कयाइ सो रहनेमी बारवईए भिक्खं हिंडिऊण सामिसगासमागच्छंतो वास-वद्दलएण अब्भाहओ एगं गुहं पविट्ठो, रायमई वि सामिणो वंदणयाए गया, वंदित्ता पडिस्सयमागच्छंतीए अंतरा

वरिसिएण तिन्ना अयाणंती तमेव गुहमणुपविट्ठा, वत्थाणि य पविसारियाणि, ताहे तीए अंगपच्चंगाणि दिट्ठाणि, सो रहनेमी तीए अज्झोववन्नो, दिट्ठो य णाए, इंगियागारकुसलाए णाओ असोहणो भावो एयस्स, ।।२.७।।

**अहं च भोयरायस्स[1], तं च सि अंधगवह्नि(ह्णि)णो ।**
**मा कुले गंधणा होमो, संजमं निहुओ चर ।।२.८।।**

**(ति.)** किं च आवयोर्यत् कुलं तदपि न चिन्तयसि ?—अहं च भोजराज्ञः-उग्रसेनस्य दुहिता । त्वं च भवसि अंधकवृष्णेः-समुद्रविजयस्य सुतः । अतो मा एकैकस्मिन् प्रधाने कुले सन्तौ आवां गन्धनौ [2]भूव-जघन्यसर्पकुलौ भवाव इत्यर्थः । ततः संयमं निभृतश्चर-साधुक्रियाकलापम् अव्याक्षिप्तः कुरु ।।२.८।।

**(स.)** ततः सा [राजिमती] तमिदमवादीत्-अहमिति-अहं च भोगराज्ञ उग्रसेनस्य तु पुत्रीति शेषः, त्वं चासि अन्धकवृष्णेः समुद्रविजयस्य पुत्र इति शेषः, अतः कारणान्मा एकैकप्रधानकुले आवां गन्धनौ भूव, अतः कारणात् संयमं सर्वदुःखनिवारणं क्रियाकलापं निभृतः सन्नव्याक्षिप्तः सन् चर कुर्वित्यर्थः. ।।२.८।।

**(सु.)** ततो सा तमिदमवोचत् – 'अहं चे'ति अहं च भोगराज्ञः-उग्रसेनस्य दुहितेति गम्यते, त्वं च असि-भवसि अंधकवृष्णेः-समुद्रविजयस्य, सुत इति गम्यते, अतो मा एकैकप्रधानकुले आवां गन्धनौ भूव, – जह न सप्पतुल्लाइं होमो'त्ति भणियं होइ', – अतः संयमं निभृतश्चर-[3]सर्वदुःखनिवारणं क्रियाकलापमव्याक्षिप्तः कुर्व्विति ।।२.८।।

**जइ तं काहिसि भावं, जा जा दच्छसि नारिओ[4] ।**
**वायविद्धु व्व[5] हढो, अट्ठियप्पा भविस्ससि ।।२.९।।**

**(ति.)** अपि च—यदि त्वं या या द्रक्ष्यसि । नारीः-रम्या रम्यतरा रम्यतमाश्च । तासु भावम्-कामसेवाभिप्रायं करिष्यसि । ततो वाताविद्ध इव हठः-वातप्रेरित इवाऽबद्धमूलो वनस्पतिविशेषः । अस्थितात्मा-संयमगुणैरप्रतिबद्धमूलः भविष्यसि । विषयवाञ्छा-वात्याप्रेरित इतश्चेतश्च संसारसागरे पर्यटिष्यसि ।

---

१. ०ग. ८ ।। २. भूवं ५, भूत्वा ९.१० ।। ३. चूर्णिः सव्वारतिनिवारणं, ४. ०उ ५-८ ।। ५. 'व्व' पाठः मुद्रितेषु ग्रन्थेषु ।।

**(स.)** जइ'इति-यदि त्वं करिष्यसि भावमभिप्रायं प्रार्थनारूपं, क्व ? या या द्रक्ष्यसि नारीः स्त्रियः तासु, एताः शोभनाः, एताश्च शोभनतराः, (सेव) इत्येवंभूतं भावं यदि करिष्यसि ततो वायाविद्ध इव वातप्रेरित इव हडोऽबद्धमूलो वनस्पतिविशेषः अस्थितात्मा भविष्यसि. कोऽर्थः ? सकलदुःखक्षयकारकेषु संयमगुणेष्वबद्धमूलत्वात् संसारसागरे प्रमादपवनप्रेरित इतश्चेतश्च पर्यटिष्यसि. ।।२.९।।

**(सु.)** किञ्च—'जइ त'मिति, यदि त्वं करिष्यसि भावं-अभिप्रायं प्रार्थनमित्यर्थः, क्व ? - या या द्रक्ष्यसि नारीः-स्त्रियः, तासु एताः शोभनाः शोभनतराः सेवामि[१]-कामयामीत्येवंभूतं भावं यदि करिष्यसि, ततो वायुनाऽऽविद्ध इव हतो-वातप्रेरित इवाबद्धमूलो वनस्पतिविशेषोऽस्थितात्मा भविष्यसि, सकलदुःखक्षयनिबन्धनेषु संयमगुणेष्वबद्धमूलत्वात् संसारसागरे प्रमादपवनप्रेरित इतश्चेतश्च पर्यटिष्यसि ।।२.९।।

**तीसे सो वयणं [१]सोच्चा, संजयाए सुभासियं,**
**अंकुसेण जहा नागो, धम्मे संपडिवाइओ ।।२.१०।।**

**(ति.)** तस्याः-राजीमत्याः । संयतायाः-प्रव्रजितायाः । स-रथनेमिः । वचनं सुभाषितम्-संवेगरङ्गकारणम् । श्रुत्वा-तेन वचनेन । धर्मे सम्प्रतिपादितः-स्थापितः। अङ्कुशेन यथा [२]नागो-हस्ती हस्तिपकेन अपवर्त्य समभूमौ स्थापितः ।।२.१०।।

**(स.) तीसे** इति-तस्या राजिमत्या असौ रथनेमिर्वचनं पूर्वोक्तं श्रुत्वा, किंविशिष्टाया राजिमत्याः ? संयताया गृहीतदीक्षायाः, किंविशिष्टं वचनं ? सुभाषितं संवेगजनकं, किंवत् ? अङ्कुशेन यथा नागो हस्ती, एवं धर्मे सम्प्रतिपादितो धर्मे स्थापित इत्यर्थः. ।।२.१०।।

**(सु.)** 'तीसे सो वयण'मिति तस्या-राजीमत्या असौ-रथनेमिर्वचनमनन्तरोदितं श्रुत्वा-आकर्ण्य किंविशिष्टायास्तस्याः ? संयतायाः-प्रव्रजिताया इत्यर्थः, किंविशिष्टं वचनं ?-सुभाषितं-संवेगनिबन्धनं, अङ्कुशेन यथा नागो-हस्ती एवं धर्म्मे सम्प्रतिपादितो-धर्म्मे स्थापित इत्यर्थः ।।२.१०।।

**एवं करिंति संबुद्धा, पंडिया पवियक्खणा ।**
**विणियट्टंति भोगेसु, जहा से पुरिसुत्तमु[३] त्ति बेमि ।।२.११।।**

१. सु. ६-१० ।। २. अत्र चेयं कथा [सा तु अन्यत्र द्रष्टव्या] ३. ०मो १० ।।

**(ति.)** तथा—एवं कुर्वन्ति । सम्बुद्धाः-ज्ञान(त)विषयस्वरूपाः । पण्डिताः-वान्तभोगाः सेवनदोषज्ञाः । प्रविचक्षणाः-अवद्यभीरवः । विनिवर्तन्ते भोगेभ्यः । यथा असौ पुरुषोत्तमः रथनेमिः । आह परः-कथमस्य पुरुषोत्तमत्वम् ?, यो हि प्रव्रजितोऽपि विषयानभिलषति। उच्यते-तथाभिलाषेऽप्यप्रवृत्तेः, कापुरुषस्तु अभिलषतानुरूपं चेष्टत एव । इति ब्रवीमि-तीर्थकृद्गणधरोपदेशेन, न स्वमत्या ।

**इति श्रीतिलकाचार्यविरचितायां टीकायां द्वितीयमध्ययनम्**

**(स.)** एवमिति-एवं कुर्वते कुर्वन्ति, के ? संबुद्धा बुद्धिमन्तः, अथवा सम्यग्दर्शन-सहितेन ज्ञानेन ज्ञातविषयस्वभावाः सम्यग्दृष्टय इत्यर्थः, पुनः किंविशिष्टाः ? पण्डिता वान्तभोगासेवनदोषज्ञाः, पुनः किंविशिष्टाः ? प्रविचक्षणाः पापभीरवः, किं कुर्वन्ति ते इत्याह-निवर्तन्ते दूरीभवन्ति, केभ्यः ? भोगेभ्यो विषयेभ्यः, क इव ? यथासौ पुरुषोत्तमो रथनेमिः, शिष्य आह-ननु कथं तस्य पुरुषोत्तमत्वं ? यो हि गृहीतदीक्षोऽपि विषयाभिलाषी जातः ?

उच्यते-तथाविधेऽभिलाषे जातेऽपि नासौ प्रवृत्तः, कापुरुषस्तु तदनुरूपं चेष्टत एवेति. इति पूर्वोक्तप्रकारेण ब्रवीमि, न स्वबुद्ध्या, किन्तु तीर्थकरगणधराणामुपदेशेन. ।।२.११।।

**।। इति श्रीदशवैकालिकशब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां द्वितीय-मध्ययनं समाप्तम् । व्याख्यातं श्रामण्यपूर्वकाख्यं द्वितीयमध्ययनम् ।।**

**(सु.)** 'एवं करंति'इति एवं कुर्वते संबुद्धाः-बुद्धिमन्तो बुद्धाः, सम्यग्दर्शनसाहचर्येण दर्शनैकीभावेन वा बुद्धाः संबुद्धा-विदितविषयस्वभावाः, सम्यग्दृष्टय इत्यर्थः, त एव विशेष्यन्ते पण्डिताः प्रविचक्षणाः, तत्र पण्डिताः प्रविवक्षया सूत्रपण्डिताः सम्यग्ज्ञानवन्तः प्रविचक्षणाश्चरणपरिणामवन्तः, अन्ये तु व्याचक्षते-संबुद्धाः सामान्येन बुद्धिमन्तः पण्डिता-वान्तभोगासेवनदोषज्ञाः, प्रविचक्षणा-अवद्यभीरवः, किं कुर्वन्ति ?-विनिवर्तन्ते भोगेभ्यो विविधं-अनेकैः प्रकारैरनादिभवाभ्यासबलेन कदर्थ्यमाना अपि मोहोदयेन निवर्त्तन्ते भोगेभ्यो-विषयेभ्यो, यथा क इत्यत्राह-यथा असौ पुरुषोत्तमो रथनेमिः । आह-कथं तस्य पुरुषोत्तमत्वं ? यो हि प्रव्रजितोऽपि विषयाभिलाषीति ?, उच्यते, तथाऽभिलाषेऽप्यप्रवृत्तेः, कापुरुषस्त्वभिलाषानुरूपं चेष्टत एवेति । अपरस्त्वाह-दशवैकालिकं नियतश्रुतमेव, यत उक्तं-

"नायज्झयणाहरणा इसिभासियमो पइन्नगसुया य ।

एए होंति अनियया निययं पुण सेसमुस्सण्णं ।।१।।"

तत् कथमभिनवोत्पन्नमिद-मुदाहरणं युज्यत इति ?, उच्यते, एवंभूतार्थस्यैव नियतश्रुतभावाद् उस्सन्नग्रहणाच्चादोषः, प्रायो नियतं, न तु सर्वथा नियतमेवेत्यर्थः । ब्रवीमीति न स्वमनीषिकया, किन्तु तीर्थकरगणधरोपदेशेनेति ।।

**।। दशवैकालिकश्रुतस्कंधे [सुमति. वृत्तौ] द्वितीयमध्ययनं टिप्पितमिति ।।**

## ।। तृतीयं अध्ययनं क्षुल्लिकाचारकथा ।।

**संजमे सुट्ठियप्पाणं, विप्पमुक्काण ताइणं ।**
**तेसिमेयमणाइन्नं, निग्गंथाण महेसिणं ।।३.१।।**

**(ति.)** इहानन्तराध्ययने श्रामण्यमुक्तं श्रमणेन च विशुद्धे आचारे धृतिः कार्या इत्यनेन सम्बन्धेनायातं क्षुल्लिकाचारकथाध्ययनं तृतीयं व्याख्यायते । तच्चेदम् — संयमे-सप्तदशभेदे चारित्रे । ते चामी-पञ्चाश्रवाद् विरमणं, पञ्चेन्द्रियनिग्रहः, कषायजयः, दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः । अथ चैवं संयमः सप्तदशधा।

पुढवि-दग-अगणि-मारुय-वणसइ-बि-ति-चउ-पणिंदि-अज्जीवे ।
पेहुप्पेह-पमज्जण-परिठवण-मणो-वइ-काए ।।१।। [ ]

सुस्थित आगमनीत्या व्यवस्थित आत्मा येषां ते सुस्थितात्मानः । अत्र सूत्रे प्रथमार्थे षष्ठी । "यत्तदोर्नित्याभिसम्बन्धात्" ये संयमे सुस्थितात्मानः विविधैः सांसारिकैर्भावैः प्रकर्षेण मुक्तास्त्यक्ताः विप्रमुक्ताः । तायिनः-तायृङ् पालने [सि० धा० ८०६] षड्जीवनिकायरक्षकाः । तेषां महर्षीणाम् निर्ग्रन्थानाम्-बाह्येन वसत्यादिना, आन्तरेण च क्रोधादिना, ग्रन्थेन परिग्रहेण रहितानाम् । एतद् वक्ष्यमाणमनाचीर्णं चॄ धातुरार्षः, अनाचरितम् अकल्प्यमित्यर्थः ।।३.१।।

**(स.)** व्याख्यातं श्रामण्यपूर्विकाख्यं द्वितीयमध्ययनम् । क्षुल्लकाचारकथाख्यमथ तृतीयमध्ययनमारभ्यते — अस्य चायमभिसम्बन्धः-द्वितीयाध्ययने इत्युक्तं—नवदीक्षितेन संयमे-ऽधृतावुत्पन्नायामपि धृतिमता भाव्यम्. अत्र तु सा धृतिराचारे कार्या, न त्वनाचारे, अयमेवात्मसंयमोपायः. उक्तं च-

"तस्यात्मा संयतो यो हि सदाचारे रतः सदा ।
स एव धृतिमान् धर्म-स्तस्यैव हि जिनोदितः [ ] ।।१।।"

इत्यनेन सम्बन्धेनायातमिदमध्ययनं व्याख्यायते-तत्र सूत्रम्-संयमे इति संयमे सुस्थितः शोभनप्रकारेण सिद्धान्तरीत्या स्थित आत्मा येषां तेषां, किंविशिष्टानां ?

विप्रमुक्तानां विविधमनेकप्रकारैः प्रकर्षेण संसारान्मुक्तानां, पुनः किंविशिष्टानां ? तायिनां, त्रायन्ते आत्मानं परमुभयं च ये ते त्रातारस्तेषाम्, — आत्मानं प्रत्येकबुद्धाः, परं तीर्थकराः, उभयं स्थविराः, — तेषामिदं वक्ष्यमाणलक्षणमनाचीर्णमनाचरितमकल्पं, केषाम् इति ?-आत्याह-निर्ग्रन्थानां साधूनां, किंविशिष्टानां ? महर्षीणां महतां यतीनाम् ।।३.१।।

(सु.) व्याख्यातं श्रामण्यपूर्विकाख्यमध्ययनं, इदानीं क्षुल्लिकाचारकथाख्यात-मारभ्यते,—अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने धर्माभ्युपगमे सति, मा भूदभिनवप्रव्रजितस्याधृतेः संमोह इत्यतो धृतिमता भवितव्यमित्युक्तं, इह तु सा धृतिराचारे कार्या, न त्वनाचारे, अयमेवात्मसंयमोपाय इत्येतदुच्यते, उक्तं च-

"तस्यात्मा संयतो यो हि, सदाचारे रतः सदा ।

स एव धृतिमान् धर्मस्तस्यैव हि जिनोदितः [ ] ।।१।।"

इत्यनेन सम्बन्धेनायातमिति-

'संयमे'-उक्तस्वरूपे, शोभनेन प्रकारेणागमनीत्या स्थित आत्मा येषां ते [सुस्थितात्मानः] तथा तेषां, त एव विशेष्यन्ते-विविधैः अनेकैः प्रकारैः प्रकर्षेण-भावसारं 'मुक्ता'स्तेषां, त एव विशेष्यन्ते-रक्षन्ति आत्मानं परं उभयं चेति त्रातारः,— आत्मानं प्रत्येकबुद्धाः, परं तीर्थकराः स्वतीर्णत्वात्, उभयं स्थविरा इति, तेषामिदं वक्ष्यमाणलक्षणम् अनाचरितं अकल्प्यं केषाम् इति ?-आह-'निर्ग्रंथानां'-साधूनामिति, अभिधानमेतत्, महान्तश्च ते ऋषयश्च महर्षयो-यतय इत्यर्थः, तेषां इह च 'पूर्वपूर्वभाव एवोत्तरोत्तरभावो नियमतो हेतुहेतुमद्भावेन वेदितव्यो', यत एव संयमे सुस्थितात्मानोऽत एव विप्रमुक्ताः, संयमसुस्थितात्मत्वनिबन्धनत्वाद् विप्रमुक्तेः, एवं शेषेष्वपि भावनीयं, अन्ये तु पश्चानुपूर्व्या हेतुहेतुमद्भावं वर्णयन्ति, यत एव महर्षयः, अत एव निर्ग्रन्थाः, एवं शेषेष्वपि भावनीयमिति सूत्रार्थः ।।३.१।।

**उद्देसियं कीयगडं, नियागमभिहडाणि[1] य ।**
**राय[2]भत्ते सिणाणे य, गंध-मल्ले य[3] वीयणे ।।३.२।।**

---

१. ०आ. ८ ।। २. ०इ. १.३.४ ।। ३. अ वीअणे ८ ।।

(**ति.**) किं तद् अनाचीर्णम् इति ? - आह — उद्देशनं साध्वाद्याश्रित्य दानारम्भस्येत्युद्देशः, तत्रोद्देशे भवमौद्देशिकम्-द्वितीयोद्गम-दोषः । अथवा, उद्देशेन साधुसङ्कल्पेन यत् पचनादिनिर्वृत्तं तदौद्देशिकम्-आधाकर्मिकम[१]प्युच्यते । क्रयणं क्रीतं भावे क्तः, तेन क्रयणेन कृतम् । साध्वर्थं गृहीतं वस्त्रादि क्रीतकृतम् । नित्यं-नित्यपिण्डं, आमन्त्रितस्य साधोः नित्यं तावत्प्रमाण-पिण्डग्रहणम्। अभिहृतानि च-स्वग्रामादेः साध्वर्थमानीतानि, चः समुच्चये । रात्रिभक्तम्-नाम [1]दिवागृहीतं रात्रौ भुक्तं, [2]रात्रौ गृहीतं दिवा भुक्तं, [3]रात्रौ गृहीतं रात्रौ भुक्तं, [4]दिवा गृहीतं रात्रिं परिवास्य दिवा भुक्तमिति चतुर्विधम् । स्नानं-अपानशौचं विना मुखक्षालनाद्यपि देशतः स्नानं, सर्वतः स्नानं तु सर्वाङ्गक्षालनम् । गन्धः[२]-कर्पूरादिवासः। माल्यम्-पुष्पमालादि । वीजनम्-घर्मादौ तालवृन्तादिना । रायभत्ते इत्यादावेकारः "अत एत् सौ पुंसि मागध्याम्" [सि॰ सू॰ ८.४.२८७] इति वचनात् । दोषश्चौद्देशिकादिष्वारम्भप्रवर्तनादिः ।।३.२।।

(**स.**) सांप्रतं यत् पूर्वोक्तमनाचरितं, तदेव आह — उद्देसियमिति-साधुमुद्दिश्यारम्भेण भवमौद्देशिकं-क्रयणं साध्वादिनिमित्तं क्रीतं तेन कृतं निर्वर्तितं क्रीतकृतं. नियागमामंत्रितस्य पिण्डस्य ग्रहणं. अभिहडं स्वकीयग्रामादेः साधुनिमित्तमभिमुख-मानीतमभ्याहृतं, बहुवचनं स्वग्राम-परग्रामनिशीथादिभेदख्यापनार्थं. रात्रिभुक्तं रात्रिभोजनं, दिवसगृहीतं दिवसभुक्तं रात्रौ सन्निधिरक्षणेन, दिवसगृहीतं रात्रिभुक्तं, रात्रौ गृहीतं दिवसभुक्तं, रात्रौ गृहीतं रात्रौ भुक्तम्, इति भेदचतुष्टयलक्षणं, स्नानं देश-सर्वभेदभिन्नं, तत्र देशस्नानं शौचातिरेकेणाक्षिपक्ष्मप्रक्षालनमपि. सर्वस्नानं तु प्रतीतमेव. गन्धमाल्यं च गन्धग्रहणात् कोष्टपुटादिपरिग्रहः माल्यग्रहणाच्च ग्रथितवेष्टितादेर्माल्यस्य परिग्रहः. वीजनमुष्णकाले तालवृन्तादिना, इदमनाचरितं. दोषाश्चेहारम्भप्रवर्तनादयः स्वयं बुद्ध्या वाच्याः. ।।३.२।।

(**सु.**) साम्प्रतं यदनाचरितं तदाह — 'उद्देसिय'मिति उद्देशनं-साध्वाद्याश्रित्य दानारम्भस्येत्युद्देशः, उद्देशे भवमौद्देशिकं १, क्रयणं क्रीतं, साध्वादिनिमित्तमिति गम्यते, तेन कृतं-निर्वर्त्तितं 'क्रीतकृतं' २, नियागमित्यामन्त्रितस्य पिण्डस्य ग्रहणं नित्यं न त्वनामन्त्रितस्य ३, 'अभिहडाणि' इति स्वग्रामादेः साधुनिमित्तमभिमुखमानीतमभ्याहृतं, बहुवचनं स्वग्रामपरग्रामनिशीथादि-भेदख्यापनार्थं ४, 'रात्रिभक्तं'-रात्रिभोजनं दिवसगृहीत-

१. ०मित्यु. ६.८-१० ।। २. ०न्ध. १.२.१० ।।

दिवसभुक्तादिचतुर्भङ्गलक्षणं ५, 'स्नानं च'-देशसर्वभेदभिन्नं, देशस्नानमधिष्ठान-शौचातिरेकेणाक्षिपक्ष्मप्रक्षालनमपि, सर्वस्नानं तु प्रतीतं ६, तथा 'गन्ध-माल्य-वीजनं' च गन्धग्रहणात् कोष्ठपुटादिपरिग्रहः, माल्यग्रहणाच्च ग्रथितवेष्टिमादेर्माल्यस्य, वीजनं तालवृन्तादिना घर्मे ।७-८-९। इदमनाचरितं, दोषाश्चौद्देशिकादिष्वारम्भप्रवर्त्तनादयः स्वधिया वाच्या इति ।।३.२।।

**सन्निही गिहिमत्ते य[1], रायपिंडे किमिच्छए ।**
**संवाहण दंतपहोअणा य, संपुच्छणा देहपलोयणा[2] य ।।३.३।।**

**(ति.)** तथा—सन्निधीयते दुर्गतावात्मा अनेनेति सन्निधिः । आहाराणां स्वाश्रये स्वार्थं परार्थमपि वा स्थापनं गृहमात्रं गृहस्थभाजनम् । राजपिण्डः-नृपाहारः । कः किमिच्छतीत्येवं यो दीयते पिण्डः स किमिच्छकः । निरुक्त्या शब्दसिद्धिः । [3]संवाहनम्-अस्थिमांस-त्वग्-रोमसुखदं मर्दनम् । दन्तप्रधावनम्-[4]इष्टिकाचूर्णाङ्गुल्यादि-[5]भिर्दन्तक्षालनम् । सम्प्रश्नः-सावद्यो गृहस्थादिविषयः, कीदृशोऽहं रूपेणेत्यादिको वा । देहप्रलोकनम्-आदर्शादौ, दोषाश्चैषु परिग्रह-प्राणिघात-शोभाद्याः ।।३.३।।

**(स.)** पुनरिदमनाचरितम्—सन्निहीति-सन्निधीयतेऽनेनात्मा दुर्गताविति सन्निधिः, गुडघृतादीनां सञ्चयकरणं, गृहमत्रं च गृहस्थभाजनं, राजपिण्डश्च नृपाहारः, किमिच्छसीत्येवं यो दीयते स किमिच्छकः, राजपिण्डोऽन्यो वा सामान्येन, तथा संबाधनमस्थि-मांस-त्वग्-रोमसुखतया चतुर्विधं मर्दनं, दन्तप्रधावनं चाङ्गुल्यादिना मुखक्षालनं, संप्रश्नः सावद्यो गृहस्थविषयः, शोभार्थं कीदृशो वाहमित्यादिरूपः, देहप्रलोकनं चादर्शादौ, अनाचरितदोषाश्च सन्निधिप्रभृतिषु परिग्रह-प्राणातिपातादयः स्वबुद्ध्या वाच्याः ।।३.३।।

**(सु.)** इदं चानाचरितमिति – 'सन्निही'सूत्रं, सन्निधीयते अनेन आत्मा दुर्गताविति सन्निधिः-घृतगुडादीनां सञ्चयक्रिया १०, 'गृहमा(म)त्रं च'-गृहस्थभाजनं च ११, तथा राजपिण्डो-नृपाहारः, कः किमिच्छतीत्येवं यो दीयते स 'किमिच्छकः', राजपिण्डोऽन्यो वा सामान्येन १२, तथा सम्बाधनं-अस्थि-मांस-त्वग्-रोमसुखतया चतुर्विधं मर्दनं १३, दन्तप्रधावनं च-अंगुल्यादिना दन्तक्षालनं १४, तथा सम्प्रश्नः-सावद्यो गृहस्थविषयो

१.अ.८ ।।२.०अ.६-९ ।।३. इतयतः क्षालनं यावत् पाठः १२ प्रतौ नास्ति ।।४. दन्तकाष्ठाङ्गु. २.६-८.१०.११, दन्तकाष्ठइष्टिका.५ ।।५.०ना दन्त.४ ।।

राढार्थं 'कीदृशो वाऽहम्'इत्यादिरूपः १५, देहप्रलोकनं च-आदर्शादौ, अनाचरितं १६, दोषाश्च सन्निधिप्रभृतिषु परिग्रहप्राणातिपातादयः स्वधियैव वाच्या इति ।।३.३।।

**अट्ठावए य नालीय, छत्तस्स य धारणट्ठाए ।**
**तेगिच्छं [१]पाहणा पाए, समारंभं च जोइणो ।।३.४।।**

**(ति.)** तथा—अष्टापदम्-सारिद्यूतम्, अर्थपदं वा गृहिणामर्थार्जनाय निमित्तादि-कथनम्। नालिका नालच[२]मिति प्रसिद्धं द्यूतम्, आस्तामान्धिकादि । छत्रस्य च धारणा-आत्मनः परस्य वा अर्थाय । आगाढग्लानादि[३]त्वं मुक्त्वा चैकित्स्यम् । उपानहौ-निःकारणं पादयोः । समारम्भश्च । ज्योतिषः-अग्नेः । एषु च दोषाः प्रतीता एव ।।३.४।।

**(स.)** किञ्च—अट्ठावय इति-अष्टापदमिति, अष्टापदं द्यूतम्, अर्थपदं वा गृहस्थमधिकृत्य निमित्तादि-विषयमनाचरितं, तथा नालिका चेति द्यूतविशेषलक्षणा, यत्र मा भूत् कलयान्यथा पाशकपातनमिति नालिकया पात्यन्त इति, इयं चानाचरितं. छत्रस्य धारणम्, आत्मानं परं वा प्रति अनर्थायेति. आगाढग्लानाद्यालम्बनं मुक्त्वानाचरितं, [धारणट्ठाए-अत्र] प्राकृतशैल्यात्रानुस्वारलोपः, अकार-णकारलोपौ च द्रष्टव्यौ, तथा श्रुतिप्रामाण्यादिति. 'तेगिच्छं ति' चिकित्साया भावश्चैकित्स्यं व्याधिप्रतिक्रियारूपमनाचरितम्. उपानहौ पादयोरनाचरिते, पादयोरिति साभिप्रायकं, न त्वापत्कल्पपरिहारार्थमुपग्रहधारणेन. समारम्भश्च समारम्भणं ज्योतिषो वह्नेः. दोषाश्चाष्टापदादीनां सुगमा एवेति. ।।३.४।।

**(सु.)** किञ्च—'अट्ठावए' इति, अष्टापदं चेत्यष्टापदं-द्यूतं, अर्थपदं वा-गृहस्थ-मधिकृत्य निमित्तादिविषयमनाचरितं १७, तथा 'नालिका चे'ति द्यूतविशेषलक्षणा, यत्र मा भूत् कलयाऽन्यथा पाशकपातनमिति नालिकया पात्यन्त इति, इयं चानाचरिता १८, अष्टापदेन सामान्यतो द्यूतग्रहणे सत्यप्यभिनिवेशनिबन्धनत्वेन नालिकायाः प्राधान्य-ख्यापनार्थं नालिकाग्रहणं, अष्टापदद्यूतविशेषपक्षे चोभयोरिति । छत्रस्य च-लोकप्रसिद्धस्य धारणमात्मानं परं वा प्रत्यनर्थायेति, आगाढग्लानाद्यालंबनं मुक्त्वाऽनाचरितं, प्राकृतशैल्या चात्रानुस्वारलोपोऽकार-नकारलोपौ च द्रष्टव्यौ, तथाश्रुतिप्रामाण्यादिति १९ । 'तेगिच्छं'ति चिकित्साया भावश्चैकित्स्यं-व्याधिप्रतिक्रियारूपमनाचरितं २०, उपानहौ पादयोरनाचरिते,

१. वाहणो ८ ।। २. ०च्छ. ६-९.१२, ०त्व. १० ।। ३. ०कत्वं ६-१०.१२ ।।

पादयोरिति साभिप्रायकं, न त्वापत्कल्पपरिहारार्थे उपग्रहधारणेन २१, तथा समारंभणं समारंभश्च, ज्योतिषः-अग्नेरनाचरितमिति २२, दोषास्त्वष्टापदादीनां प्रसिद्धा एव क्षुण्णा एवेति ।।३.४।।

**सिज्जायरपिंडं च, आसंदी[1]-पलियंकए ।**
**गिहंतरनिसिज्जा य, गायस्सुवट्टणाणि य ।।३.५।।**

**(ति.)** किञ्च—शय्यातरः-साधुवसतिदाता, तत्पिण्डः । आसन्दकः-मञ्चकः । पर्यङ्कः-पटिकादिव्यूता खट्वा । गृहान्तरनिषद्या च-स्वाश्रयादन्यत्र गृहे निषद्या, निःकारणमासनम् । गात्रस्योद्वर्तनानि-पिष्टिकादिना । चशब्दाद्-अन्योऽपि विलेपनादि-संस्कारः।।३.५।।

**(स.)** सिज्जेति-शय्यातरपिण्डोऽप्यनाचरितः, शय्या वसतिस्तया तरति संसारमिति शय्यातरः, साधूनां वसतिदाता, तस्य पिण्डः, आसंदक-पर्यङ्ककौ लोकप्रसिद्धावना-चरितौ. तथा गृहांतरनिषद्या गृहमेव गृहान्तरं गृहयोर्वा अपा(वा)न्तरालं. तत्रोपवेशनं. चशब्दात् पाटकादिपरिग्रहः. तथा गात्रस्य कायस्योद्वर्तनानि पङ्कापनयनलक्षणानि, चशब्दादन्यसंस्कारपरिग्रहः. ।।३.५।।

**(सु.)** किञ्च—'सिज्जायर' इत्यादि, शय्यातरपिण्डश्चानाचरितः, शय्या-वसतिस्तया तरति संसारमिति शय्यातरः-साधुवसतिदाता तत्पिण्ड २३, आसन्दक-पर्यंकावनाचरितौ एतौ च लोकप्रसिद्धावेव २४-२५, तथा गृहान्तरनिषद्याऽनाचरिता, गृहमेव गृहान्तरं गृहयोर्वा अपान्तरालं, तत्रोपवेशनं, चशब्दात् पाटकादिपरिग्रहः २६, तथा गात्रस्य-कायस्योद्वर्तनानि चानाचरितानि, उद्वर्तनानि पङ्कापनयनलक्षणानि, चशब्दात् तदन्यसंस्कारपरिग्रह इति २७ ।।३.५।।

**गिहिणो वेयावडियं, जा य आजीववत्तिआ[2] ।**
**तत्तानिव्वुडभोइत्तं, आउर-सरणाणि या ।।३.६।।**

**(ति.)** तथा—गृहिणो वैयावृत्यम्-आसनाद्यर्पणम् । या चाऽऽजीववृत्तिता—जाति-

---

१. ०सीं १ ।। २. ०त्ती. २ या. मुद्रिते ।।

कुल-गण-शिल्पैरन्नार्थम्'अहमपि त्वज्जातीय' इत्यादिवाग्भिराजीवनमाजीवस्तद्वृत्तिता । तप्तानिवृत्तभोजित्वम्-तप्तं तप्तमात्रं न[2] [3]त्रिदण्डोत्कलितम्, अत एवानिवृत्तम्-अपरिणतं, तप्तानिर्वृत्तं अर्थादुदकमिति गम्यते, मिश्रोदकभोजित्वमित्यर्थः । आतुरस्मरणानि च क्षुदाद्यातुरैः पूर्वोपभुक्तवालुङ्कादेः स्मरणानि च ।।३.६।।

**(स.)** गिहिणो इति-पुनर्गृहिणो गृहस्थस्य वैयावृत्त्यं, व्यावृत्तस्य भावो वैयावृत्त्यं गृहस्थं प्रति अन्नादिसंपादनमित्यर्थः. तथा या चाजीववृत्तिता जाति-कुल-गण-कर्म-शिल्पा-नामाजीवनमाजीवः, तेन वृत्तिराजीववृत्तिः, तस्या भाव आजीववृत्तिता. जात्यादेराजीवनेनात्मपालनमित्यर्थः. तप्तानिर्वृतभोजित्वं, तप्तं च तदनिर्वृतं, तप्तानिर्वृतं, अ-त्रिदण्डोद्धृतं चेति समासः, उदकमिति शेषः, तस्य भोजित्वं मिश्रसचित्तोदक-भोजित्वमित्यर्थः. तथा आतुरस्मरणानि च क्षुधादिनातुराणां पीडितानां पूर्वोपभुक्त-स्मरणानि. अथवा दोषातुराणामाश्रयदानादीनि. ।।३.६।।

**(सु.)** गिहिणो इति गृहिणो-गृहस्थस्य वैयावृत्यमिति व्यावृत्तभावो वैयावृत्त्यं, गृहस्थं प्रति अन्नादिसंपादनमित्यर्थः, एतदनाचरितमिति २८, तथा चाजीववृत्तिता-जाति-कुल-गण-कर्म्म-शिल्पानामाजीवनं आजीवस्तेन वृत्तिस्तद्भाव आजीववृत्तिता, जात्याद्याजीवनेनान्न-याचनेत्यर्थः, इयं चानाचरिता २९, तथा तप्तानिर्वृत्तभोजित्वं-तप्तं च तदनिवृत्तं तप्तानिवृत्तं-अ-त्रिदण्डोद्धृतं चेति विग्रहः, उदकमिति विशेषणान्य-थानुपपत्त्या गम्यते, तद्भोजित्वं मिश्रसचित्तोदकभोजित्वमित्यर्थः, इदं चानाचरितं ३०, आतुरस्मरणानि च-क्षुधाद्यातुराणां पूर्व्वोपभुक्तस्मरणानि चानाचरितानि आतुरशरणानि वा दोषातुराश्रयदानानीति ३१ ।।३.६।।

**मूलए सिंगबेरे य, उच्छुखण्डे अनिव्वुडे ।**
**कंदं(दे) मूले य सचित्ते, फले बीए य आमए ।।३.७।।**

**(ति.)** मूलकं, [5]शृङ्गबेरं, इक्षुखण्डं, [6]अनिवृत्तम् इदं च त्रिष्वपि योज्यम् । कन्दः-सूरणादेः । मूलम्-वृक्षादेः । सचित्तं फलम्-वालुङ्कादि । बीजम्-तिलादि । आमकम्-अपक्वसचित्तम् ।।३.७।।

---

१. ०त्रमत्रि. ६-१२ ।। २. अ-त्रिदण्डोद्वृत्तम्, अलिनम् इति चूर्णि-बृहट्टीकादिष्वभणितत्वादुत्सूत्रं ज्ञेयम् १ टि. ।। ३. त्रण उकाला इति भाषा. ।। ४. ०लकः २.५.१०.११, ०लं ६-९.१२ ।। ५. आदूः १० टि. ।। ६. काचुं १० टि. ।।

(स.) मूलए इति-पुनर्मूलको लोके प्रतीतः, शृंगबेरमार्द्रकं, इक्षुखंडं च लोकप्रतीतम्, अनिर्वृतग्रहणं सर्वत्राभिसंबद्ध्यते, इक्षुखण्डं चापरिणतं द्विपर्वान्तं यद्वर्तते, कन्दो वज्रकन्दादिः, मूलं च सट्टामूलादि सचित्तं, फलं कर्कट्यादि, त्रिपुषादि, बीजं च तिलादि, किंविशिष्टं बीजम् ? आमकं सचित्तम्. ।।३.७।।

(सु.) किञ्च-मूलए'इति मूलको-लोकप्रतीतः, शृङ्गबेरं च आर्द्रकं च तथा इक्षुखण्डं च लोकप्रतीतं, अनिर्वृतग्रहणं सर्वत्राभिसम्बध्यते, अनिर्वृतं-अपरिणतमनाचरितमिति, इक्षुखण्डं चापरिणतं द्विपर्वान्तं यद्वर्तते ३२-३३-३४, तथा कन्दो-वज्रकन्दादिः ३५, मूलं च-सट्टामूलादि सचित्तमनाचरितं ३६, फलं-त्रपुष्यादि ३७, बीजं-तिलादि ३८, आमकं-सचित्तमनाचरितमिति ।।३.७।।

**सोवच्चले सिंधवे लोणे, [1]रोमालोणे य आमए ।**
**सामुद्दे पंसुखारे य, कालालोणे य आमए ।।३.८।।**

(ति.) तथा—सौवर्चलं, सैन्धवं, लवणं, रुमालवणमाऽऽमकम्-रुमा लवणखानिः, तज्जम्। समुद्रः-समुद्रासन्नः । पांशुक्षारः-अथवा शाकम्भरियाक-रजः पांशुक्षारः । तत्र च-अस्थ्याद्यपि पतितं लवणीभवति । कृष्णलवणम्-सिन्धुदेशीयपर्वतैकदेशजम् । आमकम् ।।३.८।।

(स.) सोवच्चले इति-पुनः सौवर्चलं, सैन्धवं पर्वतैकदेशजातं, लवणं च सांभरलवणं, रुमालवणं च खानिलवणं, एतत्सर्वमामकं सचित्तमनाचरितं, सामुद्रं लवणमेव, पांशुक्षारश्चोषरलवणं, कृष्णलवणं पर्वतैकदेशजातं, सर्वमामकं ज्ञेयम्. ।।३.८।।

(सु.) 'सोवच्चले'ति, सोवर्चलं ३९, सैन्धवं, लवणं ४०, रुमालवणं च ४१, आमकं, आमकमिति सचित्तमनाचरितं, सामुद्रं-समुद्रलवणमेव ४२, पांशुक्षार-ऊषरलवणं ४३, कृष्णलवणं च सैन्धवलवणपर्वतैकदेशजं ४४, आमकमनाचरितमिति ।।३.८।।

१. रु. ५.८ ।।

**धूवणे त्ति वमणे य, वत्थीकम्म-विरेयणे ।**
**अंजणं दंतवणे य, गायाभंग-विभूसणे ।।३.९।।**

(**ति.**) तथा—धूपनम्-वस्त्रादेः, अनागतव्याधिनिवृत्तये धूमपानं वा । वमनम्-निःकारणं मदनफलादिना । वस्तिकर्म-पुटकेनाऽपाने स्नेहदानम् । विरेचनम्-हरीतक्यादिना । अञ्जनम्-दृशोः । दन्तवनम्-दन्तकाष्ठं प्रतीतम् । गात्रस्याभ्यङ्गः-तैलादिना । विभूषणम्-विलेपनादि ।।३.९।।

(**स.**) धूवणेत्ति-धूपनमात्म-वस्त्रादेः सौगन्ध्यनिमित्तम्, अथवाऽनागतव्याधि-निवृत्तिनिमित्तं धूमपानमित्यन्ये व्याख्यानयन्ति, वमनं च मदनफलादिना वान्तिः, तथा बस्तिकर्म पुण्ड्रकेणाधिष्ठाने स्नेहदानं. विरेचनं दन्त्यादिना, तथाञ्जनं रसाञ्जनं. दन्तकाष्ठं च प्रतीतमेव. तथा गात्राभ्यङ्गस्तैलादिना. विभूषणं गात्राणामेव. ।।३.९।।

(**सु.**) 'धूवणे'त्ति धूपनमिति-आत्म-वस्त्रयोरनाचरितमिति, प्राकृतशैल्याऽनागत-व्याधिनिवृत्तये धूमपानमिति अन्ये व्याचक्षते ४५, वमनं च मदनफलादिना ४६, वस्तिकर्म पुटकेनाधिष्ठाने स्नेहदानं ४७, विरेचनं दन्त्यादिना ४८, तथा अञ्जनं-रसाञ्जनादि ४९, दन्तकाष्ठं च प्रतीतं ५०, गात्राभ्यङ्गस्तैलादिना ५१, विभूषणं गात्राणामेवेति ५२। ।।३.९।।

**सव्वमेयमणाइन्नं, निगंथाण महेसिणं ।**
**संजमंमि य जुत्ताणं, लहुभूयविहारिणं ।।३.१०।।**

(**ति.**) निगमनमाह—सर्वमेतद्-औद्देशिकादि, अनाचीर्णम् । निर्ग्रन्थानां महर्षीणा । संयमे चशब्दात्-तपसि च । युक्तानाम्-उद्यतानाम् । लघुभूतविहारिणाम्-लघुभूतो वायुः, तद्वद्(अ)प्रतिबद्धतया विहारो येषां ते तथा तेषाम् ।।३.१०।।

(**स.**) अथ क्रियासूत्रमाह—सव्वमिति-सर्वमेतत्पूर्वोक्तद्वि[१]-पंचाशद्भेदभिन्नमौद्देशिका-दिकं यदनन्तरमुक्तं तत् सर्वमनाचरितं ज्ञातव्यं. केषाम् इति ?-आह-निर्ग्रन्थानां महर्षीणां साधूनामित्यर्थः. किंभूतानां? संयमे, चशब्दात् तपसि युक्तानां, पुनः किंभूताना ? लघुभूतविहारिणां, लघुभूतो वायुस्तद्वद-प्रतिबद्धतया विहारो येषां ते. ।।३.१०।।

(**सु.**) क्रियासूत्रमाह—'सव्वमेयं इति' सर्व्वमेतद्-औद्देशिकादि यदनन्तरमुक्त-मिदमनाचरितं, केषाम् इति ?-आह-निर्ग्रन्थानां महर्षीणां साधूनामित्यर्थः, त एव

१. चूर्णिसंमत्या 'द्वि' इति कृतम्

विशेष्यन्ते-संयमे, चशब्दात् तपसि च, युक्तानां-अभियुक्तानां, लघुभूतविहारिणां लघुभूतो-वायुस्ततश्च वायुभूतोऽप्रतिबद्धतया विहारो येषां ते लघुभूतविहारिणस्तेषां, निगमन-क्रियापदमेतदिति ।।३.१०।।

**पंचासवपरिन्नाया, तिगुत्ता छसु संजया ।**
**पंचनिग्गहणा धीरा, निग्गंथा उज्जुदंसिणो ।।३.११।।**

**(ति.)** किमित्येतदेषामनाचीर्णं, यत एते एवम्भूता भवन्तीत्याह—पञ्चाश्रवाः-हिंसादयः, ते परिज्ञाताः-प्रत्याख्याता यैस्ते पञ्चाश्रवपरिज्ञाताः। [1]आहिताग्न्यादेराकृति-गणत्वात् परिज्ञातपञ्चाश्रवा इत्यर्थः । त्रिगुप्ताः-त्रिभिर्मनोवाक्कायै-र्गुप्ताः । षड्जीवनिकायेषु-पृथिव्यादिषु । सम्यग्यताः । पञ्चेन्द्रियाणि निगृह्णन्तीति पञ्चनिग्रहणाः । "कृत्यल्युटोऽन्यत्रापि च[2]" [कातन्त्र व्याकरणे] इति कर्तरि युट् । धिया राजन्तीति धीराः-बुद्धिमन्तः स्थिरा वा । निर्ग्रन्थाः । ऋजुं मोक्षं प्रति सरलमार्गकल्पं संयमं पश्यन्तीत्येवंधर्माणः ऋजुदर्शिनः ।।३.११।।

**(स.)** किमित्यनाचरितं यतस्त एवंभूता भवन्तीत्याह—पंचासव'इति-किंभूतास्ते साधवः ? पंच च ते आश्रवाश्च पञ्चाश्रवा हिंसादयः, परि समन्ताद् ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया प्रत्याख्याता यैस्ते पञ्चाश्रवपरिज्ञाताः, यतः कारणात् त एवंभूताः, अतएव त्रिगुप्ता मनोवाक्कायगुप्तिभिर्गुप्ताः, पुनः किंभूताः? छसु संजया—षट्सु जीवनिकायेषु पृथिव्यादिषु सामस्त्येन यता यत्नवन्तः, पुनः किं० ? पंचनिग्रहणाः, पंचानामिन्द्रियाणां निग्रहणा निरोधकर्तारः, पुनः किंभूताः ? धीरा बुद्धिमन्तः स्थिरा वा, पुनः किंभूताः साधवः ? ऋजुदर्शिनः, ऋजुर्मोक्षं प्रति ऋजुत्वात् संयमस्तं पश्यन्ति उपादेयतया इति ऋजुदर्शिनः संयमप्रतिबद्धाः. ।।३.११।।

**(सु.)** किमिति अनाचरितं ?, यतस्ते एवम्भूता भवन्तीत्याह—

'पंचासव'इत्यादि पञ्चाश्रवा-हिंसादयः परिज्ञाता द्विविधया, परिज्ञया-ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च । परि-समन्तात् ज्ञाता यैस्ते पञ्चाश्रवपरिज्ञाताः, यतश्चैवम्भूता अत एव त्रिगुप्ता मनोवाक्कायगुप्तिभिः गुप्ताः, षट्सु संयताः-षट्सु जीवनिकायेषु पृथिव्यादिषु सामस्त्येन यताः, पञ्च निग्रहणा इति निगृह्णन्तीति निग्रहणाः पञ्चानां

१. 'आहिताग्नि'-आदिषु [सि.हे..१.१५६] इति सूत्रेण बहुव्रीहि समासे कृतान्तं पदं वा प्राक् भवति । २. 'कातन्त्रव्याकरणे तु' कृत्ययुहोऽन्यत्रापि च' एवं सूत्रं इकृत् सूत्रतः पञ्चमपादे ९२ तमम् ।

निग्रहणाः, पञ्चानामिन्द्रियाणां, धीरा-बुद्धिमन्तः, स्थिरा वा, निर्ग्रन्थाः-साधवः, ऋजुदर्शिनः इति ऋजुः-मोक्षं प्रति ऋजुत्वात् संयमः, तं पश्यन्त्युपादेयतयेति ऋजुदर्शिनः-संयमप्रतिबद्धा इति ।।३.११।।

**आयावयंति गिम्हेसु, हेमंतेसु अवाउडा ।**
**वासासु पडिसंलीणा, संजया सुसमाहिया ।।३.१२।।**

**(ति.)** ते च यथाकालं यथाशक्त्यैतत् कुर्वन्ति — आतापयन्ति-आतापनां कायोत्सर्गस्थाः सहन्ते ग्रीष्मेषु । हेमन्तेष्वप्रावृत्ताः-अप्रावरणाः शीतं सहन्ते । वर्षासु प्रतिसंलीनाः-आश्रये एव गुप्ताङ्गाः सन्ति । संयताः-साधवः । सुसमाहिताः-सुष्ठु समाधानभाजः ।।३.१२।।

**(स.)** ते ऋजुदर्शिनः कालं प्रस्तावमधिकृत्य यथाशक्ति एवं कुर्वन्ति, तथाहि— आया'इति-आतापयन्त्यूर्ध्वस्थानादिनाऽऽतापनां कुर्वन्ति, कदा ? ग्रीष्मेषूष्णकालेषु, पुनः कीदृशाः ? हेमन्तेषु शीतकालेष्वप्रावृताः प्रावरणरहितास्तिष्ठन्ति, तथा वर्षासु वर्षाकालेषु प्रतिसंलीना एकाश्रयस्था भवन्ति, संयताः साधवः, पुनः किंभूताः ? सुसमाहिता ज्ञानादिषु यत्नपराः. ।।३.१२।।

**(सु.)** ते च ऋजुदर्शिनः कालमधिकृत्य यथाशक्त्या एतत् कुर्वन्ति—'आयावयन्ति' आतापयन्तीत्यूर्ध्वस्थानादिना आतापनां कुर्वन्ति ग्रीष्मेष्विति-उष्णकालेषु, हेमन्तेषु-शीतकालेषु अप्रावृता इति-प्रावरणरहितास्तिष्ठन्ति, तथा वर्षासु-वर्षाकालेषु प्रतिसंलीना इत्येकाश्रयस्था भवन्ति, संयताः-साधवः सुसमाहिता-ज्ञानदर्शनादिषु यत्नपराः, ग्रीष्मादिषु बहुवचनं प्रतिवर्षकरणज्ञापनार्थमिति ।।३.१२।।

**परीसहरिऊदंता, [1]धुयमोहा जिइंदिया ।**
**सव्वदुक्खपहीणट्ठा, पक्कमंति महेसिणो ।।३.१३।।**

**(ति.)** किञ्च—परीषहाः-क्षुदाद्याः । तद्यथा -

खुहा पिवासा सीउण्हं, दंसा चेलारइत्थिओ ।
चरिया [2]निसीहिया [3]सिज्जा, अक्कोस वह जायणा ।।१।।

१. धू. ४ मुद्रिते च ।। २. वसति ३ टि. ।। ३. संस्तारकः ४ टि. ।।

अलाभरोगतणफासा, मलसक्कारपरीसहा ।

पन्ना अन्नाणसम्मत्तं, इय बावीसं[१] परीसहा ।।२।। [नवतत्त्व-२७-२८]

त एव रिपवः, ते दान्ताः-शमं नीता यैस्ते[२] दान्तपरीषहरिपवः इत्यर्थः । धुतमोहाः-विक्षिप्ताज्ञानाः । जितेन्द्रियाः-शब्दादिष्वरक्तद्विष्टाः । सर्वेषां दुःखानाम्-शारीरमानसानां, प्रहाणार्थम्-प्रक्षयनिमित्तम् । प्रक्रमन्ते-प्रवर्तन्ते महर्षयः ।।३.१३।।

**(स.)** परीति-पुनः किम्भूताः ? परीषहा एव रिपवस्ते दान्ता उपशमं नीता यैस्ते, पुनः किंभूताः ? धूतो मोहोऽज्ञानं यैस्ते, पुनः किंभूताः ? जितेन्द्रियाः शब्दादिविषयेषु रागद्वेषरहिताः, त एवंविधाः सर्वदुःखक्षयनिमित्तं प्रक्रामन्ति प्रवर्तन्ते. किंभूताः ? महर्षयः ।।३.१३।।

**(सु.)** किञ्च-'परीसहे'ति 'मार्गाऽच्यवन-निर्जरार्थं परिषोढव्याः परीषहाः (तत्त्वा० अ० ९,८)-क्षुत्पिपासादयः, त एव रिपवस्तुल्यधर्मत्वात् परीषहरिपवः, ते दान्ता-उपशमं नीता यैस्ते परीषहरिपुदान्ताः, धूतमोहा-विक्षिप्तमोहा इत्यर्थः मोहः-अज्ञानं, जितेन्द्रियाः-शब्दादिषु रागद्वेषरहिता इत्यर्थः, एवम्भूताः सर्वदुःखप्रक्षयार्थं-शारीर-मानसाशेष-दुःखप्रक्षयनिमित्तं प्रक्रामन्ति-प्रवर्तन्ते महर्षयः-साधव इति ।।३.१३।।

**दुक्कराइं करित्ताणं, दुस्सहाइं सहित्तु य ।**
**के इत्थ देवलोगेसु, केई सिज्झंति नीरया ।।३.१४।।**

**(ति.)** इदानीमेतेषां फलमाह—दुःकराणि-औद्देशिकत्यागादीनि कृत्वा । णं-वाक्यालङ्कारे । दुःसहानि-आतपादीनि सोढ्वा । केचिदत्र देवलोकेषु-सौधर्मादिषु, यान्तीति शेषः । केचित् सिध्यन्ति नीरजसः-क्षपितकर्माष्टकाः ।।३.१४।।

**(स.)** अथैतेषां फलमाह—दुक्कर'इति-एवं दुष्कराण्यौद्देशिकादित्यागादीनि कृत्वा, तथा दुस्सहान्यातापनादीनि सहित्वा केचिद्देवलोकेषु सौधर्मादिषु गच्छन्तीति शेषः. केचन सिद्ध्यन्ति, तेनैव भवेन सिद्धिं प्राप्नुवन्ति. किंभूताः ? नीरया निर्गतं रजोऽष्टविधं कर्म येभ्यस्तेऽष्टविध-कर्मविप्रमुक्ताः, न त्वेकेन्द्रिया इव कर्मयुक्ताः. ।।३.१४।।

---

१. ०स. ४ ।। २. ०स्ते परीषहरिपुदन्ताः दान्त. ६-१२ ।।

(सु.) इदानीमेतेषां फलमाह—'दुक्करा' इति एवं दुष्कराणि कृत्वा औद्देशिकादि-त्यागादीनि, तथा दुस्सहानि सहित्वा आतापनादीनि, केचनात्र देवलोकेषु सौधर्मादिषु, गच्छन्तीति वाक्यशेषः, तथा केचन सिद्ध्यन्ति, तेनैव भवेन सिद्धिं प्राप्नुवन्ति, वर्तमाननिर्देशः सूत्रस्य त्रिकालविषयत्वज्ञापनार्थः, नीरजस्का इत्यष्टविधकर्म्मविप्रमुक्ताः, न त्वेकेन्द्रिया इव कर्म्मयुक्ता एवेति ।।३.१४।।

**खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।**
**सिद्धमग्गमणुप्पत्ता, ताइणो परिनिव्वुड त्ति बेमि ।।३.१५।।**

(ति.) येऽपि देवलोकं गतास्तेऽपि ततश्च्युताः सन्तः साधुधर्मं प्राप्य — क्षपयित्वा पूर्वकर्माणि-अशेषाणि । संयमेन तपसा च, सिद्धिमग्र्यां-लोकाग्रस्थाम्, अनुप्राप्ताः, न तु अणिमादिसिद्धिम् । तायिनः । परिनिवृताः-परमां निर्वृतिं भेजुः । इति ब्रवीमि ।।३.१५।। **तिलकाचार्यवृत्तौ तृतीयं अध्ययनं 'क्षुल्लकाचारकथा' समाप्तम् ।।**

(स.) ये चैवंविधानुष्ठानतो देवलोकेषु गच्छन्ति, तेऽपि ततश्च्युत्वार्यदेशे सुकुले जन्म प्राप्य शीघ्रं सिद्ध्यन्त्येव. एतदाह-खवित्ता'इति-ते देवलोकात् क्षपयित्वा कर्माण्यवशिष्टानि, केन इति ?-आह-संयमेनोक्तरूपेण सप्तदशभेदेन, पुनस्तपसा द्वादशविधेन सिद्धिमार्गं सम्यग्दर्शनादिलक्षणमनुप्राप्ताः सन्तस्त्रातार आत्मादीनां परिनिवान्ति सिद्धिं प्राप्नुवन्ति. इति ब्रवीमि न स्वबुद्ध्या किन्तु तीर्थकरगणधराणामुपदेशेन. ।।३.१५।।

**इति श्रीदशवैकालिकशब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां क्षुल्लकाचार-कथाख्यं तृतीयमध्ययनं समाप्तम्. ।।**

(सु.) ये चैवंविधानुष्ठानतो देवलोकेषु गच्छन्ति, तेऽपि ततश्च्युता आर्यदेशेषु सुकुले जन्मावाप्य शीघ्रं सिद्ध्यन्त्येवेत्यत आह —

'खवित्ते'ति तदेवं देवलोकाच्च्युत्वा क्षपयित्वा पूर्वकर्म्माणि सावशेषाणि, केन इति ?-आह-संयमेन उक्तस्वरूपेण तपसा च, एवं प्रवाहेण सिद्धिमार्गं-सम्यग्दर्शनादि-लक्षणमनुप्राप्ताः सन्तस्त्रातारः आत्मादीनां परिनिर्व्वान्ति-सिद्धिं प्राप्नुवन्ति, अन्ये तु

पठन्ति-'परिनिव्वुडा' इति, तत्रापि प्राकृतशैल्या छान्दसत्वाद् वाऽयमेव पाठो ज्यायानिति ।।३.१५।। त्ति बेमि । ब्रवीमीति पूर्ववदिति ।

**।। दश. सुमतिवृत्तौ तृतीयं क्षुल्लकाचाराध्ययनं समाप्तम् ३ ।।**

## ।। चतुर्थ अध्ययनं षड्जीवनिकायिका ।।

**सुयं मे आउसं तेणं भगवया एवमक्खायं ।**

**(ति.)** अनन्तराध्ययने आचारः कथितः । स च षड्जीवनिकायगोचर इत्यनेन सम्बन्धेनायातं षड्जीवनिकायिकाध्ययनं व्याख्यायते, तच्चेदम्—सुधर्मस्वामी जम्बूस्वामिनमाह- श्रुतम्-आकर्णितं गृहीतम् । मे-मया । हे आयुष्मन् ! तेन भगवता-श्रीवर्धमानस्वामिना । एवमाख्यातम्-केवलज्ञानेनोपलभ्यावेदितम्।

**(स.)** व्याख्यातं क्षुल्लकाचारकथाख्यं तृतीयमध्ययनम्, अथ चतुर्थं षड्जीवनिकायाख्यमध्ययनं व्याख्यायते-पूर्वोक्ताध्ययनेनास्याऽध्ययनस्यायं सम्बन्धः-पूर्वं साधुनाचारे धृतिः कार्या, न त्वनाचार इत्युक्तम्-अयमेव चात्मसंयमे उपायः, स चाचारः षड्जीवनिकायगोचरः, अतः षड्जीवनिकायाः प्रोच्यन्ते- तत्र सूत्रम् **सुअमिति**-श्रुतमवधारितं मे इति मया, अत्र श्रीसुधर्मस्वामी जम्बूस्वामिनं प्राह-हे आयुष्मन् ! आयुरस्यास्तीत्यायुष्मान्, तस्य संबुद्धिः, तेन जगत्प्रसिद्धेन भगवता समग्रैश्वर्यादियुक्तेन श्रीवर्धमानस्वामिनैवंप्रकारं वक्ष्यमाणमाख्यातं, केवलज्ञानेनोपलभ्य कथितम्. अथवा 'आउसंतेणं'इति समग्रं भगवतो विशेषणं, 'आउसंतेणं' आयुष्मता चिरजीविना इत्यर्थः; मङ्गलवचनमेतत्. अथवा 'आवसंतेणं'इति पाठे मयेत्यस्य विशेषणं, किंभूतेन मया ? आवसता गुरुपादमूलसेविना. अथवा 'आमुसंतेणं'इति' पाठे किंभूतेन मया ? आमृशता भगवत्पादारविन्दयुगलं मस्तकेन, अनेन गुरुविनयप्रतिपत्तिरुक्ता.

**(सु.)** इदानीं षड्जीवनिकायिकाख्यमारभ्यते—अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने साधुना धृतिराचारे कार्या, न त्वनाचारे, अयमेव चात्मसंयमोपाय इत्युक्तम्, इह पुनः स आचारः षड्जीवनिकायगोचरः प्राय इत्येतदुच्यते, उक्तं च-

"छसु जीवनिकाएसु जे बुहे संजए सया ।
से चेव होइ विन्नेए, परमत्थेण संजए ।।१।।"

इत्यनेन सम्बन्धेनायातमिदमध्ययनमिति, तदाह—'सुयं मे' इत्यादि, श्रूयते तदिति श्रुतं-प्रतिविशिष्टार्थप्रतिपादनफलं वाग्योगमात्रं, भगवता निसृष्टम्, आत्मीयश्रवणकोटरप्रविष्टं क्षायोपशमिकभावपरिणामाऽऽविर्भावकारणं श्रुतमित्युच्यते, श्रुतमवधृतमव-

गतमिति पर्यायाः, मयेत्यात्मपरामर्शः, आयुरस्यास्तीत्यायुष्मान्, तस्यामन्त्रणं हे आयुष्मन !, कः कमेवमाह ?-गौतमः सुधर्मस्वामी वा, जंबूस्वामिनमिति, तेनेति भुवनभर्तुः परामर्शः, भगः-समग्रैश्वर्यादिः, सोऽस्यास्तीति भगवान्, तेन भगवता वर्द्धमानस्वामिनेत्यर्थः, एवमिति प्रकारवचनः शब्दः, आख्यातमिति केवलज्ञानेनोपलभ्यावेदितं, किमत आह-इह खलु षड्जीवनिकायिकानामाध्ययनमस्तीति वाक्यशेषः, इह तु लोके प्रवचने वा, खलु शब्दान्नान्यतीर्थकृत्प्रवचनेषु षड्जीवनिकायिकेति पूर्ववन्नामेत्यभिधानं अध्ययनमिति पूर्ववदेव, इह च श्रुतं मयेत्यनेनात्मपरामर्शेनै-कान्तक्षणभङ्गापोहमाह-तत्रेत्थंभूतार्थानुपपत्तेरिति, उक्तं च-

"एगंतखणियपक्खे गहणं चिय सव्वहा न अत्थाणं ।
अणुसरणसासणाइं कुतो य तेलोग(०क्क)सिद्धाइं ? ।।१।।"

तथा आयुष्मन्निति च प्रधानगुणनिष्पन्नेनामन्त्रणवचसा गुणवते शिष्यायागमरहस्यं देयं नागुणवते इत्याह, तदनुकंपाप्रवृत्तेरिति, उक्तं च-

"आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ ।
इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ।।१।।"

आयुश्च प्रधानो गुणः, सति तस्मिन्नव्यवच्छित्तिभावात्, 'तेन भगवता एवमाख्यातं-'इत्यनेन स्वमनीषिकानिरासाच्छास्त्रपारतन्त्र्यप्रदर्शनेन न ह्यसर्वज्ञेनानात्मवतान्यतस्तथाभूतात् सम्यगनिश्चित्य लोके धर्मदेशना कार्येत्येतदाह विपर्ययसंभवादिति, उक्तं च-

"सावज्जऽणवज्जाणं वयणाणं जो न जाणइ विसेसं ।
वुत्तुं पि तस्स न खमं किमंग पुण देसणं काउं ? ।।१।।
किं एत्तो पावयरं सम्मं अणहिगयधम्मसब्भावो ।
अन्नं कुदेसणाए, कट्ठयरागम्मि पाडेइ ।।२।।"

अथवा - अन्यथा व्याख्यायते सूत्रैकदेशः-आउसंतेणं'इति भगवत एव विशेषणं, आयुष्मता भगवता, चिरजीविनेत्यर्थः, मङ्गलवचनं चैतद्, अथवा जीवता साक्षादेव, अनेन च गणधरपरंपरागमस्य जीवनविमुक्तानादिसिद्धवक्तुश्चाऽपोहमाह-देहाद्यभावेन तथाविधप्रयत्नाभावादिति, उक्तं च-

"वयणं न कायजोगाभावे ण य सो अणाइसिद्धस्स ।
गहणम्मि य नो हेऊ सत्थं अत्तागमो कह णु ? ।।१।।"

अथवा आवसंतेणं'इति, गुरुमूलमावसता, अनेन च शिष्येण गुरुचरणसेविना सदा भाव्यमित्येतदाह, ज्ञानादिवृद्धिसद्भावाद्, उक्तं च-"

नाणस्स होइ भागी, थिरतरतो दंसणे चरित्ते य ।

धन्ना यावकहाए, गुरुकुलवासं न मुंचंति ।।१।।"

अथवा आउसंतेणं-आमृशता भगवत्पादारविन्दयुगलमुत्तमाङ्गेन, अनेन च विनयप्रतिपत्तेर्गरीयस्त्वमाह, विनयस्य मोक्षमूलत्वात्, उक्तं च-

"मूलं संसारस्स उ होंति कसाया अणंतपत्तस्स ।

विणओ ठाणपउत्तो दुक्खविमुक्खस्स मोक्खस्स ।।१।।"

कृतं प्रसंगेन, प्रकृतमुच्यते-

**इह खलु छज्जीवणियानामज्झयणं समणेणं भगवया महावीरेणं कासवेणं पवेइया सुयक्खाया सुपन्नत्ता, सेयं मे अहिज्जिउं अज्झयणं धम्मपन्नत्ती ।।**

**(ति.)** किं तद् इति ? आह – इह-प्रवचने जैने । खलु-निश्चयेन, नान्यत्र । षड्जीव-कायिकानामाध्ययनम् - इत्यध्ययनरूपा । श्रमणेन भगवता महावीरेण काश्यपेन-काश्यपसगोत्रेण । प्रवेदिता केवलालोकात् प्रकर्षेण वेदिता ज्ञाता । स्वाख्याता-सदेवमनुजासुरायां पर्षदि कथिता । सुप्रज्ञप्ता-यथैवाख्याता तथैवासेविता, अनेकार्थत्वाद्धातूनां 'ज्ञपिरासेवनार्थः' [ ] । अतः श्रेयो मेऽध्येतुमध्ययनम्-षड्जीव-निकायिकाख्यम्, इह पुनरध्ययनाभिधानं पूर्वोक्तानुवादमात्रमेव । धर्मप्रज्ञप्तिः-धर्मस्य प्रज्ञप्तिर्यतस्तद्धर्मप्रज्ञप्तिः ।

**(स.)** किंभूतेन भगवता आख्यातम् ? इति पृष्टे आह – एषा [इह] खलु षड्जीवनिकानामाध्ययनं श्रमणेन महातपस्विना भगवता समग्रैश्वर्यादियुक्तेन महावीरेण कषायादिवैरिजयान्महासुभटेन, किंभूतेन ? काश्यपेन काश्यपगोत्रेण प्रवेदिता ज्ञाता, न कुतश्चिदाकर्ण्य ज्ञाता, किन्तु स्वयमेव केवलज्ञानेन प्रकर्षेण विदिता ज्ञाता. पुनः स्वाख्याता, सुष्ठु द्वादशपर्षन्मध्ये आख्याता, तथा सुप्रज्ञप्ता, यथैव व्याख्याता तथैव सूक्ष्मपरिहारासेवनेन प्रकर्षेण सम्यगासेवितेत्यर्थः. तां चैवंभूतां षड्जीवनिकां श्रेयो मे ममाध्येतुं, श्रेयः पथ्यं हितं पठितुं श्रोतुं भावयितुं. कुत इत्याह-अध्ययनं धर्मप्रज्ञप्तिः, "निमित्त-कारण-हेतुषु सर्वासां प्रायो दर्शनम्" इति वचनात् ''हेतौ प्रथमा'', अध्ययनत्वा-

दध्यात्मानयनाच्चेतसो विशुद्ध्यापादनं, चेतोविशुद्ध्यापादनाच्च श्रेय आत्मनोऽध्येतुमिति. अन्ये व्याचक्षते-अध्ययनं धर्मप्रज्ञप्तिरिति पूर्वमुपन्यस्तस्याध्ययनस्यैवोपादेयतयानुवाद-मात्रम्. १.

(सु.) कृतं प्रसङ्गेन प्रकृतमुच्यते [इह खलु...] अत्र खलु षड्जीवनिकायिका-नामाध्ययनमस्तीत्युक्तं, अत्राह-षड्जीवनिकायिका केन प्रविदिता प्ररूपिता वा ? इति उच्यते, तेनैव भगवता, यत आह-समणेणमित्यादि, सा च तेन श्रमणेन-महातपस्विना भगवता-समग्रैश्वर्यादियुक्तेन महावीरेण-कषायादिशत्रुजयान्महावीरः, उक्तं च-

"विदारयति यत्कर्म्म, तपसा च विराजते ।

तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ।।१।।"

महांश्चासौ वीरश्च महावीरस्तेन महावीरेण, अत्राह-षड्जीवनिकायिका केन प्रविदिता परूपिता वा ?, इति उच्यते, तेनैव भगवता, यत आह-समणेणमित्यादि, काश्यपेनेति काश्यपगोत्रेण प्रविदिता नान्यतः कुतश्चिदाकर्ण्य ज्ञाता, किं तर्हि ? स्वयमेव केवलालोकेन प्रकर्षेण विदिता-ज्ञातेत्यर्थः, स्वाख्यातेति सदेवमनुष्यासुरायां पर्षदि सुष्ठु आख्याता-स्वाख्याता, सुप्रज्ञप्तेति, यथैवाख्याता तथैव सुष्ठु सूक्ष्म-परिहारासेवनेन प्रकर्षेण सम्यगासेवितेत्यर्थः अनेकार्थत्वाद्धातूनां "ज्ञपिरासेवनार्थः," [ ] तां चैवम्भूतां षड्जीवनिकायिकां श्रेयो मेऽध्येतुमिति, श्रेयः-पथ्यं हितं, मे इति आत्मनिर्देशः, छान्दसत्वात् सामान्येनात्मनिर्देश इत्यन्ये, ततश्च श्रेय आत्मनोऽध्येतुमिति पठितुं श्रोतुं भावयितुं, कुत इत्याह-अध्ययनं धर्मप्रज्ञप्तिः, "निमित्त-कारण-हेतुषु सर्वासां प्रायोदर्शन"मिति [ ] वचनात्, "हेतौ प्रथमा" अध्ययनत्वात्, अध्यात्मानयनात् चेतसो विशुद्ध्यापादनादित्यर्थः, एतदेव कुत ?, इत्याह-धर्म्मप्रज्ञप्तेः, प्रज्ञपनं प्रज्ञप्तिः, धर्मस्य प्रज्ञप्तिः धर्मप्रज्ञप्तिस्ततो धर्मप्रज्ञप्तेः कारणात् चेतसो विशुद्ध्यापादनं, चेतोविशुद्ध्यापादनाच्च श्रेय आत्मनोऽध्येतुमिति, अन्ये तु व्याचक्षते-अध्ययनं धर्मप्रज्ञप्तिरिति, पूर्वोपन्यस्ताध्ययनस्यैवोपादेयतया अनुवादमात्रमेतदिति ।

**कयरा खलु सा छज्जीवणीयानामज्झयणं समणेणं भगवया महावीरेणं कासवेणं पवेइया सुयक्खाया सुपन्नत्ता, सेयं मे अहिज्जिउं अज्झयणं धम्मपन्नत्ती ।**

**इमा खलु सा छज्जीवणीयानामऽज्झयणं समणेणं भगवया महावीरेणं कासवेणं पवेइया सुयक्खाया सुपन्नत्ता, झेयं से अहिज्जिउं अज्झयणं धम्मपन्नत्ती ।**

(ति) शिष्यः पृच्छति [कयरा'इति] - गुरु राह - [इमा' इति].......... उक्तार्थे सूत्रे

(स.) ततः शिष्यः प्राह – कयरा'इति-उक्तार्थमेव. अनेनैतद्दर्शयति-मानं त्यक्त्वा संवेगिना शिष्येण सर्वकार्येष्वेवं गुरुः प्रष्टव्यः. अथ शिष्येण प्रश्ने कृते गुरुराह-'इमा'इति' एतत्सूत्रमपि उक्तार्थमेव, अनेनाप्येतद्दर्शयति-गुणवते शिष्याय गुरुणापि उपदेशो दातव्य एव.

(सु.) शिष्यः पृच्छति – [कयरा...] कतरा खलु इत्यादि सूत्रमुक्तार्थमेव, अनेनैतद्दर्शयति-विहायाभिमानं संविग्नेन शिष्येण सर्वकार्येष्वेव गुरुः प्रष्टव्य इति ।

आचार्य आह-इमा खल्वित्यादिसूत्रमुक्तार्थमेव, अनेनाप्येतद्दर्शयति गुणवते शिष्याय गुरुणाऽप्युपदेशो दातव्य एवेति ।

**तं जहा-पुढविकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणस्सइकाइया तसकाइया।**

(ति.) तद्यथा-षड्जीवनिकायानाह – पृथ्वी-काठिन्यलक्षणा । आपः-द्रवाः । तेजः-उष्णम् । वायुः-चलनधर्मा । वनस्पतिः-लतादिरूपः । त्रसाः-त्रसनशीलाः । तत्तद्रूपः कायो येषां ते पृथ्वीकायाद्याः। स्वार्थे इकणि [ ] पृथ्वीकायिकाः, अप्कायिकाः, तेजस्कायिकाः, वायुकायिकाः, वनस्पतिकायिकाः, त्रसकायिकाः । इह सर्वभूताधारत्वात् पृथ्व्या इति प्रथमं पृथ्वीकायानामुपन्यासः । ततस्तत्प्रतिष्ठितत्वाद-प्कायिकानाम् । अथ तत्प्रतिपक्षत्वात् तेजस्कायिकानाम् । तदनु तेजस उपष्टम्भ-कत्वाद् वायुकायिकानाम् । अनन्तरं वायोः शाखाप्रचलनादिगम्यत्वाद् वनस्पति-कायिकानाम् । अथ वनस्पतेस्त्रसोपयोगित्वात् त्रसकायिकानामिति ।

(स.) अथ षड्जीवनिकामाह – तंजहा = तद् यथा इति उदाहरणे – पृथिवीकाठिन्यलक्षणा प्रतीता, सैव कायः शरीरं येषां ते पृथिवीकायाः, पृथिवीकाया एव पृथिवीकायिकाः, आपो द्रवाः प्रतीता एव, ता एव कायः शरीरं येषां तेऽप्काया, अप्काया एव अप्कायिकाः, तेंज उष्णस्पर्शलक्षणं प्रतीतं, तदेव कायः शरीरं येषां ते तेजःकायाः, तेजःकाया एव तेजःकायिकाः, वायुश्चलनधर्मः प्रतीत एव, स एव कायः शरीरं येषां ते वायुकायाः, वायुकाया एव वायुकायिकाः, वनस्पतिर्लतादिरूपः प्रतीतः, स एव कायः शरीरं येषां ते वनस्पतिकायास्त एव वनस्पतिकायिकाः, एवं त्रसनशीलास्त्रसाः प्रतीता एव, त एव कायाः शरीराणि येषां ते त्रसकायाः, त्रसकाया एव त्रसकायिकाः,

इह च सर्वभूताधारत्वात् पृथिव्याः प्रथमं पृथिवीकायिकानामभिधानम् ।

**(सु.)** 'तंजहा—पुढविकाइया' इत्यादि, अत्र तद्यथेत्युदाहरणोपन्यासार्थः, पृथिवी-काठिन्यलक्षणा प्रतीता, सैव कायः-शरीरं येषां ते पृथिवीकायाः, पृथिवीकाया एव पृथिवीकायिकाः, स्वार्थिके कप्रत्ययः । आपो-द्रवाः प्रतीतास्ता एव कायः-शरीरं येषां ते अप्काया, अप्काया एव अप्कायिकाः, तेजः-उष्णलक्षणं प्रतीतं, तदेव कायः-शरीरं येषां ते तेजस्कायाः, तेजस्काया एव तेजस्कायिकाः, वायुश्चलनधर्म्मा प्रतीत एव, स एव कायः-शरीरं येषां ते वायुकाया, वायुकाया एव वायुकायिकाः, वनस्पतिः-लतादिरूपः प्रतीतः, स एव कायः-शरीरं येषां ते वनस्पतिकायाः, वनस्पतिकाया एव वनस्पतिकायिकाः, एवं त्रसनशीलास्त्रसाः प्रतीताः, त एव कायाः-शरीराणि येषां ते त्रसकायाः, त्रसकाया एव त्रसकायिकाः । इह च सर्वभूताधारत्वात् पृथिव्याः प्रथमं पृथिवीकायिकानामभिधानं, तदनन्तरं तत्प्रतिष्ठितत्वादप्कायिकानां, तदनन्तमप्प्रतिपक्षत्वात् तेजस्कायिकानां, तदनन्तरं तेजस उपष्टम्भकत्वाद् वायुकायिकानां, तदनन्तरं वायोः शाखाप्रचलनादिगम्यत्वाद् वनस्पतिकायिकानां, तदनन्तरं च वनस्पतेस्त्रसोपग्राहकत्वात् त्रसकायिकानामिति ।

**पुढवी चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं,**

**आऊ चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं,**

**तेऊ चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं,**

**वाऊ चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं,**

**वणस्सई चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं,**

**(ति.)** पुनरेषां जीवत्वं प्रकटयन्नाह — पृथ्वी चित्तमती-सचित्ता अथवा चित्तमात्रा, चित्तं-चैतन्यं, तत् स्तोकम् एकेन्द्रियाणाम्, ततोऽधिकाधिकं द्वीन्द्रियादीनाम् । आख्याता-सर्वज्ञेन कथिता । अनेकजीवाः-असङ्ख्यातजीवाः तेषामेव दृश्यत्वात् ।

तथा चागमः-

एगस्स दुह्न[१] तिह्न य, संखिज्जाण व[२] न पासिउं सक्का ।
दीसंति सरीराइं, पुढविजियाणं असंखिज्जा[३] ।।१।। [ ]

पृथक्सत्त्वा-अङ्गुलासङ्ख्येयभागमात्रावगाहनया अनेकजीवसमाश्रिता[४] ।

---

१. ०ह्नं २.८ ।। २. य ६-८.१० ।। ३. ०खे. ६-८.१० ।। ४. ०ताः ४.५.९.११.१२ ।।

अत्राह परः—यद्येवं जीवपिण्डरूपा पृथ्वी ततस्तत्रोच्चारादिकरणे साधूनामहिंसकत्वानुपपत्तिः ।

अत्रोत्तरम्—शस्त्रपरिणतां[पृथिवीं] विना पृथ्वी चित्तवती । शस्त्राणि चास्याः—अनिला-ऽनल-स्नेहा-ऽऽम्ला-ऽऽलवणादीनि । एवं परिणतपृथ्व्यामुच्चारादिकरणेऽपि साधूनाम-हिंसकत्वम्-इत्यागमः । अनुमानमप्यत्र—सात्मका विद्रुमलवणोपलाद्या, पृथ्वीसमान-जातीयाङ्कुरोत्पत्त्युपलम्भात् भ्रूणमांसाङ्कुरवत् । एवमागमोपपत्तिभ्यां व्यवस्थितं पृथ्वीकायिकानां जीवत्वम् ।

उक्तं च –

आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणं ।

[1]अतीन्द्रियाणामर्थानां, सद्भावप्रतिपादने ।।१।।

आगमो ह्याप्तवचन-माप्तं दोषक्षयाद् विदुः ।

वीतरागोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसम्भवात् ।।२।। [ ]

एवमप्-तेजो-वायु-वनस्पतिसूत्राण्यापि व्याख्येयानि । अनुमानान्यपि चैवम्-सात्मकं जलं भूमिखननाऽभ्रतलतः स्वभावेन सम्भवात्, दर्दुरकाङ्का[2]हिकादिवत् । सात्मकोऽग्निः, आहारेण वृद्धिदर्शनात्, बालवत् । सात्मकः पवनः, अपराप्रेरिततिर्यग्-नियमितदिग्गमनात्, गोवत् । सात्मकास्तरवः, सर्वत्वगपहरणे मरणात्, गर्दभादिवत् ।

**(स.)** विप्रतिपत्ति निरासार्थं पुनराह – 'पुढवी चित्तमंतमक्खाया' पृथिवी चित्तं च जीवलक्षणं, तदस्या अस्तीति चित्तवती सजीवेत्यर्थः 'पाठान्तरं वा -'पुढवी चित्तमत्तमक्खाया,' अत्र मात्रशब्दः स्तोकवाची, यथा सर्षपत्रिभागमात्रं, पृथिवी चित्तमात्रा स्तोकचित्ता इत्यर्थः. तथा च प्रबलमोहोदयात् सर्वजघन्यं चैतन्यमेकेन्द्रियाणां, तदधिकं द्वीन्द्रियाणामिति. आख्याता सर्वज्ञेन कथिता, किंविशिष्टा पृथिवी ? अनेकजीवा अनेके जीवा यस्यां सा अनेकजीवा, न पुनरेकजीवा, यथा—वैदिकानां 'पृथ्वी देवता' इत्येवमादिवचनप्रामाण्यादिति. तथानेकजीवापि कैश्चिदेकभूतात्मापेक्षया मन्यते. यदाहुरेके-

"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः ।

एकधा बहुधा चैव दृश्यते जलचन्द्रवत् १.

१. केवलिगम्यानामर्थानाम् १० टि. ।। २. ०ङ्की. ७.९ ।।

अत एवाह-किंभूता पृथिवी ? 'पुढोसत्ता' पृथक्सत्त्वाः प्राणिनो यस्यां सा पृथक्सत्त्वा, अङ्गुलस्यासंख्येयभागमात्रावगाहनरैनेकैः पार्थिवजीवैः समाश्रितेति भावः । आह— यद्येवं जीवपिण्डरूपा पृथिवी, तदा तस्यामुच्चारादिकरणेन नियमतस्तन्मरणादहिंसाया अनुत्पत्तिः स्यात्, तथा च सति साधुधर्मस्यासंभवः स्यात्. अतोऽत्राह—अन्यत्र शस्त्रपरिणतायाः, शस्त्रपरिणतां पृथिवीं विहायान्या पृथिवी, चित्तवत्याख्याता इत्यर्थः । पृथिव्याः शस्त्रं त्रिधा-स्वकायशस्त्रं, परकायशस्त्रं, तदुभयशस्त्रं च, तत्र स्वकायशस्त्रं— यथा-कृष्णमृद् नीलादिमृदः शस्त्रम्, एवं गन्ध-रस-स्पर्शसंभेदेऽपि शस्त्रयोजना कार्या. परकायशस्त्रं यथा-अप्-तेजःप्रभृतीनां पृथिवी, अथवा पृथिव्या अप्-तेजःप्रभृतयः. तदुभयं यथा-कृष्णमृदुदकस्य पाण्डुमृदश्च परस्परस्पर्शगन्धादिभिः. यदा कृष्णमृदा कलुषितमुदकं भवति तदैषा कृष्णमृदुदकस्य पाण्डुमृदश्च शस्त्रं भवति. एवं च परिणतायां पृथिव्यामुच्चारादिकरणेऽपि नास्ति तन्मरणं, ततोऽहिंसाधर्मः साधूनां संभवत्येव. एवमापश्चित्तवत्य आख्याताः, तेजश्चित्तवदाख्यातं, वायुश्चित्त-वानाख्यातः, वनस्पतिश्चित्तवानाख्यात इत्याद्यपि द्रष्टव्यम् ।।

**(सु.)** विप्रतिपत्तिनिरासार्थं पुनराह—'पुढवी चित्तमंतमक्खाया' पृथिवी-उक्तलक्षणा चित्तं-जीवलक्षणं, तदस्या अस्तीति चित्तवती-सजीवेत्यर्थः, पाठान्तरं वा 'पुढवी चित्तमत्त-मक्खाया,' अत्र मात्रशब्दः स्तोकवाची, यथा "सर्षपत्रिभागमात्रम्"इति, ततश्चित्तमात्रा-स्तोकचित्तेत्यर्थः, तथा च प्रबलमोहोदयात् सर्वजघन्यं चैतन्यमेकेन्द्रियाणां तदधिकं द्वीन्द्रियादीनामिति, आख्याता सर्वज्ञेन कथिता, इयं चानेकजीवा-अनेके जीवा यस्यां सा अनेकजीवा, न पुनरेकजीवा, यथा वैदिकानां "पृथिवी देवता" इत्येवमादिवचनप्रामाण्यादिति। अनेकजीवापि कैश्चिदेकभूतात्मापेक्षयेष्यत एव, यथाहुरेके-

"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ।।१।।"

अत आह—पुढो सत्ता-पृथक् सत्त्वाः-प्राणिनो (आत्मानो) यस्यां सा पृथक्सत्त्वा, अङ्गुलासंख्येयभागमात्रावगाहनया पारमार्थिकानेकजीवसमाश्रितेति भावः, आह-यद्येवं जीवपिण्डरूपा पृथ्वी, ततस्तस्यामुच्चारादिकरणेन नियमतस्तदतिपातादहिंसकत्वानुप-पत्तिरित्यसंभवी साधुधर्म्म इत्याह-अन्यत्र शस्त्रपरिणतायाः-शस्त्रपरिणतां पृथिवीं विहायान्या चित्तवत्याख्यातेत्यर्थः, अथ किं पृथिव्याः शस्त्रं ?, -

"दव्वं सत्थग्गि-विसं-नेहं-ऽबिल-खार-लोणमाईयं ।
भावो उ दुप्पउत्तो वाया काओ अविरई य ।।१।। [दश. नि. २६]
किंची सकायसत्थं, किंची परकाय तदुभयं किंची ।
एयं तु दव्वसत्थं भावे अस्संजमो सत्थं ।।२।।" [दश. नि. २७]

धावनवल्गनोत्खननादिः, एतानि स्वपरव्यापादकत्वात् कर्मबन्ध-निबन्धनत्वात् शस्त्रमिति, तच्च किंचित् स्वकायशस्त्रं—यथा कृष्णा मृन्नीलादिमृदः शस्त्रं, एवं गन्ध-रस-स्पर्शभेदेऽपि शस्त्रयोजना कार्या, तथा किंचित् परकायेऽपि परकायशस्त्रं—यथा पृथ्वी अप्-तेजःप्रभृतीनाम्, अप्-तेजःप्रभूतयो वा पृथिव्याः, तदुभयं किंचिदिति किंचित्तदुभयशस्त्रं भवति, यथा कृष्णा मृद् उदकस्य पाण्डुमृदश्च परस्परं स्पर्शगन्धादिभिः, यदा कृष्णमृदा कलुषितमुदकं भवति तदाऽसौ कृष्णमृदुदकस्य पाण्डुमृदश्च शस्त्रं भवति, एवं च परिणतायां पृथिव्यामुच्चारादिकरणेऽपि नास्ति तदतिपात इत्यहिंसकत्वोपपत्तेः सम्भवी साधुधर्म्म इति । एवमापश्चित्तवत्य आख्याताः, तेजश्चित्तवदाख्यातं, वायुश्चित्तवानाख्यातः, वनस्पतिश्चित्तवानाख्यातः, इत्याद्यपि द्रष्टव्यम् ।

**(तं जहा) अग्गबीया मूलबीया पोरबीया खंधबीया बीयरूहा समुच्छिमा तणलया, वण्णस्सइकाईया सबीया चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं।**

**(ति.)** वनस्पतीनां जीव[त्वं] विशेषेणाह — अग्रबीजाः-कोरण्टकाद्याः । मूलबीजाः-उत्पलकन्दाद्याः । पर्वबीजाः-इक्ष्वाद्याः । स्कन्धबीजाः-शल्लक्याद्याः । बीजरुहाः-शाल्याद्याः । सम्मूर्च्छनं-सम्मूर्च्छा, [१]सम्मूर्च्छया निर्वृताः समूर्च्छिमाः, "भावादिमः" [सि॰ सू॰ ६.४,२१] इतीमः, अबीजाः सर्वसङ्ग्रहार्थं चैतत् । तृणलताः-वनस्पतिकायिकाः, तृणशब्देन तृणजातेः, लताशब्देन वृक्षजातेर्ग्रहणम्। वनस्पतयः-प्रत्येकजीवाऽसङ्ख्यात-जीवा-ऽनन्तजीवाद्यनेकभेदाः । सबीजाः चित्तवन्त- इत्यर्थः प्राग्वत् ।

अत्राशङ्का—किं बीजजीव एव मूलजीवो[२] भवति ?, उतान्यः पृथ्वीकायिकादिः तस्मिन् व्युत्क्रान्ते उत्पद्यते ।

अत्रोत्तरम्-बीजजीव एव व्युत्क्रम्य मूलजीवत्वेनोत्पद्यते, ततः किशलयावस्थामनन्त-जीवाः कुर्वन्ति । तेषां स्थितिक्षये मूलजीव एव तत्तनूं स्वशरीरतया परिणम्यावतिष्ठते।

१. सम्मूर्च्छतया नि. ६-१०.१२ ।। २. ०वी ३-५ ७, वा भवन्त्यु. १ ।।

यावत् प्रथमपत्रं शेषपत्रपुष्पफलाद्यन्ये जीवाः कुर्वन्ति ।

**(स.)** इदानीं वनस्पतिजीवानां विशेषभेदप्रतिपादनार्थमाह—[तं जहा-अग्ग...] तमिति-अग्रं बीजं येषां तेऽग्रबीजाः कोरण्टकादयः, एवं मूलं बीजं येषां ते मूलबीजा उत्पलकन्दादयः, पर्व बीजं येषां ते पर्वबीजा इक्ष्वादयः, स्कन्धो बीजं येषां ते स्कन्धबीजाः शल्लक्यादयः, बीजाद्रोहन्तीति बीजरुहाः शाल्यादयः, संमूर्छन्तीति संमूर्छिमाः प्रसिद्धबीजाभावेऽपि पृथिवीवर्षादिसमुद्भवाः, ते तथाविधास्तृणादयः, न चैते न संभवन्ति दग्धभूमावपि सम्भवात्. तथा तृणलता वनस्पतिकायिका इत्यत्र तृणलताग्रहणं स्वगतानेकभेदसन्दर्शनार्थं. वनस्पतिकायिकग्रहणं सूक्ष्मबादरादि-कानेकवनस्पति भेदसंग्रहार्थम्, एतेन पृथिव्यादीनामपि स्वगता भेदाः सूचिताः. कथमित्याह-पृथिव्यः शर्करादयः, आपोऽवश्याय-मिहिकादयः, अग्नयोऽङ्गार-ज्वालादयः, वायवो झञ्झा-मण्डलिकादयः, एतेऽग्रबीजादयः सबीजाश्चित्तवन्त आख्याताः कथिता इति. एतेन पूर्वकथिता विशेषाः सजीवाः स्वस्वनिबन्धनाश्चित्तवन्त आत्मवन्त आख्याताः कथिताः एते चानेकजीवा इत्यादिकध्रुवगण्डिका पूर्ववत् ।

**(सु.)** इदानीं वनस्पतिजीवविशेषप्रतिपादनायाह-'तंजहा अग्गबीया' इत्यादि, तद् यथा उपन्यासार्थः, अग्रं बीजं येषां ते अग्रबीजाः-कोरण्टकादयः, एवं मूलं बीजं येषां ते मूलबीजाः-उत्पलकन्दादयः, पर्व बीजं येषां ते पर्वबीजाः-इक्ष्वादयः, स्कन्धो बीजं येषां ते स्कन्धबीजाः-शल्लक्यादयः, बीजाद् रोहन्तीति बीजरुहाः-शाल्यादयः, संमूर्च्छन्तीति संमूर्च्छिमाः-प्रसिद्धबीजाभावेन पृथिवीवर्षादिसमुद्भवास्ते तथाविधा-स्तृणादयः, न चैते न संभवन्ति, दग्धभूमावपि संभवात्, तथा तृण-लता-वनस्पतिकायिका इति, अत्र तृणलताग्रहणं स्वगतानेकभेदसंदर्शनार्थं, वनस्पतिकायिकग्रहणं सूक्ष्मबादरा-द्यनेकवनस्पतिभेदसङ्ग्रहार्थं, एतेन पृथिव्यादीनामपि स्वगता भेदाः पृथिवी-शर्करादयः, तथा आपोऽवश्याय-मिहिकादयः, अग्नयः अङ्गार-ज्वालादयः, वायवो झञ्झा-मण्डलिकादयो भेदाः सूचिता इति, सबीजाश्चित्तवन्तः 'आख्याताः'-कथिता इति । एते ह्यनन्तरोदिता वनस्पतिविशेषाः सबीजाः-स्वस्वनिबन्धनाश्चित्तवन्तः-आत्मवन्त आख्याताः-कथिताः । एते चानेकजीवा इत्यादि ध्रुवगण्डिका पूर्ववत् ॥

**से जे पुण इमे अणेगे बहवे तसा पाणा, तं जहा—अंडया पोयया जराउया रसया संसेय(इ)मा समुच्छिमा अब्भिया उववाइया ।**

**(ति.)** अथ त्रसाधिकारे इदमाह – 'से'शब्दः-'अथ'शब्दार्थः । अथ ये पुनरमी । अनेके-अनेकसङ्ख्याः । बहवः-बहुप्रकाराः। त्रसाः-प्राणाः[१] । प्राणाः-उच्छ्वासादयो विद्यन्ते येषां ते, [२]अभ्रादित्वाद् मत्वर्थीयेऽचि प्राणाः = प्राणिनः इत्यर्थः । तद्यथा – अण्डजाः-पक्षिगृहोलिकाद्याः । पोतादि(दे)व जायन्ते इति पोतजाः-हस्तिवल्गुल्यादयः। जरायुवेष्टिता जायन्ते इति जरायुजाः-गो-महिष्यजाविक-मनुष्याद्याः । रसजाः-तक्रा-ऽऽरनालदधितीमनादिषु पायुकृम्याकृतयो-ऽतिसूक्ष्मा भवन्ति । संस्वेदजा-मत्कुण-यूकाद्याः । समूर्च्छनजाः-पिपीलिका-मक्षिकाद्याः। उद्भेदजाः-भुवमुद्भिद्य जाताः, पतङ्ग-खञ्जरीटाद्याः । औपपातिकाः-पल्यङ्के देवदूष्यमध्ये उपपातमात्राज्जाताः, न तु गर्भजाः, देवा नारकाश्च। [नारकास्तु कुम्भीमध्ये-इति शेषः]

**(स.)** इदानीं त्रसाधिकारमाह – से इति-सेशब्दोऽथशब्दार्थः, अथ ये पुनरमी बालादीनामपि प्रसिद्धा अनेके द्वीन्द्रियादिभेदेन बहव एकैकस्यां जातौ त्रसाः, प्राणिनः, त्रसन्तीति त्रसाः प्राणा उच्छ्वासादयो येषां ते प्राणिनः, ते के ?- इत्याह-एष खलु षष्ठो जीवनिकायस्त्रसकाय इति प्रोच्यत इति योगः. तत्राण्डाज्जाता अण्डजाः पक्षिगृह-कोकिलादयः, पोतादिवज्जायन्त इति पोतजास्ते च हस्ति-वल्गुली-चर्मजलौकादयः, जरायुभिर्वेष्टिता जायन्त इति जरायुजा गो-महिष्य-ऽजाविक-मनुष्यादयः, रसाज्जाता रसजा आरनाल-दधि-तेमनादिषु प्रायः कृम्यादयो-ऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाता इति संस्वेदजा मत्कुण-यूकादयः, संमूर्छनाज्जाताः संमूर्छिमाः शलभ-पिपीलिका-मक्षिका-शालूकादयः, [3]उद्भेदाज्जन्म येषां ते उद्भेदजा पतङ्ग-खञ्जरीट-पारिप्ल-वादयः, उपपाताज्जाता उपपातजाः उपपाते वा भवा औपपातिका- देवा नारकाश्च ।।

**(सु.)** इदानीं त्रसाधिकार एतदेवाह – 'से जे पुण इमे' सेशब्दोऽथशब्दार्थः, असावप्युपन्यासार्थः, "अथ प्रक्रिया-प्रश्ना-ऽनन्तर्य-मङ्गलोपन्यास-प्रतिवचन-समुच्चयेषु" इति [ ] वचनात्, अथ ये पुनरमी-बालादीनामपि प्रसिद्धा अनेके-द्वीन्द्रियादिभेदेन बहव एकैकस्यां जातौ, त्रसाः प्राणिनः, त्रस्यन्तीति त्रसाः, प्राणा-उच्छ्वासादय एषां विद्यन्त इति प्राणिनः, तद्यथा-अण्डजा इत्यादि, एष खलु षष्ठो जीवनिकायस्त्रसकायः प्रोच्यत इति योगः, तत्राण्डाज्जाता अण्डजाः-पक्षिगृहिकोलिका(किला)दयः, पोता एव जायन्ते पोतजाः, ते च हस्ति-वल्गुली-चर्मजलौकाप्रभृतयः, जरायुवेष्टिता जायन्त

---

१. णाः उच्छ्वा. १.१० ।। २.अभ्रादिभ्यः [सि.हे.७.२.४६] ३. उद्भेदाज्जायन्त इति विग्रहः साधुः ।

इति जरायुजाः-गोमहिष्यजाविकमनुष्यादयः, रसाज्जाता रसजाः-तक्रा-ऽऽरनाल-दधि-तीमनादिषु पायु-कृम्याकृतयोऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाता इति संस्वेदजाः-मत्कुण-यूकादयः, संमूर्च्छनाज्जाताः संमूर्च्छनजाः-शलभ-पिपीलिका-मक्षिका-शालूरा(का)दयः, उद्भेदाज्जन्म येषां ते उद्भेदजाः-पतङ्ग-खञ्जरीट-पारिप्लवादयः, उपपाताज्जाताः उपपाते भवा उपपातजाः, उपपातेन वा भवा औपपातिका-देवा नारकाश्च ।।

**जेसिं केसिंचि पाणाणं अभिक्कंतं पडिक्कंतं संकुचियं पसारियं रुयं भंतं तसियं पलाइयं आगइ-गइविन्नाया जे य कीडपयंगा जा य कुंथुपिवीलिया-सव्वे बेंदिया[१], सव्वे तेइंदिया, सव्वे चउरिंदिया, सव्वे पंचिंदिया, सव्वे तिरिक्खजोणिया, सव्वे नेरइया, सव्वे मणुया, सव्वे देवा, सव्वे पाणा परमाहम्मिया ।**

**(ति.)** एषां लक्षणमाह—येषां केषांचित् । प्राणानाम्-प्राणिनाम् । अभिक्रान्तम्-अभिमुखं क्रमणम् । प्रतिक्रान्तम्-प्रतिक्रमणम् । सङ्कुचितम्-गात्रसङ्कोचनम् । प्रसारितम्-गात्रस्य विततकरणम् । रुतम्-शब्दकरणम् । भ्रान्तम्-इतश्चेतश्च भ्रमणम् । त्रस्तम्-त्रसनम् उद्वेगात् । पलायितम्-पलायनं, भयान्नाशनम् । तथा आगतेः-कुतश्चित् । गतेः-क्वचित् । विज्ञातारः ।

आह परः—अभिक्रान्त-प्रतिक्रान्ताभ्यां नागति-गत्योः कश्चिद् भेद इति किं भेदेनाभिधानम्? ।

उच्यते—त्रसा हि विज्ञायाभिक्रमण-प्रतिक्रमणे कुर्वन्ति । लतादयस्त्वोघसंज्ञयैव वृत्यादिकं प्रति अभिक्रामन्ति इति ज्ञापनार्थम् ।

ये च कीट-पतङ्गाः-कीटाः-कृमयः, पतङ्गाः-शलभाः । याश्च कुन्थुपिपीलिकाः, किं बहुना ? । सर्वे द्वीन्द्रियाः, सर्वे त्रीन्द्रियाः, सर्वे चतुरिन्द्रियाः, सर्वे पञ्चेन्द्रियाः, सामान्येन । विशेषतश्च सर्वे तिर्यग्योनिकाः, सर्वे नैरयिकाः, सर्वे मनुजाः, सर्वे देवाः। सर्वे प्राणाः-त्रसाः स्थावराश्च । परमधर्मप्रभावमुपचारात् सुखमपि परमधर्मः, तमभिलषन्तीति "क्रीतादित्वाद्" [ ] इकणि, परमधार्मिकाः-सुखाभिलाषिण इत्यर्थः । 'जा या परमाहम्मिया' इत्यत्र दीर्घः प्राकृतत्वात् ।

**(स.)** एतेषामेव लक्षणमाह—येषां केषांचित् सामान्येनैव प्राणिनां जीवानामभिक्रान्तं

१. बेइंदिया इति प्रसिद्धः पाठः ।

भवतीति शेषः. अभिक्रमणमभिक्रान्तं प्रज्ञापकं प्रत्यभिमुखं क्रमणमित्यर्थः, एवं प्रतिक्रान्तं प्रज्ञापनात् प्रतीपं क्रमणमिति भावः, सङ्कुचनं सङ्कुचितं गात्रसंङ्कोचकरणं, प्रसारणं गात्रविततकरणं, रवणं, रुतं शब्दकरणं, भ्रमणं भ्रान्तमितस्ततश्च गमनं, त्रसनं त्रस्तं दुःखोद्वेजनं, पलायितं कुतश्चिन्नाशनं, तथा आगतेः कुतश्चित् क्वचिद् गतेश्च कुतश्चित् क्वचिदेव विन्नाया इति विज्ञातारः. नन्वभिक्रान्त-प्रतिक्रान्ताभ्यामागति-गत्योर्न कश्चिद्भेदः. तदा किमर्थं भेदेनाभिधानमुच्यत ? विज्ञानविशेषज्ञापनार्थं. किमुक्तं भवति ? य एवं विजानन्ति यथा वयमभिक्रमामः प्रतिक्रमामो वा त एवात्र त्रसाः न तु वृतिं प्रत्यभिक्रमणवन्तोऽपि वल्ल्यादय इति. नन्वेवमपि द्वीन्द्रियादीनां त्रसत्वप्रसङ्गः अभिक्रमण-प्रतिक्रमण-भावेऽप्येवंविधज्ञानस्याभावान्नैवमेतत्. हेतुसंज्ञाऽवगतेर्बुद्धिपूर्वकमिव छायात उष्णमुष्णाद्वा छायां प्रतिक्रमणादिभावात्, न चैवं वल्ल्यादीनामभिक्रमणेऽप्योघसंज्ञायाः प्रवृत्तेः. तत्र अथाधिकारागतत्रसभेदानाह—ये च कीट-पतङ्गा इत्यत्र कीटाः कृमयः, एकग्रहणे तज्जातीयानामपि ग्रहणमिति द्वीन्द्रियाः शङ्खादयोऽपि गृह्यन्ते. पतङ्गाः शलभा अत्रापि पूर्ववच्चतुरिन्द्रिया भ्रमरादयोऽपि गृह्यन्ते. तथा यच्च कुन्थु-पिपीलिका इत्यनेन त्रीन्द्रियाः सर्वेऽपि गृह्यन्ते, अतएवाह सर्वे द्वीन्द्रियाः कृम्यादयः, सर्वे त्रीन्द्रिया कुन्थ्वादयः सर्वे चतुरिन्द्रियाः पतङ्गादयः, अत्राह-ननु ये च कीटपतङ्गा इत्यादौ उद्देशव्यत्ययः कथम् ? उच्यते-विचित्रत्वात् सूत्रगतेः, अतन्त्रः सूत्रक्रम इति ज्ञापनार्थं. सर्वे पञ्चेन्द्रियाः सामान्यतो विशेषतः, पुनः सर्वे तिर्यग्योनयो गवादयः, सर्वे नारका रत्नप्रभानारकादि-भेदभिन्नाः, सर्वे मनुजाः कर्मभूमिजादयः, सर्वे देवा भवनवास्यादयः, सर्वशब्दोऽत्रान्य-समस्तदेवभेदानां सत्त्वख्यापनार्थः. सर्व एवैते त्रसाः, न त्वेकेन्द्रिया इव त्रसाः स्थावराश्चेति. उक्तं च-'पृथिव्यम्बुवनस्पतयः स्थावराः, तेजोवायू द्वीन्द्रियादयश्च त्रसाः' [तत्त्वार्थ. अध्य. २, सूत्र १३,१४] इति. सर्वेऽपि प्राणिनः परमधर्माण इति-सर्व एते प्राणिनो द्वीन्द्रियादयः पृथिव्यादयश्च परमधर्माणः परमं सुखं तद्धर्माणो दुःखद्वेषिणः सुखाभिलाषिण इत्यर्थः. यतः कारणादेवं ततो दुःखोदयादिपरिहारवाञ्छया एतेषां षण्णां जीवनिकायानां नैवं स्वयं दण्डं समारभ इति योगः ।।

(सु.) एतेषामेव लक्षणमाह—[जेसिं केसिं यि...]येषां केषाञ्चित् सामान्येनैव प्राणिनां-जीवानामभिक्रान्तं भवतीति वाक्यशेषः, अभिक्रमणमभिक्रान्तं, प्रज्ञापकं प्रत्यभिमुखं क्रमणमित्यर्थः, एवं प्रतिक्रमणं प्रतिक्रान्तं-प्रज्ञापकात् प्रतीपं क्रमणमिति भावः, सङ्कुचनं सङ्कुचितं-गात्रसङ्कोचकरणं, प्रसारणं प्रसारितं-गात्रविततकरणं,

रवणं रुतं-शब्दकरणं, भ्रमणं भ्रान्तमितश्चेतश्च गमनं, त्रसनं त्रस्तं-दुःखोद्वेजनं, पलायनं पलायितं-कुतश्चिन्नाशनं, तथा आगतेः-कुतश्चिज्जातस्य, गतेश्च-कुतश्चित् क्वचिदेव, विन्नाया इति ज्ञातारः । आह-अभिक्रान्त-प्रतिक्रान्ताभ्यां नागति-गत्योः कश्चिद्भेद इति, किमर्थं भेदेनाभिधानं?, उच्यते, विज्ञानविशेषख्यापनार्थम्,, एतदुक्तं भवति-य एवं जानन्ति यथा वयमभिक्रमामः प्रतिक्रमामो वा त्र एव त्रसाः, न तु वृत्तिं प्रत्यभिक्रमणवन्तोऽपि वल्ल्यादय इति । आह-एवमपि द्वींद्रियादीनामत्रसत्वप्रसङ्गः, अभिक्रमण-प्रतिक्रमणभावेऽप्येवंविधज्ञाना-भावात् ?, नैतदेवं, हेतुसंज्ञयाऽवगतेर्बुद्धिपूर्वक-मेव छायात उष्णमुष्णाद्वा छायां प्रति तेषां अभिक्रमणादिभावात्, न चैवं वल्ल्यादी-नामभिक्रमणादि, ओघसंज्ञया प्रवृत्तेरिति। अधिकृतत्रसभेदानाह-'जे य' इत्यादि, ये च कीट-पतङ्गा इत्यत्र कीटाः-कृमयः, "एकग्रहणे तज्जातीयग्रहण" मिति द्वीन्द्रियाः-शङ्खादयोऽपि गृह्यन्ते, पतङ्गाः-शलभाः, अत्रापि पूर्ववच्चतुरिन्द्रिया भ्रमरादयोऽपि गृह्यन्त इति, तथा याश्च कुन्थु-पिपीलिका इत्यनेन त्रीन्द्रियाः सर्वे एव गृह्यन्ते, अत एवाह-सर्वे द्वीन्द्रियाः-कृम्यादयः, सर्वे त्रीन्द्रियाः-कुन्थ्वादयः, सर्वे चतुरिन्द्रियाः-पतङ्गादयः, आह-ये च कीट-पतङ्गा इत्यादावुद्देशव्यत्ययः किमर्थं ?, उच्यते, "विचित्रा सूत्रगतिरतन्त्रः क्रम" इति ज्ञापनार्थं, सर्वे पञ्चेन्द्रियाः सामान्यतो, विशेषतः पुनः सर्वे तिर्यग्योनयो-गवादयः, सर्वे नारका-रत्नप्रभानारकादि-भेदभिन्नाः, सर्वे मनुजाः-कर्म्मभूमिजादयः, सर्वे देवा-भवनवास्यादयः, सर्वशब्दश्चात्र परिशेषभेदानां त्रसत्वख्यापनार्थः, सर्व एव एते त्रसाः, न त्वेकेन्द्रिया इव त्रसाः स्थावराश्चेति, उक्तं च-"पृथिव्यम्बुवनस्पतयः स्थावराः, तेजोवायू द्वीन्द्रियादयश्च त्रसाः" (तत्त्वा० अ० २, सू. १३-१४) इति, सर्वे प्राणिनः परमधर्माण इति, सर्वे एते प्राणिनो द्वीन्द्रियादयः पृथिव्यादयश्च परमधर्म्माण इति, अत्र परमं-सुखं, तद्धर्म्माणः सुखधर्म्माणः, सुखाभिलाषिण इत्यर्थः ।।

**एसो खलु छट्ठो जीवनिकाओ तसकाउ त्ति पवुच्चई ।। (सू.४.१ )**

**(ति.)** [षष्ठं जीवनिकायं पूर्णं कर्तुमाह—एसो... इति]...स्पष्टम् ।

**(स.)** षष्ठं जीवनिकायं पूर्णं कर्तुमाह—'एसो खलु छट्ठो जीवनिकाओ तसकाओ'त्ति उच्चइ, इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभिज्जा' इत्यादि. एष खलु

पूर्वं यः कथितः षष्ठो जीवनिकायः, पृथिव्यादिपञ्चकापेक्षया षष्ठत्वमस्य, त्रसकाय इति प्रोच्यते, तैः सर्वैरेव तीर्थकरगणधरैरिति ।।सूत्र-१।।

(सु.) यतश्चैवमतो दुःखोत्पादपरिजिहीर्षया एतेषां षण्णां जीवनिकायानां नैव स्वयं दण्डं समारभेतेतियोगः । षष्ठं जीवनिकायं निगमयन्नाह—एष खलु अनन्तरोदितः कीटादिः, 'षष्ठो जीवनिकायः' पृथिव्यादिपञ्चकायापेक्षया षष्ठत्वमस्य, त्रसकाय इति प्रोच्यते-प्रकर्षेणोच्यते सर्वैरेव तीर्थकरगणधरैरिति ।।सूत्र-१।।

**इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दण्डं समारंभिज्जा, नेवन्नेहिं दंडं समारंभाविज्जा, दंडं समारंभंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए कायेणं न करेमि न कारवेमि करंतं पि अन्नं न समणुजाणामि तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि । (सू॰ ४.२)**

(ति.) एषां दण्डपरिजिर्हीषया आह—इत्येषां षण्णां जीवनिकायानां नैव स्वयं दण्डं समारम्भे, नैवान्यैर्दण्डं समारम्भये, दण्डं समारभमाणानप्यन्यान् न समनुजानामि-नानुमोदयामि, अत्र प्राकृतत्वात् सप्तमीस्थाने वर्तमानैव व्याख्येया । यावज्जीवनम्-यावज्जीवा "भिदादित्वाद्" [ ] अङि यावज्जीवा, तया यावज्जीवया । त्रिविधम्-करणकारणानुमतिरूपं दण्डम् । त्रिविधेन मनसा वाचा कायेन, न करोमि न कारयामि, कुर्वन्तमप्यन्यं न समनुजानामि। तस्येति पञ्चम्यर्थे षष्ठी, ततः-दण्डात् । "गुरुसाक्षिकी व्रतप्रतिपत्तिः साध्वी" इति भदन्त ! - भवान्त ! भयान्तेति गिरा गुरूनामन्त्र्य प्रतिक्रामामि-निवर्तते । इह वर्तमानक्रियया अतीतानागतप्रतिक्रमणमपि ग्राह्यम्, यष्टेर्मध्यग्रहणे आद्यन्तग्रहणवत्। निन्दामि गर्हे-इति दण्डप्रवृत्तस्यात्मन आत्मसाक्षिकी निन्दा, गुरुसाक्षिकी गर्हा-जुगुप्सा। एतद्दण्डकारिणम्-आत्मानं व्युत्सृजामि-त्यजामि ।। ।।सूत्र-२।।

(स.) एएसिमिति-एतेषां षण्णां जीवनिकायानामिति, अत्र सप्तम्यर्थे षष्ठी, तत एतेषु षट्सु जीवनिकायेषु पूर्वकथितस्वरूपेषु, नैव स्वयमात्मना दण्डं सङ्घट्टन-परितापनादिलक्षणं समारभेत प्रवर्तयेत् तथा नैवान्यैः प्रेष्यादिभिर्दण्डमुक्तरूपं समारम्भयेत् कारयेदित्यर्थः, दण्डं समारभमाणानपि अन्यान् प्राणिनो न समनुजानीयात्, नानुमोदयेदिति विधायकं भगवद्वचनं. यतश्चैवं ? ततो यावज्जीवमित्यादि यावद्व्युत्सृजामि यावज्जीवं यावत्प्राणधारणं तावदित्यर्थः. किमित्याह-त्रिविधं त्रिविधेनेति तिस्रो विधाः कृतादिरूपा

यस्येति त्रिविधो दण्ड इति गम्यते. तं त्रिविधेन करणेन. एतदेव दर्शयति-मनसा वाचा कायेन, एतेषां स्वरूपमेवम्-अस्य च करणस्य कर्म उक्तलक्षणो दण्डः, तं च वस्तुतो निषेधरूपतया सूत्रेणैव दर्शयति-न करोमि स्वयं, न कारयाम्यन्यैः, कुर्वन्तमप्यन्यं न समनुजानामीति. तस्य हे भदन्त ! प्रतिक्रमामीति तस्य इति अधिकृतो योऽसौ त्रिकालविषयो दण्डस्तस्य सम्बन्धेनातीतमवयवं प्रतिक्रमामि, न वर्तमानमनागतं वा. अतीतस्यैव प्रतिक्रमणात्. भदन्तेति गुरोरामन्त्रणम्, भदन्त भवान्त भयान्त इति साधारणी श्रुतिः, अनेनैवं ज्ञापितं-व्रतप्रतिपत्तिर्गुरुसाक्षिक्येव, प्रतिक्रमामीति भूतदण्डादहं निवर्त इत्युक्तं भवति, तस्माच्च निवृत्तिर्यदनुमतेर्विरमणम्. तथा निन्दामि गर्हामि, तत्र निन्दा आत्मसाक्षिकी, गर्हा परसाक्षिकी, जुगुप्सा च आत्मानमतीतदण्डकारिणमश्लाघ्यम् व्युत्सृजामीति विशेषेण भृशं च त्यजामि ।।सूत्र-२।।

**(सु.)** एएसिं...'एतेषां षण्णां जीवनिकायानाम्'इति, "सुपां सुपो भवन्ति'[ ] इति सप्तम्यर्थे षष्ठी, एतेषु षट्सु जीवनिकायेषु अनन्तरोदितस्वरूपेषु नैव 'स्वयं' आत्मना 'दण्डं' सङ्घट्टन-परितापनादिलक्षणं, समारभेत-प्रवर्तयेत्, तथा नैवान्यैः प्रेष्यादिभिर्दण्डमुक्तलक्षणं समारंभयेत्-कारयेदित्यर्थः, दण्डं समारभमाणानप्यन्यान् प्राणिनो न समनुजानीयात्-नानुमोदयेदिति विधायकं भगवद्वचनं, यतश्चैवमतो यावज्जीवमित्यादि यावद्व्युत्सृजामीत्येवमिदं सम्यक् प्रतिपद्येतेत्यैदम्पर्यम्, पदार्थस्तु जीवनं जीवो, यावज्जीवं-आप्राणोपरमादित्यर्थः, किमित्याह-त्रिविधं त्रिविधेनेति तिस्रो विधाः-विधानानि कृतादिरूपाणि यस्येति त्रिविधो, दण्ड इति गम्यते, तं त्रिविधेन करणेनेति, एतदेवोपन्यस्यति, मनसा वचसा कायेन, एतेषां स्वरूपं प्रसिद्धमेव, अस्य च करणस्य कर्म उक्तलक्षणो दण्डः, तं वस्तुतो निराकार्यतया सूत्रेणैवोपन्यस्यन्नाह, तत्त्वतः न करोमि स्वयं, न कारयाम्यन्यैः, कुर्वन्तमपि अन्यं न समनुजानामीति, तस्य भदन्त ! प्रतिक्रमामि इति तस्येत्यधिकृतो दण्डः, योऽसौ त्रिकालविषयो दण्डस्तस्य संबन्धिनमतीतमवयवं प्रतिक्रमामि, न वर्तमानमनागतं वा, अतीतस्यैव प्रतिक्रमणात्, प्रत्युत्पन्नस्य संवरणाद् अनागतस्य प्रत्याख्यानादिति, भदन्तेति गुरोरामन्त्रणं, भदन्त ! भवान्त ! भयान्त ! इति साधारणा श्रुतिः, एतच्च गुरुसाक्षिक्येव व्रतप्रतिपत्तिः साध्वीति ज्ञापनार्थं, प्रतिक्रमामीतिभूताद् दण्डान्निवर्त्तेऽहमित्युक्तं भवति, तस्माच्च निवृत्तिर्यत्, तदनुमतेर्विरमणमिति, तथा निन्दामि गरिहामीति आत्मसाक्षिकी निन्दा, परसाक्षिकी गर्हा-जुगुप्सोच्यते, आत्मानमतीतदण्डकारिणमश्लाघ्यं व्युत्सृजामीति,

विविधार्थो विशेषार्थो वा विशब्दः, उच्छद्बो भृशार्थः सृजामि-त्यजामि, ततश्च विविधं विशेषेण वा भृशं त्यजामि व्युत्सृजामि, आह—यद्येवमतीतदण्डप्रतिक्रमणमात्रमस्यैदम्पर्यं न प्रत्युत्पन्नसंवरणमनागत-प्रत्याख्यानं चेति, नैतदेवं, न करोमीत्यादिना तदुभयसिद्धेरिति ।।सूत्र-२।। अयं चात्मप्रतिप्रत्त्यर्हो दण्डः, सामान्यविशेषरूप इति, सामान्येनोक्तलक्षण एव, स तु विशेषतः पञ्चमहाव्रतरूपतया अङ्गीकर्तव्य इति महाव्रतान्याह-

**पढमे भंते महव्वए पाणाइवायाओ वेरमणं, सव्वं भंते पाणाइवायं पच्चक्खामि, से सुहुमं वा बायरं वा तसं वा थावरं वा, नेव सयं पाणे अइवाइज्जा, नेवन्नेहिं पाणे अइवायाविज्जा, पाणे अइवायंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते, पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।**

**(ति.)** एष सामान्येन षड्जीवकायदण्डनिषेध उक्तः, विशेषतश्च महाव्रतरूपतया स्वीकार्यः। अतो महाव्रतान्याह — प्रथमे भदंत ! महाव्रते-श्रावकाणुव्रतापेक्षया महति व्रते । प्राणाः-इन्द्रियादयः,

तथा चोक्तम् -

**पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिच्छ्वासमथान्यदायुः ।**
**प्राणा दशैते भगवद्भिरुक्तास्-तेषां वियोगीकरणं च हिंसा ।।१।।**

इन्द्रवज्रा [ ]

तेषामतिपातः प्राणातिपातः-जीवस्य दुःखोत्पादनं, न तु जीवातिपातः, तस्य नित्यत्वात् । तस्माद् विरमणम्-निवर्तनं भगवतोक्तमिति शेषः । सर्वं भदन्त ! प्राणातिपातं प्रत्याख्यामि-प्रति-अविरतिप्रातिकूल्येन, आ-सामस्त्येन, ख्यामि-प्रतिषेधामि, प्राणातिपातविरतिं करोमीत्यर्थः । अथ सूक्ष्मं वा बादरं वा-अत्र सूक्ष्मः-अल्पः[1] परिग्रहः, न तु सूक्ष्मनामकर्मोदयात् सूक्ष्मः, तस्य व्यापादनाभावात्, बादरः-स्थूलः । एकैकोऽपि द्विधा-त्रसः स्थावरश्च-सूक्ष्मस्त्रसः कुन्थ्वादिः, सूक्ष्मस्थावरः पनकादिः, बादरस्त्रसो गवादिः, बादरस्थावरः पृथ्व्यादिः । नेव सयं पाणे इत्यादि स्पष्टं प्राग्वत् ।

**(स.)** [वोसिरामि इति] अयं चात्मप्रत्ययो दण्डः, सामान्यविशेषभेदाद् द्वेधा, तत्र

१. ल्पविग्रहः २.११ ।।

सामान्येन पूर्वं कथितः, स एव विशेषेण महाव्रतरूपतया आह सूत्रक्रमेण—पढम इति-प्रथमे, भदंत हे गुरो ! महाव्रते. महच्च तद् व्रतं च महाव्रतं महत्त्वं चाणुव्रतापेक्षया, तस्मिन् महाव्रते प्राणातिपाताद्विरमणे, प्राणा एकेन्द्रियास्तेषामतिपातः प्राणातिपातो जीवस्य महादुःखोत्पादनं, न तु जीवातिपात एव तस्माद्विरमणं नाम सम्यग्ज्ञान-श्रद्धानपूर्वकं सर्वथा निवर्तनं भगवता कथितमिति शेषः यतश्चैवमत उपादेयमिति निश्चित्य सर्वं हे भदन्त ! प्राणातिपातं प्रत्याख्यामीति. सर्वं समस्तं, न तु परिस्थूलमेव. हे भदन्त हे गुरो ! प्राणातिपातव्याख्यानं पूर्ववत् प्रत्याख्यामि निषेधयामि. अथ प्राणातिपातं प्रत्याख्यामीत्युक्तं तद्विशेषतो वक्तुमाह-से शब्दो मागधीभाषाप्रसिद्धो-ऽथशब्दार्थः. तद्यथा-सूक्ष्मं वा बादरं वा त्रसं वा स्थावरं वा. अत्र सूक्ष्मोऽल्पः परिगृह्यते, न तु सूक्ष्मनाम-कर्मोदयात् सूक्ष्मः, कथं ? तस्य कायेन व्यापादनस्याभावात्. बादरोऽपि स चैकैको द्विधा, त्रसः स्थावरश्च, तत्र त्रसः सूक्ष्मः कुन्थ्वादिः, स्थावरः सूक्ष्मो वनस्पत्यादिः बादरस्त्रसो गवादिः, बादरः स्थावरः पृथिव्यादिः, एतान् 'नैव सयं पाणे अइवाइज्जत्ति' नैव स्वयं प्राणिनोऽतिपातयामि, नैव अन्यैः प्राणिनोऽतिपातयामि, प्राणिनोऽतिपातयतोऽप्यन्यान्न समनुजानामि, यावज्जीवमित्यादि पूर्ववत् ।।

**(सु.)** [...वोसिरामि० इति] अयं चात्मप्रतिपत्त्यर्होदण्डः, सामान्यविशेषसूत्रः इति, सामान्येनोक्तलक्षण एव. स तु विशेषतः पञ्च महाव्रतरूपतया अङ्गीकर्तव्यः इति महाव्रतान्याह—पढमे भंते ! इति, सूत्रक्रमप्रामाण्यात् प्राणातिपातविरमणं प्रथमं तस्मिन् प्रथमे भदन्तेति गुरोरामन्त्रणं, महाव्रत इति, महच्च तद् व्रतं च महाव्रतं, महत्त्वमणुव्रतापेक्षया महाव्रते प्राणातिपाताद्विरमणं इति, प्राणा-इन्द्रियादयः, तेषामतिपातः प्राणातिपातः-जीवस्य महादुःखोत्पादनं, न तु जीवातिपात एव, तस्माद् विरमणं नाम सम्यग्ज्ञानश्रद्धान-पूर्वकं सर्वथा निवर्त्तनं, भगवतोक्तमिति वाक्यशेषः, यतश्चैवमत उपादेयमेतदिति विनिश्चित्य 'सर्वं भदन्त ! प्राणातिपातं प्रत्याख्यामी'ति सर्वं-निरवशेषं, न तु परिस्थूरमेव, भदन्तेति गुर्वामन्त्रणं प्राणातिपातमिति पूर्ववत्, प्रत्याख्यामीति-प्रतिशब्दः प्रतिषेधे, आङाभिमुख्ये, ख्या प्रकथने, प्रतीपमभिमुखं ख्यापनं प्राणातिपातस्य करोमि प्रत्याख्यामीति, अथवा प्रत्याचक्षे-संवृतात्मा साम्प्रतमनागतप्रतिषेधस्या-दरेणाभिधानं करोमीत्यर्थः, अनेन व्रतार्थपरिज्ञानादिगुणयुक्त उपस्थापनार्ह इत्येतदाह-उक्तं च-"पढिए० ।।१।।" इत्यादि, तदेतद्विशेषेणाभिधित्सुराह-से सुहुमं वेत्यादि, सेशब्दो मागधदेशीप्रसिद्धः, अथशब्दार्थः, स चोपन्यासे, तद्यथा-'सूक्ष्मं वा बादरं वा

त्रसं वा स्थावरं वा, अत्र सूक्ष्मोऽल्पः परिगृह्यते, न तु सूक्ष्मनामकर्मोदयात् सूक्ष्मः, तस्य कायेन व्यापादनासम्भवात्, बादरोऽपि स्थूरः, स चैकैको द्विधा-त्रसः स्थावरश्च, सूक्ष्मत्रसः-कुन्थ्वादिः, स्थावरो-वनस्पत्यादिः, बादरस्त्रसो गवादिः, स्थावरः पृथिव्यादिः, एतान्, 'नेव सयं पाणे अतिवाएज्ज'त्ति नैव स्वयं प्राणिनो व्यतिपातयामि, नैवान्यैः प्राणिनोऽतिपातयामि, प्राणिनोऽतिपातयतोऽप्यन्यान्न समनुजानामि यावज्जीवमित्यादि पूर्ववत्,

**पढमे भंते महव्वए उवट्ठिओमि सव्वाओ पाणाइवायाओ वेरमणं ।।१।। (सू.४.३)**

**(ति.)** निगमनमाह—उपस्थितोऽस्मि-उप-सामीप्येन तत्परिणामापत्त्या स्थितः । इतः आरभ्य मम सर्वस्मात् प्राणातिपाताद् विरमणम् । अत्र पुनर्भदन्तग्रहणं स्वीकृतमपि व्रतं पुनर्गुरोर्निवेदितमाराधितं स्यादित्येतदर्थम् उक्तं प्रथमं महाव्रतम् ।।सूत्र-३।।

**(स.)** व्रतप्रतिपत्तिं पूर्णांकुर्वन्नाह—प्रथमे भदन्त ! महाव्रते उपस्थितोऽस्मि, उप सामीप्येन तस्य परिणामस्यापत्त्या स्थितः इत आरभ्य मम सर्वस्मात् प्राणातिपाताद् विरमणम् ।।१।। उक्तं प्रथमम् ।।

**(सु.)** व्रतप्रतिप्रत्तिं निगमयन्नाह-प्रथमे भदन्त ! महव्वए उप-सामीप्येन तत्परिणामापत्त्या स्थितः, इत आरभ्य सर्व्वस्मात् प्राणातिपाताद् विरमणमिति, भदन्त ! अनेन चादिमध्यावसानेषु गुरुमनापृच्छ्य न किंचित्कर्तव्यं, कृतं च तस्मै निवेदनीयमेवं तदाराधितं भवति, एतदेवाह-सर्व्वस्मात् प्राणातिपाताद् विरमणमिति, महाव्रते उपस्थितोऽस्मि सर्वस्मात् प्राणातिपाताद्-विरमणमिति ।३। उक्तं च प्रथमं महाव्रतम् ।।

**अहावरे दुच्चे भंते महव्वए मुसावायाओ वेरमणं, सव्वं भंते मुसावायं पच्चक्खामि, से कोहा वा लोहा वा भया वा हासा वा, नेव सयं मुसं वएज्जा, नेवन्नेहिं मुसं वायाविज्जा, मुसं वायंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि । दुच्चे भंते महव्वए उवट्ठिओ मि सव्वाओ मुसावायाओ वेरमणं ।।२।। (सू.४.४)**

**(ति.)** द्वितीयमाह—[अहावरे दुच्चे.... मुसावायाओ वेरमणं ।।२।। सू. ४।।] अर्थः प्राग्वत् । उक्तं द्वितीयं महाव्रतम्।

**(स.)** अथ द्वितीयं व्रतमाह—अहावरे इति-अथापरस्मिन् द्वितीये भदन्त ! महाव्रते मृषावादाद् विरमणं. सर्वं हे भदन्त ! मृषावादं प्रत्याख्यामीति पूर्ववत्, तद्यथा-क्रोधान्नैव मृषावादं वदामीत्युक्तिः, एवं लोभाद् वा, "आद्यन्तयोर्ग्रहणे मध्यस्यापि ग्रहणम्" इति न्यायान्मान-माययोर्ग्रहणं, ततो मानाद् वा, मायाया वा, पुनर्भयाद् वा हासाद् वा, उपलक्षणत्वात् प्रेमतो वा द्वेषतो वा अभ्याख्यानादितो वा नैव मृषा स्वयं वदामि, नैव मृषाऽन्यैर्वादयामि, नैव मृषा वदतोऽप्यन्यान् समनुजानामि यावज्जीवमित्यादि पूर्ववत्. ।।२।। उक्तं द्वितीयं व्रतम् ।।

**(सु.)** इदानीं द्वितीयमाह-'अहावरे' इति, अथापरस्मिन् द्वितीये भदन्त ! महाव्रते मृषावादाद् विरमणं, सर्वं भदन्त ! मृषावादं प्रत्याख्यामीति पूर्ववत्, तद् यथा-क्रोधाद् वा लोभाद् वा इत्यनेनाद्यन्तग्रहणात् मानमायापरिग्रहः, भयाद् वा हास्याद् वा इत्यनेन प्रेम-द्वेष-कलहा-ऽभ्याख्यानादिपरिग्रहः, नेव सयं मुसं वइज्जा त्ति, नैवं स्वयं मृषा वदामि, नैवान्यैर्मृषा वादयामि, मृषा वदतोऽप्यन्यान्न समनुजानामीत्येतद् यावज्जीव-मित्यादि च भावार्थमधिकृत्य पूर्ववत् ।४। उक्तं द्वितीयं महाव्रतम् ।

**अहावरे तच्चे भंते महव्वए अदिन्नादाणाओ वेरमणं, सव्वं भंते अदिन्नादाणं पच्चक्खामि, से गामे वा नगरे वा रन्ने वा अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा, नेव सयं अदिन्नं गिह्णिज्जा, नेवन्नेहिं अदिन्नं गिह्णाविज्जा, अदिन्नं गिह्णंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि । तच्चे भंते महव्वए उवट्ठिओ मि सव्वाओ अदिन्नादाणाओ वेरमणं ।।३।। (सू.४.५)**

**(ति.)** तृतीयमाह – [ ] अहावरे तच्चे [ ] अर्थः प्राग्वत्, । उक्तं तृतीयं महाव्रतम्

**(स.)** अथ तृतीयं व्रतमाह—अहावरे इति-अथापरस्मिंस्तृतीये हे भदन्त ! महाव्रतेऽदत्तादानाद् विरमणं, सर्वं हे भदन्त ! अदत्तादानं प्रत्याख्यामीत्यादि पूर्ववत्. तद्यथा-ग्रामे वा नगरे वाऽरण्ये वा, उपलक्षणत्वात् क्षेत्रे वा प्रसिद्धान्येतानि. तथाल्पं मूल्यत एरण्डकाष्ठादिद्रव्यं, बहु वा मूल्यतो वज्रादिद्रव्यं, अणु वा प्रमाणतो वज्रादिद्रव्यं, स्थूलं वा एरण्डकाष्ठादिद्रव्यम् एतच्च चित्तवद् वा सचेतनम्, अचित्तवद् वा अचेतनं, नैव स्वयमदत्तं गृह्णामि, नैवान्यैरदत्तं ग्राहयामि, नैवादत्तं गृह्णतोऽप्यभ्यान् समनुजानामि

यावज्जीवमित्यादिव्याख्यानं पूर्ववत्. ३. उक्तं तृतीयं व्रतम् ।।

**(सु.)** अधुना तृतीयमाह - [अहावरे तच्चे...] अथापरस्मिन् तृतीये भदन्त ! महाव्रते अदत्तादानाद् विरमणं, सर्वं भदन्त ! अदत्तादानं प्रत्याख्यामीति पूर्ववत्, तद्यथा-ग्रामे वा नगरे वा अरण्ये वा इत्यनेन क्षेत्रपरिग्रहः प्रसिद्धान्येतानि, तथा अल्पं वा बहु वा अणु वा स्थूलं वा, चित्तवद् वा अचित्तवद् वा इत्यनेन तु द्रव्यपरिग्रहः, तत्र अल्पं-मूल्यत एरण्डकाष्ठादि बहु-वज्रादि, अणु-प्रमाणतो वज्रादि, स्थूलमेरण्डकाष्ठादि, एतच्च चित्तवद् वा अचित्तवद् वेति-चेतनाचेतनमित्यर्थः, 'नेव सयं अदिन्नं गेण्हेज्जा'इति, नैव स्वयमदत्तं गृह्णामि नैवान्यैरदत्तं ग्राहयामि, अदत्तं गृह्णतोऽप्यन्यान्न समनुजानामीत्येद् यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत् ।५। उक्तं तृतीयं महाव्रतम् ।।

**अहावरे चउत्थे भंते महव्वए मेहुणाओ वेरमणं, सव्वं भंते मेहुणं पच्चक्खामि, से दिव्वं वा माणुसं वा तिरिक्खजोणियं वा नेव सयं मेहुणं सेविज्जा, नेवन्नेहिं मेहुणं सेवाविज्जा, मेहुणं सेवंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि । चउत्थे भंते महव्वए उवट्ठिओमि सव्वाओ मेहुणाओ वेरमणं ।।४।। (सू०४.६)**

**(ति.)** चतुर्थमाह—[अहावरे चउत्थे।] अर्थः प्राग्वत् । उक्तं चतुर्थं महाव्रतम्

**(स.)** अधुना चतुर्थं व्रतमाह—अहावरे इति-अथापरस्मिन् चतुर्थे हे भदन्त! महाव्रते मैथुनाद् विरमणं. सर्वं हे भदन्त ! मैथुनं प्रत्याख्यामि, तद्यथा-मैथुनं त्रेधा-दैवं वा, मानुषं वा, तैर्यग्यौनं वा, तत्र देवानामिदं दैवं = देवदेवीसम्बन्धि, एवं मानुषं तैर्यग्योनिकं च ज्ञातव्यं; न स्वयं मैथुंन सेवे, न चान्यैर्मैथुनं सेवयामि, नैव मैथुनं सेवमानानन्यान् समनुजानामीति. यावज्जीवमित्यादि व्याख्यानं पूर्ववत्. ४. उक्तं चतुर्थं व्रतम्,

**(सु.)** इदानीं चतुर्थमाह-'अहावरे' इत्यादि, अथापरस्मिन् चतुर्थे भदन्त ! महाव्रते मैथुनाद् विरमणं, सर्वं भदन्त ! मैथुनं प्रत्याख्यामीति पूर्ववत्, तद्यथा-दैवं वा मानुषं वा तैर्यग्योनं वा, अनेन द्रव्यपरिग्रहः, 'नेव सयं मेहुणं सेवेज्जा' नैव स्वयं मैथुनं सेवे, न चान्यैर्मैथुनं सेवयामि, मैथुनं सेवमानानप्यन्यान्न समनुजानामीत्येतद् यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत् ।६। उक्तं चतुर्थं महाव्रतम् ।।

**अहावरे पंचमे भंते महव्वए परिग्गहाओ वेरमणं, सव्वं भंते परिग्गहं पच्चक्खामि, से अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा, नेव सयं परिग्गहं परिगिण्हिज्जा, नेवन्नेहिं परिग्गहं परिगिण्हाविज्जा, परिग्गहं परिगिण्हंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि । पंचमे भंते महव्वए उवट्ठिओ मि सव्वाओ परिग्गहाओ वेरमणं ।।५।। (सू.४.७)**

**(ति.)** पञ्चममाह-अहावरे पंचमे... अर्थः प्राग्वत् । उक्तं पञ्चमं महाव्रतम्,

**(स.)** साम्प्रतं पञ्चमं महाव्रत (मुच्यते) माह—अहावरे इति-अथापरस्मिन् पञ्चमे हे भदन्त ! महाव्रते परिग्रहाद् विरमणं. सर्वं हे भदन्त ! परिग्रहं प्रत्याख्यामीति पूर्ववत्, तद्यथा-नैव स्वयं परिग्रहं परिगृह्णामि, नैवान्यैः परिग्रहं परिग्राहयामि, परिग्रहं परिगृह्णतोऽप्यन्यान्न समनुजानामि. इत्येतद्यावज्जीवमित्यादि च व्याख्यानं च पूर्ववत्. ५. उक्तं च पञ्चमं महाव्रतम् ।।

**(सु.)** इदानीं पञ्चममाह—'अहावरे' इत्यादि, अथापरस्मिन् पञ्चमे भदन्त ! महाव्रते परिग्रहाद् विरमणं, सर्वं भदन्त ! परिग्रहं प्रत्याख्यामीति पूर्ववत्, तद्यथा-अल्पं वेत्यादि अवयवव्याख्याऽपि पूर्ववदेव, 'नेव सयं परिग्गहं परिगेण्हेज्जा' नैव स्वयं परिग्रहं परिगृह्णामि, नैवान्यैः परिग्रहं परिग्राहयामि, परिग्रहं परिगृह्णतोऽप्यन्यान्न समनुजानामीत्येतद् यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत् ।७। उक्तं पञ्चमं महाव्रतम् ।।

**[1]अहावरे छट्ठे भंते ! वए राईभोयणाओ वेरमणं, सव्वं भंते ! राईभोयणं पच्चक्खामि, से असणं वा पाणं वा खाइमं वा साइमं वा, नेव सयं राइं भुंजिज्जा, नेवन्नेहिं राइं भुंजाविज्जा, राइं भुंजंते वि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, काएणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि । छट्ठे भंते ! वए उवट्ठिओमि सव्वाओ राईभोअणाओ वेरमणं ।।६।। (सू.४.८)**

---

१. छट्ठे भं. १.४.६.१२ ।।

(ति.) षष्ठं व्रतमाह—[अहावरे छट्ठे...] अस्याप्यर्थः प्राग्वत् ।

(स.) अधुना षष्ठं व्रतमाह—अहेति-अथापरस्मिन् षष्ठे व्रते रात्रिभोजनाद् विरमणं. सर्वं हे भदन्त ! रात्रिभोजनं प्रत्याख्यामि, तद्यथा-अश्यत इति अशनमोदनादि. पीयते तत् पानं द्राक्षापानादि, खाद्यत इति खाद्यं [1]जम्बूकादि, स्वाद्यं ताम्बूलादि, नैव स्वयं रात्रौ भुञ्जे, नैवान्यै रात्रौ भोजयामि, रात्रौ भुञ्जानानप्यन्यान्न समनुजानामि, इत्येतद्यावज्जीवमित्यादि पूर्ववत्. ६ ।।

(सु.) अधुना षष्ठं व्रतमाह—'अहावरे' इत्यादि, अथापरस्मिन् षष्ठे व्रते रात्रिभोजनाद् विरमणं, सर्वं भदन्त ! रात्रिभोजनं प्रत्याख्यामीति पूर्ववत्, तद्यथा-अशनं वा पानं वा खाद्यं वा स्वाद्यं वा, अश्यत इति अशनं-ओदनादि, पीयत इति पानं-मृद्वीकापानमित्यादि, खाद्यत इति खाद्यं-खर्जूरादि, स्वाद्यत इति स्वाद्यं-तांबूलादि, 'नेव सयं राइं भुंजिज्जा' नैव स्वयं रात्रौ भुञ्जे, नैवान्यै रात्रौ भोजयामि, रात्रौ भुञ्जानानप्यन्यान्नैव समनुजानामीत्येद् यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत् । एतच्च रात्रिभोजनविरमणं प्रथम-चरमतीर्थकरतीर्थयोः ऋजुजड—वक्रजड-पुरुषापेक्षया मूलगुणत्वख्यापनार्थं पंचममहाव्रतोपरि पठितं, मध्यमतीर्थकरतीर्थेषु पुनः ऋजु-प्रज्ञपुरुषापेक्षयोत्तरगुणवर्ग इति ।८।

**इच्चेइयाइं पंच महव्वयाइं, राइभोयणवेरमणछट्ठाइं ।**
**अत्तहियट्ठाए, उवसंपज्जित्ता णं विहरामि ।। (सू० ४.९)**

(ति.) एषां निगमनमाह—इत्येतानि पंच महाव्रतानि रात्रिभोजनविरमणषष्ठानि, आत्महितः-मोक्षः। तदर्थम् । उपसम्पद्य-स्वीकृत्य । विहरामि-साधुविहारेण ।।

इह षड्जीवनिकायिकासम्बद्धानि महाव्रतान्येतदर्थमुक्तानि, येनाभिनवशिष्य एतदर्थज्ञातैवोपस्थापनार्हो भवति । उक्तं च -

पढिए य कहिय अहिगय, परिहर उवट्ठावणाइ जोगु त्ति ।
छक्कं तीहिं विसुद्धं, परिहर नवएण भेएण ।।१।। [ ]

१. खर्जूरादीति ह ।

पडयासाउ रमाई, दिट्ठंता हुंति वयसमारुहणे ।

जहमलिणाहसु दोसा, सुद्धाइसु नेव मिहइं पि ।।२।। [ ]

एतयोर्लेशोद्देशेनार्थः कथ्यते-पठितायां शास्त्रपरिज्ञायामाचाराङ्गप्रथमाध्ययनरूपायां, दशवैकालिकषड्जीवनिकायिकायां वा "सुयं मे आउसं तेणं" इत्यादि "इच्चेयं छज्जीवणियं सम्मदिट्ठी सया जए" इति गाथान्तायाम्, अर्थतः कथितायाम्-मनोवाक्कायैः कृतकारितानुमतिभेदेन सम्यगधिगतायाम् । परिहरति-अधिगतषड्जीवनिकायस्य शैक्षस्योपस्थापनार्थं परीक्षा क्रियते । सा चैवम् गीतार्थसाधुः शैक्षं पृष्ठतः कृत्वा बहिर्गच्छन् हरितकायोपरि भागेन गच्छति, ततः शैक्षोऽपि यद्युपरि गच्छति तन्नोपस्थापनार्हः, यदि च स्वयं स्थित्वैवं वक्ति "गणिमिश्राः ! साधूनां हरित्कायोपरि गन्तुं न बुध्यते, तत्कथं यूयं गता" इति, ततो गीतार्थः साधुः शीघ्रं वलति, वक्ति च "क्षुल्लक ! अपचित्ततया वयं गताः, अत्रार्थे मिथ्या मे दुःकृतम्" इत्युक्त्वा गुरुपार्श्वे गत्वा सर्वं निवेदयति । ततो गुरवः षड्जीवनिकायविराधनापरिहरणाद् योग्य इति । 'छक्कं'ति-षट्कं षड्जीवनिकायरूपं परिहरति । नवकेन भेदेन-नवभिभेदैर्मनसा परिहरति, परिहारयति, परिहरन्तमनुमोदते, एवं वाचा, एवं कायेन, इति ज्ञात्वा शैक्षमुपस्थापयन्ति, नान्यथा ।

अत्र पटादयो दृष्टान्ताः—मइलो पडो न रंगिज्जइ, सोहिओ रंगिज्जइ । असोहिए मूलपाए पासाओ न किज्जइ, सोहिए किज्जइ । वमणाईहिं असोहिए आउरे ओसहं न दिज्जइ, सोहिए दिज्जइ । असंठविए[असंस्कृते] रयणे आहरणे पडिबंधो न किज्जइ, संठविए किज्जइ । एवं पढियकहियाईहिं असोहीए सीसे वयारोवो न किज्जइ, सोहिए किज्जइ । असोहियकरणे गुरुणो दोसो, सोहियस्स अपालणे सीसस्स दोसु त्ति कृतं प्रसङ्गेन ।

**(स.)** इच्चे इति-एतच्च रात्रिभोजनविरमणं प्रथम-चरमतीर्थङ्करतीर्थयोः ऋजुजड-वक्रजडपुरुषापेक्षया मूलगुणत्वख्यापनार्थं पञ्चमहाव्रतोपरि पठितं, मध्यमतीर्थकर-तीर्थेषु पुनः ऋजुप्राज्ञपुरुषापेक्षयोत्तरगुण इति. समस्तव्रतानामङ्गीकारकरणकथनार्थमाह-इत्येतानि पूर्वं कथितानि पञ्च महाव्रतानि रात्रिभोजनविरमणषष्ठानि. किमित्याह-

आत्महिताय. आत्महितो मोक्षस्तदर्थमुपसम्पद्य सामीप्येनाङ्गीकृत्य व्रतानि, विहरामि सुसाधुविहारेण.

**(सु.)** समस्तव्रताभ्युपगमख्यापनायाह—'इच्चेयाइं पंचमहव्वयाइं' इत्यादि, इत्येतानि अनन्तरोदितानि पञ्च महाव्रतानि रात्रिभोजनविरमणषष्ठानि, किमित्याह-आत्महितार्थे आत्महितो-मोक्षस्तदर्थं, अनेनान्यार्थं तत्त्वतो व्रताभावमाह तदभिलाषानुमत्या हिंसादावनुमत्यादिभावात्, उपसम्पद्य-सामीप्येनाङ्गीकृत्य व्रतानि 'विहरामि' सुसाधु-विहारेण, तदभावेऽङ्गीकृतानामपि व्रतानामभावात्, दोषाश्च हिंसादिकर्तॄणामल्पायु-र्जिह्वाच्छेद-दारिद्रय-पण्डक-दुःखितत्वादयो वाच्या इति ।९।

**से भिक्खू वा भिक्खुणी वा संजय-विरय-पडिहयपच्चक्खायपावकम्मे दिया वा राउ[1] वा एगउ[1] वा परिसागउ[1] वा सुत्ते वा जागरमाणे वा ।**

**(ति.)** अधुना षड्जीवनीकाययतनामाह—से'-इति योऽसौ महाव्रतयुक्तः । भिक्षुर्वा भिक्षुणी वा-आरम्भपरित्यागात् धर्मपरिपालनाय भिक्षणशीलो भिक्षुः, एवं भिक्षुक्यपि, पुरुषज्येष्ठो धर्म इति भिक्षुर्विशेष्यते, तद्विशेषणानि भिक्षुक्या अपि ज्ञेयानीत्याह । संयत-विरत-प्रतिहत-प्रत्याख्यातपापकर्मा-सम्यग् यतः-संयतः सप्तदशविधसंयमोपेतः, विविधे द्वादशप्रकारे तपसि रतः-विरतः, प्रतिहतं स्थितिह्रासतो ग्रन्थिभेदेन, प्रत्याख्यातं हेत्वभावाद् [2]वृद्ध्यभावेन पापकर्म ज्ञानावरणीयादि येन स । तथा दिवा वा रात्रौ वा एको वा-कारणात् । परिषं गतः शेषकालम् । सुप्तो वा जाग्रद् वा इदं च वक्ष्यमाणं न कुर्यात् ।

**(स.)** उक्तश्चारित्रधर्मः स च यतनया स्यात्, अतो यतनार्थमाह—स इति-से इति निर्देशे, स योऽसौ महाव्रतयुक्तो भिक्षुर्वा भिक्षुकी वा आरम्भत्यागात्, धर्मकायपालनाय भिक्षणशीलो भिक्षुरेव भिक्षुक्यपि, 'पुरुषोत्तमो धर्म' इति भिक्षुर्विशेष्यते, तद्विशेषणानि भिक्षुक्या अपि ज्ञेयानि. भिक्षुविशेषणान्याह- संयत-विरत-प्रतिहत-प्रत्याख्यातपापकर्मा, तत्र सामस्त्येन यतः संयतः सप्तदशप्रकार-संयमसहितः, पुनर्विविधमनेकप्रकारतया द्वादशविधे तपसि रतो विरतः, पुनः प्रतिहत-प्रत्याख्यात-पापकर्मा-प्रतिहतं स्थितेर्ह्रासाद् ग्रन्थिभेदेन प्रत्याख्यातं हेत्वभावतः पुनर्वृद्धेरभावेन पापं पापकर्म ज्ञानावरणीयादि येन सः ततः कर्मधारयः । स तथाविधो दिवा वा, रात्रौ वा, एकको वा परिषद्गतो

१. सर्वत्र 'ओ', मुद्रिते ग्रन्थे । २. गृ. १-१०.१२ ।।

वा, सुप्तो वा, जाग्रद् वा, रात्रौ सुप्तो दिवा जाग्रत्, कारणिक एकः शेषकालं परिषद्गतः।

**(सु.)** उक्तः चारित्रधर्मः, सांप्रतं यतनाया अवसरः, तथा चाह—'से भिक्खू वा' इत्यादि, से इति निर्देशे, स योऽसौ महाव्रतयुक्तो, 'भिक्षुर्वा भिक्षुकी वा'-आरम्भत्यागाद् धर्म्मकायपालनाय भिक्षणशीलो भिक्षुः, एवं भिक्षुक्यपि, पुरुषोत्तमो धर्म्म इति भिक्षुर्विशेष्यते, तद्विशेषणानि च भिक्षुक्या अपि द्रष्टव्यानीत्याह-'संयत-विरत-प्रतिहतप्रत्याख्यातपापकर्मा' तत्र सामस्त्येन यतः संयतः—सप्तदशप्रकार-संयमोपेतः, विविधमनेकधा द्वादशविधे तपसि रतो विरतः, प्रतिहत-प्रत्याख्यात-पापकर्म्मेति, प्रतिहतं-स्थितिह्रासतो ग्रन्थिभेदेन प्रत्याख्यातं-हेत्वभावतः पुनर्वृद्ध्यभावेन, पापं कर्म्म-ज्ञानावरणादि येन स तथाविधः, दिवा वा रात्रौ वा एको वा परिषद्गतो वा सुप्तो वा जाग्रद् वा, रात्रौ सुप्तो दिवा जाग्रत्, कारणिक एकः, शेषकालं परिषद्गतः,

**से पुढविं वा, भित्तिं वा, सिलं वा, लेलुं वा, ससरक्खं वा कायं, ससरक्खं वा वत्थं, हत्थेण वा, पाएण वा, कट्ठेण वा, कलिंचेण वा, अंगुलियाए वा, सिलागाए वा, सिलागाहत्थेण वा, नालिहिज्जा, न विलिहिज्जा, न घट्टिज्जा, न भिंदिज्जा, अन्नं नालिहाविज्जा, न विलिहाविज्जा, न घट्टाविज्जा, न भिंदाविज्जा, अन्नं आलिहंतं वा, विलिहंतं वा, घट्टंतं वा, भिंदंतं वा, न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, कायेणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।।१।। (सू.४.१०)**

**(ति.)** किं तदित्याह-पृथ्वी-लोष्टादिरहिता । भित्तिः-नदीतटी । शिला-विशालः पाषाणः । लोष्टः-मृन्मयो दृषन्मयो वा । सह रजसा-असञ्चरभूमिरेणुना वर्तत इति सरजस्कं कायं, सरजस्कं वा वस्त्रम्-सजातीयत्वात् पात्राद्यापि । हस्तेन वा, पादेन वा, काष्ठेन वा, कलिंचेन वा-क्षुद्रकाष्ठेन । अङ्गुल्या वा शिलाकया वा-अयोमय्या । शिलाकाहस्तेन वा-शिलाकाकलापेन । न आ-ईषद् लिखेत्-रेखां कुर्यात्। न विशेषेण-गाढं लिखेत् । न घट्टयेत्-न चलयेत् । न भिन्द्यात्-विदारयेत् स्वयम् ।

नान्येनालिखनादि कारयेत् । अन्यमालिखनादि कुर्वन्तं न समणुजाणामीत्यादि प्राग्वत् ।।सूत्र-१०।।

**(स.)** इदं वक्ष्यमाणं न कुर्यात्, किं तद् इति ? - आह—से पुढविं वा...पृथिवी लोष्टादिरहिता, भित्तिर्नदीतटी, शिला विशालः पाषाणः लेष्टुः प्रसिद्धः, सह रजसा-अरण्यपांशुलक्षणेन वर्तते यः स सरजस्कः, कः ? कायो देहस्तं. सरजस्कं वा वस्त्रं चोलपट्टकादि. एकग्रहणेन तज्जातीयग्रहणमिति न्यायात् पात्रादि-परिग्रहः, एतानि किमित्याह-हस्तेन वा पादेन वा. काष्ठेन वा किलिञ्चेन वा क्षुद्ररूपेण वा अङ्गुल्या वा शलाकया वा लोहशलाकारूपया. शलाकाहस्तेन शलाकासमूहरूपेण वा, किं न कुर्यादित्याह-न आलिखेत्, आ ईषत् सकृद् वा लेखनं न स्वयं कुर्यात्, न विलिखेत्, नापि स्वयं नितरामनेकशो वा लेखनं कुर्यात्, न घट्टयेत्, न स्वयं घट्टनं चालनं कुर्यात्, न भिन्द्यात्, न स्वयं भेदं विदारणं कुर्यात्. तथान्यमन्येन, वा नालेखयेत्, न विलेखयेत्, न घट्टयेत्, न भेदयेत्. तथान्यं स्वत एवालिखन्तं वा विलिखन्तं वा घट्टयन्तं वा भिन्दन्तं वा न समनुजानीयादित्यादि पूर्ववत्. १।

**(सु.)** इदं वक्ष्यमाणं न कुर्यात्, किं तद् ? इत्याह 'से पुढविं वा' इत्यादि, तद्यथा-पृथिवीं वा भित्तिं वा शिलां वा लेष्टुं(लोष्टं) वा, तत्र पृथिवी-लोष्टादिरहिता, भित्तिः-नदीतटी, शिला विशालः पाषाणः, लेष्टुः(लोष्टः) प्रसिद्धः, सह रजसा-अरण्यपांशुलक्षणेन वर्तते इति सरजस्कं वा 'कायं' कायमिति देहं, सरजस्कं वा वस्त्रं-चोलपट्टकादि, एकग्रहणात् तज्जातीयग्रहणमिति पात्रादिपरिग्रहः, एतत् किमित्याह—हस्तेन वा पादेन वा काष्ठेन वा किलिञ्चेन वा-क्षुद्रकाष्ठरूपेण अङ्गुल्या वा शलाकया वा-अयःशलाकादिरूपया शलाकाहस्तेन वा-शलाकासंघातरूपेण, नालिहित'इति नालिखेत् न विलिखेत् न घट्टयेत् न भिन्द्यात्, तत्रेषत् सकृद् वाऽऽलेखनं, निरन्तरमनेकशो वा विलि(ले)खनं, घट्टनं-चालनं, भेदो-विदारणं, एतत् स्वयं न कुर्यात्, तथाऽन्यमन्येन वा नालेखयेत्, न घट्टयेत्, न भेदयेत्, तथाऽन्यं स्वत एव आलिखन्तं वा विलिखन्तं वा घट्टयन्तं वा भिन्दन्तं वा न समनुजानीयात्-इत्यादि पूर्ववत् ।१०। तथा-

**से भिक्खू वा भिक्खुणी वा संजय-विरय-पडिहयपच्चक्खायपावकम्मे दिया वा राउ वा एगउ वा परिसागउ वा सुत्ते वा जागरमाणे वा ।**

**(ति.)** तथा [से भिक्खू वा...इत्यादि] प्राग्वत् ।

**(सु.)** **से भिक्खू वा** इत्यादि यावत् जागरमाणे व त्ति पूर्ववदेव,

**से उदगं वा, ओसं वा, हिमं वा, महियं वा, करगं वा, हरतणुगं वा, सुद्धोदगं वा, उदउल्लं वा कायं, उदउल्लं वा वत्थं, ससिणिद्धं वा कायं, ससिणिद्धं वा वत्थं।**

**(ति.)** उदकम्-[1]शिरापानीयम् । अवश्यायः-त्रेहः[2] । हिमम्-स्त्यानोदकम् । महिका-धूमरी। करकः-कठिनोदकरूपः । हरतनुः-भुवमुद्भिद्य दूर्वादेरग्रे भवति । शुद्धोदकम्-गगनोदकम् । उदकार्द्रं वा कायं, उदकार्द्रं वा वस्त्रम्-उदकार्द्रता च गलद्बिन्दुता । सस्निग्धं वा कायं सस्निग्धं वा वस्त्रम्-स्नेहनं स्निग्धं "भावे निष्ठा" [ ] सह स्निग्धेन वर्तत इति सस्निग्धं, सस्नेहता चेह बिन्दुरहितता ।

**(स.)** तथा पुनः पूर्ववत् स किं न कुर्यादित्याह—से इति-स भिक्षुरुदकं वा शिरापानीयम्, अवश्यायं वा स्नेहं, हिमं वा स्त्यानोदकं, मिहिकां वा धूमरिकां, करकां वा कठिनोदकरूपां, हरतनुकं वा भुवमुद्भिद्य तृणाग्रादिस्थितं. शुद्धोदकमाकाशोदकं, उदकार्द्रं वा कायमुदकार्द्रं वा वस्त्रं, उदकार्द्रता च गलद्बिन्दुरूपा ग्राह्या. सस्निग्धं वा कायं सह स्निग्धेन स्नेहेन वर्तते यः स सस्निग्धः, स चासौ कायश्च तमेवंविधं कायं, एवं सस्निग्धं वा वस्त्रं, सस्निग्धता चेह बिन्दुरहिता ज्ञेया.

**(सु.)** तथा—से उदगं वा'इत्यादि, तद्यथा-उदकं वा अवश्यायं वा हिमं वा महिकां वा करकं वा हरतनुं वा शुद्धोदकं वा, तत्र-उदकं-शिरापानीयं, अवश्यायः-त्रेहः, हिमं-स्त्यानोदकं, महिका धूमरिका, करकः-कठिनोदकरूपः, हरतनुर्भुवमुद्भिद्य तृणाग्रादिषु भवति, शुद्धोदकं-अन्तरिक्षोदकं, तथा-उदकाद्रं वा कायं उदकार्द्रं वा वस्त्रं, उदकार्द्रता चेह गलद्बिन्दुतुषाराद्यनन्तरोदितोदकभेदसन्मिश्रता, तथा सस्निग्धं वा कायं, सस्निग्धं वा वस्त्रं, अत्र स्नेहनं स्निग्धमिति, सह स्निग्धेन वर्त्तत इति सस्निग्धः, सस्निग्धता चेह बिन्दुरहि[त]ता, अनन्तरोदितोदकभेदसन्मिश्रता,

**नामुसिज्जा, न संफुसिज्जा, नावीलिज्जा, न पवीलिज्जा, न अक्खोडिज्जा, न पक्खोडिज्जा, नायाविज्जा, न पयाविज्जा, अन्नं नामुसाविज्जा, न संफुसाविज्जा,**

---

१. ठारणुपाणी १० टि. ।। २. गूर्जरभाषायां 'त्रेह = भेज इत्यर्थः - भगवद् गोमण्डल - [ई. स. २००७, पृ. ४२५२]

**नावीलाविज्जा, न पवीलाविज्जा, न अक्खोडाविज्जा, न पक्खोडाविज्जा नायाविज्जा, न पयाविज्जा, अन्नं आमुसंतं वा, संफुसंतं वा, आवीलंतं वा, पवीलंतं वा, अक्खोडिंतं[1] वा, पक्खोडिंतं[2] वा, आयाविंतं[3] वा, पयाविंतं[4] वा, न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, कायेणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।।२।। (सू०४.११)**

**(ति.)** एतत् [उदकादि] नामृशेत्, न संस्पृशेत्, नापीडयेत्, न प्रपीडयेत्, नास्फोट्येत्, न प्रस्फोटयेत्, नातापयेत्, न प्रतापयेत्, कारणानुमतिपदानि च सुगमानि, शेषं प्राग्वत् ।

**(स.)** एतत् किं ? इत्याह—नामुसिज्जा 'सकृद्-ईषद् वा स्पर्शनमामर्षणं न स्वयं कुर्यात्, न संफुसिज्जा ततोऽन्यत्संस्पर्शनं' न कुर्यात्. एवं नावीलिज्जा सकृदीषद् वा पीडनं, न पवालिज्जा ततोऽन्यत्प्रपीडनं, न अक्खोडिज्जा सकृदीषद् वा स्फोटनं, न पक्खोडिज्जा ततोऽन्यत् प्रस्फोटनं, नायाविज्जा एवं नावेलिज्जा सकृदीषद् वा तापनं, न पयाविज्जा प्रकर्षेण तापनं प्रतापनम्, एतानि सर्वाणि स्वयं न कुर्यात्. तथान्यमन्येन वा नामर्षयेत् न संस्पर्शयेत् नापीडयेत् न प्रपीडयेत् नास्फोटयेत् न प्रस्फोटयेत् नातापयेत् न प्रतापयेत्. तथान्यं स्वत एवामृषन्तं वा संस्पृशन्तं वा आपीडयन्तं वा प्रपीडयन्तं वा आस्फोटयन्तं वा प्रस्फोटयन्तं वा आतापयन्तं वा प्रतापयन्तं वा न समनुजानीयादित्यादि पूर्ववत् २.

**(सु.)** एतत् किमित्याह-'नामुसेज्जा'इत्ति-नामृषेत्, न संस्पृशेत् नापीडयेत्, न प्रपीडयेत् नास्फोटयेत्, न प्रस्फोटयेत्, नातापयेत्, न प्रतापयेत्, तत्र सकृद्-ईषद् वा स्पर्शनमामर्षणं, अतोऽन्यत्संस्पर्शनं, एवं सकृद् ईषद् वा पीडनमापीडनं, अतोऽन्यत्प्रपीडनं, एवं सकृदीषद् वा-स्फोटनमास्फोटनम्, अतोऽन्यत्प्रस्फोटनं, एवं सकृदीषद् वा तापनमातापनं विपरीतं प्रतापनं, एतत् स्वयं न कुर्यात्, तथाऽन्यमन्येन वा नामर्षयेत्, न संस्पर्शयेत्, नापीडयेत्, न प्रपीडयेत्, नास्फोटयेत्, न प्रस्फोटयेत्, नातापयेत्, न प्रतापयेत्, तथाऽन्यं स्वत एवामृषन्तं वा संस्पृशन्तं वा आपीडयन्तं वा प्रपीडयन्तं वा

१. ०डं. २ ।। २. ०डं. २ ।। ३. ०वं. २ ।। ४. ०वं. २ ।।

आस्फोटयन्तं वा प्रस्फोटयन्तं वा आतापयन्तं वा प्रतापयन्तं वा न समनुजानीयादित्यादि पूर्ववत् ।११।

**से भिक्खू वा भिक्खुणी वा संजय-विरय-पडिहय-पच्चक्खायपावकम्मे दिया वा राउ वा एगउ वा परिसागउ वा सुत्ते वा जागरमाणे वा ।**

**(ति.)** तथा [से... इत्यादि] प्राग्वत् ।

**(स)** [पूर्ववत्]

**(सु.) से भिक्खू वा** इत्यादि, यावत् जागरमाणे व'त्ति पूर्ववदेव,

**से अगणिं वा, इंगालं वा, मुमुरं वा, अच्चिं वा, जालं वा, अलायं वा, सुद्धागणिं वा, उक्कं वा ।**

**(ति.)** इहायःपिण्डानुगतः-अग्निः । ज्वालारहितः-अङ्गारः । विरलाग्निकणो भस्म-म(मु)र्मुरः । मूलाग्निविच्छिन्ना ज्वाला-अर्चिः । अग्निप्रतिबद्धा तु-ज्वाला । अलातम् उल्मुकम्। शुद्धाग्निः-निरिन्धनः । उल्का-गगनाग्निः । एतान् -

**(स.)** से इति-इह-अग्निं लोहपिण्डानुगतं वा ज्वालारहितम्,-अङ्गारं विरलाग्निकणरूपं, मुर्मुरं मूलाग्निविच्छिन्नां ज्वालां, अर्चिर्मूलाग्निप्रतिबद्धां ज्वालाम्-अलातम्-उल्मुकम्, इन्धनरहितं शुद्धाग्निं, गगनाग्निरूपामुल्काम्।

**(सु.)** 'से अगणिं वा' इत्यादि, तद्यथा-अग्निं वा अङ्गारं वा मुर्म्मुरं वा अर्च्चिर्वा ज्वालां वा अलातं वा शुद्धाग्निं वा उल्कां वा, इह-अयस्-पिण्डानुगतोऽग्निः, ज्वाला-रहितोऽङ्गारः, विरलाग्निकणं भस्म मुर्म्मुरः, मूलाग्निविच्छिन्ना ज्वाला अर्च्चिः, प्रतिबद्धा ज्वाला, अलातं उल्मुकं, निरिन्धनः शुद्धोऽग्निः, उल्का गगनाग्निः,

**न उंजिज्जा, न घट्टिज्जा, न उज्जालिज्जा, न निव्वाविज्जा, अन्नं न उंजाविज्जा, न घट्टाविज्जा, न उज्जालाविज्जा, न निव्वाविज्जा, अन्नं उंजंतं वा, घट्टिंतं वा, उज्जालिंतं वा, निव्वावितं वा, न समणुजाणमि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, कायेणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।।३।। (सू०४.१२)**

**(ति.)** नोत्सिञ्चेत्, न घट्टयेत्, न उज्ज्वालयेत्, न निर्वापयेत्-विध्यापयेदित्यर्थः। कारणानुमतिरूपं पदाष्टकं स्पष्टम् । न समणुजाणामि इत्यादि प्राग्वत् ।।सू.१२।।

**(स.)** एतत् किं ? - इत्याह—भिक्षुरेतन्न कुर्यात्, किं तदाह-नो उंजेज्जा नो उत्सिञ्चेत्, उञ्जनमुत्सेचनं नो कुर्यात् । नो घट्टिज्जा. घट्टनं सजातीयादिना चालन। न उज्जालिज्जा उज्ज्वालनं व्यजनादिभिर्वृद्ध्यापादनं । न निव्वाविज्जा निर्वापणं विध्यापनं । एतानि न स्वयं भिक्षुः कुर्यात्, तथान्यमन्येन वा नोत्सेचयेत्. न घट्टयेत् नोज्ज्वालयेत् न निर्वापयेत्. तथान्यं स्वत एव उत्सिञ्चन्तं वा घट्टयन्तं वा उज्ज्वालयन्तं वा निर्वापयन्तं वा न समनुजानीयादित्यादि पूर्ववत्. ३.

**(सु.)** एतत् किमित्याह-'न उंजिज्जा' नोत्सिञ्चयेत्, न घट्टयेत्, नोज्ज्वालयेत्, न निर्वापयेत्, तत्र-उञ्जनं उत्सेचनं, घट्टनं सजातीयादिना चालनं, उज्ज्वालनं-व्यजनादिभिः वृद्ध्यापादनं, निर्वापणं विध्यापनं, एतत् स्वयं न कुर्यात् तथाऽन्यमन्येन वा नोत्सेचयेदित्यादि, तथाऽन्यं स्वत उत्सिञ्चयन्तं वा घट्टयन्तं वा उज्ज्वालयन्तं वा निर्वापयन्तं वा न समनुजानीयात्-इत्यादि पूर्ववत् ।१२।

**से भिक्खू वा भिक्खूणी वा संजय-विरय-पडिहयपच्चक्खाय-पावकम्मे दिया वा राउ वा एगउ वा परिसागउ वा सुत्ते वा जागरमाणे वा ।**

**(ति.)** प्राग्वत् ।

**(स.)** से इति-से **भिक्खु॰** इत्यादिव्याख्या पूर्ववत्.

**(सु.)** **'से भिक्खू वा'** इत्यादि यावत् जागरमाणे व'त्ति पूर्व्ववदेव

**से सिएण वा, विहुयणेण वा, तालियंटेण वा, पत्तेण वा, पत्तभंगेण वा, साहाए वा, साहाभंगेण वा, पेहुणेण वा, पेहुणहत्थेण वा, चेलेण वा, चेलकन्नेण वा, हत्थेण वा, मुहेण वा, अप्पणो वा कायं बाहिरं वावि पुग्गलं न फुमिज्जा, न वीइज्जा, अन्नं न फुमाविज्जा, न वीयाविज्जा, अन्नं फुमंतं वा, वीयंतं वा, न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं, मणेणं, वायाए, कायेणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।।४।। (सू॰४.१३)**

**(ति.)** सितेन वा-चामरेण । विधूननेन-वीजनेन । तालवृन्तेन-चर्ममयेन, वंशमयेन वा द्विपुटेन मध्यग्रहणच्छिद्रेण । पत्रेण-पद्मिनीपत्रादिना । पत्रभङ्गेन-कदलीपत्रखण्डेन।

शाखाया-वृक्षादेः । शाखभङ्गेन-शाखैकदेशेन । पेहुणेन-मयूरपिच्छेन । पेहुणहस्तेन मयूर-पिच्छकलापेन, यथा केशहस्तः केशकलापः, तथात्रापि । चेलेन वा-वस्त्रेण । चेलकर्णेन-चेलाञ्चलेन । हस्तेन वा मुखेन वा । एभिः किम् ? आत्मनः कायं बाह्यं वापि पुद्गलम्-उष्णौदनादि । न फूत्कुर्यात् न वीजयेत् । अन्यं न फूत्कारयेत् न वीजयेत्। अन्यं फूत्कुर्वन्तं वीजयन्तं वा । न समणुजाणामीत्यादि प्राग्वत् ।।सूत्र-१३।।

(स.) पुनः—सितेन वा चामरेण, विधुवनेन वा व्यजनेन, तालवृन्तेन वा तेनैव मध्यग्रहणच्छिद्रेण द्विपुटेन, पत्रेण वा पद्मिनीपत्रादिना, पत्रभङ्गेन तस्यैकदेशेन, शाखया वा वृक्षडालया, शाखाभङ्गेन वा शाखादेशेन, पिहुणेण वा मयूरादिपिच्छेन, पिहुणहत्थेण वा मयूरादिपिच्छसमूहेन, चै(चे)लेन वा वस्त्रेण, चै(चे)लकर्णेन वा वस्त्रैकदेशेन, हस्तेन वा करेण, मुखेन बा वदनेन, एभिः कृत्वा किमित्याह—आत्मनो वा कायं स्वदेह-मित्यर्थः, बाह्यं वा पुद्गलमुष्णोदकादि, एतत् किमित्याह-न फुमिज्जा न स्वयं फूत्कुर्यात्, मुखेन धमनं न कुर्यात्, न वीइज्जा न वीजयेच्चामरादिना. तथान्यमन्येन वा न फूत्कारयेत्, न वीजयेत्. तथान्यं स्वत एव फुत्कुर्वन्तं वा व्यजन्तं वा न समनुजानीयादित्यादि पूर्ववत्. ४.

(सु.) 'से सिएण'वा-इत्यादि, तद्यथा-सितेन वा विधुवनेन वा तालवृन्तेन वा पत्रेण वा शाखया वा शाखाभङ्गेन वा पेहुणेन वा पेहुणहस्तेन वा चेलेन वा चेलकर्णेन वा हस्तेन वा मुखेन वा, इह सितं-चामरं, विधुवनं-व्यजनं, तालवृन्तं-तदेव मध्यग्रहणच्छिद्रं द्विपुटं, पत्रं पद्मिनीपत्रादि, शाखा-वृक्षडालं, शाखाभङ्गं-तदेकदेशः, पेहुणं-मयूरादिपिच्छं, पेहुणहस्तकः-तत्समूहः, चेलं-वस्त्रं, चेलकर्णः-तदेकदेशः, हस्त-मुखे प्रतीते, एभिः किमित्याह-आत्मनो वा कायं-स्वदेहमित्यर्थः, बाह्यं वा पुद्गलं-उष्णौदनादि, एतत् किमित्याह-'न फुमेज्जा' इत्यादि, न फूत्कूर्यात्, न व्यजेत्, तत्र फूत्करणं मुखेन धमनं, व्यजनं चमरादिना वायुकरणम्, एतत् स्वयं न कुर्यात्, तथाऽन्यमन्येन वा न फूत्कारयेत् न व्याजयेत्, तथाऽन्यं स्वत फुत्कुर्वन्तं वा व्यजन्तं वा न समनुजानीयात्-इत्यादि पूर्ववत् ।१३।

**से भिक्खू वा भिक्खूणी वा संजय-विरय-पडिहयपच्चक्खाय-पावकम्मे दिया वा राउ वा एगउ वा परिसागउ वा सुते वा जागरमाणे वा ।**

(ति.) प्राग्वत् -

**(सु.) से भिक्खू वा**'इत्यादि यावत् जागरमाणे व'त्ति पूर्ववदेव,

**से बीएसु वा, बीयपइट्ठेसु वा, रूढेसु वा, रूढपइट्ठेसु वा, जाएसु वा, जायपइट्ठेसु वा, हरिएसु वा, हरियपइट्ठेसु वा, छिन्नेसु वा, छिन्नपइट्ठेसु वा, सचित्तेसु वा, सचित्तकोलपइट्ठेसु वा ।**

**(ति.)** इह बीजम्-शाल्यादि । बीजप्रतिष्ठितम्-बीजोपरि स्थापितं शयनासनादि, एवं सर्वत्र वेदितव्यम् । रूढानि-विरूढानि[1] । जातानि-स्तम्बीभूतानि । हरितानि-दूर्वादीनि, छिन्नानि-वृक्षाद्यङ्गान्यपरिणतानि । सचित्तानि अण्डकादीनि । कोलः-घुणः, तत्प्रतिष्ठितानि-तदुपरिवर्तीनि, तेषु ।

**(स.)** से इति-तथा पूर्ववद् बीजेषु वा शाल्यादिषु बीजप्रतिष्ठितेषु वा आसनशयनादिषु रूढेषु स्फुटितबीजेष्वङ्कुरितेषु, रूढप्रतिष्ठितेष्वासनशयनादिषु. जातेषु वा स्तम्बीभूतेषु. जातप्रतिष्ठितेषु वा आसनशयनादिषु, हरितेषु वा दूर्वादिषु. हरितप्रतिष्ठितेषु वा आसनशयनादिषु, छिन्नेषु वा परशुप्रमुखप्रहरणछिन्नवृक्षात् पृथक्स्थापितेषु, आर्द्रेष्वपरिणतेषु. छिन्नप्रतिष्ठितेषु वा छिन्नप्रतिष्ठितासनशयनेषु, सचित्तेषु वा अण्डकादिषु. सचित्तकोल-प्रतिनिश्रितेषु. सचित्तकोलो घुणस्तत्प्रतिनिश्रितेषु तदुपरिवर्तिषु दावा(दूर्वा)दिषु, तेषु किमित्याह-

**(सु.)** 'से बीएसु वा'इत्यादि, तद्यथा-बीजेषु वा बीजप्रतिष्ठितेषु वा रूढेषु वा रूढप्रतिष्ठितेषु वा जातेषु वा जातप्रतिष्ठितेषु वा हरितेषु वा हरितप्रतिष्ठितेषु वा छिन्नेषु वा छिन्नप्रतिष्ठितेषु वा सचित्तेषु वा सचित्तकोलप्रतिनिश्रितेषु वा, इह बीजं-शाल्यादि, तत्प्रतिष्ठितमासन (हार)शयनादि गृह्यते, एवं सर्वत्र वेदितव्यं, रूढानि-स्फुटितबीजानि, तत्प्रतिष्ठितानि, जातानि स्तम्बीभूतानि, हरितानि दूर्वादीनि, छिन्नानि-प्रहरणविशेषपरश्वादिभिर्वृक्षात् पृथक् स्थापितानि, आर्द्राण्यपरिणतानि तदङ्गानि गृह्यन्ते सचित्तानि अण्डकानि कोलो-घुणस्तत्प्रतिनिश्रितानि तदुपरिवर्त्तीनि दार्व्वा(दूर्वा)-दीनि गृह्यन्ते एतेषु किम् ? - इत्याह —

**न गच्छिज्जा, न चिट्ठिज्जा, न निसीइज्जा, न तुयट्टिज्जा, अन्नं न गच्छाविज्जा, न चिट्ठाविज्जा, न निसीयाविज्जा, न तुयट्टाविज्जा, अन्नं गच्छंतं वा, चिट्ठंतं वा, निसीयंतं वा, तुयट्टंतं वा, न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं,**

१. अङ्कुरितानि १० टि. ।।

**मणेणं, वायाए, कायेणं, न करेमि, न कारवेमि, करंतं पि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि, निंदामि, गरिहामि, अप्पाणं वोसिरामि ।।५।। (सू० ४.१४)**

**(ति.)** न गच्छेत्, न तिष्ठेत्, न निषीदेत्, न त्वग् वर्तयेत्, न स्वपेदित्यर्थः । करणा-ऽनुमत्यष्टपदी स्पष्टा । न समनुजानामीत्यादि प्राग्वत् ।।सू.१४।।

**(स.)** न गच्छेत् न तिष्ठेत् न निषीदेत् न त्वग्वर्तयेत्. एतत्सर्वं न स्वयं कुर्यात्. तथान्यमेतेषु न गमयेत् न स्थापयेत् न निषीदयेत् न स्वापयेत्. तथान्यं स्वत एव गच्छन्तं वा निषीदन्तं वा स्वपन्तं वा न समनुजानीयादित्यादि पूर्ववत् ५.

**(सु.)** न गच्छेज्जा-[इत्यादि]न गच्छेत् न तिष्ठेत् न निषीदेत् न त्वग् वर्त्तयेत्, तत्र गमनमन्यतोऽन्यत्र, स्थानमेकत्रैव, निषीदनं-उपवेशनं, त्वग्वर्त्तनं-स्वपनं, एतत् स्वयं न कुर्यात्, तथाऽन्यमेतेषु न गमयेत्, न स्थापयेत्, न निषीदयेत्, न त्वग्वर्त्तयेत्,- न स्वापयेत्, तथान्यं स्वत एव गच्छन्तं वा तिष्ठन्तं वा निषीदन्तं वा स्वपन्तं वा न समनुजानीयादिति पूर्ववत् ।१४।

**से भिक्खू वा भिक्खुणी वा संजय-विरय-पडिहयपच्चक्खायपावकम्मे दिया वा राउ वा एगउ वा परिसागउ वा सुत्ते वा जागरमाणे वा ।**

**(ति.)** प्राग्वत् ।

**(स)** [न व्याख्यातम्]

**(सु.)** **सेऽभिक्खू वा** इत्यादि यावत् **जागरमाणे व**'त्ति पूर्ववत्,

**से कीडं वा, पयंगं वा, कुंथुं वा, पिवीलियं वा, हत्थंसि वा, पायंसि वा, बाहुंसि वा, ऊरुंसि वा, उदरंसि वा, सीसंसि वा, वत्थंसि वा, रयहरणंसि वा, गुच्छंसि वा, पडिग्गहंसि वा, कंबलंसि वा, उडगंसि वा, दंडगंसि वा, पीढंसि वा, फलगंसि वा, सिज्जंसि वा, संथारगंसि वा, अन्नयरंसि वा तहप्पगारे उवगरणजाए, तओ संजयामेव पडिलेहिय, पडिलेहिय पमज्जिय पमज्जिय, एगंतमवणिज्जा, नो णं संघायमावजिज्जा ।। (सू० ४.१५)**

**(ति.)** हस्तादिषु अन्यतरस्मिन् तथाप्रकारे साधुक्रियोपयोगिन्युपकरणजाते कीटादिरूपं त्रसं कथञ्चिदापतितम् । ततस्तस्मात् स्थानात् संयत एव-यतनावानेव। प्रत्युपेक्ष्य प्रत्युपेक्ष्य । प्रमृज्य प्रमृज्य एकान्ते-तदनुपघातकस्थाने । अपनयेत्-परित्यजेत्।

नैनम्-कीटादिकम् सङ्घातम् विनाशं मिथो गात्रस्पर्शरूपं वा-तेषां पीडामापादयेत्-जनयेदित्यर्थः । शेषं स्पष्टम् । नवरम् उण्डकम्-स्थण्डिलं, योगोत्सर्गाय मात्रकम् । शय्या-वसतिः ।।सू.१५।।

**(स.)** स इति-कीटं वा द्वीन्द्रियं पतङ्गं वा कुन्थुं वा त्रीन्द्रियं पिपीलिकां वा, किमित्याह-हस्ते वा पादे वा बाहौ वा ऊरुणि वा उदरे वा शिरसि वा वस्त्रे वा पात्रे वा कम्बलके वा पादप्रोञ्छनके वा रजोहरणे वा गोच्छे वा उन्दके मात्रके स्थण्डिले वा दण्डके वा पीठके वा फलके वा शय्यायां वा संस्तारके वा अन्यतरस्मिन् वा तथाप्रकारे साधुक्रियाया उपयोगिनि उपकरणजाते, तेषु स्थानेषु कीटादिरूपं त्रसं कथञ्चिदापतितं सन्तं संयत एव सत्प्रयत्नेन वा प्रत्युपेक्ष्य प्रत्युपेक्ष्य पौनःपुन्येन, सम्यक् प्रमृज्य प्रमृज्य पौनःपुन्येन. सम्यक् किमित्याह-एकान्ते यत्र स्थाने तस्य कीटादेरुपघातो न भवति तत्रापनयेत् परित्यजेत्, परं नैनं सङ्घातमापादयेत्. नैनं त्रसं सङ्घातं परस्परगात्रसंस्पर्श-पीडारूपमापादयेत् प्रापयेत्. अनेन. कथनेन परितापनादिप्रतिषेध उक्तो ज्ञातव्यः. एकस्य करणस्य ग्रहणेनान्यकारणानुमत्योरपि प्रतिषेधः ६.

**(सु.)** **सेभिक्खू वा**—इत्यादि यावत्-'**जागरमाणे** पूर्ववत्, स कीटं वा पतङ्गं वा कुन्थुं वा पिपीलिकां वा, किमित्याह-हस्ते वा पादे वा बाहौ वा ऊरुणि वा उदरे वा शिरसि वा वस्त्रे वा पात्रे वा रजोहरणे वा कंबले वा गोच्छे वा उन्दके वा दण्डके वा पीठके वा फलके वा शय्यायां वा संस्तारके वा अन्यतरस्मिन् वा तथाप्रकारे साधुक्रियोपयोगिन्युपकरणजाते कीटादिरूपं त्रसं कथञ्चिदापतितं सन्तं संयत एव सन् प्रयत्नेन वा प्रत्युपेक्ष्य प्रत्युपेक्ष्य पौनःपुन्येन सम्यक्, प्रमृज्य प्रमृज्य पौनःपुन्येनैव सम्यक्, किमित्याह-एकान्ते-तस्यानुपघातके स्थाने अपनयेत्-परित्यजेत्, 'नैनं त्रसं संघातमापादयेत्, नैनं त्रसं संघातं-परस्परगात्रसंस्पर्शपीडारूपमापादयेत्-प्रापयेत्, अनेन परितापनादिप्रतिषेध उक्तो वेदितव्यः, एकग्रहणे तज्जातीयग्रहणादन्यकारणानु-मतिप्रतिषेधश्च, शेषमत्र प्रकटार्थमेव, नवरमुन्दकं-स्थंडिलं, शय्या संस्तारिका वसतिर्वा ।१५। इत्युक्ता यतना, गतश्चतुर्थोऽर्थाधिकारः ।

**अजयं चरमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.१।।**

**अजयं चिट्ठमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.२।।**

**अजयं आसमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.३।।**

**अजयं सयमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.४।।**

**अजयं भुंजमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.५।।**

**अजयं भासमाणो य, पाणभूयाइं हिंसई ।**
**बंधई पावयं कम्मं, तं से होइ कडुयं फलं ।।४.६।।**

**(ति.)** उक्ता यतना, साम्प्रतं 'उपदेश' माह—अयतमिति क्रियाविशेषणम्, अयतनया ईर्यासमितिं विना, चरन्-गच्छन् । प्राणभूतानि हिनस्ति ।

प्राणा द्वि-त्रि-चतुः प्रोक्ता, भूतास्तु तरवः स्मृता ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा इतीरिताः ।।१।। [ ]

प्राणभूतानीति बहुवचनात् सर्वानप्येतान् प्रमादानुपयोगाभ्यां व्यापादयति । तानि हिंसन् बध्नाति पापकं कर्म । तत् से-तस्य, भवति, कटुकफलम्-दारुणविपाकफलं, कटुकानुस्वारोऽलाक्षणिकः । अयतं तिष्ठन्-अस्थाने । अयतम् आसीनः-आकुञ्चनादि कुर्वन् । अयतं स्वपन्-अप्रत्युपेक्ष्य परिवर्तनादिना । अयतं भुञ्जानः-निःकारणं प्रणीतादि सराग-द्वेषं वा । अयतं भाषमाणः-गृहस्थभाषया निष्ठुरम्, अन्तरभाषादिना वा । शेषं सर्वगाथासु पूर्ववत् ।

**(स.)** साम्प्रतमुपदेशमाह - अजयं-इति-अयतं चरन् यत्नं विना गच्छन्निर्यासमिति-मुल्लङ्घ्य, किमित्याह—प्राणिभूतानि हिनस्ति, प्राणिनो द्वीन्द्रियादयः, भूतानि एकेन्द्रियास्तानि हिनस्ति, प्रमादेनानाभोगेन च व्यापादयति, तानि हिंसन् बंध्नाति

पापकं कर्म, अकुशलपरिणामादादत्ते क्लिष्टं ज्ञानावरणीयादि, तत्पापकर्म से तस्यायत्नचारिणो भवति कटुकफलमशुभफलं भवति. मोहादिहेतुत्वेन विपाकदारुणमित्यर्थः ।।१।।

अजयं-इति-एवमयतं तिष्ठन्नूर्ध्वस्थानेनासमंजसं हस्तपादादिकं विक्षिपन्, शेषं पूर्ववत्. ।।२।।

अजयं-इति-एवमयतमासीनो निषण्णतया अनुपयुक्तः सन्नाकुञ्चनादिभावेन, शेषं पूर्ववत्. ।।३।।

एवमयतं स्वपन्नसमाहितो दिवसे प्रकामशय्यादिना, शेषं पूर्ववत्. ।।४।।

एवमयतं भुञ्जानो निष्प्रयोजनं प्रणीतं काकशृगालभक्षितादिना, शेषं पूर्ववत्. ।।५।।

अजयं-इति-एवमयतं भाषमाणो गृहस्थभाषया निष्ठुरमन्तरभाषादिना, शेषं पूर्ववत्. ।।६।।

**(सु.)** सांप्रतं उपदेशाख्यः पञ्चम[अधिकारः] उच्यते—अजयं-इत्यादि, अयतं चरन्, अयतं गच्छन्-ईर्यासमितिमुल्लंघ्य, किमित्याह-'प्राणिभूतानि हिनस्ति', प्राणिनो-द्वीन्द्रियादयः, भूतानि-एकेन्द्रियाः, तानि हिनस्ति-प्रमादाना-ऽनाभोगाभ्यां व्यापादयतीति-भावः, तानि च हिंसन् 'बध्नाति पापं कर्म्मं' अकुशलपरिणामादादत्ते क्लिष्टं ज्ञानावरणीयादि, 'तत् से भवति कटुकफलं' तत्-पापं कर्म, से तस्यायतचारिणो भवति, कटुकफलमिति अनुस्वारोऽलाक्षणिकः, अशुभफलं भवति, मोहादिहेतुतया विपाकदारुणमित्यर्थः ।।१।।

एवमयतं तिष्ठन् ऊर्ध्वस्थानेनासमाहितो हस्तपादादि विक्षिपन्, शेषं पूर्ववत् ।।२।।

एवमयतमासीनो निषण्णतयाऽनुपयुक्त आकुञ्चनादिभावेन, शेषं पूर्ववत् ।।३।।

एवमयतं स्वपन्-असमाहितो दिवा प्रकामशय्यादिना(वा), शेषं पूर्ववत् ।।४।।

एवमयतं भुञ्जानो-निष्प्रयोजनं प्रणीतं काकशृगालभक्षितादिना(वा), शेषं पूर्ववत् ।।५।।

एवमयतं भाषमाणो, गृहस्थभाषया निष्ठुरमन्तरभाषादिना(वा), शेषं पूर्ववत् ।।६।।

**कहं चरे ? कहं चिट्ठे ?, कहमासे ? कहं सए ? ।**
**कहं भुंजंतो ? भासन्तो ?, पावं कम्मं न बंधइ ।।७।।**

**(ति.)** अत्राह-शिष्यः । यद्येवं कर्मबन्धः ततः—

[कहं चरे...इत्यादि]

**(स.)** अत्र शिष्य आह—कहं-इति-यद्येवं पापकर्मबन्धस्ततः कथं चरेदित्याह—कथं केन प्रकारेण चरेत्, कथं तिष्ठेत्, कथमासीत कथं [1]स्वपेत्, कथं भुञ्जानोऽ[2]न्नं कथं भाषमाणः पापकर्म न बध्नाति ? ७.

**(सु.)** अत्राह—यद्येवं पापकर्मबन्धः, ततः 'कहं चरे' इत्यादि कथं-केन प्रकारेण चरेत् ?, कथं तिष्ठेत् ?, कथमासीत ?, कथं स्वपेत् ?, कथं भुञ्जानो भाषमाणः पापं कर्म न बध्नातीति ? ।।७।।

**जयं चरे जयं चिट्ठे, जयमासे जयं सए ।**
**जयं भुंजंतो भासंतो, पावं कम्मं न बंधइ ।।४.८।।**

**(ति.)** गुरुराह-[जयं चरे... इत्यादि]

**(स.)** अत्र आचार्य उत्तरमाह—जयमिति-यतं चरेत् सूत्रस्योपदेशेन ईर्यासमित्यादि-समितः सन्, यतं तिष्ठेत् असमाहितः सन् हस्तपादादीनां विक्षेपेण विना, यतमासीत उपयुक्तः सन्नाकुञ्चना देरकरणेन, यतं [3]स्वपेत् समाधिमान् सन् रात्रौ प्रकामशय्यादि-परिहारेण, यतं भुञ्जानोऽप्रणीतं सिंहभक्षितादिना, एवं यतं भाषमाणः साधुभाषया तदपि मृदु कालप्राप्तं च, एवं कुर्वन् साधुः पापं कर्म क्लिष्टमकुशलानुबन्धि ज्ञानावरणीयादि न बध्नाति, कथम् ? आश्रवरोधनात् साध्वाचारतत्परत्वाच्च. ८.

**(सु.)** आचार्य आह—'जयं चरे' इत्यादि, यतं—चरेत् सूत्रोपदेशेन ईर्यादिसमितः, यतं तिष्ठेत् समाहितो हस्तपादाद्यविक्षेपेण, यतमासीत उपयुक्तमाकुञ्चनाद्यकरणेन, यतं स्वपेत्-समाहितो रात्रौ प्रकामशय्यादिपरिहारेण, यतं भुञ्जानः-सप्रयोजनमप्रणीतं प्रतर[?]सिंहभक्षितादिना, एवं यतं भाषमाणः साधुभाषया मृदु कालप्राप्तं च, पापं कर्म-क्लिष्टं अकुशलानुबन्धि ज्ञानावरणादि न बध्नाति नादत्ते, निराश्रवत्वाद्वि-हितानुष्ठानपरत्वादिति ।।८।।

**सव्वभूयप्पभूयस्स, सम्मं भूयाइं पासओ ।**
**पिहियासव्वस्स दंतस्स, पावं कम्मं न बंधइ ।।८.९।।**

**(ति.)** किं बहुना...इह द्वितीयार्थे षष्ठी, सर्वाणि भूतानि आत्मभूतानि-आत्मप्रायाणि

१. स्वप्यादिति साधुः । २. क्वचिदिदं पदन्नास्ति । ३. स्वप्यादिति साधीयान् ।

यस्य स तथा तम् । सम्यग् भूतानि-पृथ्व्यादीनि पश्यन्तम् । पिहिताश्रवम्-स्थगितप्राणातिपातादिकम्। दान्तम्-कर्मतापन(न्त्र)म् । पापं कर्म, कर्तृ न बध्नाति ।।

**(स.)** सव्व'-इति-किञ्चैवंविधस्य साधोः पापं कर्म न बध्यते. तस्य साधोः पापकर्मबन्धो न भवतीत्यर्थः, किंभूतस्य साधोः ? सर्वभूतेष्वात्मभूतो य आत्मवत् सर्वभूतानि पश्यति तस्य, किंकुर्वतः साधोः ? सम्यग् वीतरागकथितेन विधिना भूतानि पृथिव्यादीनि पश्यतः, पुनः किंभूतस्य साधोः ? पिहितो निरुद्धः स्थगित आश्रवः प्राणातिपातादिरूपो येन स तस्य, पुनः किंभूतस्य साधोः ? दान्तस्य दमितेन्द्रिय-नोइन्द्रियव्यापारस्य, एवं सति किं भवति ? सर्वभूतदयावतः पापकर्मबन्धो न भवति. ।।९।।

**(सु.)** किं च-'सव्वभूय' इत्यादि, सर्वभूतेष्वात्मभूतः सर्वभूतात्मभूतो य 'आत्मवत् सर्वभूतानि पश्यति'इत्यर्थः, तस्यैवं सम्यग् वीतरागोक्तेन विधिना भूतानि-पृथिव्यादीनि पश्यतः सतः पिहिताश्रवस्य-स्थगितप्राणातिपाताद्याश्रवस्य दान्तस्य-इन्द्रिय-नोइन्द्रियदमेन पापं कर्म्म न बध्नाति, तस्य पापकर्मबन्धो न भवतीत्यर्थः ।।९।।

**पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए ।**
**अन्नाणी किं काही ?, किं वा नाही छेय-पावगं ? ।।४.१०।।**

**(ति.)** एवं तर्हि दयैव कार्या, किं ज्ञानाभ्यासेनेत्याह —प्रथमं ज्ञानम्-जीवाजीवादेः। ततो दया, एवं तिष्ठति । सर्वसंयतः-सर्वसंयमवान्। अज्ञानी किं करिष्यति ?, किं वा ज्ञास्यति ? श्रेयः पापकं वा ।।१०।।

**(स.)** शिष्यः प्राह पढमं-इति-इत्यनेन किमागतं ? सर्वप्रकारेण दयायामेव यतितव्यं. किं प्रयोजनं ज्ञानाभ्यासेन ? गुरुराह-मा एवं भ्रमं कुरु ? यतः प्रथममादौ ज्ञानं जीवस्वरूप-रक्षणस्योपायफलविषयं, ततस्तथाविधज्ञानात् पश्चाद् दया संयमः, एवमनेन प्रकारेण ज्ञानपूर्वकदयाप्रतिपत्तिरूपेण तिष्ठत्यास्ते सर्वसंयतः सर्वोऽपि साधुवर्गः, परं यः पुनरज्ञानी ज्ञानरहितः स किं करिष्यति ? सर्वत्रान्धतुल्यत्वात् प्रवृत्तिनिमित्तस्याभावात्, किं वा कुर्वन् ज्ञास्यति छेकं निपुणं हितं कालस्योचितं पापकं वा छेकाद् विपरीतं, तत्करणं भावतोऽकरणमेव समस्तनिमित्तानामभावादन्धप्रदीप्तपलायनघुणाक्षरवत्. अत एवान्यत्रा-प्युक्तं-

"गीअत्थो अ विहारो बीओ गीअत्थमीसिओ भणिओ ।

इत्तो तइअविहारो नाणुन्नाओ जिणवरेहिं १." [ओघनिर्युक्ति-१२२]

अतो ज्ञानाभ्यासः कार्य एव. १०.

**(सु.)** एवं सति सर्वभूतदयावतः पापकर्मबन्धो न भवति, ततश्च सर्वात्मना दयायामेव यतितव्यं, अलं ज्ञानाभ्यासेनापि(न')इति मा भूदव्युत्पन्नविनेयमतिविभ्रम इति तदपोहायाह-'पढमं नाणं'-इति, प्रथमं-आदौ ज्ञानं-जीवस्वरूप-संरक्षणोपाय-फलविषयं 'ततः' तथाविधज्ञानसमनन्तरं दया-संयमः, तदेकान्तोपादेयतया भावतस्त-त्प्रवृत्तेः, एवं-अनेन प्रकारेण ज्ञानपूर्वकक्रियाप्रतिपत्तिरूपेण तिष्ठति-आस्ते, सर्वसंयतः-सर्वप्रव्रजितः, यः पुनरज्ञानी-साध्योपायफलपरिज्ञानविकलः, स किं करिष्यति ?, सर्वत्रान्धतुल्यत्वात् प्रवृत्ति-निवृत्तिनिमित्ताभावात्, किं वा कुर्वन् ज्ञास्यति छेकं निपुणं हितं कालोचितं, पापकं वा-अतो विपरीतमिति, ततश्च तत्करणं भावतोऽकरणमेव, समग्रनिमित्ताभावात्, अन्धप्रदीप्तपलायन-घुणाक्षरकरणवत्, अत एवान्यत्राप्युक्तं-"गीतत्थो य विहारो० ।।१।।" इत्यादि, अतो ज्ञानाभ्यासः कार्यः ।।१०।।

**सुच्चा जाणइ कल्लाणं, सुच्चा जाणइ पावगं ।**
**उभयं पि जाणई[1] सुच्चा, जं सेयं तं समायरे ।।४.११।।**

**(ति.)** अतो ज्ञानाभ्यासः कार्यः इत्याह-[सुच्चा...इत्यादि] स्पष्टः । नवरं यत् श्रेयः तत् समाचरेत् ।

**(स.)** यतः आह—सोच्चा-इति-श्रुत्वा जानाति कल्याणं दयाख्यं संयमस्वरूपं, श्रुत्वा च जानाति पापकं हिंसाख्यमसंयमस्वरूपम्, उभयमपि संयमा-ऽसंयमस्वरूपं श्रावकोपयोगि श्रावकयोग्यं जानाति श्रुत्वा नाश्रुत्वा, यतश्चैवमत इत्थं विज्ञाय यच्छेकं तत् समाचरेत्, तत् कुर्यादित्यर्थः. ११.

**(सु.)** तथा चाह—'सुच्चा०' इति, श्रुत्वा-आकर्ण्य तत्साधन-स्वरूप-विपाकं जानाति-बुद्ध्यते कल्याणं-कल्यो-मोक्षस्तमणति-नयतीति कल्याणं-दयाख्यं संयमस्वरूपं, श्रुत्वा जानाति पापं-पापकर्म्म असंयमस्वरूपं, उभयमपि-संयमा-ऽसंयमस्वरूपं श्रावकोपयोगि जानाति श्रुत्वा, नाश्रुत्वा, यतश्चैवमत इत्थं विज्ञाय यच्छेकं निपुणं हितं कालोचितं,

१. ०इ १० ।।

तत् समाचरेत्-तत्कुर्यादित्यर्थः ।।११।।

**जो जीवे वि न याणइ, अज्जीवे वि न याणाइ ।**
**जीवाजीवे अयाणंतो, कह सो नाहिइ संजमं ।।४.१२।।**

**जो जीवे वि वियाणइ, अज्जीवे वि वियाणइ ।**
**जीवाजीवे वियाणंतो, सो हु नाहिइ संजमं ।।४.१३।।**

**(ति.)** उक्तमेवार्थं 'जो जीवे वि' इत्यादि गाथा द्वयेन स्पष्टयन्नाह-गाथाद्वयमपि स्पष्टम् । नवरं हुरेवार्थे । नाहिइ-ज्ञास्यति ।।१२।। ।।१३।।

**(स.)** उक्तमेव स्पष्टीकुर्वन्नाह—जो-इति-यो जीवानपि पृथिवीकायादीन् न जानाति, अजीवानपि संयमस्योपघातिनो मणिस्वर्णादीन् न जानाति, एवं जीवाजीवानजानन् कथमसौ ज्ञास्यति संयमं तत्सम्बन्धिज्ञानस्याभावात् ।।१२।।

जो इति-ततश्च यो जीवानपि विजानाति; अजीवानपि विजानाति, जीवाजीवान् विजानन् स एव ज्ञास्यति संयममिति. । उपदेशाधिकारः समाप्तः ।।१३।।

**(सु.)** उक्तमेवार्थं स्पष्टयन्नाह—'जो जीवे'इत्यादि, यो जीवानपि पृथिवीकायिकादि-भेदभिन्नान् न जानाति 'अजीवानपि' संयमोपघातिनो मद्यहिरण्यादीन् न जानाति, एवं जीवाजीवानजानन् कथमसौ ज्ञास्यति संयमं ? तद्विषयं तद्विषयाज्ञानादिति भावः ।।१२।।

ततश्च 'जो जीवे' इत्यादि, यो जीवानपि विजानाति अजीवानपि विजानाति, जीवाजीवान् विजानन् स एव ज्ञास्यति संयममिति ।।१३।। प्रतिपादितः पञ्चम उपदेशार्थाधिकारः ।

**जया जीवमजीवे य, दो वि एए वियाणई ।**
**तया गइं बहुविहं, सव्वजीवाण जाणई ।।४.१४।।**

**(ति.)** अधुना धर्मफलमाह-['जया' इत्यादि,] गइं-नरकगत्यादिकम् ।

**(स.)** सांप्रतं धर्मस्य फलमाह जयेति- 'जया इत्यादि' यदा यस्मिन् काले जीवानजीवान् द्वावप्येतौ विजानाति, अनेन प्रकारेण जानाति, तदा तस्मिन् काले

गतिं नरकगत्यादिरूपां बहुविधामनेकप्रकारां सर्वजीवानां जानाति, यथावस्थितजीवा-जीवादिपरिज्ञानं विना गतिपरिज्ञानस्याभावात्. ।।१४।।

(सु.) साम्प्रतं धर्मफलमाह—'जया' इत्यादि यदा-यस्मिन् काले जीवान् अजीवांश्च द्वावप्येतौ विजानाति-विविधं जानाति, तदा-तस्मिन् काले गतिं-नरकगत्यादिरूपां बहुविधां-स्वपरगतभेदेनानेकप्रकारां, तां सर्वजीवानां जानाति यथावस्थितजीवाजीव-परिज्ञानमन्तरेण गतिपरिज्ञानाभावात् ।।१४।।

**जया गइं बहुविहं, सव्वजीवाण जाणई ।**
**तया पुन्नं च पावं च, बंधं मुक्खं च जाणई ।।४.१५।।**

**जया पुन्नं च पावं च, बंधं मुक्खं च जाणई ।**
**तया निर्विंदई भोए, जे दिव्वे जे य माणुसे ।।४.१६।।**

(ति.) निर्विंते-असारत्वेन हेयतया विचारयति ।

(स.) अथ उत्तरोत्तरफलवृद्धिमाह—जयेति-यदा गतिं बहुविधां सर्वजीवानां जानाति, तदा पुण्यं च पापं च बहुविधगतिनिबन्धनं तथा बन्धं जीवकर्मयोगदुःखलक्षणं. मोक्षं च जीवकर्मवियोगसुखलक्षणं जानाति. ।।१५।।

जया-इति-यदा पुण्यं च पापं च बन्धं च मोक्षं च जानाति, तदा निर्विन्ते मोहाभावात् सम्यग् विचारयत्यसारदुःखरूपतया, कान् ? भोगान् शब्दादीन् यान् दिव्यान् यान् मानुषान्, तेभ्यो व्यतिरिक्ताः शेषाः परमार्थतो भोगा एव न भवन्ति. ।।१६।।

(सु.) उत्तरोत्तरां फलवृद्धिमाह—यदा गतिं बहुविधां स्वपरगतभेदेनानेकप्रकारां सर्वजीवानां जानाति. तदा पुण्यं च पापं च—बहुविधगतिनिबन्धनं, तथा बन्धं-जीव-कर्म्मयोग, सुख-दुःखलक्षणं, मोक्षं-तद्वियोगस्वरूपावस्थानलक्षणं जानाति ।।१५।।

'जया' इत्यादि, यदा पुण्यं च पापं च बन्धं मोक्षं च जानाति तदा निर्विन्ते-मोहाभावात् सम्यग् विचारयत्यसारदुःखरूपतया भोगान्-शब्दादीन् यान् दिव्यान् यांश्च मानुषान्, शेषास्तु वस्तुतो भोगा एव न भवन्ति ।।१६।।

**जया निविंदए भोए, जे दिव्वे जे य माणुसे ।**
**तया चयइ संजोगं, सब्भिंतरबाहिरं ।।४.१७।।**

**जया चयइ संजोगं, सब्भिंतरबाहिरं ।**
**तया मुंडे भवित्ताणं, पव्वए अणगारियं ।।४.१८।।**

**जया मुंडे भवित्ताणं, पव्वए अणगारियं ।**
**तया संवरमुक्कट्ठं, धम्मं फासे अणुत्तरं ।।४.१९।।**

**(ति.)** उत्कृष्टसंवरम्-प्राणातिपातादि पञ्चाश्रवविरमणरूपम् ।

**(स.)** जया-इति-यदा निर्विन्ते भोगान् दिव्यान् मानुषान्, तदा त्यजति संयोगं सम्बन्धं साभ्यन्तरबाह्यं, क्रोधादिरूपमाभ्यन्तरं स्वर्णादिरूपं बाह्यं सम्बन्धमित्यर्थः. ।।१७।।

जया-इति-यदा त्यजति संयोगं साभ्यन्तरं बाह्यं तदा मुण्डो भूत्वा द्रव्यतो भावतश्च प्रव्रजति प्रकर्षेण व्रजति मोक्षमनगारं द्रव्यतो भावतश्चाविद्यमानागारमित्यर्थः ।।१८।।

जया-इति-यदा मुण्डो भूत्वा प्रव्रजत्यनगारं तदोत्कृष्टं संवरधर्मं सर्वप्राणातिपातादि-निवृत्तिरूपं चारित्रधर्मं स्पृशत्यनुत्तरं सम्यगासेवत इत्यर्थः. ।।१९।।

**(सु.)** 'जया' इत्यादि, यदा निर्विन्ते भोगान् यान् दिव्यान् यांश्च मानुषान् तदा त्यजति संयोगं-संबन्धं, द्रव्यतो भावतः साभ्यन्तरबाह्यं-क्रोधादिहिरण्यादिसम्बन्धमित्यर्थः ।।१७।।

'जया' इत्यादि, यदा त्यजति संयोगं साभ्यन्तरबाह्यं, तदा मुण्डो भूत्वा द्रव्यतो भावतश्च प्रव्रजति-प्रकर्षेण व्रजत्यपवर्गं प्रत्यनगारं द्रव्यतो भावतश्चाविद्यमाना-गारमितिभावः ।।१८।।

'जया' इत्यादि, यदा मुण्डो भूत्वा प्रव्रजत्यनगारितां, तदा 'संवरमुक्किट्ठं-इति प्राकृतशैल्या उत्कृष्टसंवरं धर्मं सर्वप्राणातिपातादिविनिवृत्तिरूपं चारित्रधर्ममित्यर्थः, स्पृशत्यनुत्तरं-सम्यगासेवत इत्यर्थः ।।१९।।

**जया संवरमुक्कट्ठं, धम्मं फासे अणुत्तरं ।**
**तया धुणइ कम्मरयं, अबोहिकलुसंकडं[1] ।।४.२०।।**

**(ति.)** अबोधिकलुषकृतम्-अबोधिकलुषेण-मिथ्यात्वमलिनेनोपात्तं, मध्यानुस्वारोऽलाक्षणिकः।

**(स.)** जया-इति-यदा संवरमुत्कृष्टं धर्मं स्पृशत्यनुत्तरं, तदा धुनाति, धातूनामनेकार्थत्वात् पातयति, किं ? कर्मरजः कर्मैवात्मरञ्जनाद् रज इव कर्मरजः, किंभूतं कर्मरजः, अबोधिकलुषकृतम्-अबोधिकलुषेण मिथ्यादृष्टिना उपात्तमित्यर्थः. ।।२०।।

**(सु.)** 'जया' इत्यादि, यदोत्कृष्टसंवरं धर्म्मं स्पृशत्यनुत्तरं, तदा धुनोति-अनेकार्थतया पातयति कर्मरजः कर्मैवात्मरञ्जनाद् रज इव रजः, किंविशिष्टमित्याह-अबोधिकलुषकृतं अबोधिकलुषेण मिथ्यादृष्टिनोपात्तमित्यर्थः ।।२०।।

**जया धुणइ कम्मरयं, अबोहिकलुसंकडं ।**
**तया सव्वत्तगं नाणं, दंसणं चाभिगच्छई ।।४.२१।।**

**जया सव्वत्तगं नाणं, दंसणं चाभिगच्छई ।**
**तया लोगमलोगं च, जिणो जाणइ केवली ।।४.२२।।**

**जया लोगमलोगं च, जिणो जाणइ केवली ।**
**तया जोए निरुंभित्ता, सेलेसिं पडिवज्जइ ।।४.२३।।**

**जया जोए निरुंभित्ता, सेलेसिं पडिवज्जइ ।**
**तया कम्मं खवित्ताणं, सिद्धिं गच्छइ नीरओ ।।४.२४।।**

**(ति.)** कर्म-भवोपग्राह्यपि ४.२१-४.२४।।

**(स.)** जया-इति-यदा धुनाति कर्मरजोऽबोधिकलुषकृतं, तदा सर्वत्रगं ज्ञानमशेषज्ञेयविषयमशेषं दर्शनं चाधिगच्छति, आवरणस्याभावादाधिक्येन प्राप्नोति. ।।२१।।

जया-इति-यदा सर्वत्रगं ज्ञानं दर्शनं चाधिगच्छति, तदा लोकं चतुर्दशरज्जुरूपमलोकं चानन्तं जिनो जानाति केवली. ।।२२।।

१. चूर्णि 'अबोधिकलुसं कडं' - स्वतंत्र विशेषण माने छे.

जया-इति-यदा लोकमलोकं च जिनो जानाति केवली, तदा उचितसमयेन योगान् निरुद्ध्य मनोयोगादीन् शैलेशीं प्रतिपद्यते भवोपग्राहिकर्मांशक्षयार्थम्. ।।२३।।

जया-इति-यदा योगान्निरुद्ध्य शैलेशीं प्रतिपद्यते, तदा कर्म क्षपयित्वा सिद्धिं लोकान्तक्षेत्ररूपां गच्छति, किंभूतः ? नीरजाः कर्मरजोमुक्तः. ।।२४।।

**(सु.)** 'जया' इत्यादि, यदा धुनोति कर्मरजः अबोधिकलुषकृतं, तदा सर्वत्रगं ज्ञानं अशेषज्ञेयविषयं दर्शनं चाशेषदृश्यविषयम् अधिगच्छत्यावरणाभावादाधिक्येन प्राप्नोतीत्यर्थः ।।२१।।

'जया' इत्यादि, यदा सर्वत्रगं ज्ञानं दर्शनं चाधिगच्छति, तदा लोकं-चतुर्दश-रज्ज्वात्मकं अलोकं चानन्तं जिनो जानाति केवली, लोकालोकौ च सर्वं नान्यतरमेवेत्यर्थः ।।२२।।

'जया' इत्यादि, यदा लोकमलोकं च जिनो जानाति केवली, तदोचितसमयेन योगान् निरुद्ध्य मनोयोगादीन् शैलेशीं प्रतिपद्यते, भवोपग्राहिकर्मांशक्षयाय ।।२३।।

'जया' इत्यादि, यदा योगान् निरुद्ध्य शैलेशीं प्रतिपद्यते भवोपग्राहिकर्मांशक्षयाय, तदा कर्म्म क्षपयित्वा भवोपग्राह्यपि सिद्धिं गच्छति लोकान्तक्षेत्ररूपां नीरजाः-सकलकर्मरजोविप्रमुक्तः ।।२४।।

**जया कम्मं खवित्ताणं, सिद्धिं गच्छइ नीरओ ।**
**तया लोगमत्थयत्थो, सिद्धो हवइ सासओ ।।४.२५।।**

**(ति.)** [सुगमा]

**(स.)** जया-इति-यदा कर्म क्षपयित्वा सिद्धिं गच्छति नीरजाः, तदा लोकमस्तकस्थ-स्त्रैलोक्यस्योपरिवर्ती सिद्धो भवति शाश्वतः, कर्मबीजाभावे न पुनरुत्पद्यते. उक्तो धर्मफलनामा षष्ठोऽधिकारः. ।।२५।।

**(सु.)** 'जया' इत्यादि,-यदा कर्म क्षपयित्वा सिद्धिं गच्छति नीरजाः, तदा लोकमस्तकस्थः त्रैलोक्योपरिवर्ती सिद्धो भवति 'शाश्वतः' कर्मबीजाभावाद् अनुत्पत्तिधर्म्मेति भावः ।।२५।। उक्तो धर्म्मफलाख्यः षष्ठोऽधिकारः ।

**सुहसायगस्य समणस्स, सायाउलस्स निगामसाइस्स ।**
**उच्छोलणा पहोइस्स, दुलहा सोगइ तारिसगस्स ।।४.२६।।**

(ति.) संप्रति यस्य धर्मफलं दुर्लभं, तमाह—सुखास्वादकस्य-प्राप्तशब्द-रसादिरसभोक्तुः । श्रमणस्य-द्रव्यसाधोः । साताकुलस्य-भाविसुखार्थं व्याक्षिप्तचित्तस्य। निकामशायिनः-सूत्रार्थवाचनावेलायामपि शयानस्य। उच्छोलनाप्रधाविनः-उच्छोलनया उदकायतनया प्रकर्षेण धावति पादादिशुद्धिं करोति यः स तथा तस्य । दुर्लभा सुगतिः-सिद्धिपर्यवसाना । तादृशकस्य-भगवदाज्ञालोपिनः।।२६।।

(स.) अथ धर्मफलस्य दुर्लभत्वमाह—सुह-इति-सुखास्वादकस्य प्राप्तेषु शब्दरसादिभोगेषु सुखोपभोगकर्तुः. एवंविधस्य श्रमणस्य द्रव्यतः प्रव्रजितस्य, पुनः किंभूतस्य श्रमणस्य ? शाताऽऽकुलस्य भाविसुखार्थं व्याक्षिप्तचित्तस्य, पुनः किंभूतस्य श्रमणस्य ? निकामशायिनः, निकाममत्यर्थं सूत्रार्थवेलामतिक्रम्य शयानस्य, पुनः किम्भूतस्य श्रमणस्य ? उत्सीलनया उदकस्या-यतनया प्रकर्षेण धावति पादादिशुद्धिं करोति यः स तथा तस्य, किं स्यादित्याह-दुर्लभा दुष्प्रापा सुगतिः सिद्धिः, तादृशस्य भगवत आज्ञालोपकारिणः. ।।२६।।

(सु.) साम्प्रतमिदं धर्म्मफलं यस्य दुर्लभं, तमभिधित्सुराह—'सुहसायगस्स'इत्ति सुखास्वादकस्य-अभिष्वङ्गेण प्राप्तसुखोपभोक्तुः, श्रमणस्य-द्रव्यप्रव्रजितस्य साताकुलस्य भाविसुखार्थं व्याक्षिप्तचित्तस्य, निकामशायिनः-सूत्रार्थवेलामप्युल्लंघ्य शयानस्य, उच्छोल-नाप्रधाविनः उच्छोलनयोदकायतनया प्रकर्षेण धावति पादादिशुद्धिं करोति यः स तथाविधस्तस्य, किमित्याह-दुर्लभा-दुष्प्रापा सुगतिः-सिद्धिपदपर्यवसाना तादृशस्य भगवदाज्ञालोपकारिण इति गाथार्थः ।।२६।।

**तवोगुणपहाणस्स, उज्जुमइ खंतिसंजमरयस्स ।**
**परीसहे जिणंतस्स, सुलहा सोगइ तारिसगस्स ।।४.२७।।**

(ति.) अथ यस्य धर्मफलं सुलभं, तमाह—तपोगुणप्रधानस्य ऋजुमतेः-सरलाशयस्य। क्षान्ति-संयमरतस्य-क्षमाप्रधान-संयमाऽऽसेविनः । परीषहान्-क्षुदादीन् जयतः । सुलभा। सुगतिः-सिद्धिरूपा । तादृशकस्य-भगवदाज्ञाकारिणः ।।२७।।

**(स.)** अथ धर्मफलस्य सुलभतामाह—तवोगुण इति-तादृशस्य भगवत आज्ञाकारिणः सुगतिः सिद्धिः सुलभा सुप्रापा भवति, किंविधस्य तादृशस्य ? तपोगुणप्रधानस्य षष्ठाष्टमादितपोगुणवतः, पुनः किंभूतस्य तादृशस्य ? ऋजुमतेर्मोक्षमार्गप्रवृत्तबुद्धेः, पुनः किंभूतस्य ? क्षान्तिसंयमरतस्य. क्षान्तिप्रधानस्य संयमस्य सेविन इत्यर्थः, पुनः किंभूतस्य ? परीषहान् क्षुत्-पिपासादीन् जयतः पराभवतः ।।२७।।

**(सु.)** इदानीं धर्म्मफलं यस्य सुलभं तमाह-'तवोगुण' इत्यादि, तपोगुणप्रधानस्य-षष्ठाष्टमादितपोगुण(धन)वतः, ऋजुमतेर्मार्गप्रवृत्तबुद्धेः, क्षान्ति-संयमरतस्य-क्षान्तिप्रधान-संयमासेविन इत्यर्थः। परीषहान् क्षुत्-पिपासादीन् जयतः-अभिभवतः सुलभा सुगतिः-उक्तलक्षणा तादृशस्य भगवदाज्ञाकारिण इति गाथार्थः ।।२७।।

**पच्छावि ते पयाया, खिप्पं गच्छंति अमरभवणाइं ।**
**जेसिं पिओ तवो संजमो य, खंती य बंभचेरं च ।।४.२८।।**

**(ति.)** ये चादौ सुखशीलाः, पश्चात् कुतोऽपि वैराग्याद् व्रतोद्यता भवन्ति, तेषां किमित्याह—पश्चादपि ते प्रयाताः-मोक्षं प्रति प्रयातुमारब्धः(ब्धा), आर्द्रकुमार-नन्दिषेणादिवत्। क्षिप्रं गच्छन्तीत्यादि सुगमम् ।।२८।।

**(स.)** महार्था षड्जीवनिकायिका इति, विधिना उपसंहारमाह—पच्छा-इति-पश्चादपि वृद्धावस्थायामपि ते प्रयाताः प्रकर्षेण याता अविराधितसंयमा[1] अपि सन्मार्गं प्रपन्ना द्रुतं गच्छन्त्यमरभवनानि देवविमानानि, ते के इत्याह-येषां प्रियं तपः संयमः क्षान्तिः ब्रह्मचर्यं च. ।।२८।।

**(सु)** नैषा गाथा विवृता-।।२८।।

**[1]इच्चेयं छज्जीवणियं, सम्मदिट्ठी सया जए ।**
**दुलहं लभित्तु सामन्नं, कम्मुणा न विराहिज्जासि - त्ति बेमि ।।४.२९।।**

**(ति.)** षड्जीवनिकायिकोपसंहारमाह—इत्येतां षड्जीवनिकायिकां सम्यग्दृष्टिजीवः। सदा यतः-यत्नपरः । दुर्लभं लब्ध्वा श्रामण्यम् कर्मणा-मनोवाक्-कायक्रियया प्रमादेन । न विराधयेत्-न खण्डयेत् । अप्रमत्तस्तु कथञ्चिद् विराधनायामप्यविराधक एव ।

१. अत्र 'विराधितसंयमा अपि' इति पाठः साधीयानिति भाति, इति टिप्पणं चिन्त्यम्, संयमकालस्याल्पतया वृद्धानां तत्परपाकाभावेन सिद्धभावानवाप्तावपि स्वर्गप्राप्तौ तथाविधस्यापि तस्य क्षमत्वमिति वृद्धैरपि पर्यन्ते संयमविराधना न कार्येति सूत्रतात्पर्यात् ।२.ए.१.३.४ ।।

एतेन -

जले जीवाः स्थले जीवाः, आकाशे जीवमालिनि ।

जीवमालाकुले लोके, कथं भिक्षुरहिंसकः ।।१।। [ ]

इति प्रत्युक्तम् ब्रवीमीति पूर्ववत् ।।

**[इति तिलकाचार्यविरचितटीकायां चतुर्थमध्ययनम्]**

**(स.)** इति पूर्वप्रकारेणैतां षड्जीवनिकायिकामधिकृताध्ययनप्रतिपादितार्थरूपां न विराधयेदिति योगः, क इत्याह-सम्यग्दृष्टिर्जीवः सूत्रश्रद्धावान्. किंभूतः ? सदा यतः सर्वकालं यतनापरः, किमित्याह-दुर्लभं लब्ध्वा श्रामण्यं साधुत्वं षड्जीवनिकाय-संरक्षणैकरूपं कर्मणा मनोवाक्-कायक्रियया प्रमादेन न विराधयेत्. अप्रमत्तस्य तु यद्यपि कथञ्चिद् द्रव्यविराधना स्यात् तथाप्यसौ न विराधकः. एतेन-

"जले जीवाः स्थले जीवा आकाशे जीवमालिनि ।

जीवमालाकुले लोके कथं भिक्षुरहिंसकः" १.

इत्येतत्प्रत्युक्तं तथा सूक्ष्मजीवानां विराधनाया अभावाच्च. ब्रवीमीति पूर्ववत् ।।२९।।

**इति श्रीसमयसुन्दरोपाध्यायविरचितायां दशवैकालिकवृत्तौ षड्जीवनिकाध्ययनं समाप्तम् । श्रीरस्तु ।**

**(सु.)** महार्था षड्जीवनिकायिकेति विधिनोपसंहरन्नाह-'इच्चेयं'इत्यादि, इत्येतां षड्जीवनिकायिकामधिकृताध्ययनप्रतिपादितार्थरूपां न विराधयेदितियोगः । सम्यग्दृष्टिः-जीवस्तत्त्व श्रद्धानवान् सदा यतः-सर्वकालं प्रयत्नपरः सन्, किमित्याह-'दुर्ल्लभं लब्ध्वा श्रामण्यं' दुष्प्राप्यं प्राप्य श्रमणभावं-षड्जीवनिकायसंरक्षणैकरूपं कर्म्मणा मनोवाक्-कायक्रियया प्रमादेन न विराधयेत्-न खण्डयेत्, अप्रमत्तस्य तु द्रव्यविराधना यद्यपि कथंचिद् भवति, तथाप्यसावविराधक एवेत्यर्थः । एतेन

"जले जीवाः, स्थले जीवा, आकाशे जीवमालिनि।

जीवमालाकुले लोके, कथं भिक्षुरहिंसकः ? ।।१।।"

इत्येतत्प्रत्युक्तं, तथा सूक्ष्माणां विराधनाभावाच्च ।।२९।।

ब्रवीमि इति पूर्ववत् ।। **सुमति० वृत्तौ व्याख्यातं षड्जीवनिकायाध्ययनम्।**

**इति चतुर्थं षड्जीवनिकायाध्ययनं समाप्तम् ४ ।।**

# ।। पञ्चमं अध्ययनं पिण्डैषणा ।।

## ।। पिण्डैषणाध्ययने प्रथमोद्देशकः ।।

**संपत्ते भिक्खकालंमि, असंभंतो अमुच्छिओ ।**
**इमेण कमजोगेण, भत्तपाणं गवेसए ।।५.१.१।।**

**(ति.)** अनन्तराध्ययने साध्वाचारः कथितः, स च पिण्डादिशुद्ध्या शुद्धो भवति इत्यनेन सम्बन्धेनायातं "पिण्डैषणाध्ययनम्" अधुना व्याख्यायते । तच्चेदम्—सम्प्राप्ते भिक्षाकाले । असम्भ्रान्तः-अनाकुलः । अमूर्च्छितः-अगृद्धः । अनेन-वक्ष्यमाणेन । क्रमयोगेन-परिपाटीव्यापारेण । भक्तपानं गवेषयेत् ।

**(स.)** अथ पञ्चमाध्ययनं प्रारभ्यते—**संपत्ते** इति-इह पूर्वाध्ययने साधोराचारः कथितः, स चाचारः कायस्य सति स्वास्थ्ये भवति, स्वाथ्यं चाहारं विना न भवति. स चाहारः शुद्धो ग्राह्यः, ततोऽनेन सम्बन्धेनायातमिदमध्ययनमाहारशुद्धिप्रतिपादकं व्याख्यातं, तच्चेदम्-[संपत्ते...] एवंविधः साधुर्भक्तपानं गवेषयेत्, यतीनां योग्यमोदना-ऽऽरनालमन्वेषयेदित्युक्तिः, क्व सति ? भिक्षाकाले भिक्षासमये, संप्राप्ते शोभनेन प्रकारेण स्वाध्यायकरणादिना प्राप्ते सति, किंभूतः साधुः ? असम्भ्रान्तोऽनाकुलः, यथाविधि उपयोगादि कार्यं कृत्वा, पुनः किंभूतः साधुः ? अमूर्च्छितो न शब्दादिविषये पिण्डे वा मूर्च्छितः, पुनः किंभूतः साधुः? अगृद्धो न पिण्डादावासक्तः, अनेन वक्ष्यमाणलक्षणेन क्रमयोगेन परिपाटीव्यापारेण. ।।५.१।।

**(सु.)** अधुना पिण्डैषणाख्यमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने साधोराचारः षड्जीवनिकायगोचरः प्रायः इत्येतदुक्तम् । इह तु धर्म्मकाये स्वस्थे सति असौ सम्यक् पाल्यते, स चाहारमन्तरेण प्रायः स्वस्थो न भवति, स च सावद्येतरभेद इत्यनवद्यो ग्राह्य इत्येतदुच्यते, उक्तं च-

"से संजए समक्खाए, निरवज्जाहारि जे विऊ ।
धम्मकायट्ठिए सम्मं, सुहजोगाण साहए ।।१।।"

इत्यनेनाभिसम्बन्धेनाऽऽयातमिदमध्ययनमिति, तच्चेदं-

'संपत्ते'-गाहा, सम्प्राप्ते-शोभनेन प्रकारेण स्वाध्यायकरणादिना प्राप्ते भिक्षाकाले-भिक्षासमये, अनेनासम्प्राप्ते भक्त-पानैषणाप्रतिषेधमाह । अलाभा-ऽऽज्ञाखण्डनाभ्यां दृष्टादृष्टविरोधात्, असम्भ्रान्तः-अनाकुलो यथावदुपयोगादि कृत्वा, नान्यथेत्यर्थः । अमूर्च्छितः-पिण्डे शब्दादिषु वा अगृद्धो, विहितानुष्ठानमितिकृत्वा, न तु पिण्डादावेवासक्त इति । अनेन वक्ष्यमाणलक्षणेन क्रमयोगेन परिपाटीव्यापारेण भक्तपानं यतियोग्य-मोदना-ऽऽरनालादि गवेषयेदिति-अन्वेषयेदिति सूत्रार्थः ।।५.१।।

**से गामे वा नगरे वा, गोयरग्गगओ मुणी ।**
**चरे मंदमणुविग्गो, अव्वक्खित्तेण चेयसा ।।५.१.२।।**

**(ति.)** क्व गवेषयेत् ? इत्याह—सोऽसम्भ्रान्तोऽमूर्च्छितो मुनिः ग्रामे वा नगरे वा। गोचराग्रगतः-गौरिव चरणं गोचरः, उच्चनीचगृहेषु भिक्षाटनं, तस्याग्रे प्रथमं गतो गन्तुमारब्धः । चरेन्मन्दम्-शनैरद्रुतम् । अनुद्विग्नः-अलाभानिष्टलाभादौ । अव्याक्षिप्तेन-शब्दादिष्वगतेन एषणोपयुक्तेन चेतसा[1] ।

**(स.)** यत्र यथा गवेषयेत्-तथाह—से इति-सोऽसम्भ्रान्तोऽमूर्च्छितो मुनिः चरेद् गच्छेत्, परं मन्दं शनैः न द्रुतं, कुत्र चरेत् ? ग्रामे वा नगरे वा. उपलक्षणत्वात् कर्बटादौ वा. किंभूतो मुनिः ? गोचराग्रगतः, गौरिव चरणं गोचर उत्तम-मध्यमा-ऽधमकुलेषु राग-द्वेषौ त्यक्त्वा भिक्षाटनम्, अग्रः प्रधान आधाकर्मादिदोषरहितः तद्गतस्तद्वर्ती. किंभूतो मुनिः ? अनुद्विग्नः, नोद्विग्नः प्रशान्तः परीषहादिभ्यो न भयं कुर्वन्नित्यर्थः, केन ? चेतसा चित्तेन, किंभूतेन चेतसा? अव्याक्षिप्तेन आहारस्यैषणाया-मुपयुक्तेनोपयोगवतेत्यर्थः ।।५.२।।

**(सु.)** यत्र यथा गवेषयेत्, तद् आह—'से गामे'त्यादि, स इत्यसम्भ्रान्तोऽमूर्च्छितो ग्रामे वा नगरे वा, उपलक्षणत्वात् कर्बटादौ वा, गोचराग्रगत इति गौरिव चरणं गोचरः उत्तम-मध्यमा-ऽधमकुलेष्वरक्तद्विष्टस्य भिक्षाटनमग्रः-प्रधानोऽभ्याहृता-ऽऽधाकर्मादि-परित्यागेन, तद्गतः-तद्वर्त्ती मुनिः-भावसाधुः चरेत्-गच्छेत् मन्दं-शनैःशनैर्न द्रुतमित्यर्थः। अनुद्विग्नः-प्रशान्तः परीषहादिभ्योऽबिभ्यत् अव्याक्षिप्तेन चेतसा-अन्तःकरणेन एषणोपयुक्तेनेति सूत्रार्थः ।।५.२।।

१. अत्र वत्सकवणिग्जाया दृष्टान्तः । स च अन्यत्र द्रष्टव्यः ।

**पुरओ जुगमायाए, पेहमाणो महिं चरे ।**
**वज्जिंतो बीयहरियाइं, पाणे य दगमट्टियं ।।५.१.३।।**

(ति.) यथा चरेत् तथाह—पुरतो युगमात्रया कोऽर्थः-युगप्रमाणाम् । महीं प्रेक्ष्यमाणश्चरेत् । वर्जयन् बीजहरितानि, प्राणान्-द्वीन्द्रियादीन् । दगमृत्तिकाम्-पृथ्वीकायाप्कायौ । चशब्दात्-तेजोवायू च ।।

(स.) (अथ) यथा चरेत् तथा(तथैव) आह—पुर इति-एवंविधः सन् मुनिर्महीं चरेद् यायात्. परं न शेषदिशां विलोकनेनेति शेषः. किं कुर्वाणः ? पुरतोऽग्रतो युगमात्रया शरीरप्रमाणया दृष्ट्या-इति शेषः. प्रेक्षमाणः प्रकर्षेण पश्यन्, पृथिवीं प्रेक्षमाण एव केवलं न, किन्तु बीजहरितानि परिहरन्. पुनः प्राणिनो द्वीन्द्रियादीन् पुनरुदकम् अप्कायं पुनर्मृत्तिकां पृथ्वीकायं चशब्दात् तेजोवायू च परिहरन् इति संयमविराधनायाः परिहारः कथितः. ।।५.३।।

(सु.) यथा चरेत् तथैवाह-'पुरओ जुग'इति पुरतो-अग्रतो युगमात्रया-शरीरप्रमाणया शकटोर्द्धिसंस्थितया दृष्ट्येति वाक्यशेषः । प्रेक्षमाणः-प्रकर्षेण पश्यन् महीं-भुवं चरेद्-यायात्, न शेषदिगुपयोगेनेति गम्यते । न प्रेक्षमाण एव, अपि तु वर्जयन्-परिहरन् बीजहरितानि, अनेनानेकभेदस्य वनस्पतेः परिहारमाह । तथा प्राणिनो-द्वीन्द्रियादीं-स्तथोदकं-अप्कायं मृत्तिकां च-पृथिवीकायं, चशब्दात् तेजो-वायुपरिग्रहः ।।५.३।।

**ओवायं विसमं खाणुं, विज्जलं परिवज्जए ।**
**संकमेण न गच्छिज्जा, विज्जमाणे परक्कमे ।।५.१.४।।**

(ति.) उक्तः संयमविराधनापरिहारः । अधुनात्म-संयमविराधनापरिहारमाह — अवपातम्-गर्तादिरूपम् । विषमम्-निम्नोन्नतम् । स्थाणुम्-कीलकम् । विजलम्-विगतजलं कर्दमं परिवर्जयेत् । तथा सङ्क्रमेण-काष्ठ-पाषाणरचितेन पट्यारूपेण जलगर्तादौ तेन न गच्छेत् । संयमा-ऽऽत्मविराधनासम्भवात् । विद्यमाने पराक्रमे-अन्यस्मिन् मार्गे, तदभावे सङ्क्रमेणापि कार्यवशाद् यतनया यायात् ।।५.४।।

(स.) अथात्मसंयमयोर्द्वयोर्विराधनापरिहारमाह—ओवायं-इति-साधुरेतत् (सर्वं)

परिवर्जयेत् परिहरेत्. एतत् किमित्याहअवपातं गर्तादिरूपं, विषमं नीचोन्नतस्थानं. स्थाणुम् ऊर्ध्वकाष्ठं, विजलं विगतजलं कर्दमं, पुनः साधुः संक्रमेण जलगर्तादिपरिहारार्थं पाषाणकाष्ठरचितेन कृत्वा न गच्छेत्. कथम् ? आत्मसंयमयोर्द्वयोर्विराधनायाः सम्भवात्, अपवादमार्गमाह विद्यमाने पराक्रमेऽन्यमार्गे सतीत्यर्थः, असति तु तस्मिन् प्रयोजनमाश्रित्य यतनया गच्छेत्, ।।५.४।।

**(सु.)** उक्तः संयमविराधनापरिहारः । अधुनाऽऽत्मसंयमविराधनापरिहारमाह- 'ओवायं'इति, अवपातं-गर्त्तादिरूपं, विषमं-निम्नोन्नतं, स्थाणुं-ऊर्ध्वकाष्ठं, विजलं-विगतजलं कर्दमं परिवर्जयेत्-एतत् सर्वं परिहरेत्, तथा सङ्क्रमेण-जलगर्त्तापरिहाराय पाषाण-काष्ठरचितेन न गच्छेत्, आत्म-संयमविराधनासम्भवात् । अपवादमाह-विद्यमाने पराक्रमे-अन्यमार्ग इत्यर्थः। असति तु तस्मिन् प्रयोजनमाश्रित्य यतनया गच्छेदिति सूत्रार्थः ।।५.५।।

**पवडंते व से तत्थ, पक्खलंते व संजए ।**
**हिंसेज्ज पाणभूयाइं, तसे अदुव थावरे ।।५.१.५।।**

**(ति.)** अवपातादौ दोषमाह—प्रपतन् वा स तत्र-गर्तादौ । प्रस्खलन् वा संयतः हिंस्यात् प्राणभूतान् त्रसानथवा स्थावरान् ।।५.५।।

**(स.)** अथावपातादौ दोषमाह—पवडं-इति-एवं कुर्वन् साधुः प्राणिभूतानि, हिंस्यात्, प्राणिनो द्वीन्द्रियादीन्, भूतान्येकेन्द्रियादीनिति. एतदेवाह-त्रसानथवा स्थावरान् प्रपातेनात्मानं चेत्येवमुभय-विराधना ज्ञातव्या. ।।५.५।।

**(सु.)** अवपातादौ दोषमाह—'पवडंते व' इति, प्रपतन् वाऽसौ तत्र अवपातादौ प्रस्खलन् वा संयतः-साधुः हिंस्याद्-व्यापादयेत्, प्राणिभूतानि प्राणिनो-द्वीन्द्रियादयः, भूतानि-एकेन्द्रियाः, एतदेवाह-त्रसानथवा स्थावरान्, प्रपातेनात्मानं चेत्येवमुभयविराधनेति ।।५.५।।

**तम्हा तेण न गच्छिज्जा, संजए सुसमाहिए ।**
**सइ अन्नेण मग्गेण, जयमेव परक्कमे ।।५.१.६।।**

**(ति.)** यतश्चैवम् ?—तस्मात् तेन-अवपातादिना । न गच्छेत् । संयतः-सुसमाहितः। सत्यन्यस्मिन्-समे मार्गे, सप्तमीस्थाने तृतीया । असति च समे मार्गे तेनैवावपातादिना विराधनाद्वयं परिहरन् यतमेव-यतनयैव पराक्रमेत् ।।५.६।।

**(स.)** यतश्चैवं, ततः किं कार्यं इति ? - आह—तम्हा-इति-संयतः साधुः तस्मात् कारणात् नावपातादिमार्गेण न गच्छेत्. किंभूतः संयतः ? सुसमाहितो भगवत आज्ञावर्ती, क्व सति, अन्यस्मिन् मार्गे सति. अत्र सूत्रत्वात् सप्तम्यर्थे तृतीया विभक्तिः. अपवादमाह- [1]असत्यन्यस्मिन् मार्गे तु तेनैवावपातादिना यतमेव यत्नेनात्मसंयमयोर्विराधनायाः परिहारेण यायात्-इति. ।।५.६।।

**(सु.)** यतश्चैवं 'तम्हा' इति, तस्मात् तेन-अवपातादिमार्गेण न गच्छेत् संयतः सुसमाहितो, भगवदाज्ञावर्तीत्यर्थः। सत्यन्येनेति, अन्यस्मिन् समादौ, मार्गेणेति मार्गे छान्दसत्वात् सप्तम्यर्थे तृतीया, असति त्वन्यस्मिन् मार्गे तेनैवावपातादिना यतमेव पराक्रमेत्, यतमिति क्रियाविशेषणं, यतमात्मसंयमविराधनापरिहारेण यायादिति ।।५.६।।

**इंगालं छारियं रासिं, तुसरासिं च गोमयं ।**
**ससरक्खेहिं पाएहिं, संजओ तं न[2]अक्कमे ।।५.१.७।।**

**(ति.)** अत्रैव विशेषतः पृथ्वीकाययतनामाह—अङ्गाराणामिमम्-आङ्गारम् । एवं क्षारं, राशिम् । तुषराशिम् । गोमयम्-गोमयराशिं, राशिशब्दोऽत्रापि सम्बध्यते । सरजस्काभ्याम्-सचित्तपृथ्वीकायरजो-गुण्डिताभ्यां पादाभ्यां संयतस्तं राशिं नाक्रामेत्। मा भूत् पृथ्वीरजोविराधनेति ।।५.७।।

**(स.)** अथात्रैव विशेषतः पृथिवीकाययतनामाह—इङ्गालं-इति-संयतः साधुः अङ्गाराणामयमाङ्गारः. आङ्गारं राशिं सरजस्काभ्यां सचित्तपृथिवीरजोगुण्डिताभ्यां पादाभ्यां नाक्रमेत्, यतस्तस्याक्रमणे सचित्तपृथिवीरजोविराधना भवेत्. एवं राशिशब्दस्य प्रत्येकं सम्बन्धात्—क्षारराशिं तुषराशिं गोमयराशिं च सरजस्कपादाभ्यां नाक्रमेत्. ।।५.७।।

**(सु.)** अत्र विशेषतः पृथ्वीकाययतनामाह—'इंगालं'इति आङ्गारमित्यङ्गाराणामय-माङ्गारस्तमाङ्गारं राशिं, एवं क्षारराशिं तुषराशिं च गोमयराशिं च, राशिशब्दः

---

१. असति तस्मिन्निति क. पु. चूर्णौ-अहवा...असति जयमेव...। २. 'नइक्कमे' इत्यन्यत्र मुद्रितः पाठः

प्रत्येकमभिसम्बध्यते । सरजस्काभ्यां पद्भ्यां-सचित्तपृथिवीरजोगुण्डिताभ्यां पादाभ्यां संयतः साधुस्तमनन्तरोदितं राशिं नातिक्रमेत्, मा भूत् पृथ्वीरजोविराधनेति ।।५.७।।

**न चरिज्ज वासे वासन्ते, महियाए वि पडंतिए ।**
**महावाए व वायंते, तिरिच्छसंपाइमेसु वा ।।५.१.८।।**

**(ति.)** अत्रैवाप्कायविराधनामाह—न चेरद् वर्षे वर्षति-बहिर्गतस्य वर्षणे तु प्रच्छन्ने तिष्ठेत् । महिकायाम्-धूमर्याम् । महावाते वा वाति सति । तिर्यक् सम्पतन्तीति तिर्यक्सम्पाताः, तत एव सम्पातिमाः पतङ्गादयः, तेषु वा सत्सु न चरेत् ।।५.८।।

**(स.)** अथ अप्कायादि यतनामाह—नेति-साधुर्वर्षे वर्षति न चरेत्, पूर्वं भिक्षार्थं प्रविष्टोऽपि वर्षे वर्षति प्रच्छन्नस्थाने तिष्ठेत्, तथा मिहिकायां वा पतन्त्यां न चरेत्, सा च मिहिका प्रायो गर्भमासेषु भवति, तथा महावाते वाति सति न चरेत्. अन्यथा महावातेन समुत्खातस्य सचित्तरजसो विराधना भवेत्. तथा तिर्यक् सम्पतन्तीति तिर्यक्सम्पाताः पतङ्गादयः, तेषु सत्सु वा न चरेत्, उक्तैवं प्रथमव्रतयतना — ।।५.८।।

**(सु.)** अत्रैवाप्कायादियतनामाह—'न चरेज्ज'इति न चरेद् वर्षे वर्षति, भिक्षार्थं प्रविष्टो वर्षणे तु प्रच्छन्ने तिष्ठेत्। तथा महिकायां वा पतन्त्यां, सा च प्रायो गर्भमासेषु पतति, महावाते वा वाति सति, तदुत्खातरजोविराधनादोषात्, तिर्यक् संपतन्तीति तिर्यक्संपाताः-पतङ्गादयः, तेषु वा सत्सु, क्वचिदप्यशनिरूपेण न चरेदिति ।।५.८।।

**न चरिज्ज वेससामंते, बंभचेरवसाणए ।**
**बंभयारिस्स दंतस्स, हुज्जा तत्थ विसुत्तिया ।।५.१.९।।**

**(ति.)** उक्ता प्रथमव्रतयतना साम्प्रतं चतुर्थव्रतयतनोच्यते—न चेरद् वेश्यासामन्ते-गणिकागृहसमीपे । ब्रह्मचर्यं अवसानयतीति इति, 'इनि पुणि वष्टि भागुरिरल्लोपे'[1] ब्रह्मचर्यवसानकं तस्मिन् ब्रह्मचर्यवसानके-ब्रह्मचर्यपर्यन्त-कारके । तत्र गतस्य ब्रह्मचारिणो दान्तस्य भवेद् विश्रोतसिका-वेश्यादर्शन-स्मरणापध्यानस्वरूपकचवरावस्थानात् ज्ञानश्रद्धाजलापगमात् । विरूपं श्रोत इव प्रणालमिव श्रान्तोऽन्तकरणं तदेव निरुक्त्या

---

१. वष्टि भागुरिरल्लोप-मवाप्योरुपसर्गयोः । आपं चैव हलन्तानां, यथा वाचा निशा दिशा ।। (सिद्धान्तकौमुद्यामव्ययप्रकरणे)

विश्रोतसिका सपङ्कप्रणालिका सकल्मषचित्तता इत्यर्थः ।।५.९।।

**(स.)** सांप्रतं चतुर्थव्रतस्य यतनोच्यते—न-इति-एवंविधः साधुः वेश्यासामन्ते गणिकागृहसमीपे न चरेत् न गच्छेत्, किंविशिष्टे वेश्यासामन्ते ? ब्रह्मचर्यवशानयने, ब्रह्मचर्यं मैथुनविरतिरूपं वशमानयति आयत्तं करोति दर्शनाक्षेपादिनेति ब्रह्मचर्यवशानयनं तस्मिन्, को दोषस्तत्र गमनत ? इत्यत आह ब्रह्मचारिणः साधोर्दान्तस्य इन्द्रिय-नोइन्द्रियदमाभ्यां भवेत् तत्र वेश्यासामन्ते विस्रोतसिका. कथम् ? तद्रूपदर्शन-स्मरणेनाशुभध्यानकचवरनिरोधतः ज्ञानश्रद्धा-जलोज्झनेन संयमशस्यशोषफला चित्तविक्रिया भवति. ।।५.९।।

**(सु.)** उक्ता प्रथमव्रतयतना । सांप्रतं चतुर्थव्रतयतनोच्यते-'न चरिज्ज'इत्ति 'न चरेद् वेश्यासामन्ते' न गच्छेद् गणिकागृहसमीपे, किंविशिष्ट इत्याह-ब्रह्मचर्यवशानयने (नये) ब्रह्मचर्यं मैथुनविरतिरूपं वशमानयति-आत्मायत्तं करोति दर्शनाक्षेपादिनेति ब्रह्मचर्यवशानयनं तस्मिन्, दोषमाह-ब्रह्मचारिणः साधोः, 'दान्तस्य' इन्द्रिय-नोइन्द्रिय-दमाभ्यां भवेत् 'तत्र' वेश्यासामन्ते 'विश्रोतसिका' तद्रूपसंदर्शन-स्मरणेनापध्यान-कचवरनिरोधतो ज्ञानश्रद्धाजलोज्झनेन संयमशस्यशोषणफला चित्तविक्रियेति ।।५.९।।

**अणायणे चरंतस्स, संसग्गीइ अभिक्खणं ।**
**हुज्ज वयाणं पीडा, सामन्नंमि य संसओ ।।५.१.१०।।**

**(ति.)** अत्रैव विशेषमाह—अनायतने-अस्थाने, वेश्यासामन्तादौ । चरतः संसर्गी, नदादेराकृति-गणत्वात् ई'प्रत्यये, तया । अभीक्ष्णं भवेद् व्रतानां पीडा ।

कथं वेश्यागतभावस्य चतुर्थव्रतं पीड्यते ? —

अनुपयोगेनैषणाया अरक्षणेऽहिंसा, केनाप्यपचित्तताप्रश्नेऽपलपनात् सत्यव्रतम्, अननुज्ञातवेश्यावलोकनाददत्तादानं, तन्ममत्वकरणे परिग्रहव्रतम्, एवं सर्वव्रतपीडा, द्रव्यश्रामण्येऽपि संशयः कदाचिदुन्निःक्रमणात् ।।५.१०।।

**(स.)** अत्र [नवम्यां गाथायां] एकवारं वेश्यासामन्तसङ्गतो दोष उक्तः, साम्प्रत मिहान्यत्र च वारंवारगमने दोषमाह—अणायण इति साधोरनायतनेऽस्थाने वेश्यासामन्तादौ चरतो गच्छतः संसर्गेण सम्बन्धेनाभीक्ष्णं पुनः पुनर्भवेद् व्रतानां प्राणातिपातविरत्यादीनां

पीडा भावविराधना. कथं ? यतस्तदानीं स साधुस्तदाक्षिप्तचित्तो भवति. पुनः श्रामण्ये श्रमणभावे-द्रव्यतो रजोहरणादिधारणरूपे भूयो भावतो व्रतप्रधानहेतौ संशयः. कदाचिदुन्निष्क्रामत्येव. ।।५.१०।।

**(सु.)** एष सकृच्चरणदोषो वेश्यासामन्तसङ्गत उक्तः, साम्प्रतमिहान्यत्र चासकृच्चरणदोषमाह-'अणायणे'इति अनायतने-अस्थाने वेश्यासामन्तादौ चरतो गच्छतः, संसर्गेण-सम्बन्धेनाभीक्ष्णं-पुनः पुनः, किम् ? इत्याह-भवेद् व्रतानां-प्राणातिपातविरत्यादीनां पीडा, तदाक्षिप्तचेतसो भावविराधना भवति, श्रामण्ये च श्रमणभावे च द्रव्यतो रजोहरणादिसंधारणरूपे भूयो भावव्रतप्रधानहेतौ संशयः, कदाचिदुन्निष्क्रामत्येवेत्यर्थः। तथा च वृद्धसंप्रदायः-

"वेसादिगयभावस्स मेहुणं पीडिज्जइ, अणुवओगेण एसणा-ऽरक्खणे(करणे) य हिंसा, पडुप्पायणे अन्नपुच्छणअवलवणा सच्चवयणं अणनुन्नायवेसाइ-दंसणे अदत्तादाणं, ममत्तकरणे परिग्गहो, एवं सव्ववयपीडा, दव्वसामन्ने पुण संसओ उन्निक्खमणेणत्ति" सूत्रार्थः ।।५.१०।।

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवढ्ढणं ।**
**वज्जए वेससामंतं, मुणी एगंतमस्सिए ।।५.१.११।।**

**(ति.)** एतन्निगमयन्नाह—[तम्हा...इति] सुगमः । नवरम् एगन्तमस्सिए-एकान्तं मोक्षमाश्रितः ।।

**(स.)** अथ निगमयन्नाह—तम्हा-इति यस्मादेवं तस्मान्मुनिः वेश्यासामन्तं वेश्यागृहसमीपं वर्जयेत् । किं कृत्वा ? दोषं पूर्वोक्तं विज्ञाय. किं भूतं दोषं ? दुर्गतेर्वर्धनं. किंभूतो मुनिः ? एकान्तं मोक्षमाश्रितः. शिष्यः प्राह-ननु प्रथमव्रतविराधनानन्तरं चतुर्थव्रतस्य विराधनायाः कथमुपन्यासः । उच्यते-अन्यव्रतविराधनाहेतुत्वेन चतुर्थव्रतस्य विराधनायाः प्राधान्यख्यापनार्थं. तच्च लेशतो दर्शितमेव. ।।५.११।।

**(सु.)** निगमयन्नाह—तम्हा'इति, यस्मादेवं तस्मादेतद् विज्ञाय दोषमनन्तरोदितं दुर्गतिवर्धनं वर्जयेद्, वेश्यासामन्तं, मुनिरेकान्तं मोक्षमार्गमाश्रित इति ।।५.११।।

**साणं सूइयं गाविं, दित्तं गोणं हयं गयं ।**
**संडिब्भं कलहं जुद्धं, दूरओ परिवज्जए ।।५.१.१२।।**

(ति.) अत्रैव विधिविशेषमाह—श्वानम् । सूतिकाम्-नवप्रसूतां गवीम् । दृप्तं गां, हयं, गजम् । सडिम्भम् [सण्डिम्भम्]-बालक्रीडास्थानम् । कलहम्-प्रतीतम् । युद्धम्-शस्त्रादिभिः । एतानि दूरतो वर्जयेत्। आत्म-संयमविराधनासम्भवात् । युद्धं हि पश्यतां कदाचित् प्रहारलगनादात्मविराधना, तत्प्रशंसाया संयमविराधना । श्वानादिभ्यश्च संयमात्मविराधना स्वयमभ्यूह्या ।।५.१२।।

(स.) अथ तत्रैव विशेषमाह-साणं-इति साधुरेतानि दूरतो दूरेण परिवर्जयेत्, कानि तानीत्यत आह-श्वानं प्रसिद्धं, सूतां गां नवप्रसूतां धेनुं, तथा दृप्तं दर्पितं गोणं बलीवर्दं, दृप्तशब्दः सर्वत्र सम्बध्यते, ततो दृप्तं हयमश्वं, पुनर्दृप्तं गजं हस्तिनं, तथा सण्डिब्भं बालक्रीडास्थानं. कलहं वाक्प्रतिबद्धं, युद्धं खड्गादिजातं, कथमेतानि वर्जयेदित्यत आह श्व-सूतगोप्रभृतिभ्य आत्मविराधना स्यात्, बालक्रीडास्थाने वन्दनागतपतन-भण्डन-लुठनादिना संयमविराधना स्यात्, सर्वत्रात्मपात्रभेदादिना उभयविराधनापि स्यात्. ।।५.१२।।

(सु.) आह-प्रथमव्रतविराधनानन्तरं चतुर्थव्रतविराधनोपन्यासः किमर्थम् ?, उच्यते-प्राधान्यख्यापनार्थं, अन्यव्रतविराधनाहेतुत्वेन प्राधान्यं, तच्च लेशतो दर्शितमेवेति । अत्रैव विशेषमाह-'साणं'इति श्वानं लोकप्रतीतं, सूतां गां-अभिनवप्रसूतां, दृप्तं-दर्प्पितं किमित्याह-गोणं, हयं गजं, गौः-बलीवर्दः, हयः-अश्वः, गजो-हस्ती, तथा 'संडिम्भं' बालक्रीडास्थानं, कलहं-सवाक्प्रतिबद्धं, युद्धं-खड्गादिभिः, एतद् दूरतो-दूरेण परिवर्जयेत्, आत्म-संयमविराधनासम्भवात्, श्व-सूतगोप्रभृतिभ्य आत्मविराधना, डिम्भस्थाने वन्दनाद्या-गमन-पतन-भण्डन-प्रलुठनादिना संयमविराधना, सर्वत्र चात्मपात्रभेदादिनोभयविराधनेति सूत्रार्थः ।।५.१२।।

**अणुन्नए नावणए, अप्पहिट्ठे अणाउले ।**
**इंदियाणि जहाभागं, दमइत्ता मुणी चरे ।।५.१.१३।।**

(ति.) अत्रैव विशेषमाह—अनुन्नतः-द्रव्यतो भावतश्च, द्रव्यतो नोर्ध्वमुखः, भावतो

न जात्याद्यभिमानी। नावनतः-द्रव्य-भावाभ्यामेव, द्रव्यानवनतोऽनीचकायः, भावानवनतोऽलाभादिनाऽदीनः। अप्रहृष्टः-लाभादौ अहर्षः । अनाकुलः-क्रोधादिरहितः। इन्द्रियाणि यथाभावम्-यथाविषयम्। दमयित्वा-इष्टानिष्टेषु स्पर्शादिषु रागद्वेषरहितो मुनिश्चरेत् । विपर्यये दोषः-द्रव्योन्नतो लोकहास्यः, भावोन्नतो जात्याद्यावेशादीर्यां न रक्षति । द्रव्यावनतो बक इति सम्भाव्यते, भावावनतः तुच्छसत्त्व इति । प्रहृष्टो योषिद्दर्शनाद् रक्त इति । आकुलो लाभार्थी । अदान्तः प्रव्रज्यानर्ह इति ।।५.१३।।

**(स.)** अथ अत्रैव विधिमाह—अणुन्नए'-इति-साधुरेवं चरेद् गच्छेत्. किंभूतो मुनिः ? अनुन्नतः, न उन्नतः अनुन्नतः, द्रव्यतो नाकाशदर्शी, भावतस्तु न जात्यादीनामभिमानकर्त्ता, पुनः किंभूतो मुनिः ? नावनतः, न अवनतः द्रव्यतो न नीचकायः. भावतस्तु नालब्ध्यादिना दीनः, पुनः किंभूतो मुनिः ? अप्रहृष्टो लाभादौ सति न हर्षवान्. पुनः किंभूतो मुनिः? अनाकुलः न आकुलः क्रोधादिना रहितः, किं कृत्वा मुनिश्चरेदित्यत आह-इन्द्रियाणि स्पर्शनादीनि, यथाभागं यथाविषयमिष्टेषु स्पर्शादिषु प्रवर्तमानान्यनिष्टेभ्यः स्पर्शादिभ्यो निवर्तमानानि, दमयित्वा रागद्वेषरहितश्चरेदित्यर्थः. विपरीते नु(तु) प्रभूता दोषा प्रकटीभवेयुः ।।५.१३।।

**(सु.)** अत्रैव विधिमाह—'अणुन्नए'इति अनुन्नतो-द्रव्यतो भावतश्च, द्रव्यतो नाकाशदर्शी, भावतो न जात्याद्यभिमानवान्, नावनतो-द्रव्यभावाभ्यामेव, द्रव्यानवनतो-ऽनीचकायः भावानवनतो-ऽलब्ध्यादिनाऽदीनः, अप्रहृष्टः-अहसन्, अनाकुलः-क्रोधादि-रहितः, इन्द्रियाणि-स्पर्शनादीनि, यथा भागं-यथाविषयं, दमयित्वा-इष्टानिष्टेषु स्पर्शादिषु रागद्वेषरहितो मुनिः-साधुश्चरेत्-गच्छेत्, विपर्यये तु-प्रभूतदोषप्रसङ्गात्, तथाहि-द्रव्योन्नतो लोकहास्यो, भावोन्नत ईर्यां न रक्षति, द्रव्यावनतो बक इति सम्भाव्यते, भावावनतः क्षुद्रसत्त्व इति, प्रहृष्टो योषिद्दर्शनाद् रक्तः इति लक्ष्यते, आकुल एवमेव, अदान्तः प्रव्रज्यां नार्हति ।।५.१३।।

**दवदवस्स न[१] गच्छिज्जा, भासमाणो य गोयरे ।**
**हसंतो नाभिगच्छेज्जा[२], कुलं उच्चावयं सया ।।५.१.१४।।**

---

१. ण ९.१०.१२ ।। २. ०च्छि. ६-१२ ।।

**(ति.)** किञ्च [दवदवस्स...] स्पष्टम् । नवरम् दवदवस्स-द्रुतं त्वरितमित्यर्थः । दोषश्च उभयविराधना ।।५.१४।।

**(स.)** पुनराह—दवदवस्स-इति-द्रुतं द्रुतं मुनिर्न गच्छेत्, तु पुनर्भाषमाणो गोचरे न गच्छेत्, तथा हसन्नाभिगच्छेत्. कुलमुच्चावचं सदा उच्चं द्रव्यतो धवलगृहादि. भावतो जात्यादियुक्तम्, एवमवचं द्रव्यतः कुटीरकवासि, भावतो जात्यादिहीनम्, उभयविराधना-लोकोपघातादयो दोषाः स्युः. ।।५.१४।।

**(सु.)** 'दवदवस्स'इति द्रुतं द्रुतं-त्वरितमित्यर्थः, न गच्छेद् भाषमाणो वा गोचरे न गच्छेत्, तथा हसन्नाभिगच्छेत्, कुलमुच्चावचं सदा, उच्चं-द्रव्य-भावभेदाद् द्विविधं-द्रव्योच्चं धवलगृहवासि, भावोच्चं जात्यादियुक्तं, एवमवचमपि द्रव्यतः कुटीरकवासि, भावतो जात्यादिहीनमिति । दोषा उभयविराधनालोकोपघातादय इति ।।५.१४।।

**आलोयं थिग्गलं दारं, संधिं दगभवणाणि य ।**
**चरंतो न विनिज्झाए, संकट्ठाणं विवज्जए ।।५.१.१५।।**

**(ति.)** पुनरत्रैव विधिमाह—आलोकम्-गवाक्षादि । थिग्गलम्-चितद्वारादि । संधिम्-चितखात्रादि । उदकभुवनानि च चरन् भिक्षार्थं न विनिध्यायेत्-न विशेषेण पश्येत् । शङ्कास्थानमेतदवलोकादि । अतो विवर्जयेत् । तत्, तद्दर्शिनि नष्टवस्तुनः अनेन गृहीतमिति शङ्का स्यात् ।।५.१५।।

**(स.)** पुनरत्रैव विधिमाह—आलोअं-इति-मुनिः चरन् भिक्षार्थं गच्छन्नेतानि न विनिध्यायेत्. विशेषेण न पश्येत्, कान्येतानि ? इत्यत आह-आलोकं निर्यूहकादिरूपं, थिग्गलं भित्ति-द्वारादि, सन्धिः क्षात्रं, दकभवनानि पानीयगृहाणि, एतदालोकादीनामवलोकनं शङ्कास्थानमतो विवर्जयेत्, कथं ? नष्टादौ तत्र शङ्का उपजायते. ।।५.१५।।

**(सु.)** अत्रैव विधिमाह—'आलोयं थिग्गलं'इति, आ(अव)लोकं-निर्यूहकादिरूपं, थिग्गलं चितं द्वारादि, संधिं चितं क्षत्रं, उदकभवनानि-पानीयगृहाणि चरन् भिक्षार्थं, न विनिज्झाए'इति-विनिध्यायेत्-विशेषेण पश्येत्, शङ्कास्थानमेतदवलोकादि, अतो विवर्जयेत्, तथा च नष्टादौ तत्राऽऽशङ्कोपजायत इति ।।५.१५।।

**रन्नो गिहिवईणं[1] च, रहसा-ऽऽरक्खियाण य ।**
**संकिलेसकरं ठाणं, दूरओ परिवज्जए ।।५.१.१६।।**

**(ति.)** अपि च—राज्ञो गृहपतीनाम्-श्रेष्ठ्यादीनाम् रहःस्थानम्, आरक्षकाणां च सङ्क्लेशकरं स्थानं दूरतः परिवर्जयेत् । रहःस्थानावलोकने हि अस्मदालोचादि-जिज्ञासवो मा[2] इति तेषां सङ्क्लेशः स्यात्, साधूनां वा तैर्निः[3]सारणादिसङ्क्लेशः क्रियेत ।।५.१६।।

**(स.)** रन्नो इति पुनः किंभूतो मुनिः ? राज्ञश्चक्रवर्त्यादेः, गृहपतीनां श्रेष्ठिप्रभृतीनां च रहस्यस्थानादि वर्जयेत्. आरक्षकाणां च दण्डनायकानां रहःस्थानं गुह्यापवरकमन्त्र-गृहादि, सङ्क्लेशकरं असदिच्छाप्रवृत्त्या मन्त्रभेदैर्वा कर्षणादिना दूरतः परिवर्जयेत् ।।५.१६।।

**(सु.)** किंच—"रन्नो गिह...'इत्यादि राज्ञः-चक्रवर्त्यादेः, गृहपतीनां-श्रेष्ठिप्रभृतीनां, रहस्यस्थानानि वर्जयेदिति योगः । आरक्षकाणां च-दण्डनायकादीनां, रहःस्थानं-गुह्या-ऽपवरक-मन्त्रगृहादि सङ्क्लेशकरं-असदिच्छाप्रवृत्त्या मन्त्रभेदे वा कर्षणादिनेति दूरतः परिवर्जयेदिति ।।५.१६।।

**पडिकुट्ठकुलं न पविसे, मामगं परिज्जए ।**
**अचियत्तकुलं न पविसे, चियत्तं पविसे कुलं ।।५.१.१७।।**

**(ति.)** किञ्च—प्रतिकुष्टम्-लोकनिषिद्धं मलिनादिकुलम् न प्रविशेत्-शासनलघुत्व-प्रसङ्गात्। मामकम्-यो वक्ति मा मे गृहं कश्चिदागच्छतु । तद्गृहं वर्जयेत् । 'अचियत्तकुलं'-अप्रीतिकुलम् । यत्र साधुप्रवेशे गृहिणामप्रीतिर्भवति तत्र न प्रविशेत् । यत्र तु प्रीतिः स्यात्, तत्र 'चियत्तकुले'-प्रीतिमति । प्रविशेत् । तेषामनुग्रहसद्भावात् ।।५.१७।।

**(स.)** पडि-इति-किञ्च साधुरेवंविधं कुलं न प्रविशेत्. किंभूतं कुलं ? प्रतिक्रुष्टं लोकनिषिद्धं मलिनादि, द्विविधमपि निषिद्धं-[1] इत्वरं सूतकयुक्तं, यावत्कथिकं च निषिद्धमभोज्यं. कुतो न प्रविशेत् ? शासनलघुत्वप्रसङ्गात्, पुनर्मामकमत्राहं गृहपतिर्मा कश्चिन्मम गृहमागच्छतु, एतद् गृहं वर्जयेत्, कुतः ? भण्डनादिप्रसङ्गात्. पुनः

१. ०ह. ६.७.९-१२ ।। २. ०मीति ४.१०.११, ।। ३. ०र्निर्वासनादि. १० ।। 1 इत्वरनिषिद्धं पाठा. ।

अचिअत्तं कुलम्. अप्रीतिकुलं यत्र प्रविशद्भिः साधुभिरप्रीतिरुत्पद्यते, न च निवारयति कुतश्चिन्निमित्तान्तरादेतन्न प्रविशेत्. तथा चिअत्तं कुलं—पूर्वोक्ताद्विपरीतं कुलं प्रविशेत्, तदनुग्रहप्रसङ्गात्. ।।५.१७।।

**(सु.)** 'पडिकुट्ठकुलं'इति, प्रतिकुष्टकुलं द्विविधं-इत्वरं यावत्कथिकं च, इत्वरं सूतकयुक्तं, यावत्कथिकं-अभोज्यं, एतन्न प्रविशेत्, शासनलघुत्वप्रसङ्गात् । मामकं यत्राह गृहपतिर्मा मम कश्चिद् गृहमागच्छेत्, एतत् वर्जयेत् भण्डनादिप्रसङ्गात् । 'अचिअत्तकुलं-अप्रीतिकुलं यत्र प्रविशद्भिः साधुभिरप्रीतिरुत्पद्यते, न च निवारयन्ति कुतश्चिन्निमित्ता-ऽन्तरात्, एतदपि न प्रविशेत्, तत्सङ्क्लेशनिमित्तत्वप्रसङ्गात् । 'चियतं'इति एतद्विपरीतं अचिअत्तविपरीतं प्रविशेत् कुलं, तदनुग्रहप्रसङ्गादिति ।।५.१७।।

**साणीपावारपिहियं, अप्पणा नावपंगुरे ।**
**कवाडं नो पणुल्लिज्जा, उग्गहं से अजाइया ।।५.१.१८।।**

**(ति.)** किं च—शाणी शणा-ऽतसीवल्कलजा पटी । प्रावारः-कम्बलादिः । एभिः पिहितम्-स्थगितम् । गृहमिति शेषः । आत्मना नापवृणुयात् । भुञ्जानानां प्रद्वेषसम्भवात्। कपाटं न प्रणोदयेत् । अवग्रहम् 'से'-तस्य । अयाचित्वा-विधिना धर्मलाभमकृत्वेत्यर्थः।।

**(स.)** साणी-इति-किंच साधुरेवंविधं, गृहमिति शेषः. आत्मना स्वयं नापवृणुयात् नोद्घाटयेत्, किंभूतं गृहं ? शाणीप्रावारपिहितं, शाणी शणा-ऽतसीवल्कजा पटी, प्रावारः प्रतीतः, कम्बलादीनामुपलक्षणमेतत्. इत्यादिभिः पिहितं स्थगितम्, अलौकिकत्वेन च तदन्तर्गतभुजि-क्रियादिकारिणा प्रद्वेषप्रसङ्गात्, तथा कपाटं द्वारस्थगनं न प्रेरयेत्, पूर्वोक्तदोषप्रसङ्गात्, किमविशेषतो नेत्याह-किं कृत्वा ? अवग्रहमयाचित्वा गाढप्रयोजने-ऽननुज्ञाप्यावग्रहं विधिना धर्मलाभमकृत्वा. ।।५.१८।।

**(सु.)** किञ्च—'साणीपावार-पिहियं'इति शाणी-अतसीवल्कजा पटी, प्रावारः-प्रतीतः, कम्बलाद्युपलक्षणमेतत्, एवमादिभिः पिहितं-स्थगितं, गृहमिति वाक्यशेषः । आत्मना-स्वयं, नापवृणुयात्-नोद्घाटयेदित्यर्थः । अलौकिकत्वेन तदन्तर्गतभुजि-क्रियादिकारिणां प्रद्वेषप्रसङ्गात् । तथा कपाटं द्वारस्थगनं न प्रेरयेत्-नोद्घाटयेत् पूर्वोक्तदोषप्रसङ्गात्, किमविशेषतो? न, इत्याह-अवग्रहमयाचित्वा-आगाढप्रयोजने-ऽननुज्ञाप्यावग्रहं विधिना धर्मलाभमकृत्वेति ।।५.१८।।

**गोयरग्गपविट्ठे उ, वच्च-मुत्तं न धारए ।**
**ओवासं फासुयं नच्चा, अणुन्नायंमि[1] वोसिरे ।।५.१.१९।।**

**(ति.)** विधिविशेषमाह । पूर्वमेव साधुना संज्ञाकायिकोपयोगं कृत्वा गोचरे प्रवेष्टव्यम्। कथञ्चिन्न कृतः अथवा कृतेऽपि पुनस्तत्कार्यं भवेत् तदैष विधिः—पूर्वार्धं स्पष्टम् । अवकासं प्रासुकम् ज्ञात्वा, अनुज्ञाप्य । अनुज्ञाते व्युत्सृजेत्।

**(स.)** विधेः शेषमाह—गोअर...इति-साधुर्गोचराग्रप्रविष्टस्तु वर्चो मूत्रं वा न धारयेत्, किन्तु अवकाशं प्रासुकं ज्ञात्वानुज्ञाप्य च व्युत्सृजेत्, अस्य वर्चो-मूत्रत्यजनविधेर्विषय **ओघनिर्युक्तितो वृद्धसंप्रदायाच्च** ज्ञातव्यः ।।५.१९।।

**(सु.)** 'गोयरग्ग'इति-गोचराग्रप्रविष्टस्तु वर्चो मूत्रं वा न धारयेत्, अवकाशं प्रासुकं ज्ञात्वा-अनुज्ञाप्य व्युत्सृजेदिति । अस्य विषयो वृद्धसम्प्रदायादवसेयः, स चायं- "पुव्वमेव साहुणा सन्नाकाइओवओगं काऊण गोयरे पविसियव्वं, कहिंचि(वि)न कओ, कए वा पुणो होज्जा ताहे वच्चमुत्तं न धारेयव्वं, जओ मुत्तनिरोहे चक्खु(क्खू)वघाओ हवइ, वच्चनिरोहे य जीविओवघाओ, असोहणा अ आयविराहणा, जओ भणियं-

"सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवायाओ पुणो विसोही न याविरई ।।१।।" (ओघनि० ४७)

अओ संघाडि(ड)यस्स सयभायणाणि समप्पिय पडिस्सए पाणयं गहाय सन्नाभूमीए विहिणा वोसिरेज्जा," वित्थरओ जहा ओहनिज्जुत्तीए ।।५.१९।।

**नीयदुवारं[2] तमसं[3], कुट्ठगं परिवज्जए ।**
**अचक्खुविसओ जत्थ, पाणा दुप्पडिलेहगा ।।५.१.२०।।**

**(ति.)** स्पष्टं नवरम् । तमसम्-सान्धकारं कोष्टकम्[4] ।।५.२०।।

**(स.)** णीअ...इति-पुनः किञ्च साधुर्नीचद्वारं नीचनिर्गमप्रवेशं परिवर्जयेत्, न तत्र भिक्षां गृह्णीयात्, एवं तमसं तमोवन्तं कोष्ठकमपवरकं परिवर्जयेत्, सामान्यापेक्षया सर्व एवंविधो भवतीत्यत आह-अचक्षुर्विषयो यत्र न चक्षुर्व्यापारो भवेद् यत्रेत्यर्थः, तत्र

१.अणुन्नविअ इति मुद्रितेऽन्यत्र पाठः । २. नीचद्वारम् २ टी., नीचा १० टि. ।। ३. ०र. १, ०रि. १० ।।
४. अपवरकम् २ टि. ।।

को दोष ? इत्याह-प्राणिनो दुष्प्रत्युपेक्षणीया भवन्ति, ईर्याशुद्धिर्न भवति. ।।५.२०।।

**(सु.)** तहा(तथा) 'नीयदुवारं'इति—नीचनिर्गमप्रवेशं, तमसमिति-तमोवन्तं कोष्ठकं-अपवरकं परिवर्जयेत्, न तत्र भिक्षां परिगृह्णीयात् सामान्यापेक्षया, सर्व एवंविधो भवतीत्याह-अचक्षुर्विषयो यत्र, न चक्षुषो व्यापारो यत्रेत्यर्थः । अत्र दोषमाह-प्राणिनो दुष्प्रत्युप्रेक्षणीया भवन्ति, ईर्याशुद्धिर्न भवतीति सूत्रार्थः ।।५.२०।।

**जत्थ पुप्फाइं बीयाइं, विप्पइन्नाइं कुट्टए ।**
**अहुणोवलित्तं उल्लं, दट्ठूणं परिवज्जए ।।५.१.२१।।**

**(ति.)** ईदृशं दृष्ट्वा द्वारत एव निवर्तते । धर्मलाभमपि न कुर्यात् संयमात्म-विराधनापत्तेः ।।५.२१।।

**(स.)** जत्थ'...इति किञ्च साधुरेतानि परिवर्जयेद् दूरत एव, न तु तत्र धर्मलाभं कुर्यात्, संयमस्यात्मनश्च विराधनाप्राप्तेः, एतानि कानि ?-इत्याह-पुष्पाणि जातिपुष्पादीनि, बीजानि शालिबीजानि, किंविशिष्टानि ? विप्रकीर्णान्यनेकधा विक्षिप्तानि, परिहर्तुमशक्यानीत्यर्थः. कुत्र ? कोष्ठके कोष्ठकद्वारे वा, तथा किं कृत्वा ? अधुना उपलिप्तं साम्प्रतमुपलिप्तमार्द्रकमशुष्कं कोष्ठकमन्यद् वा दृष्ट्वा. २१.

**(सु.)** किञ्च—'जत्थ'इति, यत्र पुष्पाणि-जातिपुष्पादीनि, बीजानि-शालिबीजादीनि, विप्रकीर्णानि-अनेकधा विक्षिप्तानि परिहर्तुमशक्यानीत्यर्थः । कोष्ठके कोष्ठकद्वारे वा, तथाऽधुनोपलिप्तं-साम्प्रतोपलिप्तं, आर्द्रकं-अशुष्कं, कोष्ठकमन्यद् वा दृष्ट्वा परिवर्जयेत्, दूरत एव, न तु तत्र धर्मलाभं कुर्यात्, संयमात्म-ऽऽविराधनापत्तेरिति ।।५.२१।।

**एलगं दारगं साणं, वच्छगं वावि कुट्टए ।**
**उल्लंघिउं[1] न पविसे, विहूइत्ताण व संजए ।।५.१.२२।।**

**(ति.)** किञ्च [जत्थ...इति] स्पष्टः । नवरम्, विहूइत्ताण व-विधूय वा प्रेर्येत्यर्थः।

**(स.)** एलगं...इति-पुनः किञ्च संयतः साधुरेलकं मेषं, दारकं बालकं, श्वानं मण्डलं, वत्सकं वापि क्षुद्रवृषभलक्षणं कोष्ठके उल्लङ्घ्य पद्भ्यां न प्रविशेत्, व्यूह्य वा प्रेर्य न प्रविशेत्, आत्म-संयमविराधनादोषाल्लाघवाच्चेति. ।।५.२२।।

---

१. उल्लंघिआ इति पाठोऽन्यत्र मुद्रिते ।।

**(सु.)** किं च—'एलगं'इति, एडकं-मेषं, दारकं-बालं, श्वानं-मण्डलं, वत्सकं वापि-क्षुद्रवृषभलक्षणं कोष्ठके उल्लङ्घ्य पद्भ्याम् न प्रविशेत्, व्यूह्य वा-प्रेर्य वेत्यर्थः । संयतः-साधुः, आत्म-संयमविराधनादोषाल्लाघवाच्चेति ॥५.२२॥

**असंसत्तं पलोइज्जा, नाइदूरावलोयए ।**
**उप्फुल्लं न विनिज्जाए, नियट्टिज्ज अयंपिरो ॥५.१.२३॥**

**(ति.)** विधिविशेषमाह—असंसक्तं प्रलोकयेत्-न योषिद्दृष्टेर्दृष्टिं मीलयेदित्यर्थः । नातिदूरम्-दायकस्यैवागमनमार्गदेशं प्रलोकयेत् । परतश्चौरादिशङ्का स्यात् । उत्फुल्लम्-विकसितनेत्रं गृहोपस्करमपि[2] न विनिध्यायेत् । अदृष्टकल्याण इति लाघवोत्पत्तेः । निवर्त्तेत अलब्धेऽपि अजल्पन् दीनं दातृदोषं वा ॥५.२३॥

**(स.)** अत्रैव विशेषदोषमाह—असंसत्तं-इति-असंसक्तं न प्रलोकयेत्, योषिद्दृष्टेर्दृष्टिं न मीलयेत्, रागोत्पत्ति-लोकोपघातदोषात्, तथा नातिदूरं प्रलोकयेत्, दायकस्यागमनमात्र-प्रदेशं प्रलोकयेत्, चौरादिकशङ्कादोषात्, तथोत्फुल्लं विकसितलोचनं 'न विनिज्झाए' न निरीक्षेत गृहपरिच्छदमपि, अदृष्टकल्याण इति लाघवोत्पत्तेः, तथा निवर्तेत अलब्धेऽपि सति, परं किं कुर्वन् ? अजल्पन् दीनवचनमनुच्चरन्निति. ॥५.२३॥

**(सु.)** इहैव विशेषमाह—'असंसत्तं'इति असंसक्तं प्रलोकयेत् न योषिद्दृष्टेर्दृष्टिं मीलयेदित्यर्थः, रागोत्पत्तिलोकोपघातदोषात् । तथा 'नातिदूरं प्रलोकयेत्' दायकस्यागमनमात्रदेशं प्रलोकयेत्, परतश्चौरादिशङ्कादोषः । तथोत्फुल्लं-विकसितलोचनं 'न निज्झाए' इति-न निरीक्षेत, गृहपरिच्छदमप्यदृष्टकल्याण इति लाघवोत्पत्तेः । तथा निवर्त्तेत गृहादलब्धेऽपि सति, अजल्पन्-दीनवचनमनुच्चारयन्निति ॥५.२३॥

**अइभूमिं न गच्छिज्जा, गोयरग्गगओ मुणी ।**
**कुलस्स भूमिं जाणित्ता, मियं भूमिं परिक्कमे[3] ॥५.१.२४॥**

**(ति.)** तथा—अतिभूमिम्-यत्रान्ये भिक्षाचरा न यान्ति । तां गृहस्थैरननुज्ञातां न गच्छेत्। गोचराग्रगतो मुनिः । कुलस्य-श्रद्धालोरश्रद्धालोर्वा । भूमिं-मर्यादां ज्ञात्वा । मितां भूमिम्-तदनुज्ञातां परिक्रामेत् ॥५.२४॥

---

१. दृष्टि. ६-०.१२ ॥ २. ०स्का. ८-१०, ०रिकर. ९.१२ ॥ ३. परक्कमे इति मुद्रितपाठान्तरः ।

**(स.)** अइभूमिं-इति-पुनरपि मुनिरतिभूमिर्गृहस्थैर्या नानुज्ञाता, यत्रान्ये भिक्षाचरा न यान्ति तामतिभूमिं न गच्छेत्, किंभूतो मुनिः ? गोचराग्रप्रविष्टः। अनेन कथनेन अन्यदा गोचरीं विना तत्र गमननिषेधमाह-किं तर्हि कुर्यात् ? कुलस्य भूमिमुत्तमादि-रूपामवस्थां ज्ञात्वा मितां भूमिं गृहस्थैरनुज्ञातां पराक्रमेत्, यत्र तेषामप्रीतिर्न जायते. ।।५.२४।।

**(सु.)** तथा 'अइभूमिं न'इति अतिभूमिं न गच्छेद्, अननुज्ञातां गृहस्थैः, यत्रान्ये भिक्षाचरा न यान्तीत्यर्थः । गोचराग्रगतो मुनिः, अनेनान्यदा तद्गमनासम्भवमाह-किं तर्हि ? कुलस्य भूमिं-उत्तमादिरूपामवस्थां ज्ञात्वा मितां भूमिं तैरनुज्ञातां पराक्रमेत्, यत्रैषामप्रीतिर्न जायते इति ।।५.२४।।

**तत्थेव पडिलेहिज्जा, भूमिभागं वियक्खणो ।**
**सिणाणस्स य वच्चस्स, संलोगं परिवज्जए ।।५.१.२५।।**

**(ति.)** विशेषमाह—तत्रैव-तस्यामेव भूमौ मितायां प्रत्युपेक्षेत । भूमिभागम्-उचितं भूप्रदेशम् । विचक्षणो-गीतार्थः । स्नानस्य [1]वर्चसश्च संलोकं परिवर्जयेत् । तत्राप्रावृत-स्त्रीदर्शनेन रागादिभावात् ।।५.२५।।

**(स.)** विधिशेषमाह—तत्थ-इति मुनिस्तत्रैव तस्यामेव मितायां भूमौ सूत्रोक्तविधिना भूमिभागमुचित-भूमिप्रदेशं प्रत्युपेक्षेत तत्र च तिष्ठेत्, किंभूतो मुनिः ? विचक्षणो विद्वान्, एतद्विशेषणेन केवलागीतार्थस्य भिक्षाटननिषेधमाह-पुनः स्नानस्य तथा वर्चसः संलोकं परिवर्जयेत्,

अयं परमार्थः-स्नानभूमि-कायिक्यादिभूमिसन्दर्शनं परिहरेत्, कुतः? प्रवचनलाघव-प्रसङ्गात् अप्रावृतस्त्रीदर्शनाच्च रागादिसम्भवात्. ।।५.२५।।

**(सु.)** विधिशेषमाह—'तत्थेव'इति तत्रैव-तस्यामेव मितायां भूमौ, प्रत्युपेक्षेत सूत्रोक्तेन विधिना भूमिभागं-उचितं भूमिप्रदेशं, विचक्षणो-विद्वान्, अनेन केवलागीतार्थस्य भिक्षाटन-प्रतिषेधमाह । तत्र च तिष्ठन् स्नानस्य तथा वर्च्चसः-विष्ठायाः संलोकं परिवर्ज्जयेद्, एतदुक्तं भवति-स्नानभूमि-कायिकादिभूमिसंदर्शनं परिहरेत्, प्रवचनलाघवप्रसङ्गात्, अप्रावृतस्त्रीदर्शनाच्च रागादिभावादिति ।।५.२५।।

---

१. स्थंडीलनी जग्या जोवामां आवे १० टि. ।।

**दगमट्टियआयाणे, बीयाणि हरियाणि य ।**
**परिवज्जिंतो चिट्ठिज्जा, सव्विंदियसमाहिए ।।५.१.२६।।**

**(ति.)** तथा—उदकमृत्तिकादानम्-आदीयतेऽनेन आदानो मार्गः, उदकमृत्तिकानयन-मार्गमित्यर्थः। शेषं स्पष्टम् ।।५.२६।।

**(स.)** दग...इति-पुनः किम्भूतो मुनिः ? एतानि परिवर्जयंस्तिष्ठेत् पूर्वोक्त उचितप्रदेशे, कानि ? उदकमृत्तिकयोरानयनमार्गं, पुनर्बीजानि शाल्यादीनि, हरितानि दूर्वादीनि, चशब्दादन्यान्यपि सचेतनानि, किंभूतो मुनिः ? सर्वेन्द्रियसमाहितः शब्दादिभिरव्याक्षिप्तः ।।५.२६।।

**(सु.)** किंच—'दग'इति उदकमृत्तिकादानं-आदीयतेऽनेनेत्यादानो-मार्गः, उदक-मृत्तिकानयन-मार्गमित्यर्थः । बीजानि-शाल्यादीनि 'हरितानि च' दूर्वादीनि, चशब्दादन्यानि च सचेतनानि परिवर्जयन्, तिष्ठेदनन्तरोदिते देशे सर्वेन्द्रियसमाहितः, शब्दादिभिरव्या-(नाक्षि)प्त इति ।।५.२६।।

**तत्थ से चिट्ठमाणस्स, आहरे पाणभोयणं ।**
**अकप्पियं न इच्छिज्जा, पडिगाहिज्ज कप्पियं ।।५.१.२७।।**

**(ति.)** तत्रोचितभूमौ तस्य तिष्ठतः दात्री आहरेत्-आनयेत् ।

पानभोजनयोग्यवस्तु पानभोजनम् । उत्तरार्धं स्पष्टम्

अत्राशङ्क्योत्तरम्-अकल्प्यनिषेधे कल्प्यग्रहणं सिद्धमेव, परं द्रव्यतः शोभनमशोभनं वा कल्प्यं ग्राह्यमिति दर्शनार्थं तदप्युक्तम् ।।५.२७।।

**(स.)** तत्थ...इति-तत्रोचितभूमौ, से तस्य साधोस्तिष्ठतः सतो गृहीति शेषः, पानभोजन-माहरेदानयेत् ।

तत्रायं विधिः-अकल्पिकमनेषणीयं न गृह्णीयान्न इच्छेत्, प्रतिगृह्णीयात् कल्पिकम्, एतच्चार्थापन्नमपि कल्पिकग्रहणं द्रव्यतः शोभनमशोभनमपि एतदविशेषेण ग्राह्यमिति दर्शनार्थं साक्षादुक्तमिति. ।।५.२७।।

**(सु.)** 'तत्थ से'इति, तत्र कुलोचितया भूमौ, 'से'-तस्य साधोस्तिष्ठतः सतः, आहरेद्-आनयेत् पानभोजनं, गृहीति गम्यते । तत्रायं विधिः-अकल्पिकं-अनेषणीयं न

गृह्णीयात्, प्रतिगृह्णीयात् कल्पिकं-एषणीयं, एतच्चार्थापन्नमपि कल्पिकग्रहणं, द्रव्यतः शोभनमशोभनमपि एतदविशेषेण ग्राह्यमिति दर्शनार्थं साक्षादुक्तमिति ।।५.२७।।

**आहरंती सिया तत्थ, परिसाडिज्ज भोयणं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.२८।।**

**(ति.)** आहरंती-आनयन्ती । स्यात् कदाचिद् दात्री परिशाटयेत् सिक्थादि ददतीं प्रत्याचक्षीत् न मे कल्पते तादृशम् । अत्र [1] घृतबिन्दुदृष्टान्तः ।

**(स.)** आहरन्ती इति-अगारी, भिक्षामिति शेषः, आहरन्ती आनयन्ती स्यात् कदाचित् तत्र देशे परिशाटयेत् सिक्यादि, इतश्चेतश्च विक्षिपेद् भोजनं वा पानं वा, ततः किमित्याह-ददतीं तां स्त्रियं प्रत्याचक्षीत, कथं प्रत्याचक्षीतेत्यत आह-न मे मम कल्पते तादृशं परिशाटनासहितं सिद्धान्तोक्तदोषप्रसङ्गात्, दोषांश्च भावं च ज्ञात्वा कथयेन्मधु-बिन्दूदाहरणादिना. ।।५.२८।।

**(सु.)** आहरन्ति त्ति,'आहरंती आनयन्ती भिक्षामगारी इति गम्यते, स्यात् तत्र कदाचित्, तदेकदेशं परिशाटयेत्-इतश्चेतश्च विक्षिपेत् भोजनं वा पानं वा, ततः किमित्याह-ददतीं प्रत्याचक्षीत-प्रतिषेधयेत् तामगारीं । स्त्रियो हि प्रायो भिक्षां ददतीति स्त्रीग्रहणं, कथं प्रत्याचक्षीतेत्याह-न मे-मम कल्पते तादृशं परिशाटनावत्, समयोक्तदोषप्रसङ्गात्, दोषांश्च भावं ज्ञात्वा कथयेत् मधुबिन्दूदाहरणादिनेति ।।५.२८।।

**संमद्[2]दमाणी पाणाणि, बीयाणि हरियाणि य ।**
**असंजमकरिं नच्चा, तारिसिं परिवज्जए ।।५.१.२९।।**

**(ति.)** स्पष्टः । नवरम् । असंजमकरिम्-साधुनिमित्तमसंयमकरणशीलाम् ।।

**(स.)** संमद्द... इति-सम्मर्दयन्तीं पद्भ्यां समाक्रामन्तीं, कानि ? इत्यत आह-प्राणिनो द्वीन्द्रियादीन्, बीजानि शालिबीजादीनि, हरितानि दूर्वादीनि, असंयमकरीं साधुनिमित्तमसंयमकरणशीलां ज्ञात्वा तादृशीं परिवर्जयेत्, ददतीं प्रत्याचक्षीतेति. ।।५.२९।।

**(सु.)** किं च–'सम्मद्द'इति, संमर्दयन्ती पद्भ्याम् समाक्रामन्ती, कान् ?-इत्याह-

१. अन्यत्र द्रष्टव्यम् ।। २. ०यंति १.३-५ ।।

प्राणिनो-द्वीन्द्रियादीन्, बीजानि-शालिबीजादीनि, हरितानि-दूर्वादीनि, असंयमकरीं-साधुनिमित्तमसंयमकरणशीलां ज्ञात्वा तादृशीं परिवर्जयेत्, ददतीं प्रत्याचक्षीतेति ।।५.२९।।

**साहट्टु निक्खिवित्ताणं, सचित्तं घट्टियाणि य ।**
**तहेव समणट्ठाए, उदगं संपणुल्लिया ।।५.१.३०।।**

**(ति.)** संहृत्य करोटिकादेः सिक्थादि । सचित्तोपरि निक्षिप्य । सचित्तम्-बीजहरितपुष्पादि। घट्टयित्वा तथैव श्रमणार्थम् । उदकं भाजनस्थम् सम्प्रणुद्य-प्रेर्य ।।५.३०।।

**(स.)** साह..इति संहृत्यान्यस्मिन् भाजने ददाति, तथा अदेयं भाजनगतं षड्जीव-निकायेषु निक्षिप्य ददाति तथा सचित्तमलातपुष्पादि घट्टयित्वा सञ्चाल्य च ददाति, तथैव श्रमणार्थं यतिनिमित्तमुदकं पानीयं सम्प्रणुद्य भाजनस्थं प्रेर्य ददाति, तदा साधुः किं करोति ? तद्विधिमग्रगाथायां वक्ष्यति. ।।५.३०।।

**(सु.)** 'साहट्टु'इति, संहृत्यान्यस्मिन् भाजने ददाति, "तं फासुगमवि वज्जए, तत्थ फासुए फासुयं साहरइ, फासुए अफासुयं साहरइ, अफासुए फासुयं साहरइ, अफासुए अफासुयं साहरइ ४, तत्थ जं फासुए फासुयं साहरइ, तत्थ वि थेवे थेवं साहरइ, थेवे बहुं साहरइ, बहुए थेवं साहरइ, बहुए बहुयं साहरइ ४" एवमादि यथा पिण्डनिर्युक्तौ। तथा निक्षिप्य भाजनगतमदेयं षड्जीवनिकायिकेषु ददाति तथा सचित्तं-अलातपुष्पादि घट्टयित्वा-संचाल्य च ददाति । तथैव श्रमणार्थं-प्रव्रजितनिमित्तमुदकं संप्रणुद्य भाजनस्थं प्रेर्य ददाति ।।५.३०।।

**[1]आगाहइत्ता चलइत्ता, आहारे पाणभोयणं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.३१।।**

**(ति.)** वर्षासु गृहाङ्गणादिरहितं जलम् अवगाह्य । चलयित्वा तन्निर्गमार्थं वाहं कृत्वा। आहरेत्[2]-आनयेत् । पानभोजनम् । शेषं प्राग्वत् ।।५.३१।।

**(स.)** आगह...इति-तथा वर्षासु गृहाङ्गणस्थितं जलम्-अवगाह्योदकमेवात्मनोऽभि-

१. 'ओगाहइत्ता' मुद्रितोऽन्यत्र पाठः ।। २. ०त् पान. ६-१०.१२ ।।

मुखमाकृष्य करादिभिश्चालयित्वोदकमेव ददाति. उदके नियमादनन्तवनस्पतिः'इति प्राधान्यख्यापनार्थं 'सचित्तं घट्टइत्ताणम्' इत्युक्तेऽपि भेदेनोपादानम्, अस्ति चायं न्यायः-यदुत—सामान्यग्रहणेऽपि प्राधान्यख्यापनार्थं भेदेनोपादानं, यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायात इति. ततश्च उदकं चालयित्वा आहरेदानीय दद्यात्, किं तदित्याह-पान-भोजनमोदना-ऽऽरनालादि, तदित्थंभूतं ददतीं प्रत्याचक्षीत, न मे मम कल्पते तादृशम् ।।५.३१।।

**(सु.)** तथा ओगाहइत्ता—अवगाह्य-उदकमेवात्मनोऽभिमुखमाकृष्य ददाति। तथा चालयित्वा उदकमेव ददाति, उदके नियमादनन्तवनस्पतिरिति प्राधान्यख्यापनार्थं सचित्तं घट्टयित्वेत्युक्तेऽपि भेदेनोपादानं, अस्ति चायं न्यायः-"यदुत सामान्यग्रहणेऽपि प्राधान्यख्यापनार्थं भेदेनोपादानं, यथा-ब्राह्मणा आयाता, वशिष्टोऽप्यायात" इति, ततश्च-उदकं चालयित्वा आहरेद् आनीय दद्यादित्यर्थः । किं तदित्याह-पानभोजनं-ओदना-ऽऽरनालादि । तदित्थम्भूतां ददतीं प्रत्याचक्षीत-निराकुर्यात्- न मम कल्पते तादृशमिति पूर्ववदेवेति सूत्रद्वयार्थः ।।५.३१।।

**पुरेकम्मेण हत्थेण, दव्वीए भायणेण वा ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.३२।।**

**(ति.)** पुरःकर्म-दानात् पूर्वमप्कायेन क्षालनं यस्य हस्तादेस्तेन हस्तेन । दर्व्या भाजनेन करोटिकादिना । शेषं प्राग्वत् ।।५.३२।।

**(स.)** पुरेकम्मेण...इति-पुरःकर्मणा हस्तेन साधुनिमित्तं पूर्वं कृतसचित्तपानीय-त्यजनव्यापारेण, तथा दर्व्या डोव[=डोयो]सदृशया, भाजनेन वा कांस्यभाजनादिना ददतीं प्रत्याचक्षीत न मम कल्पते तादृशम् ।।५.३२।।

**(सु.)** 'पुरेकम्मे'इति, पुरः कर्म्मणा हस्तेन-साधुनिमित्तं प्राक्कृतजलोज्झनव्यापारेण, तथा दर्व्या-डोवसदृशया, भाजनेन वा-कांस्यभाजनादिना ददतीं प्रत्याचक्षीत-प्रतिषेधयेत्, न मम कल्पते तादृशमिति पूर्ववदेव इति सूत्रार्थः ।।५.३२।।

**उदउल्ले ससिणिद्धे, ससरक्खे मट्टियाऊसे ।**
**हरियाले हिंगए, मणोसिला अंजणे लोणे ।।५.१.३३।।**

**गेरुयवन्निय सेडिया-सोरट्ठियपिट्ठकुक्कुसकए य ।**

**उक्कट्ठमसंसट्ठे, संसट्ठे चेव बोधव्वे ।।५.१.३४।। युग्मम्**

**(ति.)** उदकार्द्रेण-गलदुदकबिन्दुना । सस्निग्धेन-ईषदुदकयुक्तेन । सरजस्केन-पृथ्वी-रजोगुण्डितेन । मृतिका-कर्दमस्तद्युक्तेन । तथा ऊषः-पांशुक्षारः । हरितालः हिंगुलकः मनःसिला। अञ्जनम्-सौवीरादि । लवणम्-सामुद्रादि । गैरिकः-धातुः । वर्णिका-पीतमृत्तिका । श्वेतिका-खटिका । सौराष्ट्रिका-तुवरी । पिष्टम्-आमतण्डुलक्षोदः। कुक्कुसाः प्रतीताः। कृतेनेति-एभिर्गुण्डितेन हस्तादिनेति गम्यम् । उत्कृष्ट इति उत्कृष्टशब्देन कालिङ्गालाबुपुष्पफलादीनां शस्त्रकृतानि श्लक्ष्णखण्डान्युच्यन्ते । चिञ्चिणिकादिपत्रसमुदायो वा उदूखलखण्डितः । असंसृष्टेन-व्यञ्जनादिनालिप्तेन संसृष्टेन-लिप्तेन । बोधव्यो हस्त इति, विधिमूर्ध्वं स्वयमेव वक्ष्यति ।।५.३३,५.३४।।

**(स.)** एवं उदउल्ल इति पुनरप्येवमुदकार्द्रेण गलत्पानीयबिन्दुयुक्तेन हस्तेन, एवं सस्निग्धेन ईषत्पानीययुक्तेन हस्तेन २, एवं सरजस्केन पृथिवीरजोवगुण्डितेन हस्तेन ३. एवं मृद्गतेन कर्दमयुक्तेन हस्तेन ४. एवं ऊषः पांशुक्षारः तद्युक्तेन हस्तेन, तथा हरिताल-हिङ्गुलक-मनःशिला एते सर्वे पार्थिवा वर्णकभेदाः, अञ्जनं रसाञ्जनादि, लवणं सामुद्रादि, ततो हरितालादियुक्तेन हस्तेन. ।।५.३३।।

गेरुअ...इति-तथा गैरिको धातुः, वर्णिका पीतमृत्तिका, सेटिका खटिका, सौराष्ट्रिका तुवरिका, पिष्टम् आमतन्दुलक्षोदः, कुकुसाः प्रतीताः, कृतेनेति एभिः कृतेन, एभ्यः खरण्टितेन, हस्तेनेति शेषः, तथा उत्कृष्ट इति, उत्कृष्टशब्देन कालिङ्गा-ऽलाबु-त्रपुसफलादीनां शस्त्रकृतानि श्लक्ष्णखण्डानि भण्यन्ते, चिञ्चिणिकादिपत्रसमुदायो वा उदूखलकण्डित इति-तथा असंसृष्टो व्यञ्जनादिनाऽलिप्तः, संसृष्टश्चैवं व्यञ्जनादिना लिप्तो बोद्धव्यो हस्त इति. विधिं पुनरत्रोर्ध्वं स्वयमेव वक्ष्यतीति. ।।५.३४।।

**(सु.)** एवं-'एवं'[इति] उदकार्द्रेण, हस्तेन-करेण, उदकार्द्रो नाम गलदुदकबिन्दुयुक्तः । एवं सस्निग्धेन हस्तेन, सस्निग्धो नाम ईषदुदकयुक्तः, एवं सरजस्केन हस्तेन-सरजस्को नाम पृथिवीरजोगुण्डितः । एवं मृद्गतेन हस्तेन, मृद्गतो नाम कर्दमयुक्तः। एवं ऊषादिष्वपि योज्यं । एतावन्त्येव एतानि सूत्राणि नवरमूषः-पांशुक्षारः, हरिताल-हिङ्गुलक-मनःशिलाः पार्थिवाः वर्णकभेदाः, अञ्जनं-रसाञ्जनादि, लवणं-सामुद्रादि ।।५.३३।।

तथा 'गेरुय'इति, गैरु(रि)को-धातुः, वर्णिका-पीतमृत्तिका, सेटिका-खटिका, श्वेतिका-शुक्लमृत्तिका, सौराष्ट्रिका-तुवरिका, पिष्टं-आमतण्डुलक्षोदः, कुक्कुसाः-प्रतीताः, कृतेनेत्येभिः कृतेन, हस्तेनेति गम्यते । तथा उत्कृष्ट इत्युत्कृष्टशब्देन कालिङ्गा-ऽलाबु-त्रपुषफलादीनां शस्त्रकृतानि श्लक्ष्णखण्डानि भण्यन्ते । चिञ्चिणिकादि-पत्रसमुदायो वा उदुखलख(क)ण्डित इति, तथाऽसंसृष्टो व्यञ्जनादिनाऽलिप्तः, संसृष्टश्चैव व्यञ्जनादिलिप्तो बोद्धव्यो हस्त इति । विधिं पुनरत्रोर्ध्वं स्वयमेव वक्ष्यतीति ।।५.३४।।

**असंसट्ठेण हत्थेण, दव्वीए भायणेण वा ।**
**दिज्जमाणं न इच्छिज्जा, पच्छाकम्मं जहिं भवे ।।५.१.३५।।**

**(ति.)** असंसृष्टेन-अन्नाद्यलिप्तेन । हस्तेन, दर्व्या भाजनेन च दीयमानं न इच्छेत्। यत्र हस्तादेः क्षालनादिरूपं पश्चात् कर्म भवति । निर्लेपं तु मण्डकादि गृह्णीयात् ।।५.३५।।

**(स.)** असंसट्ठ...इति असंसृष्टेन हस्तेन अन्नादिभिरलिप्तेन, तथा दर्व्या भाजनेन वा दीयमानं नेच्छेन्न गृह्णीयात्, किं सामान्येन नेत्याह-पश्चात्कर्म यत्र भवति दर्व्यादौ, शुष्कमण्डकादि तदन्यदोषरहितं गृह्णीयादिति. ।।५.३५।।

**(सु.)** आह च-असंसट्ठेण'इति, असंसृष्टेन हस्तेनान्नादिभिरलिप्तेन दर्व्या भाजनेन वा दीयमानं नेच्छेत्, किं सामान्येन ?, न, इत्याह-पश्चात्कर्म्म यत्र भवति दध्यादौ, शुष्कमण्डकादिवत्, तदन्यदोषरहितं गृह्णीयादिति ।।५.३५।।

**संसट्ठेणं तु हत्थेणं, दव्वीए भायणेण वा ।**
**दिज्जमाणं पडिछिज्जा, जं तत्थेसणियं भवे ।।५.१.३६।।**

**(ति.)** संसृष्टेन-अन्नादिलिप्तेन । हस्तादिना दीयमानं प्रतीच्छेत् । यत् तत्रैषणीयम्-अन्यदोषरहितं भवेत् ।।५.३६।।

**(स.)** संसट्ठ...इति संसृष्टेन हस्तेना-ऽन्नादिलिप्तेन, तथा दर्व्या भाजनेन वा दीयमानं प्रतीच्छेद् गृह्णीयात्, किं सामान्येन नेत्याह-यत् तत्रैषणीयं भवति तदन्यदोषरहितमित्यर्थः ।।५.३६।।

(सु.) 'संसट्ठेण'इति संसृष्टेन हस्तेनाऽन्नादिलिप्तेन, तथा दर्व्या भाजनेन वा दीयमानं प्रतीच्छेत्-गृह्णीयात्, किं सामान्येन ?, न, इत्याह-यत् तत्रैषणीयं भवति, तदन्यदोष-रहितमित्यर्थः । इह च वृद्धसम्प्रदायः-"संसट्ठे हत्थे संसट्ठे मत्ते सावसेसे दव्वे, संसट्ठे हत्थे संसट्ठे मत्ते निरवसेसे दव्वे, एवं अट्ठभंगा, एत्थ पढमो भंगो सव्वुत्तमो, अन्नेसु वि जत्थ सावसेसं दव्वं तत्थ घेप्पइ, न इयरेसु, पच्छाकम्मदोसाओ" त्ति ।।५.३६।।

**दुण्हं तु भुंजमाणाणं, एगो तत्थ निमंतए ।**
**दिज्जमाणं न इच्छिज्जा, छंदं से पडिलेहए ।।५.१.३७।।**

(ति.) स्पष्टः । नवरम् । छन्दम्-अभिप्रायम् । 'से'-तस्य द्वितीयस्य प्रत्युपेक्षेत । इष्टं चेत् तस्य दीयमानं तदा गृह्णीयात् । न चेन्नैव ।।५.३७।।

(स.) दुण्हं...इति किञ्च द्वयोर्भुञ्जतोः पालनं कुर्वतोः, एकस्य वस्तुनो नायकयोरित्यर्थः, एकस्तत्र निमन्त्रयेत्, तद्दानं प्रत्यामन्त्रयेत्, तद्दीयमानं नेच्छेदुत्सर्गतः, अपितु छन्दमभिप्रायं से तस्य द्वितीयस्य प्रत्युपेक्षेत नेत्रवक्त्रविकारैः, किमस्येदं दीयमानमिष्टं न वेति, इष्टं च गृह्णीयात्, नो चेन्नेति. एवं भुञ्जानयोरभ्यवहार उद्यतयोरपि योजनीयं, यतो भुजिधातुः पालनेऽभ्यवहारे च वर्तत इति. ।।५.३७।।

(सु.) किं च–'दोण्हं तु'इति, द्वयोर्भुञ्जतोः पालनां कुर्वतोः, एकस्य वस्तुनो नायकयोरित्यर्थः। एकस्तत्र निमन्त्रयेत्-तद्दानं प्रत्यामन्त्रयेत्, तद्दीयमानं नेच्छेदुत्सर्गतः, अपितु छन्दं-अभिप्रायं, 'से'-तस्य द्वितीयस्य प्रत्युपेक्षेत नेत्र-वक्त्रविकारैः, किमस्येदमिष्टं दीयमानं न वेति, इष्टं चेत् गृह्णीयात्, न चेत्, न इति । एवं भुञ्जानयोः-अभ्यवहारायोद्यतयोरपि योजनीयं । यतो "भुजिः-पालने अभ्यवहारे च" [ ] वर्तत इति ।।५.३७।।

**दोण्हं तु भुंजमाणाणं, दो वि तत्थ निमंतए ।**
**दिज्जमाणं पडिछिज्जा, जं तत्थेसणियं भवे ।।५.१.३८।।**

(ति.) स्पष्टः ।।५.३८।।

(स.) दुण्हं...इति तथा द्वयोस्तु पूर्ववद् भुञ्जतोर्भुञ्जानयोर्द्वावपि तत्रातिप्रसादेन

निमन्त्रयेयाताम्, तत्रायं विधिः-दीयमानं प्रतीच्छेद् गृह्णीयात्, यत् तत्रैषणीयं भवेत् तदन्य-दोषरहितमिति. ।।५.३८।।

(सु.) तथा 'दुण्हं तु' द्वयोस्तु पूर्ववद् भुञ्जतोर्भुञ्जानयोर्वा द्वावपि तत्राभि(ति)प्रसादेन निमन्त्रयेयाताम्, तत्रायं विधिः-दीयमानं प्रतीच्छेत्-गृह्णीयात् यत् तत्रैषणीयं भवेदिति, तदन्यदोषरहितमिति ।।५.३८।।

**गुव्विणीए उवण्णत्थं, विविहं पाणभोयणं ।**
**भुंजमाणं विवज्जित्ता, भुत्तसेसं पडिच्छए ।।५.१.३९।।**

(ति.) विधिविशेषमाह—गुर्विण्या उपन्यस्तम्-उपकल्पितम् । विविधम्-द्राक्षापानखण्डखाद्यादि पानभोजनम् । तया भुज्यमानं विवर्जयेत् । मा भूत् तस्या अल्पत्वेनाभिलाषानिवृत्तौ गर्भपातादिदोषः । भुक्तशेषम्-भुक्तोद्धरितं प्रतीच्छेत् ।।५.३९।।

(स.) विधिविशेषमाह—गुव्विणीए इति-गुर्विण्या गर्भवत्या, उपन्यस्तमुपकल्पितं, किं तदित्याह-विविधमनेकप्रकारं पानभोजनं द्राक्षापान-खण्डखाद्यादि, तत्र भुज्यमानं तया विवर्जयेत्. मा भवतु तस्य भोजनग्रहणेऽल्पत्वेन तस्या अनिवृत्तिः, अनिवृत्तौ च गर्भपातदोषः स्यात्, अथं च भुक्तशेषं भुक्तोद्धरितं तु प्रतीच्छेत्, यत्र पान-भोजने तस्या अभिलाषो निवृत्तो भवेत्. ।।५.३९।।

(सु.) विशेषमाह—'गुव्विणीए'इति, गुर्विण्या-गर्भवत्या, उपन्यस्तं-उपकल्पितं, किं तद् ?-इत्याह-विविधं-अनेकप्रकारं, पान-भोजनं-द्राक्षापान-खण्डखाद्यकादि, तत्र भुज्यमानं तया विवर्ज्यं, मा भूत् तस्या अल्पत्वेनाभिलाषानिवृत्त्या गर्भपातादिदोष इति । भुक्तशेषं-भुक्तोद्धरितं प्रतीच्छेत्, यत्र तस्या निवृत्तोऽभिलाष इति ।।५.३९।।

**सिया य समणट्ठाए, गुव्विणी कालमासिणी ।**
**उट्ठिया वा निसीइज्जा, निसन्ना वा पुणुट्ठए ।।५.१.४०।।**

(ति.) किञ्च—स्यात् कदाचित् श्रमणार्थं गुर्विणी कालमासिनी-गर्भाधानान्नवम-मासवती। उत्थिता-ऊर्ध्वस्था सती दानाय निषीदेत् । निषन्ना वा सती उत्तिष्ठेत् ।।५.४०।।

(स.) किञ्च—सिया-इति एवंविधा गुर्विणी स्त्री स्यात् कदाचिच्छ्रमणार्थं साधुनिमित्तं साधवे दानं ददामीति बुद्ध्योत्थिता सती निषीदेत्, वा अथवा निषण्णा सती

स्वकाय-व्यापारेण पुनरुत्तिष्ठेत्, तदा साधुस्तदीयहस्तादाहारं न गृह्णीयादिति, किंविशिष्टा गुर्विणी ? कालमासिणी कालमासवती, गर्भाधानान्नवममासवतीत्यर्थः. ।।५.४०।।

**(सु.)** किञ्च–'सिया य'इति स्याच्च-कदाचिच्च श्रमणार्थं-साधुनिमित्तं गुर्व्विणी पूर्वोक्ता कालमासवर्तिनी-गर्भाधानान्नवममासवर्त्तिनीत्यर्थः । उत्थिता वा यथा कथञ्चित् निषीदेत्, निषण्णा वा ददामीति साधुनिमित्तं, निषण्णा वा स्वव्यापारेण पुनरुत्तिष्ठेत् ददामीति साधुनिमित्तमेवेति ।।५.४०।।

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.४१।।**

**(ति.)** तत्र किम् ? गुर्विण्या संयतार्थं कृतोत्थानया कृतासनया वा दीयमानं संयतानामकल्पिकम्[१]। तस्याः तद्गर्भस्य वा कष्टसम्भवात् । शेषं स्पष्टम् ।।५.४१।।

**(स.)** तं'इति-तादृशो दीयमान आहारः साधूनामकल्पिकः, अतस्तादृशमाहारं ददतीं च गुर्विणीं प्रति साधुः किं वदेत् ? - इदमाह-तद् भक्तपानं तु निषीदनेनोत्थानेन च दीयमानं संयतानां साधूनामकल्पिकं भवेदग्राह्यं स्यात्, इह चायं संप्रदायः—यदि सा गुर्विणी निषीदनमुत्थानं च न करोति, यथावस्थिता च सत्याहारं ददाति, तत् स्थविर-कल्पिकानां साधूनां कल्पते, जिनकल्पिकानां साधूनां तु न कल्पते, यतो जिनकल्पिकः प्रथमदिवसादारभ्य गुर्विण्या दीयमानमाहारं न गृह्णातीति. यतश्चैवमाचारस्ततो गुर्विणीं तादृशमाहारं दीयमानां प्रत्याचक्षीत वदेत्, किं वदेत् ? तादृशं भक्तपानं मम न कल्पते. ।।५.४१।।

**(सु.)** 'तं भवे'इति, तद् भवेद् भक्तपानं तु तथानिषीदनोत्थानाभ्यां दीयमानं संयतानामकल्पिकं, इह च "स्थविरकल्पिकानामनिषीदनोत्थानाभ्यां यथावस्थिततया दीयमानं कल्पिकं, जिनकल्पिकानां तु आपन्नसत्त्वया प्रथमदिवसादारभ्य सर्वथा दीयमानमकल्पिकमेव"इति सम्प्रदायः । यतश्चैवम् ?,-तो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमित्येतत् पूर्ववदेवेति ।।५.४१।।

**थणगं [२]पज्जोमाणी, दारगं वा कुमारियं ।**
**तं निक्खिवित्तु रोयंतं, आहरे पानभोयणं ।।५.१.४२।।**

१. ०तम् ६-१०.१२ ।। २. पि. ६-१०.१२ ।। पिज्ज(ज्जे)माणी इति मुद्रितोऽन्यत्र पाठः ।।

**(ति.)** तथा स्तनं पाययन्ती दारकं वा कुमारिकां वा । तद् दारकादि निक्षिप्य रुदद् भूमौ आहरेत् पानभोजनम् । तत्र बालस्य स्तन्यपानान्तरायः । मार्जारादितश्चापायः ।।५.४२।।

**(स.)** पुनः कथं न गृह्णीयात् ? - इत्याह—थणगं'इति-एवंविधा स्त्री यदि पानभोजनमाहरेद् दद्यात् तदा साधुर्न गृह्णीयात्, किं कुर्वती ? दारकं बालकं दारिकां च बालिकां, वा शब्दान्नपुंसकं स्तनं पाययंती, किं कृत्वा ? तद् दारकादि रुदत् सद् भूम्यादौ निक्षिप्य, अयमत्र सम्प्रदायः—गच्छवासी साधुर्यदि बालकादिः स्तनजीवी भवति स्तनं च पिबन् वर्तते, स रुदन्नरुदन् वा भवतु, परं तं बालकादिकं भूम्यादौ निक्षिप्याहारं दद्यात् तदा न गृह्णीयात्, अथ बालकादिः स्तन्यं पिबति, अन्यद् भोजनमपि करोति, परं निक्षिप्यमाणो रोदिति, तदाप्याहारं दीयमानं न गृह्णीयात्, अथ नो रोदनं करोति तदा गृह्णीयात्, अथ स्तनजीवी वर्तते, परं तत्समये निक्षिप्यमाणः स्तन्यपानं न कुर्वाणोऽस्ति, परं निक्षिप्यमाणो रोदनं करोति, तदापि स्त्रिया दीयमानमाहारं नो गृह्णीयात्, अथ न कुर्वाणोऽस्ति तदा गृह्णीयात्, अथान्नमाहर्तुमारब्धोऽस्ति, परं स्तन्यं पिबन्नस्ति, तदा रोदनं करोतु वा मा वा साधुर्न गृह्णीयात्, अथापिबन्नपि यदि रोदिति, तदापि न गृह्णीयात्. अत्र शिष्यः प्राह-एवमाहारग्रहणे को दोषः ? गुरुराह-खरहस्तैर्बालकादेर्भूम्यादौ निक्षिप्यमाणस्य अस्थिरत्वेन परितापनादोषो भवेत्, मार्जारो वा तं बालादिकमपहरेत्. ।।५.४२।।

**(सु.)** किञ्च'थणगं', स्तनं(न्यं) पाययन्ती, किमित्याह-दारकं कुमारिकां वा, वाशब्दस्य व्यवहितः सम्बन्धः, अत एव नपुंसकं वा, तद् दारकादि निक्षिप्य रुदन् भूम्यादौ आहरेत् पानभोजनं, अत्रायं वृद्धसम्प्रदायः "गच्छवासी जंइ थणजीवी पिबंतो निक्खित्तो तो न गिण्हइ, रोवउ वा मा वा, अह अन्नं पि आहारेइ, तो जइ न रोवइ, तो गिण्हइ, अह रोवइ तो न गेण्हइ, अह अपियंतो निक्खित्तो थणजीवी रोवइ तो न गेण्हति, अह ण रोवति तो गेण्हति । गच्छनिग्गया पुण जाव थणजीवी ताव रोवउ मा वा पियंतो वा अपियंतो वा न गिण्हंति, जाहे अन्नं पि आहारेउमाढत्तो हवइ, ताहे जइ पियंतओ रोवउ वा मा वा न गेण्हंति, अह अपियंतओ तो जइ रोवइ तो परिहरंति, अरोविए गिण्हंति, सीसो आह-को तत्थ दोसोत्थि ?, आयरिया भणंति-तस्स निक्खिप्पमाणस्स खरेहिं हत्थेहिं घेप्पमाणस्स अथिरत्तणेण परितावणादोसा मज्जाराइ वा अवहरिज्ज"त्ति ।।५.४२।।

**तं भवे भत्तपाणं तुं, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.४३।।**

**(ति.)** अतः-[तं...इत्यादि] स्पष्टः ।

**(स.)** तं'इति एवं दीयमानां स्त्रियं प्रति प्रत्याचक्षीत साधुः, किं वदेदित्याह-तद् भक्तपानं तु पूर्वोक्तं संयतानामकल्पिकमकल्पनीयं, यतः कारणादेवं ततो ददतीं स्त्रियं प्रति प्रत्याचक्षीत वदेत्, न मम कल्पते तादृशमिति. ।।५.४३।।

**(सु.)** 'तं भवे भत्तपाणं'इति, तद् भवेद् भक्तपानं तु अनन्तरोदितं संयतानामकल्पिकं। यतश्चैवमतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.४३।।

**जं भवे भत्तपाणं तु, कप्पाकप्पंमि संकियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.४४।।**

**(ति.)** किं बहुना ? - इत्युपदेशसर्वस्वमाह—स्पष्टः । नवरम् । किमिदमुद्गमादि-दोषयुक्तं न वेत्याशङ्काकारि ।।

**(स.)** किं बहुना ? - उपदेशस्य सर्वरहस्यमाह—जं'इति यद् भक्तपानं तु कल्पाकल्पयोः कल्पनीया-कल्पनीययोर्विषये शङ्कितं भवेत्-'न वयं विद्मः, किमिदमुद्गमादिदोषयुक्तं किंवा न'इति शङ्कास्थानं स्यात्. तदित्थं भूतं कल्पनीय-निश्चयेऽजाते सत्यशनादि दीयमानां स्त्रियं प्रति साधुरिति प्रत्याचक्षीतेति वदेत्, किं ? न मम कल्पते तादृशमिति. ।।५.४४।।

**(सु.)** किं च बहुनोक्तेन, उपदेशसर्वस्वमाह-'जं भवे'इति यद् भवेद् भक्तपानं तु कल्पाकल्पयोः-कल्पनीयाकल्पनीयधर्मविषय इत्यर्थः । किम् ?, शङ्कितं-न विद्मः किमिदमुद्गमादि-दोषयुक्तं किं वा नेत्येवमाऽऽशङ्कास्पदीभूतं, तदित्थम्भूतमसति कल्पनीयनिश्चये ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.४४।।

**दगवारएण पिहियं, निस्साए पीढएण वा ।**
**लोढेण वा वि लेवेण, सिलेसेण व केणइ ।।५.१.४५।।**

**(ति.)** किञ्च—देयं वस्तु भाजनस्थं दकवारकेण-उदककुम्भेन । पिहितम् स्थगितम ।

नीसाए'इति-निसोदिकया पीषिण्येत्यर्थः । पीठकेन वा-आसनपट्टेन । लोढेण वापि-शिलापुत्रकेन । लेपेन-मृल्लेपादिना । श्लेषेण वा केनचिद्-जतु-लाक्षादिना ।।५.४५।।

**(स.)** पुनः कीदृशमाहारं न गृह्णीयात् ? - इत्याह—दग...इति-यदशनादि भाजनस्थं दकवारेण पानीयकुम्भेन पिहितं स्थगितं भवेत्, तथा नीसाए'त्ति निस्सारिकया पेषण्या, पीठकेन काष्ठपीठादिना, लोढेन वापि शिलापुत्रकेण, तथा लेपेन वा मृल्लेपादिना, श्लेषेण वा केनचिज्जतुसिक्थादिना पिहितं भवेत् ।।५.४५।।

**(सु.)** किञ्च—'दगवारेण पिहियं'इति दकवारेण उदककुम्भेन पिहितं-स्थगितं भाजनस्थं, तथा 'नीसाए'इति पेषण्या, पीठकेन-काष्ठपीठादिना, लोढेन चापि शिलापुत्रकेण, तथा लेपेन-मृल्लेपादिना, श्लेषेण केनचिज्जतुसिक्थादिनेति ।।५.४५।।

**तं च [१]उब्भिंदिउं दिज्जा, समणट्ठा एव दायए ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.४६।।**

**(ति.)** तच्च-पिहितलिप्तादिकम् । उद्भिज्य श्रमणार्थं दायको देयात् । उत्तरार्धं प्राग्वत् ।।५.४६।।

**(स.)** तत् किं कुर्यात् ? - इत्याह — तं'इति पुनः तच्चैतैः पूर्वोक्तैः स्थगितं लिप्तं वा श्रमणार्थं नात्मार्थं सकृदुद्भिद्य दायको दद्यात्, तदित्थं भूतं ददतीं स्त्रियं साधुर्वदेन्न मम कल्पते तादृशमिति. ।।५.४६।।

**(सु.)** 'तं च'इति तच्च उब्भिंदितुं, स्थगितं लिप्तं सत् उद्भिद्य दद्यात् श्रमणार्थं दायकः, नात्माद्यर्थं, तदित्थम्भूतं ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.४६।।

**असणं पाणगं वा वि, खाइमं साइमं तहा ।**
**जं जाणिज्ज सुणिज्जा वा, दाणट्ठा पगडं इमं ।।५.१.४७।।**

**(ति.)** किञ्च—[असणं] स्पष्टः । नवरम् । दानार्थं प्रकृतम् - साधुवादनिमित्तम् ।।५.४७।।

**(स.)** पुनः कीदृशं न गृह्णीयात् ? इत्याह—असणं'इति अशनं मुद्गादि, पानकं

१. उब्भिंदिआ'इति पाठोऽन्यत्र मुद्रिते ।।

वा आरनालादि, खादिमं लड्डुकादि, स्वादिमं हरीतक्यादि साधुर्यज्जानीयात्, स्वयमामन्त्रणादिना वाऽथवान्यतः शृणुयात्, किं, ? यदिदमशनादिकं, 'दाणट्ठापगडं' कोऽर्थः ? कोऽपि वणिग्देशान्तरादायातः साधुनिमित्तं ददाति, अथवा अव्यापार-पाखण्डिभ्यो ददाति, तदप्यशनादिकं न गृह्णीयात् ।।५.४७।।

(सु.) किञ्च–असणं'इति, अशनं पानकं वापि खाद्यं स्वाद्यं, तद्यथा-ओदन-आरनालादि-,लड्डुक–हरीतक्यादि, यज्जानीयादामन्त्रणादिना, शृणुयाद् वान्यतो यथा दानार्थं प्रकृतमिदं, दानार्थं प्रकृतं नाम साधुवादनिमित्तं यो ददाति अव्यापारपाषण्डिभ्यो [वा] देशान्तरादेरागतो वणिक्प्रभृतिरिति सूत्रार्थः ।।५.४७।।

**तं भवे (तारिसं) भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.४८।।**

(ति.) स्पष्टः ।

(स.) तत् किं कुर्यात् ? इत्यत आह–तारिसं'इति-तादृशमशनादिकं ददतीं स्त्रियं प्रति साधुः, किं वदेदित्याह-तद् भक्तपानं साधुपाखण्डिदानार्थं यत् प्रकल्पितं तत्संयतानामकल्पिकं न कल्पते ग्रहीतुं, यतः कारणादेवं तद् ददतीं स्त्रियं प्रत्याचक्षीत वदेत् साधुर्यन्न मम कल्पते तादृशमिति. ४८.

(सु.) 'तारिसं'इति-तादृशं भक्तपानं दानार्थं प्रवृत्तव्यापारं संयतानामकल्पिकं । यतश्चैवम् ?-अतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.४८।।

**असणं पाणगं वा वि, खाइमं साइमं तहा ।**
**जं जाणिज्ज सुणिज्जा वा, पुन्नट्ठा पगडं इमं ।।५.१.४९।।**

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.५०।।**

**असणं पाणगं वा वि, खाइमं साइमं तहा ।**
**जं जाणिज्ज सुणिज्जा वा, वणिमट्ठा पगडं इमं ।।५.१.५१।।**

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.५२।।**

**असणं पाणगं वा वि, खाइमं साइमं तहा ।**
**जं जाणिज्ज सुणिज्जा वा, समणट्ठा पगडं इमं ।।५.१.५३।।**

**(ति.)** श्रमणाः-निर्ग्रन्थ-शाक्यादयः ।।५.५३।।

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.५४।।**

**(ति.)** [तं...] दानार्थं पुण्यार्थं श्रमणार्थं प्रकृते-आरम्भे साधूनां गृह्णताम् आरम्भसंविभागो दोषः । वनीपकार्थं प्रकृते त्वन्तरायः । अतस्तदादाननिषेधः ।।५.४९-५.५४।।

**(स.)** असणं'इत्यादि पूर्ववत्, पुनः कीदृशं न गृह्णीयात् ? - इत्याह—तं भवे'इति-साधुः पुण्यार्थं प्रकृतं न गृह्णीयात्, कोऽर्थः ? साधुवादानङ्गीकारेण यत्पुण्यार्थं प्रकृतं, ।।५.४९-५०।।

असणं'इति-वनीपकार्थं, वनीपकाः कृपणाः, ५१-५२ शेषं व्याख्यानं पूर्ववत्.।

पुनः कीदृशं न गृह्णीयादित्याह—

असणमिति-साधुः श्रमणार्थं प्रकृतमशनादि न गृह्णीयात्, श्रमणा निर्ग्रन्थाः शाक्यादयस्तन्निमित्तं कृतं, शेषं व्याख्यानं पूर्ववत्. ।।५.५३।।

पुनः कीदृशं न गृह्णीयादित्याह—तं भवे इति-स्पष्टम् ।।५.५४।।

**(सु.)** 'असणं'ति, एवं पुण्यार्थं प्रकृतमिदं, पुण्यार्थं प्रकृतं नाम साधुवादानङ्गीकरणेन यत्पुण्यार्थं कृतमिति ।।५.४९-५०।।

एवं वनीपकार्थं वनीपकाः-कृपणाः ।।५.५१।।

एवं श्रमणार्थमिति, श्रमणा-निर्ग्रंथाः, शाक्यादयः ।।५.५३।।

अस्य निषेधः पूर्ववत् ।।५.५४।।

**उद्देसियं कीयगडं, पूइकम्मं च आहडं ।**
**अज्झोअरपामिच्चं, मीसजायं च वज्जए ।।५.१.५५।।**

**(ति.)** औद्देशिकम्-साधूद्देशेन दध्न ओदनस्य मीलनेन करम्बकरणम् । सङ्खण्डिकोद्धृत-मोदकचूर्णेन गुडपादादि क्षिप्त्वा मोदककरणं च । क्रीतम् प्रतीतम्। पूतिकर्मापि-आधाकर्मिकावयवमिश्रम् । आहृतम्-स्वग्रामाहृतादि । अध्यवपूरकम्-स्वार्थं मूलाद्रहणादौ, साध्वर्थम् अधिकप्रक्षेपरूपम् । प्रामित्यम्-साध्वर्थमुद्धार्यानीय दानम् । मिश्रजातम्-गृही साध्वर्थं मूलत एव मिश्रमुपस्कृतं वर्जयेत् ।।५.५५।।

**(स.)** उद्देसि...इति-उद्दिश्य साधुनिमित्तं कृतमौद्देशिकं १, क्रीतकृतं द्रव्य-भावभेदक्रयक्रीतं २, पूतिकर्म संभाव्यमानाधाकर्मावयवैः संमिश्रम् ३, अभ्याहृतं साधुनिमित्तं ग्रामादेरानीयमानं ४, तथा अध्यवपूरकं स्वार्थं मूलाद्रहणे साधुनिमित्तं प्रक्षेपरूपं ५, प्रामित्त्यं साधुनिमित्तमुच्छिद्य दानलक्षणं ६, मिश्रजातं चादित एव गृहस्थ-संयतयोर्निमित्तं मिश्रमुपसंस्कृतम् ७, एतादृशं सर्वमशनादि साधुर्वर्जयेत्, परं न गृह्णीयात्. ।।५.५५।।

**(सु.)** किंच–'उद्देसिअं'इति-उद्दिश्य कृतमौद्देशिकं-उद्दिष्टकृतकर्मादिभेदं, क्रीतकृतं-द्रव्य-भावक्रयक्रीतभेदं, पूतिकर्म्म च-सम्भाव्यमानाधाकर्म्मावयवसंमिश्रलक्षणं, आहृतं-स्वग्रामाहृतादि, तथाऽध्यवपूरकं-स्वार्थमूलाद्रहणप्रक्षेपरूपं, प्रामित्यं-साध्वर्थमुच्छिद्य दानलक्षणं, मिश्रजातं च-आदित एव गृहिसंयतमिश्रोपस्कृतरूपं वर्ज्जयेदिति ।।५.५५।।

**उग्गमं से पुच्छिज्जा, कस्सट्ठा केण वा कडं ? ।**
**सुच्चा निस्संकियं सुद्धं, पडिगाहिज्ज संजए ।।५.१.५६।।**

**(ति.)** औद्देशिकादिसन्देहे किं कुर्यादित्याह–उद्गमं से-तस्य शङ्कितस्यान्नादेः पृच्छेत् तत्स्वामिनं कर्मकरं वा । कस्यार्थं केन वा कृतमेतद् । न भवदर्थं किन्त्वन्यार्थमिदमिति तद् वचः श्रुत्वा निःशङ्कितं शुद्धं प्रतिगृह्णीयात् संयतः । विपर्यये दोषात् ।।५.५६।।

**(स.)** अथोद्गमादिदोषस्य सन्देहदूरीकरणायोपायमाह–उग्गमं'इति-संयतः साधुः शुद्धमशनादि निर्दोषं सत् प्रतिगृह्णीयात्, कथं ? पूर्वं तत्स्वामिनं कर्मकरं वा 'से' तस्याशनादेः शङ्कितस्योद्गमं तन्निष्पत्तिरूपं पृच्छेत्, यथा कस्यार्थमेतत् केन वा कृतमेतत्, ततः किं कृत्वा ? इति तद्वचः श्रुत्वा, इतीति किं? न भवदर्थमिदमशनादि कृतं, किन्त्वन्यार्थमिति निःशङ्कितं शङ्कारहितम् ।।५.५६।।

(सु.) संशयव्यपोहायोपायमाह-'उग्गमं'इति-उद्गमं-तत्प्रसूतिरूपं, 'से' तस्य शङ्कितस्य अशनादेः पृच्छेत् तत्स्वामिनं कर्म्मकरं वा, यथा कस्यार्थमेतत् ? केन वा कृतमेतदिति, श्रुत्वा तद्वचो न भवदर्थं, किं त्वन्यार्थमित्येवम्भूतं निःशङ्कितं शुद्धं सद् ऋजुत्वादिभावगत्या प्रतिगृह्णीयात् संयतः । विपर्ययग्रहणे दोषादिति ।।५.५६।।

**असणं पाणगं वा वि, खाइमं साइमं तहा ।**
**पुप्फेसु हुज्ज उम्मीसं, बीएसु हरिएसु वा ।।५.१.५७।।**

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.५८।।**

(ति.) इह तृतीयार्थे सप्तमी । पुष्पैर्बीजैर्हरितैः उन्मिश्रम् ।।५७।।, स्पष्टः ।।५८।।

(स.) पुनः कीदृशं न गृह्णीयात् ? - तद् आह—असणं'इति-अशनं पानकं वा पि खाद्यं स्वाद्यं तथा पुष्पैर्जाति-पाटलादिभिर्बीजैर्हरितैर्वा यदि उन्मिश्रं भवेत्, तदा संयतो न गृह्णीयात्. ।।५.५७।। ददतीं च किं वदेत् ?- तद् आह—तं'इति पूर्ववत्- ।।५८।।

(सु.) तथा 'असणं'ति-अशनं पानकं वापि खाद्यं स्वाद्यं तथा, पुष्पैः-जातिपाटलादिभिः भवेदुन्मिश्रं बीजैर्हरितैर्वेति ।।५.५७।।

'तं भवे' इति-तादृशं भक्तपानं तु संयतानामकल्पिकं, यतश्चैवम् ?- अतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति सूत्रार्थः ।।५.५८।।

**असणं पाणगं चेव खाइमं साइमं तहा ।**
**उदगंमि हुज्जा निक्खित्तं, [1]उत्तिंगपणगेसु वा ।।५.१.५९।।**

**तं भवे भत्तेपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.६०।।**

(ति.) स्पष्टः ।।५९-६०।।

(स.) पुनः कीदृशं न गृह्णीयादित्याह—असणमिति अशनं पानकं वापि खाद्यं

१. जीवोना दर १० टि. ।।

स्वाद्यं तथा यदि उदके सचित्तपानीयोपरि, अथवा उत्तिंगपनकेषु कीटिकानगरेषु निक्षिप्तं भवेत् तदा साधुर्न गृह्णीयात्. ।।५.५९।। ददतीं च वदेत् ? तद् आह— तं'इति - पूर्ववत् ।।५.६०।।

**(सु.)** तथा 'असणं'इति सूत्रं, अशनं पानकं वापि खाद्यं स्वाद्यं तथा, उदके भवेन्निक्षिप्तमुत्तिङ्गपनकेषु वा कीटिकानगरोल्लिषु वेत्यर्थः । उदकनिक्षिप्तं द्विविधं- अनन्तरं परम्परं च, अनन्तरं नवनीतपोग्गलियमादि, परंपरं जलघडोवरिभायणत्थं दधिमादि, एवं उत्तिंगपणगेसु भावनीयमिति ।।५.५९।।

'तं भवे'इति सूत्रं, तद् भवेद् भक्तपानं तु संयतानामकल्पिकं, यतश्चैवम् ? अतो ददतीं प्रत्याचक्षीत-न मम कल्पते, तादृशमिति सूत्रार्थः ।।५.६०।। तथा

**असणं पाणगं चेव, खाइमं साइमं तहा ।**
**अगणिंमि[१] हुज्ज निक्खित्तं, तं च संघट्टिया दए ।।५.१.६१।।**

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.६२।।**

**(ति.)** अग्नौ भवेन्निक्षिप्तम्-आरोपितं दुग्धादि तन्मम भिक्षां ददत्या तापातिशयेन मा उद्भूत् । इत्यग्निं संघट्य अज्वलन्तं कृत्वा अशनादि दद्यात् ।।५.६१।।

**(स.)** पुनः कीदृशं न गृह्णीयादित्याह—असणमिति-अशनं पानकं खाद्यं स्वाद्यं यदि तेजसि अग्नौ निक्षिप्तं भवेत्, तं संघट्य भिक्षां दद्यात्, तदा साधुर्न गृह्णीयात्, कुतः दात्री संघट्टनं कुर्यात्, तत्रोच्यते-अहं यावद् भिक्षां ददामि तावता मा भूत्, तापातिशयेनोद्वर्तिष्यत. इति. ।।६१।।

तदा ददतीं प्रति साधुः किं वदेदित्याह—तं'इति पूर्ववत् ।।५.६२।।

**(सु.)** 'असणं'ति सूत्रं, अशनं पानकं वापि खाद्यं स्वाद्यं तथा, तेजसि भवेन्निक्षिप्तं, तेजसीत्यग्नौ तेजस्काय इत्यर्थः । तच्च सङ्घट्ट्य, 'यावद् भिक्षां ददामि तावत्

१. तेउम्मि'इति पाठोऽन्यत्र मुद्रिते ।।

तापातिशयेन मा भूत्, उद्वर्त्तिष्यत' इत्यपोह्य दद्यादिति ।।५.६१।।

**(सु.)** 'तं भवे'इति-तद् भवेद् भक्तपानं तु संयतानामकल्पिकं, अतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति ।।५.६२।।

**उसक्किया ओसक्किया, उज्जालिया पज्जालिया निव्वाविया ।**
**उस्सिंचिया निस्सिंचिया, [1]उवत्तिया उयारिया दए ।।५.१.६३।।**

**तं भवे भत्तपाणं च संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.६४।।**

**(ति.)** एवं मम भिक्षां ददत्या माग्निर्विध्यायतु इति उल्मुक (कानि) उत्सर्प्य अग्नेर्मध्ये प्रेर्य ददाति । ओसक्किया-अपसर्प्य अतिदाहभयादुल्मुकानि उत्सार्य । उज्ज्वाल्य-अर्धविध्यातं स्तोकेन्धनप्रक्षेपेण । प्रज्वाल्य-बहुतरेन्धनप्रक्षेपेण । निर्वाप्य-पाक्य[2]दाहभयाद् विध्याप्य । उत्सिञ्च्य-उद्भवनादुज्झनभयेन कियदप्यन्यत्रोत्सार्य । तथा उद्भवन्तमुदकेन निषिच्य । अपवर्त्य-अग्न्युपरिस्थभाजनवस्तुभाजनान्तरे सञ्चार्य । अवतार्य-दाहभयाद् दानार्थं वा अग्न्युपरिस्थं भाजनं बहिर्विमुच्य साधोभिक्षां दद्यात् ।।५.६३-५.६४।।

**(स.)** पुनः कीदृशमशनादि न गृह्णीयात् ? - इत्याह–'एवमुस्सिक्किआ' इति, यावद् भिक्षां ददामि तावन्मा भूद् विध्यासतीत्युत्सिच्य दद्यात् १, 'एवमोस्सक्किआ' इत्यवसर्प्य अतिदाहभयादुल्मुकान्युत्सार्येत्यर्थः २, एवमुज्जालिआ उज्ज्वाल्यार्धविध्यातं सकृदिन्धनप्रक्षेपेण, पज्जालिआ, प्रज्वाल्य पुनः पुनः, ३, एवं निव्वाविआ, निर्वाप्य दाहभयादिनेति भावः ४, एवमुसिंचिआ, निस्सिंचिआ उत्सिच्यातिभृतादुब्भ(ज्झ)नभयेन, ततो वा दानार्थं तीमनादि निषिच्य तद्भाजनाद् रहितं द्रव्यमन्यत्र भाजने न दद्यात्, उद्वर्तनाभयेन वाद्र(?)हितमुदके[3]न निषिच्य दद्यात्, ५, एवम्-उवत्तिआ ओआरिया, अपवर्त्य तेनैवाग्निनिक्षिप्तेन भाजनेन, अन्येन वा दद्यात्, तथावतार्य दाहभयाद् दानार्थं वा दद्यात्, तदन्यच्च साधुनिमित्तयोगे न कल्पते. ।।६३।।

अथ कदाचित् पूर्वोक्तप्रकारेण तादृशं काचिद् ददाति, तदा तां प्रति साधुः किं

१. ओ. ३ ।। २. ०क. ५-१२ ।। ३. अद्दहियगदव्वं'इति चूर्णौ।

कथयेदित्याह—तं'इति पूर्ववत् ।।६४।।

**(सु.)** एवमुस्सक्किया'इति-यावद् भिक्षां ददामि तावन्मा भूत्-विध्यास्यतीत्युत्सिच्य दद्याद्, एवं ओसक्किया-अवसर्प्यातिदाहभयादुल्मुकान्युत्सार्येत्यर्थः, एवं 'उज्जालिया पज्जालिया' उज्ज्वाल्य-अर्द्धविध्यातं सकृदिन्धनप्रक्षेपेण, प्रज्वाल्य-पुनः पुनः, एवं निव्वाविया-निर्वाप्य दाहभयादेवेति भावः, एवमुस्सिंचिया निस्सिंचिया-उत्सिच्य-अतिभृतादुज्झनभयेन ततो वा दानार्थं तीमनादि, निषिच्य-तद्भाजनाद् रहितं द्रव्यमन्यत्र भाजने, तेन दद्याद्, उद्वर्त्तनभयेन, वा तदार्द्र(आर्द्र)हितमुदकेन निषिच्य, एवं ओवत्तिया-ओवारिया, 'अपवर्त्य-तेनैवाग्निनिक्षिप्तेन भाजनेनान्येन वा दद्यात्, तथा 'अवतार्य' दाहभयाद् दानार्थं वा दद्यात् । तत्तदन्यच्च साधुनिमित्तयोगे न कल्पते ।।५.६३।।

'तं भवे' सूत्रं पूर्ववत् ।।५.६४।।

**हुज्ज कट्ठं सिलं वा वि, इट्टालं वा वि एगया ।**
**ठवियं संकमट्ठाए, तं च हुज्ज चलाचलं ।।५.१.६५।।**

**न तेण भिक्खू गच्छिज्जा, दिट्ठो तत्थ असंजमो ।**
**गंभीरं झुसिरं चेव, सव्विंदियसमाहिए ।।५.१.६६।। युग्मम्**

**(ति.)** गोचरप्रविष्टस्य च-आद्यः स्पष्टः । द्वितीयस्यायमर्थः । गम्भीरम्-अप्रकाशम् । शुषिरं प्रतीतम्। तत्र चलने जीवोपमर्दनरूपोऽसंयमो दृष्टस्ततः सर्वेन्द्रियसमाहितो भिक्षुस्तस्मिन्न गच्छेत् ।।५.६५-५.६६।।

**(स.)** पुनर्गोचराधिकार एव गोचरीप्रविष्टस्य साधोः को विधिः ?-इत्याह-हुज्ज...इति एवंविधं काष्ठं शिला वा २ इष्टकाशकलं वा भवेत्, किंविशिष्टं काष्ठादि ? एकदा एकस्मिन् काले वर्षाकालादौ सङ्क्रमार्थं सुखेन चलनार्थं स्थापितं तदपि च चलाचलमप्रतिष्ठितं भवेत्, न तु भवेत् स्थिरमेव. ।।५.६५।।

तादृशेन चलाचलेन काष्ठादिना साधुः किं न कुर्यात् ?-इत्याह—ण...इति-तेन काष्ठादिना भिक्षुर्न गच्छेत्, कथमित्याह—तत्र काष्ठादौ गमनेऽसंयमो दृष्टः, कथं ? काष्ठादिचलने प्राणिनामुपमर्दसंभवात्. तथा एवंविधमन्यदपि काष्ठादि परिहरेत् साधुः, विशिष्टं काष्ठादि ? गम्भीरमप्रकाशं, पुनः शुषिरं अन्तःसाररहितं, किंविशिष्टः

साधुः ? सर्वेन्द्रियसमाहितः शब्दादिषु रागद्वेषावकुर्वाणः. ।।५.६६।।

(सु.) गोचराधिकार एव गोचरप्रविष्टस्य होज्ज'इति, भवेत् काष्ठं शिलां वापि इट्टालं वापि, एकदा-एकस्मिन् काले प्रावृडादौ स्थापितं सङ्क्रमार्थं, तच्च भवेच्चलाचलं-अप्रतिष्ठितं, न च भवेत् स्थिरमेवेति सूत्रार्थः ।।५.६५।।

'न तेणं' इति सूत्रं, न तेन काष्ठादिना भिक्षुर्गच्छेत्, किमित्याह-दृष्टस्तत्रासंयमः, तच्चलने प्राण्युपमर्दसम्भवात्। तथा गम्भीरं-अप्रकाशं, शुषिरं-चैवान्तःसाररहितं, सर्व्वेन्द्रियसमाहितः-शब्दादिषु रागद्वेषावगच्छन् परिहरेदिति ।।५.६६।।

**निस्सेणिं फलगं पीठं, ऊसवित्ताणमारुहे ।**
**मंचं कीलं च पासायं, समणट्ठा एव दावए ।।५.१.६७।।**

**दुरूहमाणी पवडिज्जा, हत्थं पायं च लूसए ।**
**पुढविजीवे विहिंसिज्जा, जे य तन्निस्सिया जगा ।।५.१.६८।।**

**एयारिसे महादोसे, जाणिऊण महेसिणो ।**
**तम्हा मालोहडं भिक्खं, न पडिगाहंति संजया ।।५.१.६९।।**

त्रिभिर्विशेषकम्

(ति.) तथा—निश्रेणीं फलकं पीठं मञ्चं कीलं च उच्छ्रित्य-ऊर्ध्वीकृत्य । आरोहेत् प्रासादं श्रमणार्थमेव दायकः । मालादानीय श्रमणानां भिक्षां दातुम् । अत्र दोषमाह-दुरुहमाणी-आरोहन्ती प्रपतेत् । प्रपतन्ती च हस्तं पादं वा लूषयेत् । तथा पृथ्वीकायान् विहिंस्यात् । कथंचित् तत्रस्थान् ये च तन्निःश्रिताः-तदाश्रिताः । जगा'इति-गमधातुः, गच्छन्तीत्येवं शीलाः, द्युतिगमोर्द्वे च क्विपि जगच्छब्दनिष्पत्तिः । ततो जगच्छब्देन गमनशीलास्त्रसाः प्राणिनः उच्यन्ते । तांश्च हिंस्यात् । तृतीया गाथा स्पष्टा ।।५.६७-५.६९।।

(स.) पुनः कीदृशे प्रकारे न गृह्णीयात् ? -इत्याह—निस्सेणिं'इति-दाता श्रमणार्थं साधुनिमित्तं प्रासादं यद्यारोहेत्, तदा साधुर्भिक्षां न गृह्णीयात्, किं कृत्वा प्रासादमारोहेत्? निश्रेणिं फलकं पीठं मञ्चं कीलं चोत्सृज्योर्ध्वं कृत्वा. ।।६७।।

कथं न गृह्णीयात् ? तथा ग्रहणे दोषमाह—दुरूह...इति-निश्रेणिप्रमुखमारोहन्ती स्त्री प्रपतेत्, प्रपतन्ती च हस्तं वा पादं वा लूषयेत् स्वकीयं, स्वत एव खण्डयेत्, पुनरपि कथञ्चित् तत्र स्थाने पृथिवीजीवान् विहिंस्यात्, पुनरपि यानि तन्निश्रितानि पृथ्वीनिश्रितानि जगन्ति प्राणिनः तानपि(तान्यपि) हिंस्यात्. ।।६८।।

ततः साधवः किं कुर्वन्ति ? इत्याह-एआरिस 'इति-एतादृशान् पूर्वोक्तान् महादोषान् ज्ञात्वा महर्षयः साधवः, यस्माद् दोषकारिणीयं भिक्षा, तस्मान्मालापहृतां मालोपनीतां भिक्षां न प्रतिगृह्णन्ति, किंविशिष्टा महर्षयः ? संयताः, सम्यक् संयमे यतनां कुर्वाणाः. ।।६९।।

**(सु.)** 'निस्सेणी'इति सूत्रं, निःश्रेणिं, फलकं पीठं उस्सवित्ता-उत्सृत्योर्ध्वं कृत्वेत्यर्थः, आरोहेत्, मञ्चं कीलकं चोत्सृत्य, कमारोहेदित्याह-प्रासादं, श्रमणार्थं-साधुनिमित्तं, दायको-दाता आरोहेत्, एतदप्यग्राह्यमिति ।।५.६७।।

**(सु.)** अत्रैव दोषमाह—'दुरूहमाणी'इति, आरोहन्ती प्रपतेत्, प्रपतन्ती च हस्तं वा पादं वा लूषयेत्-स्वकं स्वत एव खण्डयेत्, तथा पृथिवीजीवान् विहिंस्यात् कथञ्चित् तत्रस्थान् तथा यानि च तन्निश्रितानि जगन्ति-प्राणिनस्तांश्च(तानि) हिंस्यादिति ।।५.६८।।

'एयारिसे'इति-ईदृशान् अनन्तरोदितरूपान् महादोषान् ज्ञात्वा महर्षयः-साधवो, यस्माद् दोषकारिणीं तस्माद् मालापहृतां-मालोपनीतां भिक्षां न प्रतिगृह्णन्ति संयताः। पाठान्तरं = वा हंदि मालापहृतामिति, हंदीत्युपदर्शनमिति ।।५.६९।।

**कंदं मूलं पलंबं वा, आमं छिन्नं व सन्निरं ।**
**तुंबागं सिंगबेरं च, आमगं परिवज्जये(ए) ।।५.१.७०।।**

**(ति.)** अन्यदपि प्रतिषेध्यमाह—कन्दम्-सूरणादेः । मूलम्-मूलकादेः । प्रलम्बम्-तालफलादिः । आमं छिन्नं सन्निरम्-समयभाषया पत्रशाकम् । तुम्बागम्-तुम्बकमेव । शृङ्गबेरं च-आर्द्रकम्। आमकं परिवर्जयेत् ।।५.७०।।

**(स.)** पुनः किं किं कीदृशं कीदृशं न गृह्णन्ति तदाह—कंदं...इति-साधुः कन्दं सूरणादि 'वर्जयेत्' इत्युक्तिः सर्वत्रालापनीया १, तथा मूलं पिण्डादिरूपं २, प्रलम्बं वा

तालफलादि ३, आमं छिन्नं च सन्निरं, सन्निरमिति पत्रशाकं ४ तुम्बाकं त्वग्-मज्जान्तर्वर्त्यार्द्रं, तुलसीमित्यन्ये ५, शृङ्गबेरं चार्द्रकम् ६, च आमकं सचित्तं ।।७०।।

**(सु.)** प्रतिषेधाधिकार एवाह 'कंदं मूलं'इति-कन्दं-सूरणादिलक्षणं, मूलं-पिण्डादिवृन्दारिकादिरूपं, प्रलम्बं वा-तालफलादि, आमं छिन्नं च सन्निरं-सन्निरमिति, पत्रशाकं, तुम्बाकं त्वग्मिञ्जान्तर्वर्त्यार्द्रां वा तुलसीमित्यन्ये, शृङ्गबेरं च-आर्द्रकं, आमकं परिवर्ज्जयेदिति ।।५.७०।।

**तहेव सत्तुचुन्नाइं, कोलचुन्नाइं आयणे ।**
**सक्कुलिं फाणियं पूयं, अन्नं वा वि तहाविहं ।।५.१.७१।।**

**विक्कायमाणं पसढं, रएण परिफासियं**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.७२।। युग्मम्**

**(ति.)** तथैव शक्तुचूर्णान्, शक्तून् कोलचूर्णान्-बदरचूर्णान् । आपणे-हट्टे । शष्कुलीम्-तिलपर्पटिकाम् । फाणितम्-द्रवगुडम् । पूपम्-कणिक्खादिमयम् । अन्यद् वा-तथाविधं मोदकादिकं विक्रीयमाणम्-आपणे प्रसढम्-प्रसोढं विक्रया[1]भावात् चिरस्थापितं, प्राकृतत्वादोकारस्य अकारः । अत एव रजसा परिस्पृष्टम्-व्याप्तम् । तद् ददतीं प्रत्याचक्षीत न मे कल्पते तादृशमिति गाथाद्वयार्थः ।।५.७१।।

**(स.)** पुनः कीदृशं परिवर्जयेत् ?-इत्याह—तहेव...इति-तथैव सक्तुचूर्णान् सक्तून् १, कोलचूर्णान् बदरचूर्णान् २. आपणे वीथ्यां तथा शष्कुलिं तिलवर्पटिकां ३, फाणितं द्रवगुडं ४, पूपकं कणिकादिमयम् ५, अन्यद् वा तथाविधं मोदकादि. ।।७१।।

तत् किं ? इत्याह—विक्का...इति—एवम्भूतं सक्तुचूर्णादिकं दीयमानमपि साधुर्न गृह्णीयादित्यर्थः ।।७२।।

**(सु.)** तहेव'इति तथैव सक्तुचूर्णान्, कोलचूर्णान्-बदरसक्तून् आपणे-वीथ्यां, तथा शष्कुलिं तिलपर्प्पटिकां, फाणितं-द्रवगुडं, पूयं-कणिक्कादिमयं, अन्यद् वा तथाविधं मोदकादि ।।५.७१।।

**(सु.)** किमित्याह—'विक्काय'इति विक्रायमाणं-विक्रीयमाणमापण इति वर्त्तते ।

१. ०य. १.३-५ ।।

प्रसह्यमनेकदिनस्थापनेन प्रकटम्, अत एव रजसा पार्थिवेन परिस्पृष्टं-व्याप्तं, तदित्थम्भूतं तु ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति सूत्रद्वयार्थः ।।५.७२।।

**बहुअट्ठियं पुग्गलं, अणमिसं वा बहुकंटयं ।**
**अत्थियं [1]तिंदुयं बिल्लं, उच्छखंडं च सिंबलिं ।।५.१.७३।।**

**(ति.)** किञ्च—इह वनस्पत्यधिकारः । बहुस्थिकम्-बहुबीजम् । पुद्गलम् पुद्गलाख्यवृक्ष-फलम् । अनिमिषं वा-अनिमिषनाम्नो वृक्षस्य फलम् । बहुकण्टकम् । अत्थियम्-अस्तिकवृक्षफलम् । ति[2]ण्डुकम्-टिम्बरुकीफलम् । बिल्लम् इक्षुखण्डं च प्रतीतम् । सिंबलिं-शाल्मलीं वल्लादिफलिकां वा ।।५.७३।।

**(स.)** पुनः किं किं कीदृशं कीदृशं दीयमानमपि न गृह्णीयात् ? तदाह—बहु...इति साधुः पुद्गलादिकं दीयमानमपि न गृह्णीयादित्युक्तिः पुद्गलं मांसं, किंभूतं पुद्गलं ? बह्वस्थिकं, तथा अनिमिषं वा मत्स्यं, किंभूतमनिमिषं ? बहुकण्टकम्, अयं किल कालाद्यपेक्षया ग्रहणे प्रतिषेधः, अन्ये त्वभिदधति वनस्पत्यधिकारात् तथाविधफलाभिधाने एते इति. तथा चाह—अस्थिकमस्थिकवृक्षफलं, तिन्दुकं तिन्दुरुकीफलं, बिल्वमिक्षुखण्डं चैतद् द्वयमपि प्रसिद्धं, शाल्मलीं वा वल्लादिफलिं च. ।।७३।।

**(सु.)** किञ्च—बहुअट्ठियं पोग्गलं'इति-बह्वस्थिकं पुद्गलं-मांसं, अनिमिषं वा मत्स्यं वा बहुकण्टकं, अयं किल कालाद्यपेक्षया ग्रहणे प्रतिषेधः । अन्ये त्वभिदधति-"वनस्पत्यधिकारात् तथाविधफलाभिधाने एते" इति । तथा चाह-अस्थिकं-अस्थिकवृक्षफलं, तिंदुकं ति तेन्दुकीफलं, बिल्वं इक्षुखण्डं च प्रतीते, शाल्मलिं वा वल्लादिफलं, वाशब्दस्य व्यवहितः सम्बन्ध इति ।।५.७३।।

**अप्पे सिया भोयणज्जाए, बहु उज्झियधम्मिए ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.७४।।**

१. ति. २.३.५ ।। २. तिडु १.३-५.१० ।।

**(ति.)** अत्र दोषमाह—अल्पं स्याद् भोजनजातं बहूज्झनधर्मकमेतत् । शेषं स्पष्टम् ।।५.७४।।

**(स.)** एतद् ग्रहणे दोषमाह—अप्पे इति-बहुअट्ठिअपुग्गलादिके भक्षिते सत्यल्पं स्याद् भोजनजातं. तथैतद्बहूज्झनधर्मकं च, यतश्चैवं ततो ददतीं प्रति साधुर्वदेत् न मम कल्पते तादृशमिति ।।७४।।

**(सु.)** अत्रैव दोषमाह—'अप्पे'इति अल्पं स्यात्, भोजनजातमत्र तथा बहूज्झनधर्म्मकमेतद् यतश्चैवं ?-अतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.७४।।

**तहेवुच्चावयं पाणं, अदुवा वारधोयणं ।**
**संसेइमं चाउलोदगं, अहुणाधोयं विवज्जए ।।५.१.७५।।**

**(ति.)** उक्तोऽशनविधिः । अधुना पानविधिमाह – यथा प्रागशनमुच्चावचमुक्तं तथैव पानम् । उच्चम्-वर्णाद्युपेतं, द्राक्षापानादि। अवचम्-वर्णादिहीनं, आरनालादि । अथवा वारकधावनम्-गुडघटक्षालनं, धान्यस्थाली-क्षालनाद्यपि । संस्वेदजम्-पिष्टस्वेद-सङ्गतोदकादि । तन्दुलोदकम्-आष्टिकरकमुच्यते। तदधुना धौतम्-अपरिणतम् । विवर्जयेत् ।।५.७५।।

**(स.)** उक्तोऽशनविधिः, अथ पानविधिमाह—तहे...इति-एवंविधं पानं गृह्णीयात्, किंविधं पानं ? तथैवोच्चावचं, तथैव यथाशनमुच्चावचम्, उच्चं वर्णाद्युपेतं द्राक्षापानादि, अवचं वर्णादिहीनं पूत्यारनालादि, अथवा वारकधावनं गुडघटधावनादि धान्यस्थालीक्षालनादि, संस्वेदजं पिष्टोदकादि, एतदशनवदुत्सर्गापवादाभ्यां साधुर्गृह्णीयादिति वाक्यशेषः. तन्दुलोदक-मधुनाधौतमपरिणतं साधुर्विवर्जयेत्. ।।७५।।

**(सु.)** उक्तोऽशनविधिः । साम्प्रतं पानविधिमाह—'तहेव'इति-तथैव यथा अशनमुच्चावच्चं तथा पानं, उच्चं-वर्णाद्युपेतं द्राक्षापानादि, अवचं-वर्णादिहीनं पूत्यारनालादि, अथवा वारकधावनं-गुडघटधावनादीत्यर्थः। संस्वेदजं-पिष्टोदकादि, एतदशनवदुत्सर्गापवादाभ्यां गृह्णीयादिति वाक्यशेषः। तन्दुलोदकं त्वट्टिकरकं(व्रीहिदकं) अधुनाधौतमपरिणतं विवर्ज्जयेदिति ।।५.७५।।

**जं जाणिज्ज चिराधोयं, मईए दरिसणेण वा ।**
**पडिपुच्छिया व सुच्चा वा, जं च निस्संकियं भवे ।।५.१.७६।।**

**(ति.)** अत्रैव विधिमाह—यत्-तन्दुलोदकादि । जानीयात् चिरधौतं मत्या दर्शनेन वा कलुष्याधोनिविष्टतया कियती वेला धौतस्यास्येति प्रतिपृच्छ्य वा गृहस्थम् । 'सुच्चा वा' वाशब्दश्चार्थे, महती वेलेति तत्प्रतिवचः श्रुत्वा च । यदेव निःशङ्कितं भवेत् तद् गृह्णीयादित्यर्थः।।५.७६।।

**(स.)** अत्रैव विधिमाह—जं'इति साधुर्यत् तन्दुलोदकमेवं जानीयात् तद् गृह्णीयादिति शेषः, किंविशिष्टं तन्दुलोदकं ? चिराद् धौतं, कथं जानीयात् ?-इत्याह-मत्या तद्ग्रहणादिकर्मजया, तथा दर्शनेन वा वर्णादिपरिणतसूत्रानुसारेण, वा किं कृत्वा ? इति गृहस्थं पृष्ट्वा, इतीति किं ? कियती वेलास्य धौतस्य जातेति, च पुनरिति श्रुत्वा गृहस्थाद्, इतीति किं ? महती वेला जातास्य धौतस्येति. एवं च यन्निःशङ्कितं भवति तद् गृह्णीयादिति. ।।५.७६।।

**(सु.)** अत्रैव विधिमाह—'जं जाणेज्ज'इति सूत्रं, तन्दुलोदकं जानीयात्-विन्द्यात्, चिरधौतं, कथं जानीयात् ?-इत्याह-मत्या दर्शनेन वा, मत्या-तद्ग्रहणादिकर्म्मजया, दर्शनेन वा-वर्णादिपरिणतसूत्रानुसारेण, वा चशब्दार्थः, तदप्येवम्भूतं कियती वेलाऽस्य धौतस्येति पृष्ट्वा गृहस्थं, श्रुत्वा वा महती वेलेति श्रुत्वा च प्रतिवचनं, यच्चेति, यदेवं निःशङ्कितं भवति, निरवयवं प्रशान्ततया तन्दुलोदकं तत् प्रतिगृह्णीयादिति । विशेषः **पिण्डनिर्युक्ता**वुक्त इति ।।५.७६।।

**अजीवं परिणयं नच्चा, पडिगाहिज्ज संजए ।**
**अह संकियं भविज्जा, आसाइत्ताण रोवए ।।५.१.७७।।**

**(ति.)** उष्णोदकादिविधिमाह—अजीवं परिणतम्-त्रिदण्डपरिर्तनादिरूपम् । गृहस्थप्रश्नेन ज्ञात्वा प्रतिगृह्णीयात् संयतः । तदभावे चतुर्थरसमपि देहोपकारकं मत्यादिना ज्ञात्वा । अथ शङ्कितं भवेत् कुथिताम्लत्वादिना । तत आस्वाद्य रोचयेत्-निश्चे(च्च)यं कुर्यात् ।।

**(स.)** अथोष्णोदकादिविधिमाह—अजीवं...'इति संयतः साधुरेवंविधमुष्णोदकं गृह्णीयादित्युक्तिः, किं कृत्वा ! अजीवं प्रासुकं, तथा परिणतं त्रिदण्डोत्कलितं,

चतुर्थरसमप्यपूत्यादि देहोपकारकं मत्या दर्शनेन वा ज्ञात्वा, शङ्कितं भवेत् पूत्यादिभावेन, ततः तत् पानीयमास्वाद्य रोचयेद् विनिश्चयं कुर्यात्. ।।५.७७।।

(सु.) उष्णोदकादिविधिमाह—'अजीवं'ति सूत्रं, उष्णोदकं अजीवं परिणतं ज्ञात्वा त्रिदण्डपरिवर्त्तनादिरूपं मत्या दर्शनेन वेत्यादि वर्त्तते, तदेवम्भूतं प्रतिगृह्णीयात् संयतः, चतुर्थरसमपूत्यादि देहोपकारकं मत्यादिना ज्ञात्वेत्यर्थः । अथ शङ्कितं भवेत् पूत्यादिभावेन, तत आस्वाद्य रोचयेद् विनिश्चयं कुर्यादिति ।।५.७७।।

**थोवमासायणट्ठाए, हत्थगंमि दलाहि मे ।**
**मा मे अच्चंबिलं पूइं, नालं [1]तन्हविणित्तए ।।५.१.७८।।**

(ति.) तच्चैवम्—स्तोकमास्वादनाय हस्ते देहि मे । मा मम अत्यम्लं कुथितं वा, नालं तृष्णानिवर्त्तनाय । ततः किमस्योपादानेन ? । प्रायोग्यं चेद् ग्राह्यम् ।।५.७८।।

(स.) अथ केन विधिना विनिश्चयं कुर्यात् ?- इत्याह-थोव...इति-साधुर्दातारं प्रत्येवं वदेत्, एवं किं ? मे मम हस्ते आस्वादनार्थं स्तोकं पानीयं प्रथमं देहि ? यदि साधोरुपभोग्यं ततो ग्रहीष्ये, मा मे मम अत्यम्लं पूति तृषापनोदाय नालं समर्थं, ततः किमनेनाप्रयोजनेनेति. तत आस्वादितं सच्च तत् साधुयोग्यं चेद् भवति तदा गृह्यत एव, नो चेत् तदाऽग्राह्यम् ।।७८।।

(सु.) तच्चैवं—'थोवं'इति-स्तोकमास्वादनार्थं प्रथमं तावद्धस्ते देहि मे, यदि साधुप्रायोग्यं ततो ग्रहीष्ये, मा मेऽत्यम्लं पूति नालं तृडपनोदाय, ततः किमनेनानुपयोगिना? इति सूत्रार्थः ।।५.७८।।

**[2]तं च अच्चंबिलं पूइ, नालं तण्हविणित्तए ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.१.७९।।**

**तं च हुज्ज अकामेणं, विमणेण पडिच्छियं ।**
**तं अप्पणा न पिबे, नो वि अन्नस्स दावए ।।५.१.८०।।**

(ति.) तच्च भवेत् । अकामेन-निरभिलाषेण । विमनस्केन प्रतीप्सितम् । तत्र

१. तिण्हं विणित्तए...इति मुद्रितेऽन्यत्र पाठः ।। २. इयं गाथा १-७.९-१२ प्रतिषु नास्ति ।।

देहापकारकमित्यात्मना न पिबेत्, नाप्यन्यस्य दापयेत् ।।५.७९-५.८०।।

**(स.)** अथ कदाचित् स्त्री तदत्यम्लमपि ददाति, तदा तां ददतीं प्रति साधुः किं वक्ति तदा—तं'इति-तच्चात्यम्लं पूति, नालं समर्थं तृष्णां विनेतुं, ततो ददतीं प्रति वक्ति, न मम कल्पते तादृशमिति. ।।५.७९।।

अथाकामादिना कदाचित् तदत्यम्लादिकं गृहीतं तदा को विधिः?- तद् आह— तं'इति एवंविधमत्यम्लादि साधुना कदाचिदकामेनाग्रहवशेन विमनस्केन-अन्यचित्तेन प्रतीच्छितं गृहीतं भवेत्, तदापि तत् साधुर्न पिबेत् कायस्यापकारकमित्यनाभोगधर्मश्रद्धयापि, नापि अन्येभ्यो दापयेत्, रत्नाधिकेनापि स्वयं दानस्य प्रतिषेधज्ञापनार्थं दापनग्रहणम् इह चेयं भावना—'सव्वत्थ संजमं, संजमाओ अप्पाणं चेव रक्खिज्जा' इति. ।।८०।।

**(सु.)** आस्वादितं च सत् साधुप्रायोग्यं चेत् गृह्यत एव, नो चेत्, अग्राह्यं, अत आह-तं चेति, गतार्थं चेति ।।५.७९।।

**(सु.)** 'तं च होज्ज'इति, तच्चात्यम्लादि भवेत्, अकामेन उपरोधशीलतया विमनस्केन-अन्यचित्तेन प्रतीच्छितं-गृहीतं, तदात्मना कायापकारकमनाभोगधर्म्मश्रद्धया न पिबेत्, नाप्यन्येभ्यो दापयेत्, रत्नाधिकेनापि स्वयं दानस्य प्रतिषेधज्ञापनार्थं दापनग्रहणम्। इह च "सव्वत्थ संजमं, संजमाओ अप्पाणमेव"इत्यादि भावनेति ।।५.८०।।

**एगंतमवक्कमित्ता, अच्चित्तं पडिलेहिया ।**
**जयं परिट्ठविज्जा, परिट्ठप्प पडिक्कमे ।।५.१.८१।।**

**(ति.)** तर्हि कथं तत्-कार्यं ?-तद् विधिमाह-[एगंत...] स्पष्टः । नवरं पडिक्कमे-ऐर्यापथिकीं प्रतिक्रामेत् ।।५.८१।।

**(स.)** ननु स्वयं तादृशं न पिबेत्, अन्यस्य न पाययेत्, तर्हि किं कुर्यात् ? इत्याह— एगं...इति-साधुस्तत्पूर्वं गृहीतमत्यम्लादिकं प्रतिष्ठापयेद् विधिना व्युत्सृजेत्, किं कृत्वा ? एकान्तं स्थानमवक्रम्य गत्वा, अचित्तं दग्धप्रदेशादिस्थानं, प्रत्युपेक्ष्य चक्षुषा, प्रमृज्य च रजोहरणेन स्थण्डिलमिति शेषः, कथं प्रतिष्ठापयेत् ? यतमत्वरितं न शीघ्रं. प्रतिष्ठापनानन्तरं किं कुर्यात् ?- इत्याह-प्रतिष्ठाप्य वसतिमुपाश्रयमागतः सन् प्रतिक्रामेदीर्यापथिकीम्, एतच्च बहिरागतनियमकरणसिद्धं प्रतिक्रमणमबहिरपि प्रतिष्ठाप्य प्रतिक्रमणनियमज्ञापनार्थमिति. ।।८१।।

**(सु.)** अस्यैव विधिमाह—'एगन्त'इति-एकान्तं अवक्रम्य-गत्वा अचित्तं दग्धदेशादि प्रत्युपेक्ष्य चक्षुषा प्रमृज्य च रजोहरणेन स्थण्डिलमिति गम्यते, यतं-अत्वरितं प्रतिष्ठापयेत्, विधिना त्रिः वाक्यपूर्वं व्युत्सृजेत्, प्रतिष्ठाप्य वसतिमागतः प्रतिक्रामेत् ईयापथिकाम्। एतच्च बहिरागतनियमकरणसिद्धं प्रतिक्रमणं, अबहिरपि प्रतिष्ठाप्य प्रतिक्रमण-नियमज्ञापनार्थमिति ।।५.८१।।

**सिया य गोयरग्गओ, इच्छिज्जा परिभुत्तुयं ।**
**कुट्ठगं भित्तिमूलं वा, पडिलेहित्ताण फासुयं ।।५.१.८२।।**

**(ति.)** एवमन्न-पानग्रहणविधिमभिधाय भोजनविधिमाह—स्याद् गोचराग्रगतो दूरे ग्रामान्तरे वा भिक्षाप्रविष्टो बालादिस्तृषाद्यभिभूतः। इच्छेत् परिभोक्तुम् । कोष्टकम्-शून्यागारमठादि । भित्तिमूलं वा-कुट्यकोणं वा । प्रत्युपेक्ष्य-दृशा, रजोहृत्या च प्रमृज्य । प्राशुकम्-बीजादिरहितम् ।।५.८२।।

**(स.)** एवमन्नपानग्रहणविधिं कथयित्वा भोजनविधिमाह—सिया'इति-बालादिः साधुः पिपासाद्यभिभूतः स्यात् कदाचिद् गोचराग्रगतो ग्रामान्तरं भिक्षार्थं प्रविष्टः सन् परिभोक्तुमिच्छेत् तदा तत्र वसतिर्नास्ति. तदा कोष्ठकं शून्यं च मठादि भित्तिमूलं वा कुड्यैकदेशादि इति।।५.८२।।

**(सु.)** एवमन्नपानग्रहणविधिमभिधाय भोजनविधिमाह—'सिआ य'इति-स्यात्-कदाचित् गोचराग्रगतो-ग्रामान्तरं भिक्षां प्रविष्ट इच्छेत्, परिभोक्तुं पानादिपिपासाद्यभिभूतः सन्, तत्र साधुवसत्यभावे कोष्ठकं-शून्यं चट्टमठादि भित्तिमूलं वा-कुड्यैकदेशादि प्रत्युपेक्ष्य-चक्षुषा, प्रमृज्य च रजोहरणेन, प्रासुकं-बीजादिरहितं चेति ।।५.८२।।

**अणुन्नवित्तु मेहावी, पडिच्छन्नंमि संवुडे ।**
**हत्थगं संपमज्जित्ता, तत्थ भुंजिज्ज संजओ(ए) ।।५.१.८३।।**

**(ति.)** अनुज्ञाप्य गृहस्थं, मेधावी साधुः, प्रतिच्छन्ने स्थाने, संकृत्तः (वृतः) ईर्यां प्रतिक्रम्य, हस्तकं उपलक्षणत्वाद् देहं मुखवस्त्रिकया प्रमृज्य, कवलादानकाले च हस्तं मुखं च तत्र भुञ्जीत संयतः ।।५.८३।।

**(स.)** आह—अणुन्न...इति-संयतः साधुस्तत्र स्थाने वक्ष्यमाणेन विधिना रागद्वेषरहितः

सन् भुञ्जीत, किं कृत्वा ? तत्स्वामिनमवग्रहमनुज्ञाप्यादेशं गृहीत्वा, सागारिकपरिहारतो विश्रामणव्याजेन. किंभूतः संयतः ? मेधावी साधुसामाचारीविधिज्ञः, किंभूते कोष्ठकादिस्थाने ? प्रतिच्छन्ने, उपरि तृणादिभिराच्छादिते, नाकाशे, किंभूतः संयतः? संवृत उपयुक्तः सन्नीर्याप्रतिक्रमणं कृत्वा, ततो हस्तकं मुखवस्त्रिकारूपमादायेति शेषः, तेन विधिना कायं सम्प्रमृज्य भुञ्जीत ।।५.८३।।

**(सु.)** तत्र—'अणुन्नवित्तु'इति-अनुज्ञाप्य सागारिकपरिहारतो विश्रमणव्याजेन तत्स्वामिनमवग्रहं मेधावी-साधुः, प्रतिच्छन्ने तत्र कोष्ठकादौ, संवृतः-उपयुक्तः सन् साधुरीर्याप्रतिक्रमणं कृत्वा, तदनु हस्तकं-मुखवस्त्रिकारूपमादायेति वाक्यशेषः । संप्रमृज्य विधिना तेन कायं, तत्र भुञ्जीत संयतो रागद्वेषावपाकृत्येति सूत्रार्थः ।।५.८३।।

**तत्थ से भुंजमाणस्स, अट्ठियं कंटओ सिया ।**
**तणकट्ठं सक्करं वा वि, अन्नं वा वि तहाविहं ।।५.१.८४।।**

**(ति.)** स्पष्टः । अन्नं वा वि'-अन्यद्वापि, ईलिका-केश-धान्य-कीटिकादि गृहस्थप्रमादेन अशोधिते धान्ये राद्धे ।।५.८४।।

**(स.)** अथ तत्र भुञ्जानस्य साधोरस्थि वा कण्टकादि वा स्यात्, तदा साधुः किं कुर्यात् ? इत्याह—तत्थ...इति-तत्र कोष्ठकादौ, 'से' तस्य साधोर्भुञ्जानस्यास्थि वा कण्टको वा स्यात्, अन्ये वदन्ति-कथञ्चित् गृहिणां प्रमाददोषात् कारणगृहीते पुद्गल एव, तृणं वा काष्ठं वा शर्करा वा स्यात्, अन्यद् वापि तथाविधं बदरकण्टकादि वा स्यात् ।।५.८४।।

**(सु.)** तत्थ'इति तत्र कोष्ठकादौ से-तस्य साधोः भुञ्जानस्यास्थि कण्टको वा स्यात्, कथञ्चित् गृहिणां प्रमाददोषात्, कारणगृहीते पुद्गल एवेत्यन्ये । तृणं काष्ठं शर्करं चापि स्यात्, उचितभोजने अन्यद् वापि तथाविधं बदरकर्कटादीति ।।५.८४।।

**तं उक्खिवित्तु न निक्खिवे, आसएण न छड्डए ।**
**हत्थेण संगहेऊणं, एगंतमवक्कमे ।।५.१.८५।।**

**(ति.)** तदुत्क्षिप्य न यत्र कुत्रचिन्निक्षिपेत् । आस्येन न छर्दयेत् 'मा भूत् कस्यापि विराधनेति । शेषं स्पष्टम् ।।५.८५।।

**(स.)** तं'इति-साधुः तदस्थ्यादिकमुत्क्षिप्य हस्तेन यत्र क्वचिन्न निक्षिपेत्, तथाऽऽस्येन मुखेन नोज्झेत्, माभूद् विराधनेति हेतोः, अपि तु किं कुर्यात् ? हस्तेन तदस्थ्यादिकं गृहीत्वैकान्तं निर्व्यञ्जनं (?-निर्जनं) स्थानमवक्रामेद् गच्छेत् ।।५.८५।।

**(सु.)** 'तं उक्खिवित्तु' इति, तदस्थि इति, उत्क्षिप्य हस्तेन यत्र क्वचिन्न निक्षिपेत्, तथा आस्येन-मुखेन नोज्झेत्, मा भूद्विराधनेति, अपि तु हस्तेन गृहीत्वा तदस्थ्यादि एकान्तमवक्रामेदिति ।।५.८५।।

**एगंतमवक्कमित्ता, अचित्तं पडिलेहिया ।**
**जययं परिट्ठविज्जा, परिट्ठप्प पडिक्कमे ।।५.१.८६।। त्रिभिर्विशेषकम्**

**(ति.)** एषोऽपि स्पष्टः ।

**(स.)** तत्र गत्वा किं कुर्यात् ?-इत्याह—एगंतं'इति-साधुस्तदस्थ्यादिकं यतमत्वरितं परिष्ठापयेत्, किं कृत्वा ? एकान्तमवक्रम्य गत्वा, पुनः किं कृत्वा ? अचित्तं प्रासुकं प्रत्युपेक्ष्य चक्षुषा, रजोहरणेन प्रमार्ज्य (प्रमृज्य) च परिष्ठाप्य च प्रतिक्रामेदीर्यापथिकीमिति ।।८६।।

**(सु.)** इगन्त...इति एकान्तमवक्रम्याचित्तं प्रत्युपेक्ष्य यतं प्रतिष्ठापयेत्, प्रतिष्ठाप्य प्रतिक्रामयेदिति भावार्थः पूर्ववदेवेति ।।५.८६।।

**सिया य भिक्खू इच्छिज्जा, सिज्जमागम्म भुत्तुयं ।**
**सपिंडपायमागम्म, उंडुयं पडिलेहिया ।।५.१.८७।।**

**(ति.)** वसत्या[मा]गतस्य भोजनविधिमाह—स्याद् भिक्षुरिच्छेत् । शय्याम्-वसतिम् । आगम्य भोक्तुं सह पिण्डपातेन-भिक्षया । भिन्नवाक्यत्वान्न पौनरुक्त्यम् । आगम्य वसतिद्वारे बहिरेव । उण्डुकम्-स्थानं प्रत्युपेक्ष्य पिण्डपातं विशोधयेदिति शेषः ।।५.८७।।

**(स.)** अथ वसतिमधिकृत्य भोजनविधिमाह—सिया'इति स्यात् कदाचित् तदन्य-कारणाभावे सति भिक्षुरिच्छेत् शय्यां वसतिं, किं कृत्वा ? आगम्य तत्रागत्य, किमथ ? परिभोक्तुं भोजननिमित्तं, तत्रायं विधिः-सपिण्डपातं पिण्डपातेन विशुद्धसमुदानेनागम्य, वसतिमिति शेषः, बहिरेव उण्डुकं स्थानं प्रत्युपेक्ष्य विधिना तत्रस्थः पिण्डपातं विशोधयेत्, ।।८७।।

**(सु.)** वसतिमधिकृत्य भोजनविधिमाह—'सिआ य'इति, स्यात् कदाचित् तद् द्रव्यं कारणाभावे सति भिक्षुरिच्छेदिति शय्यां-वसतिमागम्य परिभोक्तुं, तत्रायं विधिः-सह पिण्डपातेन-विशुद्धसमुदानेनागम्य, वसतिमिति गम्यते, तत्र बहिरेव उन्दुकं-स्थानं प्रत्युपेक्ष्य विधिना तत्रस्थः पिण्डपातं विशोधयेदिति सूत्रार्थः ।।५.८८।।

**विणएणं पविसित्ता, सगासे गुरुणो मुणी ।**
**इरियावहियमायाय, आगओ य पडिक्कमे ।।५.१.८८।।**

**(ति.)** विशोध्य पिण्डं विनयेन-कृताञ्जलिः, "नैषेधिकी नमः क्षमाश्रमणेभ्यः" इत्युच्चरन् । प्रविश्य वसतिं गुरुसकाशमागतः । ऐर्यापथिकीमादाय-"इच्छामि पडिक्कमिउं" इत्यादि पठित्वा । प्रतिक्रामेत्-कायोत्सर्गं कुर्यात् ।।५.८८।।

**(स.)** ततः पश्चात् किं कुर्यात् ? - इत्याह—विणएणं'इति-साधुस्तत्रागतो गुरुसमीपं प्रतिक्रामेत् कायोत्सर्गं कुर्यात्, किं कृत्वा ? 'गुरुसगासे इरियावहिअं आयाय' गुरुसमीपे ईर्यापथिकां 'इच्छामि पडिक्कमिउं' इत्यादि पाठरूपाम् 'आयाय' पठित्वा, पुनः किं कृत्वा ? 'विणएण पविसित्ता' पूर्वं पिण्डं विशोध्य बहिर्विनयेन 'नैषेधिकी नमः क्षमाश्रमणेभ्यः'अञ्जलिकरणलक्षणेन, वसतिमिति शेषः; प्रविश्य. ।।५.८८।।

**(सु.)** तत ऊर्ध्वं 'विणएणं'त्ति विशोध्य पिण्डं बहिः 'विनयेन' 'नैषेधिकी नमः क्षमाश्रमणेभ्यो'अञ्जलिकरणलक्षणेन प्रविश्य, वसतिमिति गम्यते, सकाशे गुरोः-मुनिर्गुरुसमीप इत्यर्थः । ईर्यापथिकीमादाय 'इच्छामि पडिक्कमिउं इरियावहियाए' इत्यादि सूत्रं पठित्वा, आगतश्च गुरुसमीपं प्रतिक्रामेत्-कायोत्सर्गं कुर्यादिति ।।५.८८।।

**आभोइत्ताण नीसेसं, अईयारं जहक्कमं ।**
**गमणागमणे चेव, भत्तपाणं च संजए ।।५.१.८९।।**

**(ति.)** तत्र कायोत्सर्गे आभोगयित्वा निःशेषमतिचारं यथाक्रमं, गमनागमनयोश्चैव भक्तपानयोश्च योऽतिचारस्तम् । संयतः कायोत्सर्गस्थो हृदये स्थापयेदिति शेषः ।।

**(स.)** ततः किं कुर्यात् ?- इत्याह आभोइ...इति-साधुः कायोत्सर्गस्थस्तमतिचार हृदये स्थापयेत्, किम्भूतमतिचार ? निःशेषं यथाक्रमं परिपाट्या, किं कृत्वा ? तत्र

कायोत्सर्गे आभोगयित्वा ज्ञात्वा, कुत्रेत्याह-गमनागमनयोः; गमने गच्छत, आगमन आगच्छतः, पुनः भक्तपानयोः, भक्ते पाने च. ।।५.८९।।

**(सु.)** आभोइत्ताण'इति तत्र कायोत्सर्गे आभोगयित्वा-ज्ञात्वा निःशेषमतिचारं यथाक्रमं परिपाट्या, क्व ? इत्याह-गमनागमनयोश्चैव-गमने-गच्छत, आगमने-आगच्छतो, योऽतिचारः, तथा भक्तपानयोश्च-भक्ते पाने च योऽतिचारस्तं संयतः-साधुः कायोत्सर्गस्थो हृदये स्थापयेदिति ।।५.८९।।

**उज्जु-पन्नो अणुव्विग्गो, अव्वक्खित्तेण चेयसा ।**
**आलोए गुरुसगासे, जं जहा गहियं भवे ।।५.१.९०।।**

**(ति.)** उत्सार्य च कायोत्सर्गं—ऋजुप्रज्ञः-अकुटिलमतिः । अनुद्विग्नः-क्षुदादिजयात् प्रसन्नः । अव्याक्षिप्तेन चेतसा-अन्यत्र अगतचित्तेन । शेषं स्पष्टम् ।।५.९०।।

**(स.)** कायोत्सर्गे पारिते च किं कुर्यात्-इत्याह—उज्जु-इति साधुरशनादि यथा येन प्रकारेण हस्तप्रदानादिना गृहीतं भवेत्, तद् गुरुसमीपे आलोचयेद् गुरोर्निवेदयेदिति भावः, केन ? एवंविधेन चेतसा, किंभूतेन चेतसा, 'अव्वक्खित्तेण' अव्याक्षिप्तेनान्यत्रोपयोगमगच्छता, किंभूतः साधुः ? ऋजुप्रज्ञो-ऽकुटिलमतिः, पुनः किंभूतः साधुः ? अनुद्विग्नः, सर्वत्र क्षुदादिजयात् प्रशान्तः ।।९०।।

**(सु.)** विधिनोत्सारिते चैतस्मिन् 'उज्जुप्पन्नो'इति-ऋजुप्रज्ञः-अकुटिलमतिः, सर्वत्र अनुद्विग्नः-क्षुधादिजयात्, प्रशान्तः, अव्याक्षिप्तेन चेतसा, अन्यत्रोपयोगमगच्छतेत्यर्थः, आलोचयेत् गुरुसकाशे-गुरोर्निवेदयेदितिभावः । यदशनादि, यथा-येन प्रकारेण हस्तप्रदा(धाव)नादिना गृहीतं भवेदिति सूत्रार्थः ।।५.९०।।

**न सम्ममालोइयं [1] हुज्जा, पुव्विं पच्छा व जं कडं ।**
**पुणो पडिक्कमे तस्स, वोसट्ठो चिंतए इमं ।।५.१.९१।।**

**(ति.)** तदनु च—न सम्यगालोचितं भवेत् । सूक्ष्ममज्ञानाद् विस्मरणाद् वा [1] पूर्वं पश्चाद् वा यत्कृतं दात्र्या पुरःपश्चात्कर्म वेत्यर्थः । पुनः-आलोचितान्तरम् । प्रतिक्रामेत । तस्य-सूक्ष्मातिचारस्य । "इच्छामि पडिक्कमिउं गोयरचरियाए" इत्यादि "तस्स मिच्छामि

१. पुरः ६-१०.१२ ।।

दुक्कडम्" इत्यन्तं सूत्रं पठित्वा । व्युत्सृष्टः-कायोत्सर्गस्थः । चिन्तयेदिदम् ।।५.९१।।

**(स.)** ततः किं कुर्यात् ? इत्याह—न...इति साधुस्तस्य सूक्ष्मातिचारस्य यत् पूर्वं कृतं तत् पुरःकर्म, यत् पश्चात् कृतं तत् पश्चात्कर्म सूक्ष्मं न सम्यगालोचितं भवेत्, कुतः ? अज्ञानादनाभोगेनाऽननुस्मरणाद् वा, तत् सर्वं पुनरालोचनान्तरकालं प्रतिक्रामेत्, किं कृत्वा ? 'इच्छामि पडिक्कमिउं गोअरचरिआए' इत्यादि सूत्रं पठित्वा, ततो व्युत्सृष्टः कायोत्सर्गस्थ इदं वक्ष्यमाणं गाथारूपं चिन्तयेत्. ।।५.९१।।

**(सु.)** तदनु च 'न सम्म...इति न सम्यगालोचितं भवेत् सूक्ष्मं, अज्ञानात् अनाभोगेना-ऽननुस्मरणाद्वा, पूर्वं पश्चाद्वा यत्कृतं, पुरःकर्म्म पश्चात्कर्म्म चेत्यर्थः। पुनरालोचनोत्तरकालं प्रतिक्रामेत्, तस्य-सूक्ष्मातिचारस्य 'इच्छामि पडिक्कमिउं गोयरचरियाए' इत्यादि सूत्रं पठित्वा व्युत्सृष्टः-कायोत्सर्गस्थः, चिन्तयेदिदं-वक्ष्यमाणलक्षणमिति ।।५.९१।।

**अहो जिणेहिं असावज्जा, वित्ती साहूण देसिया ।**
**मुक्खसाहणहेउस्स, साहुदेहस्स धारणा ।।५.१.९२।।**

**(ति.)** किं तत् ? — अहो जिनैरसावद्या वृत्तिः साधूनां देशिता, मोक्षसाधनहेतोः साधुदेहस्य धारणेति । प्राकृतत्वाल्लुप्तचतुर्थीकं धारणायै इत्यर्थः ।।५.९२।।

**(स.)** किं चिन्तयेत् ? तद् आह—अहो इति—अहो इति विस्मये, जिनैस्तीर्थकरैः साधूनां वृत्तिर्दर्शिता देशिता वा, किंभूता वृत्तिः ? असावद्या अपापा, कस्मै ? साधुदेहस्य धारणाय धारणार्थं, किंभूतस्य साधुदेहस्य ? मोक्षसाधनहेतोः, मोक्षसाधनं ज्ञानदर्शनचारित्ररूपं, तस्य हेतोः. ।।९२।।

**(सु.)** 'अहो जिणेहिं' — 'अहो' विस्मये, जिनैः-तीर्थकरैः, असावद्या-अपापा, वृत्तिः-वर्त्तना, साधूनां दर्शिता देशिता वा, मोक्षसाधनहेतोः-सम्यग्दर्शनज्ञानचारित्र-साधनस्य साधुदेहस्य धारणाय संधारणार्थमिति ।।५.९२।।

**नमुक्कारेण पारित्ता, करित्ता जिणसंथवं ।**
**सज्जायं पट्ठवित्ताणं, वीसमिज्ज खणं मुणी ।।५.१.९३।।**

**(ति.)** ततश्च—नमस्कारेण-नमो अरिहंताणं'इत्यनेन पारयित्वा । कृत्वा जिनसंस्तवम्-चतुर्विंशतिस्तवं भणित्वेत्यर्थः । स्वाध्यायं प्रस्थाप्य विश्राम्येत् क्षणं

मुनिः ।।५.९३।।

**(स.)** ततः किं कुर्यात् ? - इत्याह-णमुक्कार...इति-णमुक्कारेति-मुनिः क्षणं स्तोककालं विश्राम्येत्, किं कृत्वा ? नमस्कारेण 'नमो अरिहन्ताणं'इति कथनरूपेण कायोत्सर्गं पारयित्वा, पुनः किं कृत्वा ? जिनसंस्तवं 'लोगस्स उज्जोयगरे' इत्यादिरूपम् कृत्वा, अतो यदि न पूर्वं प्रस्थापितः, ततः स्वाध्यायं प्रस्थाप्य मण्डल्युपजीवकस्तं स्वाध्यायमेव कुर्यात्, यावदन्ये आगच्छन्ति, यः पुनस्तदन्यः क्षपकादिः सोऽपि प्रस्थाप्य विश्राम्येत्. ।।९३।।

**(सु.)** ततश्च 'नमोक्कारेणं'इति-नमस्कारेण पारयित्वा 'नमो अरिहंताणं'इत्यनेन, कृत्वा जिनसंस्तवं "लोगस्स उज्जोगरे" इत्यादिरूपं, अ(त)तो यदि न पूर्वं प्रस्थापितस्ततः स्वाध्यायं प्रस्थाप्य मण्डल्युपजीवकः, तमेव कुर्यात् यावदन्ये आगच्छन्ति, यः पुनस्तदन्यः क्षपकादिः सोऽपि प्रस्थाप्य विश्राम्येत् क्षणं-स्तोककालं मुनिरिति ।।५.९३।।

**वीसमंतो इमं चिंते, हियमट्ठं लाभमट्ठिओ ।**
**जइ मे अणुग्गहं कुज्जा, साहू हुज्जामि तारिओ ।।५.१.९४।।**

**(ति.)** विश्राम्यन्निदं चिन्तयेद् । हितमर्थम्—उत्तरार्द्धेन वक्ष्यमाणम् । लाभार्थिकः-कर्मनिर्जरार्थी । यदि मे अनुग्रहं कुर्युः साधवो मदीयानीतप्रासुकपिण्डादानेन, ततोऽहं स्यां तारितो भवाब्धेः, ।

इति विचिन्त्य भोक्तुमासीनान् गुरून् निमन्त्रयेत् । यदि गृह्णन्ति, ततो भव्यं, नो चेद् वाच्यम् । प्रभो ! बालवृद्धेभ्यो दत्त । ददते चेत् ततः सुन्दरम् । अथ भणेत् त्वमेव यच्छ ।।५.९४।।

**(स.)** पुनः साधुर्विश्रामानन्तरं किं कुर्यात् ? इत्याह- वीस...इति-साधुर्विश्राम्यन्निदं हितं कल्याणप्रापकमर्थं वक्ष्यमाणलक्षणं चिन्तयेत्, केन ? चेतसा परिणतेन मनसा, किंभूतः साधुः ? लाभेन निर्जरादिनार्थोऽस्येति लाभार्थिकः सन्, कथम् ? इत्याह-यत एवं जानाति यदि मे मम साधवो मयानीतो यः प्रासुकः पिण्डः, तस्य ग्रहणेनानुग्रहं प्रसादं कुर्युः, तदाहं तारितो भवसमुद्रात् स्यां भवामि, एवं चिन्तयित्वोचितवेलायां साधुराचार्यमामन्त्रयेत्, यद्याचार्यो गृह्णाति, ततो भव्यं, कदाचित् स स्वयं न गृह्णाति

तदा तस्य वाच्यं- 'हे भगवन् ! देहि केभ्यश्चित्' इत्युक्ते यदि साधुः(? आचार्यः) किं दातव्यं कस्यापि ददाति तदा सुन्दरम् ।।९४।।

**(सु.)** वीसमंतो'इति विश्राम्यन्निदं चिन्तयेत् परिणतेन चेतसा, हितं-कल्याण-प्रापकमर्थं-वक्ष्यमाणलक्षणं, किंविशिष्टः सन् ? भावलाभेन-निर्जरादिनाऽर्थोऽस्येति, लाभार्थिकः, यदि मे-ममानुग्रहं कुर्युः साधवः प्रासुकपिण्डग्रहणेन, ततः स्यामहं तारितो भवसमुद्राददिति ।।५.९४।।

**साहवो तो चिअत्तेणं, निमंतिज्ज जहक्कमं ।**
**जइ तत्थ केइ इच्छिज्जा, तेहिं सद्धिं तु भुंजए ।।५.१.९५।।**

**(ति.)** ततः साधूंस्ततो मनःप्रीत्या निमन्त्रयेत् । यथाक्रमम्-रत्नाधिकक्रमेण । यदि तत्र केचिदिच्छेयुः । ततः तैः सार्धं संविभज्य भुञ्जीत ।।५.९५।।

**(स.)** अथाचार्यो भणति-त्वमेव देहि, तदा किं कुर्यात् ? इत्याह—साहव...इति-साधुस्ततो गुरुणानुज्ञातः सन्, यथाक्रमं यथारत्नाधिकतया ग्रहणौचित्यापेक्षया बालादिक्रमेणेत्यन्ये वदन्ति, साधून् निमन्त्रयेत्, केन ? 'चिअत्तेण' मनःप्रीत्या, ततो यदि केचन धर्मबान्धवा इच्छेयुरङ्गीकुर्युः, तदा तैः सार्धमुचितसंविभाग-दानेन साधुर्भुञ्जीत. ।।९५।।

**(सु.)** एवं सञ्चित्योचित वेलायां आचार्यमामन्त्रयेत्, यदि गृह्णाति शोभनं, नो चेद्-वक्तव्योऽसौ भगवन् ! देहि केभ्योऽप्यतो यद् दातव्यं, ततो यदि ददाति, सुन्दरं, अथ भणति-'त्वमेव प्रयच्छ' अत्रान्तरे 'साहवो'इति-साधूंस्ततो गुर्व्वनुज्ञातः सन् 'चिअत्तेणं'त्ति मनःप्रणिधानेन निमन्त्रयेत् यथाक्रमं यथारत्नाधिकतया, "ग्रहणौचित्यापेक्षया बालादिक्रमेण'इत्यन्ये । यदि तत्र केचन धर्मबान्धवा इच्छेयुः-अभ्युपगच्छेयुः, ततस्तैः सार्धं भुञ्जीतोचित-संविभागदानेनेति ।।५.९५।।

**अह कोइ न इच्छिज्जा, तओ भुंजिज्ज एगओ ।**
**आलोए भायणे साहू, जयं अप्परिसाडियं ।।५.१.९६।।**

**(ति.)** स्पष्टः । नवरम् — आलोके-सप्रकाशे । यतम्-यत्नेन । अपरिशातयन्-हस्तमुखाभ्यां सिक्थाद्यनुज्झन् ।।५.९६।।

**(स.)** अथ कोपि नेच्छेत्, तदा किं कुर्यात् ? - इत्याह- अह...इति-अथ कोऽपि साधुर्नेच्छेत्, तदा साधुरेकाकी रागादिरहितो भुञ्जीत, कथं भुञ्जीतेत्याह-आलोकभाजने मक्षिकादीनामपोहाय प्रकाशप्रधाने भाजन इत्यर्थः, यतः प्रयत्नेन तत्रोपयुक्तः, किं कुर्वन् ? अपरिशातयन्, हस्तमुखाभ्यां कणमात्रमपि न त्यजन्. ।।९६।।

**(सु.)** 'अह कोइ'इति अथ कश्चिन्नेच्छेत् साधुः, ततो भुञ्जीत एकको-रागादिरहित इति । कथं भुञ्जीतेत्यत्राह-आलोके भाजने मक्षिकाद्यपोहाय प्रकाशप्रधाने भाजन इत्यर्थः । साधुः-प्रव्रजितः यतं-प्रयत्नेन तत्रोपयुक्तं, अपरिशाटं-हस्तमुखाभ्यां अनुज्झन्निति ।।५.९६।।

**तित्तगं व कडुयं व कसायं, अंबिलं व महुरं लवणं वा ।**
**एयं लद्धमन्नत्थ पउत्तं, महु घयं व भुंजिज्ज संजए ।।५.१.९७।।**

**(ति.)** भोजनमाश्रित्य विशेषमाह—पूर्वार्द्धं स्पष्टम् - उत्तरार्द्धस्यार्थः । एतल्लब्धम्-आगमोक्तविधिना प्राप्तम्। अन्यार्थम्-मोक्षसाधकदेहोपष्टम्भार्थं प्रयुक्तम् । मधुघृतमिव-सखण्डाज्यमिव । भुञ्जीत संयतः । कोऽर्थस्तिक्ताद्यनिष्टादौ अद्विष्टः ।।५.९७।।

**(स.)** अथ भोज्यमाश्रित्य विशेषमाह—तित्तगं'इति संयत एवंविधमप्यशनादि मधु-घृतमिव मधु-घृतसमानं मृष्टमिति ज्ञात्वा भुञ्जीत, किंविशिष्टमशनादि ? तिक्तं वा एलुकवालुकादि, कटुकमार्द्रतीमनादि, कषायं वल्लादि, अम्बिलं वा अम्लं तक्राऽऽरनालादि, मधुरं क्षीरदध्यादि, लवणं वा प्रकृतिक्षारं, तथाविधशाकादि अन्यद् वा लवणोत्कटम्, एतल्लब्धम्, आगमे उक्तेन विधिना प्राप्तं, पुनः कीदृशम् ? अन्यार्थप्रयुक्तम्, अन्यार्थमक्षोपाङ्गन्यायेन देहार्थं परमार्थतो हि तत्साधकमिति कृत्वा मोक्षार्थं प्रयुक्तं, परं न वर्णाद्यर्थम् ।।९७।।

**(सु.)** भोज्यमधिकृत्य विशेषमाह—'तित्तगं व'इति-तिक्तकं वा एलुक-वालुङ्कादि,

कटुकं वाऽऽर्द्रकतीमनादि, कषायं वल्लादि, आम्लं तक्रारनालादि, मधुरं क्षीरमध्वादिकं, लवणं वा प्रकृतिक्षारं तथाविधशाकादि लवणोत्कटं वान्यत्, एतत् तिक्तकादि लब्धं-आगमोक्तेन विधिना प्राप्तं अन्यार्थं "अक्षोपाङ्गन्यायेन" परमार्थतो मोक्षार्थं प्रयुक्तम् तत् साधकमिति कृत्वा मधुघृतमिव भुञ्जीत संयतः, न वर्णाद्यर्थं । अथवा मधुघृतमिव "नो वामाओ हणुयाओ दाहिणं हणुयं संचारेज्ज"इति ।।५.९७।।

**अरसं विरसं वावि, सूइयं वा असूइयं ।**
**उल्लं वा जइ वा सुक्कं, मंथु कुम्मा भोयणं ।।५.१.९८।।**

**(ति.)** किञ्च-अरसम्-संस्काराभावादनाप्तरसम् । विरसम्-पुराणौदनादि । सूचितं वा असूचितम्-कथनाकथनेन दत्तम् । आर्द्रं वा-सुकुमारम् । शुष्कं वा-कठिनम् । मन्थु-बदरचूर्णादि । कुल्माषाः-राद्धमाषाः । तद्भोजनम् ।।५.९८।।

**(स.)** पुनः कीदृशमशनादि ? - इत्याह-अरसं'इति-एतादृशं भोजनं वर्तते, तस्याग्रिमगाथया सह योजना कार्या, किंभूतमशनादि भोजनम् ? अरसं रसवर्जितं हिंग्वादिभिरसंस्कृतं, पुनः किंभूतं? विरसं वा विगतरसं पुराणमोदनादि, पुनः किंभूत ? सूचितं व्यञ्जनादियुक्तं, वा अथवा असूचितं व्यञ्जनादिरहितम्, अन्ये त्वेवमर्थं कुर्वन्ति-सूचितं कथयित्वा दत्तम्, असूचितमकथयित्वा वा दत्तं, पुनः किंभूतम् ? आर्द्रं प्रचुरव्यञ्जनं, यदि वा शुष्कं स्तोकव्यञ्जनं. किंभूतं तद् ?-इत्याह-मन्थु-कुम्मासभोजनं, मन्थु बदरचूर्णादि, कुल्माषाः सिद्धमाषाः, केचिद् वदन्ति कुल्माषा यवमाषाः ।।९८।।

**(सु.)** किंच–'अरसं'इति अरसं-अप्राप्तरसं हिङ्ग्वादिभिरसंस्कृतमित्यर्थः, विरसं वा-विगतरसं-अतिपुराणौदनादि, सूचितं-व्यञ्जनादियुक्तम् असूचितं वा-तद्रहितं वा, "कथयित्वा अकथयित्वा वा दत्तं"इत्यन्ये । आर्द्रं-प्रचुरव्यञ्जनं, यदि वा शुष्कं-स्तोकव्यञ्जनं वा, किं तदित्याह-मन्थुकुल्माषभोजनं-मन्थु-बदरचूर्णादि, कुल्माषाः-सिद्धमाषाः, "यवमाषा" इति केचिदिति ।।५.९८।।

**उप्पन्नं नाइहीलिज्जा, अप्पं वा बहु फासुयं ।**
**मुहालद्धं मुहाजीवी, भुंजिज्जा दोसवज्जियं ।।५.१.९९।।**

**(ति.)** एतत् किम् ? - इत्याह—उत्पन्नम्-ईदृशमेव विधिना प्राप्तम् । नातिहीलयेत । अल्पम् स्तोकम् । बहु वा-असारप्रायम् । किं विशिष्टं, प्रासुकम् । मुधालब्धम्-मायया आलापाद्यैपना(?)वर्जया प्राप्तम् । मुधाजीवी-जात्याद्यनाजीवकः । भुञ्जीत दोषवर्जितम्-संयोजनादिदोषरहितम् । ।५.९९ । ।

**(स.)** एतद् भोजनं किम् ? - इत्याह—उप्पण्णं'इति-एवं पूर्वोक्तमरसादिकमशनादि साधुर्भुञ्जीत, परं नातिहीलयेत् सर्वथा न निन्देत्, किंभूतमशनं ? विधिना प्राप्तमल्पं भवेत्, तदा नैवं ज्ञातव्यं वक्तव्यं वा, यत् किमेतदल्पमात्रं न देहपूरकमपि, तथा बहु वाऽसारप्रायं किमनेनाऽसारेण, किंभूतमशनं? फासुअं प्रासुकं, यस्मात् प्राणा गता निर्जीवं जातम्. अन्ये त्वाचार्या इत्थं व्याख्यां कुर्वन्ति-अल्पशब्दाद् विरसादि वा बहु प्रासुकं सर्वथा शुद्धं नातिहीलयेत्, अपि त्वेवं भावयेत्—यदेवेह लोका ममानुपकारिणः प्रयच्छन्ति तदेव शोभनमिति. किंभूतमशनं ? मुधा लब्धं मन्त्रतन्त्रादिना अप्राप्तं, किंभूतः साधुः ? मुधाजीवी सर्वथाऽनिदानजीवी, अन्ये वदन्ति जात्यादिना न जीवी, एवंविधमशनादिदोषवर्जितं संयोजनादिदोषवर्जितं साधुर्भुञ्जीत. ।।५.९९ । ।

**(सु.)** एतद् भोजनं किं ? - इत्याह—'उप्पन्नं'इति सूत्रं, उत्पन्नं-विधिना प्राप्तं, नातिहीलयेत्-सर्वथा न निन्दयेत्, अल्पमात्रमेतत् न देहपूरकमिति किमनेन ? बहु वा असारप्रायमिति । वाशब्दस्य व्यवहितः सम्बन्धः, किंविशिष्टं तत् ? - इत्याह-प्रासुकं-प्रगतासु निर्जीवमित्यर्थः । अन्ये तु व्याचक्षते-"अल्पं वा, वाशब्दाद् विरसादि वा, बहु प्रासुकं-सर्वथा शुद्धं नातिहीलयेत्'इति, अपि त्वेवं भावयेत्-यदेवेह लोका ममानुपकारिणः प्रयच्छन्ति तदेव शोभनमिति, एवं मुधा लब्धं-कोण्टलकादिव्यतिरेकेण प्राप्तं, मुहाजीवी-सर्वथा अनिदानजीवी, "जात्याद्यनाजीवक" इत्यन्ये, भुञ्जीत दोषवर्जितं-संयोजनादिरहितमिति ।।५.९९ । ।

**दुल्लहा हु मुहादाई, मुहाजीवी वि दुल्लहा ।**
**मुहादायी मुहाजीवी, दोवि गच्छंति सोगइं ति बेमि ।।५.१.१०० । ।**

**(ति.)** एतद् दुरापमिति दर्शयन्नाह—स्वजना अमी, कुलगुरवोऽमी, अस्मत्कुटुम्बेऽतीव ममत्वम्, अस्मान् प्रति बहुतमं वात्सल्यं कुर्वन्ति । इत्यादिकारणैरुपरोधं विना

चारित्रिणोऽमी, महासत्त्वा, निर्ममा, इहलोकनिरपेक्षाः, मोक्षमार्गैकदृष्टयः, सत्पात्रभूता इति बुद्ध्या भक्त-पान-वस्त्र-पात्रादिभिस्तेषामुपकुर्वते । इत्येते मुधादायिनो दुर्लभाः। मुधाजीविनः-ज्योतिष-निमित्त-मन्त्र-तन्त्र-सस्नेहालापा-सनाद्यर्पणासद्भूतस्वाजन्यकरण-ममत्वदर्शनादि-वात्सल्यैर्भक्त-पान-वस्त्राद्यर्थं निरीहतया गृहस्थान्नावर्जयन्ति ते दुर्लभाः मुधादायिनो मुधाजीविनश्च द्वयेऽपि गच्छन्ति द्वावपि गच्छतः। सुगतिम्-सिद्धिगतिमिति, कदाचिदनन्तरमेव कश्चिद् देवलोक-सुमानुषत्वप्रत्यागमनपरम्परया । इति-समाप्तौ ब्रवीमिति पूर्ववत् ।।५.१००।। अत्र मुधादायकत्वे धर्मं प्रपित्सुर्भद्रकः श्रेष्ठी, मुधाजीवित्वे च **साधुद्वयं** [१]दृष्टान्तः । **तिलकाचार्यवृत्तौ पंचमे प्रथमोद्देशः समाप्तः ।।**

**(स.)** मुधाजीवी'इति दुर्लभमेतद् दर्शयति,-दुल्लहा...इति-दुर्लभा एवंविधा दातारस्तथाविध**भागवत**वत्. मुधाजीविनोऽपि दुर्लभास्तथाविध**चेल्लक**वत्, एतयोः कथानके वृत्तितो ज्ञेये. अमीषां फलमाह-मुधा दातारो मुधाजीविनश्च द्वावप्येतौ सुगतिं सिद्धिगतिं गच्छन्ति. कदाचित् तस्मिन्नेव भवे, कदाचिद् देवलोक-सुमानुषत्वप्रत्यागमनपरम्परया. ब्रवीमीति पूर्ववत्. ।।५.१००।।

**इति श्रीदशवैकालिकसूत्रस्य शब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां पिण्डैषणाध्ययनस्य प्रथमोद्देशकः समाप्तः**

**(सु.)** एतद् दुरापमपि दर्शयति 'दुल्लहा...इति-दुर्लभा एव मुधादातारः, तथाविध**भागवत**वत्, मुधाजीविनोऽपि दुर्लभाः तथाविध**चेल्लक**वत्, अमीषां फलमाह-मुधादातारो मुधाजीविनश्च द्वावप्येतौ गच्छतः सुगतिं-सिद्धिगतिं कदाचिदनन्तरमेव, कदाचित् देवलोक-सुमानुषत्व-प्रत्यागमपरम्परया, ब्रवीमीति पूर्ववत् ।

अत्र भागवतोदाहरणम् (दृ० ३)-कश्चित् परिव्राजकः कञ्चनापि भक्तिमन्तं भागवतमवादीत्-यदि मदीयोदन्तमुद्वहसि, ततोऽहं तव गृहे वर्षासमयमतिवाहयामि, तेनोक्तम्-यदि मदीयां तप्तिं न करोषि, तेनोक्तम्-एवं करिष्ये, ततः प्रदत्तस्तेन तस्मै समाश्रयः, तद्रक्षणं चकार भोजनादिभिस्तस्य गृहाधिपतिः, अतिक्रान्ते च कियत्यपि काले-एकदा प्राप्तच्छिद्रैश्चौरैस्तस्य भागवतस्य प्रधानोऽश्वः प्रमादेन रक्षकाणामपहृतः, प्रभातं वर्त्तते इति न शक्ताः ते तमश्वं निर्वोढुं, ततोऽतिवृक्षगहने बद्ध्वा तं, तेऽन्यत्रोपययुः,

१. तत्कथा च अन्यत्र दर्शनीया ।।

अत्रान्तरे प्रातरेव स्नातुं परिव्राजकस्तडागमुपजगाम, दृष्टश्च तेन सरःसमीपवर्त्तिन्यां जाल्यामसौ तुरङ्गमः, प्रत्यभिज्ञातश्चापि सोऽयमश्वः, योऽस्माकमुपकारिणो भागवतस्य तस्करैरपहृतः, ततस्तेन गत्वा स्वमावासं अग्रे गृहपतिपुरुषाणामुक्तम्-यथा मम स्नातुमितः सरसि गतस्य जाल्यां धौतवासो विस्मृतं, ततस्तैः पुमान् प्रहितः, तेन च तत्र गतेन दृष्टौऽसो वाजी समानीतश्च, कथितो गृहपतये, ततस्तेन समचिन्ति-अपि व्याजेन व्रतिना ममोपकारः कृतः, ततत्कथमहं निर्व्याजदानफलं विहाय प्रत्युपकारेण दानप्रवृत्तिं विदधामीति संप्रधार्य गदितोऽसौ परिव्राजकः-भद्र ! व्रज त्वमिदानीं, न कृतोपकारिणे भवते तप्तिं विधास्यामि, यस्मादुपकारिणि विहितं दानं निष्फलं उपजायत इति, एष मुधादायी'इति ।

मुधाजीविन्युदाहरणमुच्यते (दृ० ४) - कश्चिन्नरपतिरनित्यतां विलोक्य प्रियाणामपि पुत्र-कलत्र-मित्र-पौत्रादीनां, समुपजातवैराग्यो धर्माधर्मपरीक्षां चक्रे, को वा अनिसृष्टं भुङ्क्ते ? ततस्तं परीक्षयामि-इति संप्रधार्य पुरुषानामुधिकयादिदेश-यथा राजा मोदकान् प्रयच्छति, समागत्य परिगृह्यतामिति । समाकर्ण्योद्घोषणामुपजग्मुः कार्प्पटिकप्रभृतयोऽर्थिनो जनाः, पृष्टाश्च ते भूभुजा केन भवन्तो जीवन्ति ?, तत्रैकेनोक्तम्-अहं तावत् मुखेन । अपरेण गदितं-अहं पादाभ्यां, अपरेणोक्तम्-अहं हस्ताभ्यां, अन्येन निवेदितं-अहं लोकानुग्रहणेन, क्षुल्लकसाधुनोक्तम्-अहं मुधिकयेति, ततस्तां नरपतिः पुनरपि जगाद-कथमेवेति । ततः प्रथमो जगाद-अहं तावत्कथको जनानां विस्तार्य रामायणादिकथां कथयामि, तेन मुखेन जीवामीति । द्वितीयः प्राह-अहं हि लेखवाहको घटिकामध्ये योजनं लङ्घयामि, तेन पादाभ्यां जीवामि । तृतीयः प्राह-अहं हि लेखकः, अतो हस्ताभ्यां जीवामि । भिक्षुकेणोक्तम्-अहं प्रव्रजितः अतो लोकाणामनुग्रहेण निर्वहणं। पुनः क्षुल्लकसाधुनोक्तम् प्रव्रजितोऽहं जन्म-जरा-मरण-रोग-शोक-व्याध्युपद्रवशतोपद्रुतं दारिद्र्य-दौर्भाग्य-कलङ्क-व्रात-कलुषितं, इष्टवियोगानिष्टसंयोगदुःखजनितकृशतरकायं क्षुधा-पिपासा-शीतोष्ण-क्लेशसहस्रसंकुलं दैन्य-चिंता-जरादिभिः क्षणमप्यमुक्तसमीपं संसारं विलोक्य, ततो निर्विण्णः प्रतिपद्य, अमुं शारीर-मानसाऽनेकदुःखजलधिविलङ्घनसेतुं सौभाग्य-सौजन्यौदार्योपकारकरणपटिष्टं ज्ञानविज्ञानजनकं विजितसमस्तराजन्य-चक्रराज(राज्य)संपादकं स्वर्गावाससंपादितसुखातिशय-

संदोहं मोक्षफलदायकं जैनधर्म्मं, ततो मुधिकया यथोपलब्धेनाहारजातेन जीवामीति। निशम्य तद्भाषितम्-अहो एष धर्म्मः सर्वदुःखमोक्षसाधक इति निश्चित्य, विशेषेणाचार्य-समीपे धर्ममाकर्ण्य प्रतिबुद्धो, राज्ये सुतं संस्थाप्य प्रव्रज्यामसौ नरपतिरग्रहीत् । एष मुधाजीवी इति ॥५.१००॥

**॥ इति पिण्डैषणाध्ययनस्य प्रथमोद्देशकः ५-१ ॥**

## ।। पिण्डैषणाध्ययने द्वितीयोद्देशकः ।।

**पडिग्गहं संलिहित्ताणं, लेवमायाए संजए ।**
**दुगंधं वा सुगंधं वा, सव्वं भुंजे न छड्डए ।।५.२.१।।**

**(ति.)** पिण्डैषणायाः प्रथमोद्देशके प्रक्रान्तोपयोगि यन्नोक्तं, तदाह - पतद्ग्रहं पात्रकम् । संलिह्य-प्रदेशिन्या निरवयवं कृत्वा । लेपमादाय-उपजीव्य। संयतः दुर्गन्धं वा सुगन्धि वा सर्वं भुञ्जीत । न छर्दयेत् । अत्रार्धव्यत्ययो[1] युक्तः परं पतद्ग्रहाभिधानं मङ्गलार्थमित्येवमुद्देशकादावुपन्यासः ।।५.२.१।।

**(स.)** अथ पिण्डैषणायाः प्रथमोद्‌देशे यदुपयोगि नोक्तं, तद् द्वितीयोद्‌देशके दर्शयन्नाह पडिग्गहं...इति-संयतः साधुर्दुर्गन्धि वा सुगन्धि वा भोजनजातं सर्वं समस्तं भुञ्जीताऽऽश्री(ऽश्नी)यात् परं नोज्झेत्, अत्र गन्धग्रहणं रसादीनामुपलक्षणं, कुतो नोज्झेत् ? उच्यते-संयमविराधनाभयात्, किं कृत्वा ? प्रतिग्रहं पात्रं सँल्लिह्य प्रदेशिन्या निरवयवं कृत्वा, कया ? लेपमर्यादया आलेपं सँल्लिह्य. ।।५.२.१।। विशेषमाह-

**(सु.)** पिण्डैषणायाः प्रथमोद्देशक एव प्रक्रान्तोपयोगि यन्नोक्तं-तद् द्वितीये समुपदर्शयन्नाह-'पडिग्गहं'इति-प्रतिग्रहं-भाजनं, संलिह्य-प्रदेशिन्या निरवयवं कृत्वा, कथमित्याह-लेपमर्यादया-अलेपं संलिह्य, संयतः-साधुः, दुर्गन्धि वा सुगन्धि वा भोजनजातं, गन्धग्रहणं रसाद्युपलक्षणं, सर्वं-निरवशेषं भुञ्जीत-अश्नीयात्, नोज्झेत्-नोत्सृजेत् किञ्चिदपि, मा भूत् संयमविराधनेति । अस्यैवार्थस्य गरीयस्त्वख्यापनाय सूत्रार्थयोः व्यत्ययोपन्यासः । प्रतिग्रहशब्दो माङ्गलिक इत्युद्‌देशादौ तदुपन्यासार्थं वा, अन्यथैवं स्यात्-दुर्गन्धि वा सुगन्धि वा सर्वं भुञ्जीत नोज्झेत् । प्रतिग्रहं संलिह्य लेपमर्यादया संयतः । विचित्रा च सूत्रगतिरिति ।।५.२.१।।

**सि(से)ज्जा निसीहियाए, समावन्नो य गोयरे ।**
**अयावयट्ठा भुच्चा णं, जंइ तेण न संथरे ।।५.२.२।।**

**(ति.)** विधिविशेषमाह—शय्यायाम्-वसतौ । नैषेधिक्याम्-स्वाध्यायभूमौ । समापन्नो

---

१. गाथापश्चार्धस्य १० टि. ।।

वा गोचरे क्षपकग्लानादिः । अयावदर्थम्-अपरिपूर्णम् । छात्रमठादौ भुक्त्वा । यदि तेन भुक्तेन न संस्तरेत् ।।५.२.२।।

**(स.)** विशेषमाह—सेज्जा'इति-यदि क्षपको ग्लानादिर्वा तेन भुक्तेन न संस्तरेन्न यापयितुं समर्थः, तदा द्वितीयवेलामपि गोचरे भक्तपानं गवेषयेदित्यग्रिमगाथायाः सम्बन्धः. किंभूतः क्षपकादिः ? 'सेज्जा निसीहियाए समावन्नो' शय्यायां वसतौ नैषेधिक्यां स्वाध्यायभूमौ, अथवा शय्यैवा-ऽसमञ्जसनिषेधात्-नैषेधिकी, तस्यां समापन्नः सन्, किं कृत्वा ? अयावदर्थं भुक्त्वा, न यावदर्थमपरिसमाप्तमित्यर्थः, णं वाक्यालङ्कारे. ।।५.२.२।।

**(सु.)** विधिविशेषमाह-'सेज्जा'इति शय्यायां-वसतौ, नैषेधिक्यां-स्वाध्यायभूमौ, शय्यैव वा असमञ्जसनिषेधान्नैषेधिकी तस्यां, समापन्नो वा गोचरे, क्षपकादिः, छात्र(छन्न)मठादौ च, अयावदर्थं भुक्त्वा, न यावदर्थं = अपरिसमाप्तमित्यर्थः । णमिति वाक्यालङ्कारे । यदि तेन-भुक्तेन, न संस्तरेत् न यापयितुं समर्थः, क्षपको विषमवेलापत्तनस्थो ग्लानो वा भवति ।।५.२.२।।

**तओ कारणमुप्पन्ने, भत्तपाणं गवेसए ।**
**विहिणा पुव्वउत्तेणं, इमेणं उत्तरेण य ।।५.२.३।।**

**(ति.)** ततः कारणे-वेदनादौ । उत्पन्ने भक्तपानं गवेषयेत् । विधिना पूर्वोक्तेनानेन। उत्तरेण वा - वक्ष्यमाणेन ।।५.२.३।।

**(स.)** यद्येकवारं भुक्तेन न संस्तरेत् तदा किं कुर्यादित्याह—तओ इति-पुष्टालम्बनः साधुः, ततः कारणे वेदनादावुत्पन्ने द्वितीयवारमपि भक्तपानं गवेषयेदन्वेषयेत्, अन्यथा यतीनामेकवारमेव भक्तगवेषणमुक्तं, केन ? विधिना, किंभूतेन विधिना, पूर्वोक्तेन, सम्प्राप्ते भिक्षाकाल इत्यादिना, च पुनः, अनेन वक्ष्यमाणलक्षणेनोत्तरेण. ।।३।।

**(सु.)** 'तओ'इति ततः कारणे-वेदनादौ उत्पन्ने पुष्टालम्बनः सन् भक्तपानं गवेषयेत्-अन्वेषयेत्, अन्यथा सकृद् भुक्तमेव यतीनामिति । विधिना पूर्वोक्तेन "संप्राप्ते भिक्षाकाले" इत्यादिना, अनेन च वक्ष्यमाणलक्षणेनोत्तरेण चेति ।।५.२.३।।

**कालेण निक्खमे भिक्खू, कालेण य पडिक्कमे ।**
**अकालं च विवज्जित्ता, काले कालं समायरे ।।५.२.४।।**

**(ति.)** स चायमित्याह—यो यत्र ग्रामादावुचितो भिक्षाकालः, तेन कारणभूतेन निःक्रामेत् भिक्षुर्भिक्षार्थम्। कालेन - यावता स्वाध्यायवेला स्यात्, तावता प्रतिक्रामेत्-निवर्तेत । अकालं च-भिक्षादेः । विवर्ज्य । भिक्षाटनयोग्यः कालोऽपि भिक्षा । ततश्च भिक्षासमये भिक्षां समाचरेत्-कुर्यादित्यर्थः ।।५.२.४।।

**(स.)** तदेव वक्ष्यमाणलक्षणमाह—कालेण'इति-भिक्षुः साधुर्वसतेः सकाशाद् भिक्षायै निष्क्रामेत्, केन ? कालेन करणभूतेन, कः कालः ? यो यस्मिन् ग्रामादौ भिक्षायामुचितः, पुनर्भिक्षुः कालेन तेनैव यावता स्वाध्यायादि निष्पद्यते तावता प्रतिक्रामेन्निवर्तेत, पुनर्भिक्षुः काले भिक्षावेलायां कालं भिक्षां समाचरेत्, किं कृत्वा ? अकालं च वर्जयित्वा, कोऽकालः ? येन कालेन स्वाध्यायादि न सम्भाव्यते स किलाकालः, **स्वाध्यायादीनि हि स्वाध्यायवेलायामेव क्रियन्ते,** ।।४।।

**(सु.)** कालेण'इति, यो यस्मिन् ग्रामादावुचितो भिक्षाकालः, तेन करणभूतेन, निष्क्रामेत् भिक्षुर्व्रती व्रजेत् वसतेर्भिक्षायै, कालेन चोचितेनैव यावता स्वाध्यायादि निष्पद्यते तावता प्रतिक्रामेत्-निवर्तेत,

भणियं च-"खित्तं कालो भायणं तिन्नि वि पहुप्पंति हिंडउ'त्ति अट्ठभंगा",

अकालं च वर्जयित्वा येन स्वाध्यायादि न संभाव्यते, स खल्वकालः तमपास्य, काले कालं समाचरेत्-इति सर्व्वयोगोपसङ्ग्रहार्थं निगमनं, भिक्षावेलायां भिक्षां समाचरेत्, स्वाध्यादिवेलायां स्वाध्यायादीनीति । उक्तं च-

"जोगो जोगो जिणसासणंमि दुक्खक्खया पउंजंते ।
अन्नोन्नमबाहाए असवत्तो होइ कायव्वो ।।१।।" (ओघ. नि. गा. २७७) ।।५.२.४।।

**अकाले चरसि भिक्खू, कालं न पडिलेहसि ।**
**अप्पाणं च किलामेसि, सन्निवेसं च गरिहसि ।।५.२.५।।**

**(ति.)** अकालचरणे दोषमाह—अकालचारी साधुः केनचित् साधुना भिक्षा प्राप्ता न वा'? इत्युक्तः, सन्नेवं वदेत्। कुतः तद्दुःसन्निवेशे भिक्षा ? । सोऽथ तेनोच्यते ।

अकाले चरसि भिक्षो !, प्रमादात् कालं न प्रत्युपेक्षसे । अकालचरणादात्मानं च क्लमयसि । अपूर्णपात्रतया सन्निवेशं च गर्हसे ।।५.२.५।।

**(स.)** अकाले गोचरीगमने दोषमाह-अकाल'इति कोऽपि साधुरकाले भिक्षार्थं प्रविष्टः, अथाकालचारित्वेन भिक्षा न लब्धा, तदान्येन केनापि साधुना पृष्टः, भो ! भिक्षा त्वया प्राप्ता न वेति ? तदा स वदति, कुतोऽत्र स्थण्डिलसन्निवेशे भिक्षाप्राप्तिः? तदान्यः साधुः पृच्छाकृत्, तमकालचारिणं वदति, हे भिक्षो ! त्वमकाले चरसि, कस्मात्? प्रमादात् स्वाध्यायलोभाद् वा, पुनस्त्वं कालं किमयं भिक्षाकालो न वेत्यादिरूपं न प्रत्युपेक्षसे न जानासि, च पुनस्त्वकालचरणेनात्मानं क्लामयसि दीर्घभ्रमणेनो-नोदरताभावेन च, च पुनः सन्निवेशं ग्रामादिकमवर्णवादेन गर्हसि, ततो भगवत आज्ञालोपेन दैन्यप्रतिपत्त्या च तव महान् दोषः सम्भाव्यते, तस्मादकालाटनं न श्रेय इति. ।।५।।

**(सु.)** अकालचरणे दोषमाह– अकाले'इति अकालचारी कश्चित्साधुरलब्धभैक्षः केनचित्साधुना 'प्राप्ता भिक्षा न वे'त्यभिहितः सन्नेवं ब्रूयात्-कुतोऽत्र स्थण्डिलसन्निवेशे भिक्षा ?, स तेनोक्तः—अकाले चरसि भिक्षो ! प्रमादात् स्वाध्यायलोभाद् वा, कालं न प्रत्युपेक्षसे, किमयं भिक्षाकालो न वेति, अकालचरणेनात्मानं च क्लामयसि (ग्लपयसि) दीर्घाटन-न्यूनोदरताभावेन, सन्निवेसं च गर्हसि भगवदाज्ञालोपतो दैन्यं प्रतिपद्येति । यस्मादयं दोषः सम्भाव्यते तस्मादकालाटनं न कुर्यादिति ।।५.२.५।।

**सइ काले चरे भिक्खू, कुज्जा पुरिसकारियं ।**
**अलाभुत्ति न सोइज्जा, तवुत्ति अहियासए ।।५.२.६।।**

**(ति.)** अतोऽकालाटनं न कार्यमित्याह—सति काले-जाते समये । चरेद् भिक्षुः । कुर्यात् पुरुषकारम्-वीर्याचारं न लङ्घयेत् । भिक्षायाः कथञ्चिदलाभे, अलाभ इति न शोचयेत् । किन्तु तपो भविष्यतीत्यधिसहेत ।।५.२.६।।

**(स.)** ततः साधुः किं कुर्यात् ?- इत्याह—सइ...इति-भिक्षुः काले सति भिक्षाकाले जाते सति चरेद् भिक्षार्थं गच्छेत्. अन्ये पुनः 'सइकाले' इत्यस्यैवमर्थं कुर्वन्ति-स्मृतिकालो भिक्षाकालो यत्र भिक्षुः स्मर्यते, तस्मिन्, पुनर्भिक्षुः पुरुषकारं जङ्घाबले सति वीर्याचारं न लङ्घयेत्, तत्र चालाभे सति भिक्षाया अप्राप्तौ सत्यां भिक्षुर्न

शोचयेत्, किन्त्वेवं भावयेत्-मया भिक्षा न लब्धा परं वीर्याचारस्त्वाराधितः, वीर्याचारार्थमपि भिक्षाटनं न केवलमाहारार्थमेव, अतो न शोचयेत्, अपि तु तप इत्यधिसहेत, अनशनमूनोदरतादि वा तपोऽपि भविष्यतीति सम्यग् विचिन्तयेत्. ।।६।।

**(सु.)** आह च—सइ'इति सति-विद्यमाने भिक्षाकाले-भिक्षासमये चरेत् भिक्षुः । अन्ये तु व्याचक्षते-स्मृतिकाल एव भिक्षाकालोऽभिधीयते, संस्मर्यन्ते यत्र भिक्षुकाः, स स्मृतिकालः तस्मिन् चरेत्, भिक्षुः-भिक्षार्थं यायात्, कुर्यात् पुरुषकारं, जङ्घाबले सति वीर्याचारं न लङ्घयेत्, तत्र चालाभे सति भिक्षाया अलाभ इति न च शोचयेत्, वीर्याचाराराधनस्य निष्पन्नत्वात्, तदर्थं च भिक्षाटनं नाहारार्थमेवातो न शोचयेत्, अपि तु तप इत्यधिसहेत, अनशन-न्यूनोदरतालक्षणं तपो भविष्यतीति सम्यग् विचिन्तयेदिति ।।५.२.६।।

**तहेवुच्चावया पाणा, भत्तट्ठाय समागया ।**
**तंउज्जुयं न गच्छिज्जा, जयमेव परक्कमे ।।५.२.७।।**

**(ति.)** उक्ता कालयतना, क्षेत्रयतनामाह—तथैवोच्चावचाः । प्राणिनः-कार्पटिक-काक-श्वानादयः । भक्तार्थम्-भिक्षा बलिप्राभृतिकाहेतोः आगताः । तदृजुकम्-तेषामभिमुखम् । तन्मध्ये न गच्छेत्, तदधिकरण-सन्त्रासना-ऽन्तरायदोषात् । किन्तु यतमेव पराक्रमेत् । तेषामुद्वेगमकुर्वन् ।।५.२.७।।

**(स.)** कालयतनोक्ता, अथ क्षेत्रयतनामाह—तहे...इति-भिक्षुस्तदृजुकं तेषां प्राणिनामभिमुखं संमुखं न गच्छेत्, तेषां केषां ? ये प्राणाः प्राणिनो भक्तार्थं बलिप्राभृतकादिषु समागता भवन्ति, कथं ? तेषां सन्त्रासेनान्तरायदोषो भवेत्, तर्हि किं कुर्यात् ? यतमेव पराक्रामेत्, तेषामुद्वेगमनुत्पादयन्, किंभूताः प्राणिनः, तथैवोच्चा हंसादयः, अवचाः काकादयः, शोभना-ऽशोभनभेदेन नानाप्रकाराः. ।।५.२.७।।

**(सु.)** उक्ता कालयतना, अधुना क्षेत्रयतनामाह-तहेव'इति, तथैवोच्चावचाः-शोभनाशोभनभेदेन नानाप्रकाराः प्राणिनो भक्तार्थं समागताः बलिप्राभृतिकादिष्वागता भवन्ति, तदृजुगं-तेषामभिमुखं न गच्छेत्, तत्सन्त्रासनेनान्तरायाधिकरणादिदोषात्, किन्तु यतमेव पराक्रामेत्, तदुद्वेगमनुत्पादयन्निति ।।५.२.७।।

**गोयरग्गपविट्ठो उ, न निसीइज्ज कत्थई ।**
**कहं च न पबन्धिज्जा, चिट्ठित्ता ण व संजए ।।५.२.८।।**

**(ति.)** गोचराग्रप्रविष्टो न निषीदेत् गृहादौ । स्थित्वा वा तत्र संयतः कथां च - धर्मकथादिकाम् । न [प्र]बध्नीयात्-प्रबन्धेन कुर्यात् । अनेषणाद्वेषादिदोषप्रसङ्गात् ।।

**(स.)** पुनर्गोचरीगतः साधुः किं न कुर्यात् ? - इत्याह—गोअर..इति-साधुर्गोचराग्रप्रविष्टस्तु भिक्षार्थं प्रविष्टः सन् न निषीदेन्नोपविशेत् क्वचिद्देवकुलादौ, यतस्तत्र निषीदने संयमस्य घातो भवति, च पुनः कथां धर्मकथादिरूपां न प्रबध्नीयात्-प्रबन्धेन न कुर्यात्, अनेनैकव्याकरणे एकदृष्टान्तकथने चानुज्ञामाह, [1]एतदेवाह-किं कृत्वा ? स्थित्वा, कालपरिग्रहेण संयतो यतिरेवं च क्रियमाणे अनेषणा-द्वेषादिदोषप्रसङ्गो भवेत्. ।।८।।

**(सु.)** गोयरग्ग'इति, गोचराग्रप्रविष्टस्तु भिक्षार्थं प्रविष्ट इत्यर्थः । न निषीदेत्-नोपविशेत्, क्वचित्-गृहदेवकुलादौ संयमोपघातादिप्रसङ्गात्, कथां च-धर्मकथादिरूपां न प्रबध्नीयात्-प्रबन्धेन न कुर्याद्, अनेनैकव्याकरणैकज्ञातानुज्ञामाह, अत एवाह-स्थित्वा कालपरिग्रहेण संयत इति, अनेषणा-द्वेषादिदोषप्रसङ्गादिति सूत्रार्थः ।।५.२.८।।

**अग्गलं फलिहं दारं, कवाडं वा वि संजए ।**
**अवलंबिया न चिट्ठिज्जा, गोयरग्गगओ मुणी ।।५.२.९।।**

**(ति.)** उक्ता क्षेत्रयतना, द्रव्ययतनामाह—अर्गलाम्-गोपाटकादौ । परिघम्-प्रतोल्यादा । द्वारम्-द्वारशाखारूपम् । कपाटं वापि संयतः । अवलम्ब्य न तिष्ठेत् । गोचराग्रगतो मुनिः । लाघवापत्तेः ।।५.२.९।।

**(स.)** क्षेत्रयतनोक्ता, अथ द्रव्ययतनामाह—अग्गलं'इति-संयतो यतिः, अर्गलां गोपुरकपाटादिसम्बन्धिनीं, परिघं कपाटकादिस्थगनं, द्वारं शाखामयं, कपाटं द्वारयन्त्रं वावलम्ब्य न तिष्ठेत्, कथं ? एवमवलम्बने लाघवविराधनादोषो भवेत्. किंभूतः संयतः ? गोचराग्रगतो भिक्षायां प्रविष्टः. ।।५.२.९।।

**(सु.)** उक्ता क्षेत्रयतना, द्रव्ययतनामाह—अग्गलं'इति, अर्गलां-गोपुरकपाटादि-सम्बन्धिनीं फलकं-पाटकादिस्थगनं, द्वारं शाखामयं, कपाटं द्वारयन्त्रं, वापि संयतोऽवलम्ब्य न तिष्ठेत् लाघव-विराधनादोषात्। गोचराग्रगतो-भिक्षाप्रविष्टः, संयतो यति-मुनिपर्यायौ, तदुपदेशाधिकाराददुष्टावेवेति ।।५.२.९।।

---

1 अतएवाह-पाठा० ।

**समणं माहणं वा वि, किविणं वा वणीमगं ।**
**उवसंकमंतं भत्तट्ठा, पाणट्ठाए व संजए ।।५.२.१०।।**

**(ति.)** उक्ता द्रव्ययतना, भावयतनामाह—स्पष्टः । नवरम् । कृपणम्-क्षुद्रभिक्षाचरम्। उप-सामीप्येन, सङ्क्रामन्तम्-गच्छन्तम् ।।५.२.१०।।

**(स.)** उक्त द्रव्यविराधना, भावविराधनामाह—समणं'इति-संयतः साधुः श्रमणं निर्ग्रन्थादिरूपं, ब्राह्मणं धिग्जातीयं, कृपणं वा पिण्डोलकं, वनीपकं दरिद्रम्, एतेषां चतुर्णां मध्येऽन्यतममुपसङ्क्रामन्तं सामीप्येन गच्छन्तमागच्छन्तं वा, किमर्थं ? भक्तार्थं पानार्थं वा. ।।१०।।

**(सु.)** उक्ता द्रव्ययतना । भावयतनामाह—समणं ति, श्रमणं-निर्ग्रन्थादिरूपं, ब्राह्मणं-धिग्वर्णं, वापि कृपणं वा पिण्डोलकं, वनीपकं-दरिद्रं चतुर्णामन्यतममुपसङ्क्रामन्तं-सामीप्येन गच्छन्तं वा गतं वा भक्तार्थं पानार्थं वा संयतः-साधुरिति ।।५.२.१०।।

**तमइक्कमित्तु न पविसे, न चिट्ठे चक्खुफासउं[१] ।**
**एगंतमवक्कमित्ता, तत्थ चिट्ठिज्ज संजए ।।५.२.११।।**

**(ति.)** तान् अतिक्रम्य-उल्लङ्घ्य । न प्रविशेत्, न तिष्ठेत् तेषां चक्षुर्गोचरे[२] । उत्तरार्धं स्पष्टम् ।।५.२.११।।

**(स.)** उक्तां योजनामग्रिमगाथयाह—तम'इति-संयतः पूर्वगाथायां य उक्तः, तं श्रमणादिकं चतुर्भेदं पूर्वोक्तमति-क्रम्योल्लङ्घ्य न प्रविशेत्, नापि तेभ्यः समुदाने दीयमाने चक्षुर्गोचरे तिष्ठेत्, तर्हि किं कुर्यात् ?- इत्याह-एकान्तमवक्रम्य तत्र तिष्ठेत् संयतः ।।११।।

**(सु.)** तमइक्कमित्तु'इति श्रमणादिमतिक्रम्योल्लङ्घ्य न प्रविशेत्, दीयमाने च समुदाने तेभ्यो न तिष्ठेच्चक्षुर्गोचरे, कस्तत्र विधिरित्याह-एकान्तमवक्रम्य तत्र तिष्ठेत् संयत इति ।।५.२.११।।

**वणीमगस्स वा तस्स, दायगस्सुभयस्स वा ।**
**अप्पत्तियं सिया हुज्जा, लहुत्तं पवयणस्स वा ।।५.२.१२।।**

१. चक्खुगोयरे इत्यन्यत्र मुद्रितः पाठः [०फासओ] । २. स्पर्शे १-५.११ ।।

**(ति.)** तत्र प्रवेशे चैते दोषा-इत्याह—स्पष्टः । नवरम् । अहो ! [1]अलौकिकतैषामिति लघुत्वं प्रवचनस्येति ।।५.२.१२।।

**(स.)** अन्यथैते दोषा भवन्ति, तानाह-वणी...इति वनीपकस्य वा तस्य, उपलक्षणत्वात् पूर्वोक्तस्य श्रमणादेश्च दातुर्वा उभयोर्वा, अप्रीतिः कदाचित् स्यात्, का ? अप्रीतिः अहो एते लौकिकव्यवहारस्याऽज्ञातार इत्यादिरूपा, तथा प्रवचनस्य लघुत्वं स्यात्, अन्तरायदोषोऽपि स्यात्. ।।१२।।

**(सु.)** अन्यथैतद्दोषा इत्याह—वणीमगस्स'इति, वनीपकस्य वा तस्येत्येतत् श्रमणाद्युपलक्षणं, दातुर्वा उभयोर्वा अप्रीतिः कदाचित् स्यात्-अहो अलौकिकज्ञता एतेषामिति लघुत्वं प्रवचनस्य वाऽन्तराय-दोषश्चेति तस्मान्नैव कुर्यात् ।।५.२.१२।।

**पडिसेहिए व दिन्ने वा, तओ तम्मि नियत्तिए ।**
**उवसंकमिज्ज भत्तट्ठा, पाणट्ठाए व संजए ।।५.२.१३।।**

**(ति.)** तस्मात् तत्र न गच्छेत्, किन्तु [पडिसेहिए इति...] स्पष्टः ।।५.२.१३।।

**(स.)** तस्मादेवं पूर्वोक्तं न कुर्यात्, तर्हि किं कुर्यात् ? इति-आह 'पडिसे'इति—संयतः साधुः प्रतिषिद्धे वा दत्ते वा, ततः स्थानात् तस्मिन् वनीपकादौ निवर्तिते सति उपसङ्क्रामेद् भक्तार्थं पानार्थं वा. ।।५.२.१३।।

**(सु.)** किन्तु—पडिसेहिए प्रतिषिद्धे वा दत्ते वा ततः स्थानात् तस्मिन् वनीपकादौ निवर्त्तिते सति उपसङ्क्रामेत् भक्तार्थं पानार्थं वापि संयत इति ।।५.२.१३।।

**उप्पलं पउमं वावि, कुमुयं वा मगदंतियं ।**
**अन्नं वा पुप्फसच्चित्तं, तं च संलुंचिया दए ।।५.२.१४।।**

**(ति.)** परपीडाप्रतिषेधाधिकारादिदं चाह—उप्पलम्-नीलोत्पलम् । पद्मम्-अरविन्दम्। कुमुदम्-कैरवम् । मगदंतियं-मेत्तिका, या बालादिभिर्नखरञ्जनार्थं वर्त्तित्वा हस्ताङ्गुलीषु दीयते । मल्लिका वावि च किल कलिका ताम् । अन्यद्वा पुष्पं सच्चित्तम् । तच्च संलुञ्च्य-छित्त्वा । भक्तपानादि दद्यात् ।।५.२.१४।।

१. ०लो. १-५ ।।

(स.) परपीडाधिकारात्, पुनरिदमाह—उप्पलं'इति-उत्पलं नीलोत्पलादि, पद्मं-अरविन्दं, कुमुदं वा गर्दभकं वा, मगदन्तिकां मेत्तिकां, मल्लिकामित्यन्ये, तथाऽन्यद् वा पुष्पं सचित्तं शाल्मलीपुष्पादि, तच्च सँल्लुञ्च्या-ऽपनीय छित्त्वा दद्यात्. ।।१४।।

(सु.) परपीडाप्रतिषेधाधिकारादिदमाह—उप्पलं'इति उत्पलं-नीलोत्पलादि, पद्मम्-अरविन्दं, कुमुदं वा गर्दभकं वा मगदन्तिकां मेत्तिकां, मल्लिकामित्यन्ये, तथाऽन्यद् वा पुष्पं सचित्तं-शाल्मलीपुष्पादि, तच्च-संलुञ्च्य-अपनीय छित्त्वा दद्यादिति ।।५.२.१४।।

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.२.१५।।**

(ति.) प्राग्वत् ।।५.२.१५।।

(स.) तदा किमित्याह—तं...इति ततः संयतो ददतीं प्रतीदं वदेत्-हे स्त्रि । तादृशं भक्तपानं संयतानामकल्पनीयं ततो मे मम न कल्पते. ।।१५।।

(सु.) [1]तारिसं, इति, तादृशं भक्तपानं तु संयतानामकल्पिकं, यतश्चैवं अतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति ।।५.२.१५।।

**उप्पलं पउमं वा वि, कुमुयं वा मगदंतियं ।**
**अन्नं वा पुप्फसच्चित्तं, तं च सम्मद्दिया दए ।।५.२.१६।।**

(ति.) स्पष्टः । नवरम् । संमृज्य छिन्नानामेव अपरिणतानां मर्दनं कृत्वा ।

अत्राह परः-"सम्मद्दमाणी पाणाणां" इत्यादि प्रागुक्तमेव । उच्यते-तत्र सामान्येनोक्तम्। इह तु विशेषोक्तेर्न दोषः ।।५.२.१६।।

(स.) पुनः कीदृशं न कल्पते ? इत्याह—उप्पलं...इति उप्पलमिति-तच्चोत्पलादिकं पूर्वोक्तं संमृद्य दाता दद्यात्, तदापि संयतो न गृह्णीयात्, सम्मर्दनं नाम पूर्वच्छिन्ना-नामेवापरिणतानां मर्दनम्. ।।१६।।

**तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.२.१७।।**

---

१. 'मूले मुद्रिते तु' तं भवे 'पाठ' ।

[ति-स्पष्टः] ।।५.२.१७।।

**(स.)** ततः किम् ? इत्याह—तमिति-अर्थलापनिका पूर्ववत्. ।।५.२.१७।।

**(सु.)** ['उप्पलं... संमद्दिआ दए'।।, तथा 'तं भवे' इति] एवं तच्च संमृद्य दद्यात्, संमर्दनं नाम पूर्वच्छिन्नानामेवापरिणतानां मर्द्दनम्, शेषं सूत्रद्वयेऽपि तुल्यम् । आह 'एतत्पूर्वमप्युक्तमेव, "संमद्दमाणी पाणाणि, बीयाणि हरियाणि य," [५.१.२९] इति, अत्र, उच्यते-उक्तं नाम सामान्येन, विशेषाऽभिधानाददोषः ।।५.२.१७।।

**सालुयं वा विरालियं, कुमुउप्पलनालियं[1] ।**
**मुणालियं सासवनालियं, उच्छुखण्डं अनिव्वुडं ।।५.२.१८।।**

**(ति.)** शालूकंम्-उत्पलकन्दम् । बिरालिकाम्-पलाशकन्दरूपाम् । [2]कुमुदोत्पल-नालिके-अल्पं नालं नालिका । मृणालिकाम्-मृणालं पद्मनालं, अल्पं मृणालं मृणालिकाम्। सर्षपनालिकाम्-सिद्धार्थमञ्जरीम् । इक्षुखण्डम् [3]अनिवृतम् । इदं च पूर्वेष्वपि योज्यम ।।

**(स.)** पुनः किं किं वर्जयेत् ? इत्याह – सालुअं...इति-शालूकं वा उत्पलकन्दं, विरालिकां पलाशकन्दरूपां, पर्ववल्लिप्रतिपर्व-कन्दमित्यन्ये, कुमुदोत्पलनालौ प्रसिद्धौ, तथा मृणालिकां पद्मिनी-कन्दोत्थां, सर्षपनालिकां सिद्धार्थमञ्जरीं, तथा इक्षुखण्डं, एतच्छालूकादिसप्तकं किंभूतं ? अनिर्वृतं सचित्तं, ।।१८।।

**(सु.)** सालुयं'इति, शालूकं-उत्पलकन्दं, विरालिकां-पलाशकन्दरूपां, पर्ववल्लि-प्रतिपर्ववल्लि-प्रतिपर्वकन्दमित्यन्ये । कुमुदोत्पलनालौ प्रतीतौ, तथा मृणालिकां-पद्मिनीकन्दोत्थाम्, सर्षपनालिकां-सिद्धार्थकमञ्जरीं, तथेक्षुखण्डम्, अनिर्वृत्तं-सचित्तं, एतच्चानिर्वृतग्रहणं सर्वत्राभिसम्बध्यते इति ।।५.२.१८।।

**तरुणगं वा पवालं, रुक्खस्स तणगस्स वा ।**
**अन्नस्स वा वि हरियस्स, आमगं परिवज्जए ।।५.२.१९।। युग्मम्**

**(ति.)** किञ्च—तरुणकम्-कठिनीभूतं पत्रम् । प्रवालं वा-पल्लवो वृक्षादेः । तृणकस्य वा-मधुरतृणादेः । अन्यस्य वा हरितस्य-आर्यकादेः । आमम्-अपरिणतम् । वर्जयेत् ।।५.२.१९।।

---

१. ०यो. ६-१०.१२ ।। २. कुमुदोत्पलयोः १० टि. ।। ३. शस्त्र लाग्या वगरनुं १० टि. ।।

**(स.)** पुनः किं किं तदाह—तरुण...इति-वृक्षस्य चिञ्चिणिकादेर्वा, तृणस्य वा मधुरतृणादेः, अन्यस्यापि हरितस्यार्जकादेश्च, तरुणकं वा प्रवालं, आमकमपरिणतं सचित्तं, संयतः पूर्वगाथोक्तं शालूरादि सप्तकं चिञ्चिणिकादित्रयस्य तरुणप्रवालं च सचित्तं परिवर्जयेत्, ।।१९।।

**(सु.)** तरुणगं'इति, तरुणकं वा प्रवालं-पल्लवं, वृक्षस्य-चिञ्चिणिकादेः, तृणस्य वा-मधुरतृणादेः, अन्यस्य वापि हारितस्यार्यकादेः, आमकं-अपरिणतं परिवर्जयेदिति ।।५.२.१९।।

**तरुणियं वा छिवाडिं, आमियं भज्जियं सइं ।**
**दिंतियं पडियाइक्खे, न मे कप्पइ तारिसं ।।५.२.२०।।**

**(ति.)** तथा—तारुणिकां वा-अपूर्णतारुण्याम् । छिवाडिम्-मुद्गादिफलीम् । आमाम्-अपक्वाम् । तथा भर्जिताम् । सकृद्-एकवारम् । शेषं स्पष्टम् ।।५.२.२०।।

**(स.)** पुनः संयतः किं कुर्यात् ? यद् आह—तरुणि...इति भिक्षुरेवंविधां स्त्रियं प्रतीति वदेत्, इतीति किं ? न मे ममैतादृशं भोजनं कल्पते, किं कुर्वतीं स्त्रियं? छिवाडिं मुद्गादिफलिं, किंविशिष्टां छिवाडिं ? तरुणं वा असंजातां, तथा पुनर्भर्जितां, पुनः किंभूताम् ? आमाम्-असिद्धां सचेतनां सकृदेकवारं ददतीम् ।।२०।।

**(सु.)** तथा—तरुणियं, वा'इति तरुणां वा असंजातां वा छिवाडिमिति मुद्गादिफलिं, आमाम्-असिद्धां सचेतनां, तथा भर्ज्जितां, सकृत्-एकवारं, ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशं भोजनमिति ।।५.२.२०।।

**तहा कोलमणस्सिन्नं, वेलूयं कासवनालियं ।**
**तिलपप्पडगं नीमं, आमगं परिवज्जए ।।५.२.२१।।**

**(ति.)** तथा—कोलम्-वरदम् [? बदरम्]। अश्विन्नम्-वह्न्युदकयोगेनाप्राप्तविकारम्। वेलुकम्-वंशकरिल्लम् । कासवनालिकम्-श्रीपर्णीफलम् । अश्विन्नमित्यनयोरपि योज्यम्। तिलपर्यटम्-सतिलपिष्टमयम् । नीमम्-नीमफलम् । आमकं परिवर्जयेत् ।।५.२.२१।।

**(स.)** पुनः साधुः किं वर्जयेत् ? तद् आह—तहा'इति साधुः कोलं बदरं परिवर्जयेत्,

किंभूतं कोलम् ? अस्विन्नम्, अस्विन्नमिति पदस्यार्थः सर्वत्र योज्यः, पुनस्तिलपर्पटकं पिष्टतिलमयं, तथा नीमं नीमफलम्, एतत् सर्वमामं परिवर्जयेत् साधुः ।।२१।।

**(सु.)** तहा कोलं'इति, तथा कोलं-बदरं, अश्विन्नं-वह्न्युदकयोगेनाऽनापादित-विकारान्तरं, तथा वेलुकं वंसकरिल्लं, कासवनालिकां श्रीपर्णीफलं, अस्विन्नमिति सर्वत्र योज्यम् । तथा तिलपर्पटकं-पिष्टतिलमयं, नीमं-नीमफलं, आमं परिवर्जयेदिति ।।५.२.२१।।

**तहेव चाउलं पिट्ठं, वियडं वा तत्तनिव्वुडं ।**
**तिलपिट्ठं पूइपिन्नागं, आमगं परिवज्जए ।।५.२.२२।।**

**(ति.)** तथैव ताण्डुलपिष्टम्-लोष्टमित्यर्थः । वितटम्-विशिष्टनदीकूपतटादेरानीतं, यद्वा विगततटम्-आन्तरिक्षं धौतश्वेतपट्यादिना गृहीतम् । तप्तानिर्वृतम्-अवलित-त्रिदण्डम्। तिलपिट्टम्-तिलवर्त्तिका । पूति-पवित्रम् । पिण्याकम्-सर्षपखलम्। आमकं परिवर्जयेत् ।।५.२.२२।।

**(स.)** पुनः किं वर्जयेत् ? - साधुस्तदाह-तह...इति-संयतस्तथैव तान्दुलं पिष्टं लोट्टमित्यर्थः, तथा विकटं वा शुद्धोदकं, तथा तप्तनिर्वृतं क्वथितं, सच्छीतीभूतं तप्तानिर्वृतं वा यत् त्रिदण्डोत्कलितं न जातं, तथा तिलपिट्टं तिललोष्टं, तथा पूति पिण्याकं सर्षपखलम्, एतत् तान्दुललोष्टादि पञ्चकं कीदृशम् ? आमकमपक्वं, तत् सर्वं परिवर्जयेत्. ।।५.२.२२।।

**(सु.)** तहेव'इति, तथैव तान्दुलं पिष्टं-लोष्ठ(ट्ट)मित्यर्थः, विकटं वा-शुद्धोदकं, तथा तप्तनिर्वृतं=क्वथितं सत् शीतीभूतं, तप्तानिर्वृतं वा-अप्रवृत्तत्रिदण्डं, तिलपिष्ठं-तिललोष्ठं(ट्टं) पूतिपिन्नागं-सिद्धार्थकखलं, आमं परिवर्जयेदिति ।।५.२.२२।।

**कविट्ठं माउलिंगं[1] च, मूलगं मूलगत्तियं ।**
**आमं असत्थपरिणयं, मणसा वि न पत्थए ।।५.२.२३।।**

**(ति.)** कपित्थम् । मातुलिङ्गम् । मूलकम्-सपत्रडालम् । मूलकर्त्तिकाम्-मूलकन्दस्य चक्कलाम् । शेषं स्पष्टम् ।।५.२.२३।।

---

१. माउलंगं - इत्यपि पाठः ।।

**(स.)** पुनः साधुः प्रार्थयेन्मनसापि न, तदेवाह—कवि...इति-साधुरेतदग्रे वक्ष्यमाणं मनसापि न प्रार्थयेत्, किं तद् ?-आह-कपित्थं कपित्थफलं, मातुलिङ्गं च बीजपूरकं, मूलकं सपत्रजालकं, मूलकर्तिकां मूलकन्दचक्कम्, आमामपक्वां, पुनः कीदृशीम् ? अशस्त्रपरिणतां स्वकायशस्त्रादिना अविध्वस्ताम्, अनन्तकायकत्वाद् गुरुत्वख्यापनार्थमुभयं मनसापि न प्रार्थयेत्. ।।२३।।

**(सु.)** कविट्ठं'इति, कपित्थं-कपित्थफलं, मातुलिङ्गं वा-बीजपूरकं, मूलकं सपत्रजालकं, मूलकर्तृकां-मूलकन्दचक्कलीं, आमां-अपक्वामशस्त्रपरिणतां स्वकायशस्त्रादिनाऽविध्वस्तां अनन्तकायिकत्वात् गुरुत्वख्यापनार्थमुभयम् । मनसापि न प्रार्थयेदिति ।।५.२.२३।।

**तहेव फलमंथूणि, बीयमंथूणि जाणिया[१] ।**
**बिभेलगं पियालं वा, आमगं परिवज्जए ।।५.२.२४।।**

**(ति.)** तथैव फलमन्थून्-बदरचूर्णान् । बीजमन्थून्-यवादिचूर्णान् । ज्ञात्वा । बिभीतकम् । पियालम्-राजादनम् । आमकं परिवर्जयेत् ।।५.२.२४।।

**(स.)** पुनः साधुः किं वर्जयेत् ? तद् आह-तहेव'इति-तथैव फलमन्थून् बदरचूर्णान्, बीजमन्थून् यवादिचूर्णान् ज्ञात्वा सिद्धान्तवचनात्, तथा बिभीतकं बिभीतकफलं, प्रियालं च प्रियालफलम्, एतत्फलमन्थुप्रमुखचतुष्टयमपि आममपरिणतं साधुर्वर्जयेत्. ।।२४।।

**(सु.)** तहेव'इति, तथैव फलमन्थून्-बदर(रादि)चूर्णान्, बीजमन्थून्-यवादिचूर्णान् ज्ञात्वा प्रवचनतः, बिभीतकं-बिभीतकफलं, प्रियालं-प्रियालफलं च आमं-अपरिणतं परिवर्जयेदित्यर्थः ।।५.२.२४।।

**समुयाणं चरे भिक्खू, कुलं उच्चावयं सया ।**
**नि(नी)यं कुलमइक्कम्म, ऊसढं नाभिधारए ।।५.२.२५।।**

**(ति.)** विधिमाह—समुद आनाः प्राणाः साधूनां यत्र तत् समुदानम्-शुद्धभैक्षम् । आश्रित्य चरेद् । भिक्षुः । कुलं उच्चावचम्-अगर्हिततत्वे सति आढ्यानाढ्यम् । सदा ।

---

१. जाणिय'इति पाठोऽन्यत्र मुद्रितः ।

नीचम्-अनाढ्यकुलम् । अतिक्रम्य-उल्लङ्घ्य । उच्छ्रितम्-आढ्यकुलम् । नाभु(भि)-धारयेत्-प्रधानाशनादिलाभलोभेन, धातूनामनेकार्थत्वात् नाभिगच्छेत् ।।५.२.२५।।

**(स.)** अथ गोचरणविधिमाह—समु...इति साधुः समुदानं शुद्धं भैक्ष्यं समाश्रित्य चरेद् गच्छेत्, कुत्र ?-इत्याह-कुलमुच्चावचं परं सदा अगर्हितत्वे सति, उच्चं प्रभूतधनापेक्षया प्रधानम्, अवचं तुच्छधनापेक्षयाप्रधानं, यथा परिपाट्येव चरेत् सदा सर्वकालं, परं नीचं कुलमतिक्रम्योल्लङ्घ्य विभवापेक्षया प्रभूततरलाभार्थमुत्सृतमृद्धिमत्कुलं नाभिधारयेन्न निषीदेन्न यायात्, कस्मात्? अभिष्वङ्गलोकलाघवात्. ।।२५।।

**(सु.)** विधिमाह—समुयाणं...इति, समुदानं भावभैक्ष्यमाश्रित्य चरेत्-गच्छेत् भिक्षुः। क्वेत्याह-कुलमुच्चावचं सदा, अगर्हितत्वे सति विभवापेक्षया प्रधानमप्रधानं च, यथा परिपाट्येव चरेत्-गच्छेत्, सदा-सर्वकालं, नीचं कुलमतिक्रम्य विभवापेक्षया प्रभूततरलाभार्थं उत्सृतं-ऋद्धिमत् कुलं नाभिधारयेत्-न यायात्, अभिष्वङ्ग-लोकलाघवादिप्रसङ्गादिति ।।५.२.२६।।

**अदीणो वित्तिमेसिज्जा, न विसीइज्ज पंडिए ।**
**अमुच्छिओ भोयणंमि, माइन्ने एसणारए ।।५.२.२६।।**

**(ति.)** किंवा-अदीनः । वृत्तिम्-प्राणवर्त्तनम् । एषयेत् । अलाभेऽपि न विषीदेत् । पण्डितः-साधुः । लाभेऽपि अमूर्च्छितो भोजने । मात्राज्ञः-स्वादिष्टमपि भोज्यं नाधिकमाददीत । एषणाशुद्धौ रतः ।।५.२.२६।।

**(स.)** अथ कीदृशः किं कुर्यात् साधुः ? तद् आह—अदीण इति-पण्डितः साधुर्वृत्तिं प्राणवर्तनमेषयेत्, परं न विषीदेत्-अलाभे सति न विषादं कुर्यात्, किंभूतः पण्डितः ? अदीनो द्रव्यदैन्यमङ्गीकृत्याम्लानवदनः. पुनः किंभूतः पण्डितः भोजनेऽमूर्छितोऽगृद्धः, पुनः किंभूतः पण्डितः ? लाभे सति मात्राज्ञ आहारमात्रां प्रति, पुनः किंभूतः ? एषणारत उद्गमोत्पादनैषणापक्षपाती. ।।२६।।

**(सु.)** अदीणो'इति, अदीनो-द्रव्यदैन्यमङ्गीकृत्याम्लानवदनः, वृत्तिं-वर्त्तनं एषयेत्-गवेषयेत्, न विषीदेत्-अलाभे सति विषादं न कुर्यात्, पण्डितः-साधुः, अमूर्छितः-अगृद्धो भोजने, लाभे सति मात्राज्ञ आहारमात्रां प्रति, एषणारतः-उद्गमोत्पादनैषणा-

पक्षपातीति ।।५.२.२६।।

**बहुं परघरे अत्थि, विविहं खाइम-साइमं ।**
**न तत्थ पंडिओ कुप्पे, इच्छा दिज्ज परो न वा ।।५.२.२७।।**

**(ति.)** एवं च भावयेत्—पूर्वार्द्धं स्पष्टम् । न तस्मिन्नाऽददाने । पण्डितः-साधुः । कुप्येत् । इच्छयास्वेच्छया। परः-गृही । दद्यान्न वेति ।।५.२.२७।।

**(स.)** तत एवं च परिभावयेत्, तद् आह—बहुं'इति-परगृहेऽसंयतादिगृहे बहु प्रमाणतः प्रभूतमस्ति, किं तत् ? खाद्यं स्वाद्यं च, किम्भूतं ? विविधमनेकप्रकारम् उपलक्षणत्वा-दशनादिकमपि प्रभूतमस्ति, तत्सर्वं सदस्ति, परं न ददाति, तदा पण्डितो न कुप्येन्न रोषं कुर्याद् अदातुरुपरि, किन्त्वेवं चिन्तयेत्-यदीच्छा स्यात् तदा परो दद्यात्, न स्यात् तदा न दद्यात्, परमन्यत् किमपि न चिन्तयेत्, कुतः ? सामायिकबाधात्. ।।२७।।

**(सु.)** एवं च परिभावयेत्-बहुं'इति, बहु-प्रमाणतः प्रभूतं परगृहे-असंयतादिगृहेऽस्ति विविधं-अनेकप्रकारं खाद्यं स्वाद्यं, एतच्चाशनाद्युपलक्षणं, न तत्र पण्डितः कुप्येत्-सदपि न ददातीति न रोषं कुर्यात्, किंतु-इच्छया दद्यात् परो न वेति, इच्छा परस्य, न तत्रान्यत् किञ्चिदपि चिन्तयेत्, सामायिकबाधनादिति ।।५.२.२७।।

**सयणा-ऽऽसण-वत्थं भत्तं पाणं व संजए ।**
**अदिंतस्स न कुप्पिज्जा, पच्चक्खे वि अ दीसओ ।।५.२.२८।।**

**(ति.)** एतदेव सामान्येनाह—पूर्वार्धं स्पष्टम् । अददानस्य-गृहिणो । न कुप्येत् । प्रत्यक्षेऽपि दृश्यमाने-शयनादौ ।।५.२.२८।।

**(स.)** एतदेव विशेषेणाह—सयण...इति-संयतः शयनमासनं वस्त्रं भक्तं पानकं वाऽददतस्तत्स्वामिनो न कुप्येददातुरुपरि न कोपं कुर्यात्, क्व सति ? तत्स्वामिनः शयनासनादौ प्रत्यक्षेऽपि च दृश्यमाने. ।।२८।।

**(सु.)** एतदेव विशेषेणाह—सयणा...इति, शयना-ऽऽसन-वस्त्रं चेत्येकवद्भावः । भक्तं पानकं वा संयतोऽददतो न कुप्येत् तत्स्वामिनः, प्रत्यक्षेऽपि च दृश्यमाने शयनासनादाविति ।।५.२.२८।।

**इत्थियं पुरिसं वा वि, डहरं वा महल्लगं ।**
**वंदमाणं न जाइज्जा, नो अन्नं फरुसं वए ।।५.२.२९।।**

**(ति.)** किञ्च—स्त्रियं पुरुषं । वापि-अपिशब्दान्नपुंसकं वा डहरं वा महल्लकम्-बालं वा वृद्धं वा, वाशब्दान्मध्यमम् । वन्दमानं न याचेत । अन्नाद्यलाभे याचितादाने । नो एनं परुषं वदेत्-वृथा ते वन्दनमित्यादीति ।।५.२.२९।।

**(स.)** इत्थियं'इति पुनः किंच साधुः स्त्रियं वा पुरुषं वा, अपिशब्दान्नपुंसकं वा, डहरं तरुणं वा, महल्लकं वृद्धं वा, वाशब्दान्मध्यमं वा, वन्दमानं सन्तं भद्रकोऽयमिति ज्ञात्वा न याचेत, कथं ? याचने तेषां विपरिणामो भवति, यतीनामुपरि भावभङ्गो भवति, अन्नादीनामभावे याचितस्यादाने न चैनं परुषं कठोरं ब्रूयात्, किं परुषं ? वृथा ते वन्दनं, यदि न ददासीत्यादि, पाठान्तरं वा-वन्दमानो न याचेत, लल्लिव्याकरणेन, शेषं पूर्ववत्. ।।२९।।

**(सु.)** किंच-इत्थियं'इति, स्त्रियं वा पुरुषं वा, अपिशब्दात् तथाविधं नपुंसकं वा, डहरं-तरुणं, महल्लकं वा-वृद्धं वा, वाशब्दान्मध्यमं वा, वन्दमानं सन्तं भद्रकोऽयमिति न याचयेत्, विपरिणामदोषात्, अन्नाद्यभावेन याचितादाने, न चैनं परुषं ब्रूयात्-वृथा ते वन्दनमित्यादिरिति । पाठान्तरं वा-'वन्दमानो न याचेत लल्लिव्याकरणेन' शेषं पूर्ववदिति ।।५.२.२९।।

**जे न वंदे न से कुप्पे, वंदिओ न समुक्कसे ।**
**एवमन्नेसमाणस्स, सामन्नमणुचिट्ठई ।।५.२.३०।।**

**(ति.)** तथा—यो-गृही । न वन्दते । से-तस्य । न कुप्येद् । वन्दितः-केनचिन्नृपादिना। न समुत्कर्षेत्-नोत्कर्षं कुर्यात् । एवमन्वेषमाणस्य-जिनाज्ञां पालयतः । श्रामण्यम्-शुद्धम् । अवतिष्ठते ।।५.२.३०।।

**(स.)** जे'इति-तथा पुनः किम्भूतः ? यः साधुर्यो गृहस्थादिकोऽपि न वन्दते, तदा न कुप्येत्, नावन्दमानस्योपरि कोपं कुर्यात्, तथा केनापि राजादिना यदि वन्दितस्तदा न समुत्कर्षेन्नोत्कर्षं कुर्यात्, एवमुक्तप्रकारद्वयेनान्वेषमाणस्य भगवदाज्ञयानुपालयतः

श्रामण्यं यतित्वमनुतिष्ठत्यखण्डम् ।।३०।।

**(सु.)** जे न वंदे'इति, यो न वन्दते कश्चिद् गृहस्थादिर्न से तस्मै कुप्येत् । तथा वन्दितः केनचिन्नृपादिना न समुत्कर्षेत् । एवं-उक्तेन प्रकारेण अन्वेषमाणस्य-भगवदाज्ञामनुपालयतः, श्रामण्यमनुतिष्ठति अखण्डितमिति सूत्रार्थः ।।५.२.३०।।

**सिया एगगयओ लद्धं[१], लोभेणं विनिगूहए ।**
**मामेयं दाइयं संतं, दट्ठूणं सयमायए ।।५.२.३१।।**

**(ति.)** स्वपक्षस्तेयप्रतिषेधमाह—स्यात् कदाचित् । एककः-जघन्यसाधुः । लब्धम्-उत्कृष्टं भोज्यम् । लोभेन विनिगूहते-अहमेवेदं भोक्ष्ये, इत्यान्तप्रान्तेन पिधत्ते । मा ममेदम्-भोज्यम् । दर्शितं सन् । द्रष्ट्वा-आचार्यादिः । स्वयमाददीतेति ।।५.२.३१।।

**(स.)** अथ स्वपक्षस्तेयस्य प्रतिषेधमाह—सिया'इति-स्यात् कदाचित् साधुरेकः कश्चिदत्यन्तजघन्यो लब्धमुत्कृष्टमाहारं लोभेनाहारगृद्ध्या विनिगूहते अन्तःप्रान्तादिना-हारेण तमुत्कृष्टमाहारमाच्छादयेत्. कथम्? अहमेव भोक्ष्य इति, किमित्यत आह-मा ममेदं भोजनजातं दर्शितं सद्[२] वीक्ष्याचार्यादिः स्वयमादद्यादात्मनैव गृह्णीयात् ।।३१।।

**(सु.)** स्वपक्षस्तेयप्रतिषेधमाह—सिया'इति, स्यात्-कदाचित् एककः-कश्चिद-त्यन्तजघन्यो लब्ध्वोत्कृष्टमाहारं लोभेन-अभिष्वङ्गेण विनिगूहते-अहमेव भोक्ष्य इत्यन्तप्रान्तादिना आच्छादयति । किमित्यत आह-मा मम इदं भोजनजातं दर्शितं सत्, दृष्ट्वा आचार्यादिः स्वयमादद्यादात्मनैव गृह्णीयादिति ।।५.२.३१।।

**अत्तट्ठागरुओ लुद्धो, बहुं पावं पकुव्वई ।**
**दुत्तोसओ य सो होइ, निव्वाणं च न गच्छई ।।५.२.३२।।**

**(ति.)** अस्य दोषमाह—आत्मार्थ एव गुरुर्यस्य स आत्मार्थगुरुरुदरम्भरिर्जघन्यो न प्रायोग्यं गुर्वादि योग्यं दर्शयति । स बहु पापं प्रकरोति । दुस्तोषश्च स भवति-सदा स्वादिष्टालाभात्। अत्र निर्वाणम्-सुखं, परत्र निर्वाणम्-मोक्षम् । न गच्छति-गृह्या प्रबलमोहत्वेन गुर्वभक्त्या अनन्तसंसारित्वात् ।।५.२.३२।।

---

१. 'लद्धुं' मुद्रितमन्यत्र । २. दृष्ट्वेति पाठान्तरम् ।

**(स.)** अस्य साधोर्दोषमाह–अत्त...इति-स साधुरेवं पूर्वोक्तभोजने बहु पापकर्म करोति, किंभूतः साधुः ? 'अत्तट्ठागुरुओ' आत्मनोऽर्थ एव जघन्यो, गुरुः पापप्रधानो यस्य स आत्मार्थगुरुकः, पुनः किम्भूतः स साधुः ? लुब्धः क्षुद्रः सन्, अयं परलोकदोष उक्तः, अथेहलोकदोषमाह-पुनर्दुस्तोषश्च भवति येन केनचिदाहारेणास्य क्षुद्रस्य तुष्टिः कर्तुं न शक्यते, अत एव हेतोः स साधुर्निर्वाणं तु मोक्षं न गच्छति, इह लोके च धृतिं न लभते, अनन्तसांसारिकत्वाद् वा मोक्षं न गच्छति. ।।३२।।

**(सु.)** अस्य दोषमाह-अत्तट्ठा'इति, आत्मार्थ एव [जघन्यो] गुरुः- [पाप] प्रधानो यस्य स आत्मार्थगुरुः, लुब्धः सन् क्षुद्रभोजने बहु-प्रभूतं पापं प्रकरोति-मायया द्रारिद्र्यकर्मेत्यर्थः, अयं परलोकदोषः । इहलोकदोषमाह—दुस्तोषश्च भवति-येन केनचिदाहारेणास्य क्षुद्रसत्त्वस्य तुष्टिः कर्तुं न शक्यते । अत एव निर्वाणं च न गच्छति, इहलोके च धृतिं न लभते, अनन्तसंसारिकत्वाद् वा मोक्षं न गच्छतीति ।।५.२.३२।।

**सिया एगयओ लद्धुं, विविहं पाणभोयणं ।**
**भद्दगं भद्दगं भुच्चा, विवन्नं विरसमाहरे ।।५.२.३३।।**

**(ति.)** एष प्रत्यक्षापहारि परोक्षापहारि[ण]माह—स्यादेककः-भिक्षागतः । प्राग्वद् लब्ध्वा । विविधं पानं भोजनम् । भद्रकं भद्रकम्-घृतपूर्णादि बहिरेव क्वापि भुक्त्वा । विवर्णं विरसम्-शीतौदनादि । वसतावाहरेत्-आनयेत् ।।५.२.३३।।

**(स.)** एवं च यः प्रत्यक्षमपहरति स प्रत्यक्षहर उक्तः, अधुना यः परोक्षमपहरति स परोक्षहर उच्यते—सिया'इति-एकः कोऽपि लुब्धः सन् स्यात् कदाचिद् विविधमनेकप्रकारं पानभोजनं, तत्र भिक्षाचर्यायां गत एव भद्रकं भद्रकं भव्यं घृतपूरादिकं भुक्त्वा बहिरेव क्वापि, यद् विवर्णमम्लखलादि विरसं विगतरसं शीतौदनाद्याहरेत् ।।३३।।

**(सु.)** एवं यः प्रत्यक्षमपहरति स उक्तः, अधुना यः परोक्षमपहरति स उच्यते—सिया'इति, स्यादेको लब्ध्वेति पूर्ववत्, विविधं-अनेकप्रकारं पानभोजनं, तत्र भिक्षाचर्यागत एव भद्रकं भद्रकं-घृतपूर्णादि भुक्त्वा विवर्णं-विगतवर्णं आम्लखलादि, विरसं-विगतरसं-शीतौदनादि आहरेद्-आनयेदिति ।।५.२.३३।।

**जाणंतु ता [1]इमे समणा, आययट्ठी अयं मुणी ।**
**संतुट्ठो सेवई पंतं, लूहवित्ती सुतोसओ ।।५.२.३४।।**

**(ति.)** किमर्थमेवं करोति ? - इत्याह [जाणंतु...] स्पष्टः । नवरम् । आयतार्थी- आयतो दीर्घोऽनन्तो मोक्षस्तदर्थी ।।५.२.३४।।

**(स.)** किमर्थमेवं कुर्यात् ? इत्याह-जाणं...इति-स लुब्धः साधुरेवं जानाति, एवं किं ? श्रमणाः शेषसाधवस्तावदादौ मां जानन्तु—यथायं मुनिः साधुरायतार्थी मोक्षार्थी, पुनः कीदृशः? सन्तुष्टो लाभेऽलाभे च समः सन् प्रान्तमसारं सेवते, किम्भूतः मुनिः ? रूक्षवृत्तिः संयमवृत्तिः, पुनः किंभूतः ? सुतोष्यो येन केनचित् तोषं नीयत इति. ।।५.२.३४।।

**(सु.)** किमर्थमेवं कुर्यादित्याह-जाणंतु'इति, जानन्तु मां तावत् इमे श्रमणाः- शेषसाधवः यथा आयतार्थी-मोक्षार्थी अयं मुनिः-साधुः, सन्तुष्टो-लाभालाभयोः समः सेवते प्रान्तं-असारं, रूक्षवृत्तिः-संयमवृत्तिः, सुतोष्यः-येन केनचित् तोषं नीयत इति ।।५.२.३४।।

**पूयणट्ठा जसोकामी, माणसंमाणकामए ।**
**बहुं पसवई पावं, मायासल्लं च कुव्वई ।।५.२.३५।।**

**(ति.)** ईदृशं कथं करोति ? - इत्याह पूजार्थं यशस्कामी । मानसम्मानकामः- मानो वन्दनादिः, सम्मानो वस्त्रादिः। स चैवम्भूतो बहु-अतिप्रचुरम् । पापं प्रसूते- निवर्तयेत् । तच्च सम्यगनालोचयन् मायाशल्यं च-अनन्तरभवहेतुकं करोति ।।५.२.३५।।

**(स.)** एतदपि किमर्थमेवं कुर्यात् ? इत्याह-पूअण...इति-एवंविधः साधुर्बहु-अतिप्रचुरं पापं प्रधानक्लेशयोगात् प्रसूते निर्वर्त्तयति तद्गुरुत्वादेव सम्यङ्नाऽऽलोचयति, ततो मायाशल्यं च भावशल्यं करोति, किम्भूतः साधुः ? पूजार्थं यशःकामी, एवं कुर्वतो मम स्वपक्ष-परपक्षाभ्यां सामान्येन पूजा भविष्यतीति यशःकामी, अहोऽयमितिप्रवादार्थी वा, पुनः किम्भूतः साधुः ? मानसम्मानकामुकः, मानो वन्दनाभ्युत्थानलाभनिमित्तः,

१. ०व. १-५.११ ।।

सम्मानश्च वस्त्रपात्रादिलाभनिमित्तः, तयोः कामुको वाञ्छकः. ।।३५।।

(सु.) एतदेव किमर्थमेवं कुर्यात् ? इत्याह—पूयणट्ठा'इति, पूजार्थमेवं कुर्वतः स्वपक्षपरपक्षाभ्यां सामान्येन पूजा भविष्यतीति, यशस्कामी-अहो अयमिति, प्रवादार्थी वा, मानसन्मानकामकः एवं कुर्यात् । तत्र वन्दनाभ्युत्थानलाभनिमित्तो मानो, वस्त्रपात्रादिलाभनिमित्तश्च सन्मान इति । स चैवम्भूतो बहु-अतिप्रचुरं प्रधानसंक्लेशयोगात् प्रसूते-निर्वर्त्तयति पापं, तद्गुरुत्वादेव सम्यगनालोचयन् मायाशल्यं च-भावशल्यं च करोतीति ।।५.२.३५।।

**सुरं वा मेरगं वा वि, अन्नं वा मज्जगं रसं ।**
**संसक्खं न पिबे भिक्खू, जसं सारक्खमप्पणो ।।५.२.३६।।**

(ति.) प्रतिषेधान्तरमाह—सुरां वा-पिष्टादिनिष्पन्नाम् । मेरकम्-मद्यविशेषम् । अन्यं वा मद्यगम्-मद्यगामिनम् । रसम्-इक्षुरसादिकं धातुकीपुष्पभावितम् । सदा परित्यागे केवल्यादयः साक्षिणो यस्य तत् ससाक्षि । न पिबेद् भिक्षुः-अनेनात्यन्तिकस्तत्प्रतिषेधः । यशस्करत्वेनोपचारात् संयमो यशः तत्सम्यगात्मनो रक्षन् ।।५.२.३६।।

(स.) पुनः प्रतिषेधान्तरमाह—सुरं'इति-भिक्षुः सुरादि न पिबेत्, तत्र सुरां वा पिष्टादिनिष्पन्नां, मेरकं वापि प्रसन्नाख्यम्, अन्यं वा सुराप्रायोग्यद्रव्यनिष्पन्नं मद्यसम्बन्धिनं रसं सीध्वादिरूपं न पिबेत्. यतः कीदृक् तत् ?- ससाक्षि सदा-परित्यागे साक्षिणः केवल्यादयो यस्य तत् ससाक्षि केवलिप्रतिषिद्धमित्यर्थः, अनेन सर्वथा प्रतिषेध उक्तः, सदा साक्षिभावात्, किमिति न पिबेदित्याह-स भिक्षुः किं कुर्वन् ? आत्मनो यशःसंयमं संरक्षन्, अन्ये त्वाचार्या एतत्सूत्रं ग्लानापवादविषयमल्पसागारिकविधानेन व्याचक्षते. ।।५.२.३६।।

(सु.) प्रतिषेधान्तरमाह—सुरं वा'ति, सुरां वा-पिष्टादिनिष्पन्नां, मेरकं चापि-प्रसन्नाख्यां, सुराप्रायोग्य-द्रव्यनिष्पन्नमन्यं वा, मद्यरसं-सीध्वादिरूपं, ससाक्षिकं-सदापरित्याग-साक्षिकेवलिप्रतिषिद्धं न पिबेत् भिक्षुः, अनेनात्यन्तिक एव तत्प्रतिषेधः, सदासाक्षिभावात्। किमिति न पिबेदित्याह-यशः संरक्षन्नात्मनः, यशःशब्देन संयमोऽभिधीयते । अन्ये तु ग्लानापवादविषयं एतत् सूत्रमल्पसागारिकविधानेन

व्याचक्षत इति ।।५.२.३६।।

**पियाइ एग्गओ तेणो, न मे कोइ वियाणइ ।**
**तस्स पस्सह दोसाइं, नियडिं च सुणेह मे ।।५.२.३७।।**

**(ति.)** तत्पाने दोषानाह—पिबति । एकः-अद्वितीयः, धर्मसहायरहितः । न मां कश्चिज्जानाति इति धिया । स्तेनः-चौरोऽसौ भगवददत्तग्रहणात् । तस्य पश्यत दोषान्-ऐहिकानामुष्मिकांश्च। निकृतिं च-मायाम् । शृणुत मे-मम कथयत इति गुरूक्तिः ।।५.२.३७।।

**(स.)** सुरादिपानेऽत्रैव दोषमाह—पिया....इति-एको धर्मसहायरहित एकान्तस्थितो वा, कोऽप्यधर्मी पिबति, किम्भूत एकः ? चौरः, भगवता यन्न दत्तं तस्य ग्रहणादन्योपदेशयाचनाद् वा, पुनः किं कुर्वन् ? न मां कोऽपि जानातीति विभावयन्निति शेषः, तस्येत्थंभूतस्य भो ! शिष्या ! यूयं दोषानिहलोकसम्बधिनः परलोकसम्बन्धिनश्च पश्यत ? च पुनर्निकृतिं मायारूपां श्रुणुत मम कथयत इति शेषः. ।।५.२.३७।।

**(सु.)** अत्रैव दोषमाह—पियए'इति, पिबत्येको-धर्मसहायविप्रमुक्त एकान्तस्थितो वा स्तेनः-चौरोऽसौ भगवददत्तग्रहणात् अन्योपदेशयाचनाद् वा, न मां कश्चिज्जानाति विभावयन्, तस्येत्थंभूतस्य पश्यत दोषानैहिकान् पारलौकिकांश्च निकृतिं च-मायारूपां श्रुणुत ममेति ।।५.२.३७।।

**वड्ढई सुंडिया तस्स, मायामोसं च भिक्खुणो ।**
**अयसो य अनिव्वाणं, सययं च असाहुया ।।५.२.३८।।**

**(ति.)** किञ्च—वर्धते । शौण्डिता(का) तस्य-शुण्डापिपासा । मायया मृषावादो मायामृषा च-पीतापलापेन भिक्षोः । अयशश्च सर्वत्र । तदलाभे च अनिर्वाणम् । सततं चासाधुता-अत्रामुत्र च संयमात्मविराधना ।।५.२.३८।।

**(स.)** पुनस्तस्य किं भवति ? - तदाह—वड्ढई'इति-तस्य भिक्षोः शौण्डिकात्यन्ताभिष्वङ्गरूपा वर्धते, पुनर्मायामृषावादं च माया च मृषावादश्च, तस्य वर्धते, प्रत्युपलब्धस्यापलापेनेदं च भवपरम्पराहेतुरनुबन्धदोषात्, तथा अयशश्च स्वपक्षपरपक्षयोर्मध्ये तथा तस्यालाभेऽनिर्वाणमतृप्तिः दुःखं सततं वर्धते, च पुनरसाधुता वर्धते, लोके व्यवहारतः

चारित्रपरिणामबाधनेन परमार्थतः ।।३८।।

**(सु.)** वड्ढई' इति, वर्धते शौण्डिका-तदत्यन्ताभिष्वङ्गरूपा तस्य, मायामृषावादं चेत्येकवद्भावः, प्रत्युपलब्धापलापेन वर्द्धते तस्य भिक्षोः, इदं च भवपरम्पराहेतुरनुबन्धदोषात्, तथाऽयशश्च स्वपक्षपरपक्षयोः, तथा अतृप्तिदुःखं-अनिर्वाणं, तदलाभे सततं चासाधुता लोके व्यवहारतश्चरणपरिणामबाधनेन परमार्थत इति ।।५.२.३८।।

**निच्चुव्विग्गो जहा तेणो, अत्तकम्मेहिं दुम्मई ।**
**तारिसो मरणंते वि, न आराहेइ संवरं ।।५.२.३९।।**

**(ति.)** स्पष्टः । नवरम् । तादृशः-किलष्टचित्तः । संवरम्-प्राणातिपातादिपञ्चाश्रवनिरोधरूपम् ।।५.२.३९।।

**(स.)** पुनस्तस्य किं स्यात् ? - इत्याह—निच्चु...इति-स इत्थंभूतो भिक्षुर्नित्योद्विग्नः सदाऽप्रशान्तः स्यात्. यथा स्तेनश्चौरः, कैः ? आत्मकर्मभिः स्वकीयदुश्चरितैः, किम्भूतो भिक्षुः ? दुर्मतिर्दुर्बुद्धिः, तादृशः सन् सङ्क्लिष्टचित्तो मरणान्तेऽपि संवरं चारित्रं नाराधयति सदैवाकुशलबुद्ध्या तस्य संवरबीजाभावात्. ।।३९।।

**(सु.)** निच्चुव्विगो'इति, स इत्थंभूतो नित्योद्विग्नः-सदा अप्रशान्तो यथा स्तेनः-चौरः, आत्मकर्मभिः-स्वदुश्चरितैः दुर्मतिः-दुर्बुद्धिस्तादृशः-क्लिष्टचित्तो(सत्त्वो) मरणान्तेऽपि-चरमकालेऽपि नाराधयति संवरं-चारित्रं, सदैवाकुशलबुद्ध्या तद्बीजाभावादिति ।।५.२.३९।।

**आयरिए नाराहेइ, समणे आवि तारिसो ।**
**गिहत्था वि णं गरिहंति, जेणं जाणंति तारिसं ।।५.२.४०।।**

**(ति.)** तथा—स्पष्टः । नवरम् । नादृशः-दुराचारः । णमिति-तम् ।।५.२.४०।।

**(स.)** पुनस्तस्य किं स्यात् ? इत्याह—आय...इति-तादृशो भिक्षुराचार्यान् नाराधयत्यशुद्धभावत्वात्, तथा श्रमणानपि नाराधयत्यशुद्धभावादेव, गृहस्था अप्येनं दुष्टशीलं गर्हन्ति कुत्सन्ति, किमिति येन कारणेन जानन्ति तादृशं दुष्टशीलमिति. ।।४०।।

**(सु.)** तथा—आयरिए'इति आचार्यान् नाराधयत्यशुद्धभावत्वात् श्रमणांश्चापि तादृशो नाराधयत्यशुद्धभावत्वादेव, गृहस्था अप्येनं दुष्टशीलं गर्हन्ति-कुत्सन्ति । किमिति ?, येन जानन्ति तादृशं-दुष्टशीलमिति ।।५.२.४०।।

**एवं तु अगुणप्पेही, गुणाणं च विवज्जओ(ए) ।**
**तारिसो मरणंते वि, न आराहेइ संवरं ।।५.२.४१।।**

**(ति.)** एवम्-उक्तविधिना । अगुणप्रेक्षी-अगुणदर्शी अगुणशीलश्च । गुणानां च-अप्रमादादीनां स्वकीयानामनासेवनेन परगतानां प्रद्वेषेण विवर्जकः । तादृशः-क्लिष्टचित्तः मरणान्तेऽपि नाराधयति संवरम् ।।५.२.४१।।

**(स.)** पुनस्तस्य किं स्यात् ? इत्याह—एवं'इति-एवमुक्तप्रकारेणागुणप्रेक्षी अगुणान् प्रेक्षत इत्येवंशीलः, पुनः किम्भूतः गुणानां चाप्रमादादीनां स्वगतानामनासेवनेन परगतानां च प्रद्वेषकरणेन विवर्जकस्त्यागी, तादृशः क्लिष्टचित्तपरिणामो मरणान्तेऽपि नाराधयति संवरं चरित्रम् ।।४१।।

**(सु.)** एवं तु'इति, एवं तु उक्तेन प्रकारेण अगुणप्रेक्षी-अगुणान्-प्रमादादीन् प्रेक्षते तच्छीलश्च य इत्यर्थः । तथा गुणानां चाप्रमादादीनां स्वगतानामनासेवनेन परगतानां च प्रद्वेषेण विवर्जकः-त्यागी, तादृशः-क्लिष्टचित्तो मरणान्तेऽपि नाराधयति संवरं-चारित्रमिति गाथार्थः ।।५.२.४१।।

**तवं कुव्वइ मेहावी, पणीयं वज्जए रसं ।**
**मज्जपमायविरओ, तवस्सी अइउक्कसो ।।५.२.४२।।**

**(ति.)** एतद् विपरीतमाह—स्पष्टः । नवरम् । मज्जप्पमायविरमो-मद्यादिप्रमाद-विरतः । अइउक्कसो-अहं तपस्वीत्युत्कर्षरहित इत्यर्थः ।।५.२.४२।।

**(स.)** यतश्चैवम् ?-अतस्तद्दोषपरिहारेण साधुः कीदृशः स्यात् ? तद् आह—तवं'इति-मेधावी मर्यादावर्ती साधुस्तपः करोति, प्रणीतं स्निग्धं रसं घृतादिं वर्जयति, न केवलमेतत् करोति, अपि तु मद्यविरतो भवति, किंभूतो मेधावी ? तपस्वी, पुनः किंभूत ? अत्युत्कर्षोऽहं तपस्वीत्युत्कर्षरहितः. ।।४२।।

**(सु.)** तवं'इति, तपः प्रकरोति मेधावी मर्यादावर्त्ती, प्रणीतं-स्निग्धं वर्जयति रसं-

घृतादिकं, न केवलमेतत् करोति अपि तु मद्य-प्रमादविरतो, ''**नास्ति क्लिष्ट-सत्त्वानामकृत्यम्**'' इत्येवं प्रतिषेधः । तपस्वी-साधुः अत्युत्कर्षः-अहं तपस्वीत्युत्कर्षरहित इति सूत्रार्थः ।।५.२.४२।।

**तस्स पस्सह कल्लाणं, अणेगसाहुपूइयं ।**
**विउलं अत्थसंजुत्तं, कित्तइस्सं सुणेह मे ।।५.२.४३।।**

**(ति.)** तस्य-ईदृग्गुणवतः साधोः पश्यतः । कल्याणहेतुत्वात् कल्याणम् । संयमस्तम् अनेकैः साधुभिः पूजितम्-आराधितम् । विपुलम्-मोक्षसुखावहत्वात् । अर्थः-तत्त्वतः कर्मनिर्जररूपस्तेन संयुक्तः । संयमस्तदासेविनं कर्मनिर्जराया दर्शनात् कीर्तयिष्ये । श्रुणुत मे कथयत इति गुरूक्तिः ।।५.२.४३।।

**(स.)** एवंभूतस्य तस्य किं स्यात् ? - इत्याह—तस्स'इति तस्य साधोरित्थंभूतस्य यूयं कल्याणं गुणानां संपद्रूपमर्थात् संयमं पश्यत ? किंभूतं कल्याणं ? अनेकैः साधुभिः पूजितं, कोऽर्थः ! सेवितमाचरितं, पुनः किंभूतं कल्याणं ? विपुलं विस्तीर्णं विपुलमोक्षावहत्वात्, पुनः किंभूतं कल्याणं ! अर्थसंयुक्तं तुच्छतादिपरिहारेण निरुपमसुखरूपं. कथं ? मोक्षसाधकत्वात्, यूयं श्रुणुत मम कथयत इति शेषः ।।४३।।

**(सु.)** तस्स'इति, तस्येत्थंभूतस्य, पश्यत कल्याणं-गुणसम्पद्रूपं संयमम् । किं विशिष्टमित्याह-अनेकसाधुपूजितं पूजितमिति-सेवितमाचरितं, विपुलं-विस्तीर्णं विपुलमोक्षावहत्वात् । अर्थसंयुक्तं-तुच्छतादिपरिहारेण निरुपमसुखरूपमोक्षसाधनत्वात्, कीर्त्तयिष्ये अहं श्रुणुत मे-ममेति ।।५.२.४३।।

**एवं तु गुणप्पेही, अगुणाणं विवज्जओ ।**
**तारिसो मरणंते वि, आराहेइ संवरं ।।५.२.४४।।**

**(ति.)** प्राक्तन [५.२.४१, गाथायाः] व्यत्ययेनास्य व्याख्या ।।५.२.४४।।

**(स.)** एवंविधश्च स साधुः किं करोतीत्यत आह—एवं'इति-एवं तूक्तप्रकारेण स साधुस्तादृशः सन् शुद्धाचारः सन्, मरणान्तेऽपि चरमकालेऽपि, संवरं चारित्रमाराधयति सदैव कुशलबुद्ध्या तद्बीजपोषणात्, किंभूतः साधुः ? गुणप्रेक्षी गुणानप्रमादादीन्

प्रेक्षत इत्येवंशीलो यः स गुणप्रेक्षी, तथा पुनः किंभूतः ? अगुणानां च प्रमादादीनां स्वगतानामनासेवनेन विवर्जकस्त्यागी. ।।४४।।

(सु.) एवं तु, [इति] एवं तु-उक्तेन प्रकारेण स-साधुर्गुणप्रेक्षी-गुणान्-अप्रमादादीन् प्रेक्षते तच्छीलश्च य इत्यर्थः, तथा अगुणानां च-प्रमादादीनां स्वगतानामनासेवनेन परगतानां चाननुमत्या विवर्जकः-त्यागी, तादृशः-शुद्धवृत्तो मरणान्तेऽपि-मरण(चरम)-कालेऽपि आराधयति संवरं-चारित्रं, सदैव कुशलबुद्ध्या तद्बीजपोषणादिति ।।५.२.४४।।

**आयरिए आराहेइ, समणे यावि तारिसे ।**
**गिहित्था वि णं पूइंति, जेण जाणंति तारिसं ।।५.२.४५।।**

(ति.) एषोऽपि प्राक्तन [५.२.४० तम गाथायाः] व्यत्ययेन व्याख्येयः ।।५.२.४५।।

(स.) पुनः स किं करोति तं च गृहस्थाः किं कुर्वन्ति ? - इत्याह—आय...इति-तादृशो गुणवान् साधुराचार्यानाराधयति शुद्धभावत्वात्, अपि पुनः श्रमणानाराधयति शुद्धभावत्वादेव, तथा गृहस्था अप्येनं पूजयन्ति, कथं ? येन कारणेन ते जानन्ति तादृशं शुद्धं धर्मम् ।।४५।।

(सु.) आयरियए'इति, आचार्यान् आराधयति, शुद्धभावत्वात् । श्रमणांश्चापि तादृशः समाराधयति, शुद्धभावत्वादेव, गृहस्था अप्येनं-शुद्धवृत्तं पूजयन्ति, किमिति ? येन जानन्ति तादृशं-शुद्धवृत्तमिति ।।५.२.४५।।

**तवतेणे वयतेणे, रूवतेणे य जे नरे ।**
**आयारभावतेणे य, कुव्वई देवकिव्विसं ।।५.२.४६।।**

(ति.) तपःस्तेनो, वाक्स्तेनो, रूपस्तेनो, यो नरः आचारभावस्तेनः । कुरुते देवकिल्बिषम्-किल्बिषदेवत्वमित्यर्थः । तत्र तपस्तेनः-क्षपकवत् कृशः कश्चित् केनचित् पृष्टः क्षपकस्त्वम् ? स स्वपूजार्थं प्राह-अहम् । अथवा साधवः क्षपका एव, तूष्णीं वा स्तः । वाक्स्तेनः-तत्र त्वं धर्ममाख्य ? इत्यायुक्तो वक्ति । एवम् । रूपस्तेनः-त्वद्रूपं ममाग्रेऽमुकेन श्लाघितम्, इत्युक्तः स्माह । एवम् । आचारस्तेनः-सदाचारो भवान् श्रूयते ? इत्युक्तः स्माह । सदाचारास्तपोधनाः । भावस्तेनः-शुभभावो भवान् भव्यैरभिधीयते? इत्युक्तो वक्ति । एवम् ।।५.२.४६।।

**(स.)** पुनः स्तेनाधिकार एवेदमाह—तव...इति-एवंविधः साधुर्देवकिल्विषं कर्म करोति निर्वर्त्तयतीत्यर्थः, किम्भूतः साधुः ? तपःस्तेनः, वाक्स्तेनः, तथा रूपस्तेनश्च, यो नरः, तथाचारस्तेनः, तथा भावस्तेनश्च, तत्र तपःस्तेनो नाम यः क्षपकरूपसदृशः, केनचित् पृष्टत्वमसौ क्षपक इति, तदा पूजाद्यर्थमाह अहमिति, अथवा वक्ति साधवः क्षपका एव, अथवा तूष्णीमास्ते, एवं वाक्स्तेनो धर्मकथकादिसदृशरूपः कोऽपि केनचित् पृष्टस्तथैवाह, एवं रूपस्तेनो राजपुत्रादिसदृशरूपः पृष्टस्तथैवाह, एवमाचारस्तेनो विशिष्टाचारवर्तिसदृशरूपस्तथैवाह, भावस्तेनस्तु परोत्प्रेक्षितं कथञ्चित् श्रुत्वा स्वयमनुत्प्रेक्षितमपि मया तत्प्रपञ्चेनेदं चर्चितमित्याद्याह, स इत्थम्भूतः साधुर्दुष्टभावदोषात् क्रियां पालयन्नपि देवकिल्बिषं निर्वर्त्तयति. ।।५.२.४६।।

**(सु.)** स्तेनाधिकार एवेदमाह—तव'इति तपस्तेनो वाक्स्तेनो रूपस्तेनश्च यो नरः कश्चिद् आचारभावस्तेनश्च [नामक्षपकरूपश्च] पालयन्नपि क्रियां तथाभावदोषात्, करोति देवकिल्बिषं कर्म्म निर्वर्त्तयतीत्यर्थः, तत्र तपस्तेनो नाम क्षपकरूपकल्पः कश्चित् केनचित् पृष्टः, त्वमसौ क्षपक इति ?, पूजाद्यर्थमाह-अहं, अथवा वक्ति-साधव एव क्षपकास्तूष्णीं वाऽऽस्ते, एवं वाक्स्तेनो धर्मकथकादितुल्यरूपः कश्चित् केनचित् पृष्ट इति । एवं रूपस्तेनो राजपुत्रादेस्तुल्यरूपः । एवमाचारस्तेनो विशिष्टाचारवर्त्तितुल्यरूप इति । भावस्तेनस्तु परोत्प्रेक्षितं कथञ्चित् केनचित् श्रुत्वा स्वयमनुत्प्रेक्षितमपि मयैतत्प्रपञ्चेन चर्चितमित्याहेति ।।५.२.४६।।

**लद्धूण वि देवत्तं, उववन्नो देवकिव्विसे ।**
**तत्था वि से न याणाइ, किं मे किच्चा इमं फलं ।।५.२.४७।।**

**(ति.)** अयं चेत्थंभूतः—लब्ध्वापि देवत्वम् । उपपन्नो देवकिल्बिषः-किल्बिषिकदेवः। तत्रापि सन् जानाति-विशुद्धावधिज्ञानाभावात् । किं कृत्वा ममेदं फलं जातमिति शेषः ।।५.२.४७।।

**(स.)** पुनस्तस्य किं स्यात् ? तद् आह—लद्धूण...इति-असौ साधुर्लब्ध्वापि देवत्वं तथाविधक्रियापालनवशेनोपपन्नो देवकिल्बिषे देवकिल्बषकाये, तत्रापि स न जानाति विशुद्धस्यावधेरभावेन, किं न जानाति तदाह-किं कृत्वा ? ममेदं फलं किल्बिषदेवत्वं जातमिति. ।।४७।।

**(सु.)** अयं चेत्थंभूतः, लद्धण वा'इति, लब्ध्वापि देवत्वं तथाविधक्रियापालन-वशेनोपपन्नो देवकिल्बिषे-देवकिल्बिषिकाये, तत्राप्यसौ न जानाति विशुद्धावध्यभावात्, किं मम कृत्वेदं फलं-किल्बिषिकदेवत्वमिति ।।५.२.४७।।

**तत्तो वि से चइत्ताणं, लब्भिही एलमूययं ।**
**नरगं तिरिक्खजोणिं वा, बोही जत्थ सुदुल्लहा ।।५.२.४८।।**

**(ति.)** स्पष्टः । से-इत्यसौ । एडमूकताम्-अवाक्-श्रुतित्वम् ।।५.२.४८।।

**(स.)** पुनरस्यैव साधोर्दोषान्तरमाह—तत्तो-'इति-ततोऽपि देवलोकाच्च्युत्वापि स साधुर्मानुषत्वे एलमूकताम्-अज-भाषानुकारित्वं लप्स्यते, पुनस्ततोऽपि परम्परया नरकं तिर्यग्योनिं वा लप्स्यते, तत्र च बोधिः सकलसम्पत्तिकारिणी जिनधर्मप्राप्तिः सुदुर्लभा दुरापा दुःखेन प्राप्या भविष्यतीति. ।।४८।।

**(सु.)** अस्यैव दोषान्तरमाह—तत्तो'इति, ततोऽपि देवलोकादसौ च्युत्वा लप्स्यते एलमूकतां-अजभाषानुकारित्वं मानुषत्वे, तथा नरकं तिर्यग्योनिं वा पारम्पर्येण लप्स्यते, बोधिर्यत्र सुदुर्लभः-सकलसम्पन्निबन्धना यत्र जिनधर्मप्राप्तिर्दुरापा । इह च प्राप्नोत्येल-मूकताम्'इति वाच्ये असकृद्भावप्राप्तिख्यापनाय लप्स्यत इति भविष्यत्कालनिर्देश इति ।।५.२.४८।।

**एयं च दोसं दट्ठूणं, नायपुत्तेण भासियं ।**
**अणुमायं पि मेहावी, मायामोसं विवज्जए ।।५.२.४९।।**

**(ति.)** प्रकृतमुपसंहरंति—ज्ञातपुत्रेण-श्रीमहावीरेण भाषितम् । अणुमात्रमपि-स्तोकमपि। मेधावी-साधुः । मायामृषावादम्-अनन्तरोक्तम् । विवर्जयेत् ।।५.२.४९।।

**(स.)** अथ प्रकृतस्योपसंहारमाह—एअं'इति मेधावी मर्यादावर्ती साधुरेनं पूर्वोक्तं दोषं सत्यपि श्रामण्ये किल्बिष-देवत्वप्राप्तिरूपं दृष्ट्वा मायामृषावादं पूर्वोक्तं विवर्जयेत् परित्यजेत्, किम्भूतं दोषम् ? आगमतो ज्ञातपुत्रेण भगवता वर्धमानस्वामिना भाषितमुक्तं, किम्भूतं मायामृषावादं ? अणुमात्रमपि स्तोकमात्रमपि, किं पुनः प्रभूतम् ? ।।४९।।

१. बधिरश्चासौ मूकः १० टि. ।।

**(सु.)** प्रकृतमुपसंहरति—एयं च'इति एयं चेति, एनं दोषं-अनन्तरोदितं सत्यपि श्रामण्ये किल्बिषिकत्वादिप्राप्तिरूपं दृष्ट्वा आगमतो, ज्ञातपुत्रेण-भगवता वर्द्धमानेन भाषितं-उक्तं, अणुमात्रमपि-स्तोकमात्रमपि, किमुत प्रभूतं ? मेधावी-मर्यादावर्त्ती, मायामृषावादं-अनन्तरोदितं विवर्जयेत् परिवर्जयेदिति ।।५.२.५०।।

**सिक्खिऊण भिक्खेण सोहिं, संजयाण बुद्धाण सगासे ।**
**तत्थ भिक्खू सुप्पणिहिंदिए, तिव्वलज्जगुणवं विहरिज्जासि ।।५.२.५०।। त्ति बेमि**

**(ति.)** अध्ययनार्थमुपसंहरन्नाह—पूर्वार्द्धं स्पष्टम् । उत्तरार्द्धस्यायमर्थः । तत्र भिक्षुः सुप्रणिहितेन्द्रियः । तीव्रो लज्जागुणः-यस्यासंयमकरणे स तीव्रलज्जागुणवान्। विहरेत् । ब्रवीमीति प्राग्वत् ।।५.२.५०।। **पिण्डैषणाध्ययने तिलकाचार्यटीका समाप्ता ।।**

**(स.)** अथाध्ययनार्थमुपसंहरन्नाइ—सिक्खि...इति-तत्र भिक्षैषणायां भिक्षुर्विहरेत् सामाचारीपालनं कुर्यात्, किं कृत्वा? भिक्षैषणाशुद्धिं पिण्डमार्गणशुद्धिमुद्गमादिरूपां शिक्षित्वाधीत्य, केभ्यः सकाशात् ?-इत्याह-संयतेभ्यः साधुभ्यः; किंविशिष्टेभ्यः संयतेभ्यः, ? बुद्धेभ्यो ज्ञाततत्त्वेभ्यः, ज्ञातार्थेभ्यः न द्रव्यसाधुभ्यः सकाशात्, किम्भूतो भिक्षुः ? सुप्रणिहितेन्द्रियः श्रोत्रादिभिरिन्द्रियैर्गाढं तदुपयुक्तः, पुनः किम्भूतो भिक्षुः ? तीव्रलज्जः, तीव्रा लज्जानाचारकरणे यस्य स तीव्रलज्ज उत्कृष्टसंयम इत्यर्थः पुनः किंभूतो भिक्षुः ? गुणवान् पूर्वोक्तप्रकारेण साधुगुणैः सहितः, ब्रवीमीति पूर्ववत्. ।।५०।।

**इति समयसुन्दर टीकायां पिण्डैषणाध्ययने द्वितीयोद्देशकः. २. पिण्डैषणाध्ययनं समाप्तम् ५.**

**(सु.)** अध्ययनार्थमुपसंहरन्नाह-सिक्खिऊण'इति, शिक्षयित्वाऽधीत्य भिक्षैषणाशुद्धिं-पिण्डमार्गणाशुद्धिमुद्गमादिरूपां, केभ्यः सकाशात् ?-इत्याह-संयतेभ्यः-साधुभ्यः, बुद्धेभ्योऽवगततत्त्वेभ्यो गीतार्थेभ्यो न द्रव्यसाधुभ्यः सकाशात् । ततः किम् ?-इत्याह-तत्र भिक्षैषणायां भिक्षुः-साधुः सुप्रणिहितेन्द्रियः-श्रोत्रादिभिर्गाढं तदुपयुक्तः, तीव्रलज्जः-उत्कृष्टसंयमः सन्, अनेन प्रकारेण गुणवान् विहरेत्-सामाचारीपालनं कुर्यात्, ब्रवीमीति पूर्ववदिति ।।५.२.५०।।

**।। इति सुमति० वृत्तौ पिण्डैषणाध्ययने द्वितीय उद्देशकः समाप्तः, समाप्तं च पिण्डैषणाध्ययनम् ।।**

## ।। षष्ठं अध्ययनं महाचारकथा ।।

**नाण-दंसणसंपन्नं, संजमे य तवे रयं ।**
**गणिमागमसंपन्नं, उज्जाणम्मि समोसढं ।।६.१।।**

**रायाणो रायमच्चा य, माहणा अदुव खत्तिया ।**
**पुच्छंति निहुयप्पाणे कहं भे आयारगोयरो ? ।।६.२।।**

**(ति.)** अनन्तराध्ययने पिण्डशुद्धिरुक्ता । तत्र च गृहादौ पृष्टेन, न सविस्तरः स्वाचारो वाच्यः, किन्तु स्वाश्रये स च क्षुल्लिकाचारकथातो महान् महाचारकथायां सविस्तरं वाच्य इति महाचारकथाध्ययनं व्याख्यायते । तच्चेदम् -ज्ञानम्-श्रुतज्ञानादि । दर्शनम्-क्षायोपशमिकादि । ताभ्यां सम्पन्नम्-युक्तं । संयमे तपसि च रतम् । गणिनम्-आचार्यम् । आगमसम्पन्नम्-विशिष्टश्रुतधरम् । उद्याने-उद्यानस्थे प्रासादे । समवसृतम्-अवस्थितम् ।।६.१।।

तत्र च - [रायाणो...इति] पूर्वार्द्धं स्पष्टम् । पृच्छन्ति । निभृतात्मानः-एकाग्रचित्ताः। कथं भो ! भवताम् आचारगोचर इति ।।६.२।।

**(स.)** नाण...इति, व्याख्यातं पिण्डैषणाऽऽध्ययनम्, अधुना 'महाचारकथा'-ऽध्ययनस्यमारभ्यते, अन चाध्ययनस्यायमभिसम्बन्धः-इहेतः पूर्वाध्ययने साधोर्भिक्षा-विशुद्धिरुक्ता, इह तु गोचरप्रविष्टेन सता, स्वस्याचारं पृष्टेनाचारज्ञेनापि महाजनसमक्षं तत्रैव स्थाने विस्तरतो न कथयितव्यम्, अपि तूपाश्रये गुरवः कथयिष्यन्तीति वक्तव्यम्, इत्येतदुच्यते-इत्यनेन सम्बन्धेनायातमिदमध्ययनमिति. तथाहि-गाथात्रयेणोक्तिमेलनं, राजानो नरपतयः, राजामात्याश्च मन्त्रिणः, ब्राह्मणाः प्रसिद्धाः, 'अदुव'इति' तथा क्षत्रियाः श्रेष्ठ्यादयः साधुं प्रतीति पृच्छन्ति, इतीति किं ? कथं भे भवतामाचारगोचरः क्रियाकलापः ? यं प्रति त्वं स्थितोसि, किम्भूता राजादयः, निभृतात्मानोऽसंभ्रान्ता बद्धाञ्जलय इति द्वितीयगाथाया व्याख्यानं ।।६.२।।

किम्भूतं साधुं ? नाणदंसणसम्पन्नं, ज्ञानं श्रुतज्ञानादि, दर्शनं च क्षायोपशमिकादि.

ताभ्यां सम्पन्नं संयुक्तम्, पुनः किम्भूत साधुं ? संयमे पञ्चानामाश्रवाणां विरमणादौ, तपसि चानशनादौ रतमासक्तम्, [१]पुनः किम्भूतं साधुम् ? उद्याने क्वचित् साधूनामुपभोगयोग्यस्थाने समवसृतं स्थितं धर्मदेशनार्थं वा प्रवृत्तमिति प्रथमगाथार्थः ।।६.१।।

**(सु.)** व्याख्यातं पिण्डैषणाध्ययनं, अधुना महाचारकथाख्यमारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तराध्ययने साधोर्भिक्षाविशोधिरुक्ता; इह तु गोचरप्रविष्टेन सता स्वाचारं पृष्टेन तद्विदाऽपि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्य इति, अपि त्वालये गुरवो वा कथयन्ति-इति वक्तव्यमित्येतदुच्यते, उक्तं च-

"गोयरग्गपविट्ठो उ, न निसीएज्ज कत्थइ।

कहं च न पबंधेज्जा चिट्ठिताण व संजए ।।अत्रैव ५.२.७।।"

इत्यनेनाभिसम्बन्धेनायातमिदमध्ययनमिति, तच्चेदं-नाणदंसणसंपन्नं इत्यादि, ज्ञानदर्शनसंपन्नं ज्ञानं-श्रुतज्ञानादि, दर्शनं-क्षायोपशमिकादि ताभ्यां संपन्नं-युक्तं, संयमे-पञ्चाश्रवविरमणादौ, तपसि च-अनशनादौ रतं-आसक्तं, गणोऽस्यास्तीति गणी, तं गणिनं-आचार्यं, आगमसंपन्नं-विशिष्टश्रुतधरं, बह्वागमत्वेन प्राधान्यख्यापनार्थमेतत्। उद्याने-क्वचित्साधुप्रायोग्ये, समवसृतं-स्थितं धर्मदेशनार्थं वा प्रवृत्तमिति ।।६.१।।

**(सु.)** तत् किम् ? इत्याह-रायाणो'इति, राजानः-नरपतयः, राजामात्याश्च-मन्त्रिणः, ब्राह्मणाः प्रतीताः, अदुवा'इति तथा क्षत्रियाः श्रेष्ठ्यादयः पृच्छन्ति निभृतात्मानः-असम्भ्रान्ता रचिताञ्जलयः, कथं भे-भवतामाचार-गोचरः-क्रियाकलापः स्थित इति ।।६.२।।

**तेसिं सो निहुओ[२] दंतो, सव्वभूयसुहावहो ।**
**सिक्खाए सुसमाउत्तो, आयक्खइ वियक्खणे ।।६.३।।**

**(ति.)** स्पष्टः । नवरम् । शिक्षया-ग्रहणासेवनरूपया । सुष्ठु समायुक्तः ।।६.३।।

**(स.)** अथ स साधू राजादिभ्यः पृच्छकेभ्यः किं वदेत् ? इत्याह—तेसिं'इति-स गणी साधुः, तेभ्यो राजादिभ्य आख्याति कथयति, किम्भूतः साधुः ? निभृतोऽसम्भ्रान्त उचितधर्मकथास्थित्या, किम्भूतः साधुः? [दान्तः] इन्द्रियनो-इन्द्रियदमनेन, पुनः किम्भूतः साधुः ? सर्वभूतसुखावहः सर्वप्राणिहित इत्यर्थः, पुनः किम्भूतः साधुः ? शिक्षया ग्रहणासेवनारूपया सुष्ठु भव्यरीत्या समायुक्तः, पुनः किम्भूतः साधुः ? विचक्षणः पण्डित इति गाथात्रयार्थः ।।६.३।।

१. गणिमागमसंपन्नम्'इत्येतद् विशेषणद्वयं न विवृतं, कथमिति न ज्ञायते । २. असम्भ्रातः १० टि. ।।

**(सु.)** तेसिं...इति, तेभ्यो राजादिभ्यः, असौ गणी निभृतोऽसम्भ्रान्तः उचितधर्म-कायस्थित्या, दान्त इन्द्रिय-नोइन्द्रियदमाभ्यां, सर्वभूतसुखावहः-सर्वप्राणिहित इत्यर्थः। शिक्षया-ग्रहणासेवनारूपया, सुसमायुक्तः, सुष्ठु-एकीभावेन युक्तः, आख्याति-कथयति विचक्षणः-पण्डित इति ।।६.३।।

**हंदि धम्मत्थकामाणं, निगंथाण सुणेह मे ।**
**आयारगोयरं भीमं, सयलं दुरहिट्ठियं ।।६.४।।**

**(ति.)** हंदि'इति-सम्बोधने । धर्मः चारित्रधर्मः, तस्यार्थः-प्रयोजनं मोक्षः, तत्र, कामो-ऽभिलाषो येषां ते धर्मार्थकामाः, तेषां धर्मार्थकामानाम् । निर्ग्रन्थानां श्रुणुत । मे-मम पार्श्वात् । आचारः क्रियागोचरो, महत्वाल्लक्षणया कलापः तम्, आचारगोचरम्-क्रियाकलापम् । भीमम्-कर्मशत्रून् प्रति रौद्रम् । सकलम्-सम्पूर्णम् । दुरधिष्ठ[त]म्-हीनसत्त्वैर्दुःपालम् ।।६.४।।

**(स.)** किंवदेत् ? इत्याह हंदि...इति-हंदीत्युप(प्र)दर्शने, हे राजादयः ! यूयं धर्मार्थकामानामाचारगोचरं क्रियाकलापं मत्समीपात् श्रुणुत इत्युक्तिः, धर्मश्चारित्रधर्मादिः, तस्यार्थः प्रयोजनं मोक्षः, तं कामयन्ते वाञ्छन्ति विशुद्धविहितानुष्ठानकरणेनेति धर्मार्थकामा मुमुक्षवः, तेषां, किम्भूतानां धर्मार्थकामानां निर्ग्रन्थानां बाह्याभ्यन्तरग्रन्थिरहितानां, किम्भूतमाचारगोचरं ? भीमं कर्मशत्रूणामपेक्षया रौद्रं, पुनः किम्भूतमाचारगोचरं ? सकलं संपूर्णं दुरधिष्ठितं क्षुद्रसत्त्वैर्दुराश्रयमिति. ।।६.४।।

**(सु.)** हंदि धम्मत्थ, हन्दीत्युपप्रदर्शने, तमेनं धर्म्मार्थकामानामिति, धर्मः-चारित्रधर्मादिः तस्यार्थः-प्रयोजनं मोक्षः तं कामयन्ति-इच्छन्तीति विशुद्धविहितानुष्ठान-करणेनेति धर्मार्थकामा-मुमुक्षवः, तेषां निर्ग्रन्थानां-बाह्याभ्यन्तरग्रन्थ-रहितानां श्रुणुत मम समीपात्, आचारगोचरं-क्रियाकलापं भीमं-कर्मशत्र्वपेक्षया रौद्रं सकलं-संपूर्णं दुरधिष्ठं(ष्ठितं)-क्षुद्रसत्त्वैर्दुराश्रयमिति ।।६.४।।

**नन्नत्थ एरिसं वुत्तं, जं लोए परमदुच्चरं ।**
**विउलट्ठाणभाइस्स, न भूयं न भविस्सइ ।।६.५।।**

**(ति.)** अस्यैवाचारगुरुतामाह—नान्यत्र-मिथ्यादृग्मते । ईदृशम्-आचारललितम्। उक्तं । यल्लोके-षष्ठ्यर्थे सप्तमी, लोकस्य सामान्यजनस्य । परमदुश्चरम्-अत्यन्त-

दुःकरम् । विपुलं-विशालमनन्तं, स्थानं-अवस्थानं, यत्र स विपुलस्थानो मोक्षस्तद्धेतुत्वात् संयमोऽपि विपुलस्थानं, तद् भाजिनः-तदासेविनः । न भूतं न भविष्यति-अन्यज्जिनमतात् ।।६.५।।

**(स.)** इहानन्तरसूत्रे निर्ग्रन्थानामाचारगोचरस्य यत्कथनं तस्योपन्यासः कृतः, अथ तस्यैवार्थतो गुरुतामाह—नऽन्न...इति-भो राजादयः ! जिंनमतादन्यत्र कपिलादिमत ईदृशं यत् पूर्वमुक्तमाचार-गोचरं वस्तु, यल्लोके प्राणिलोके परमदुश्चरमत्यन्तदुष्करं वस्तु, विपुलस्थानभाजिनः, कोऽर्थः ? विपुलस्थानं, विपुलमोक्षहेतुत्वात् संयमस्थानं, तद् भजते सेवत इत्येवंशीलो विपुलस्थानभाजी, तस्य विपुलस्थानभाजिनः साधोर्न भूतं न भविष्यति. ।।६.५।।

**(सु.)** इहानन्तरसूत्रे निर्ग्रन्थानामाचारगोचर-कथनोपन्यासः कृतः, साम्प्रतमस्यैवार्थतो गुरुतामाह-नऽन्नत्थ...इति, न अन्यत्र-कपिलादिमते ईदृशं उक्तमाचारगोचरं वस्तु यल्लोके-प्राणिलोके परमदुश्चरं-अत्यन्तदुष्करमित्यर्थः । ईदृशं च विपुलस्थानभाजिनः-विपुलस्थानं-विपुलमोक्षहेतुत्वात् संयमस्थानं, तद् भजते-सेवते तच्छीलश्च यः, तस्य न भूतं न भविष्यतीति अन्यत्र जिनमतादिति ।।६.५।।

**सखुड्डगवियत्ताणं, वाहियाणं च जे गुणा ।**
**अखंड-फुल्ला कायव्वा, तं सुणेह जहा तहा ।।६.६।।**

**(ति.)** सक्षुल्लकव्यक्तानाम्-सबाल-वृद्धानां द्रव्यभावरूपाणाम् । व्याधिमतां च । ये गुणाः-वक्ष्यमाणाः । ते अखण्ड(डा-)स्फुटिताः कर्तव्याः-अखण्डा देशाविराधनया, अस्फुटिताः। सर्वाविराधनया । तच्छ्रुणुत । यथा-कर्तव्याः । तथेति ।।६.६।।

**(स.)** पुनरेतदेव भावयन्नाह—सखुड्ड...इति-सक्षुल्लकव्यक्तानां ये गुणा वक्ष्यमाण-लक्षणाः तेऽखण्डास्फुटिताः कर्तव्याः, कोऽर्थः ? सह क्षुल्लकैर्द्रव्य-भावबालैर्ये वर्तन्ते ते सक्षुल्लकाः व्यक्ताश्च द्रव्य-भाववृद्धाः, तेषां सक्षुल्लकव्यक्तानां सबालवृद्धानामित्यर्थः, किम्भूतानां सक्षुल्लकव्यक्तानां ?-व्याधिमतां, चशब्दादव्याधिमतां च, सरोगाणामरोगाणां चेति भावः ? किम्भूता गुणाः ? अखण्डाऽस्फुटिताः, अखण्डा देशविराधनापरित्यागेन, अस्फुटिताश्च सर्वविराधनात्यागेन, तत् श्रुणुत यथा कर्तव्यास्तथेति. ।।६.६।।

**(सु.)** एतदेव संभावयन्नाह—सखुड्डग'इति, सह क्षुल्लकैः-द्रव्य-भावबालैर्ये वर्त्तन्ते, ते व्यक्ता-द्रव्य-भाववृद्धाः, तेषां सक्षुल्लकव्यक्तानां, सबाल-वृद्धानामित्यर्थः, व्याधिमतां चशब्दादव्याधिमतां च, सरुजानां नीरुजानां चेतिभावः । 'जे' ये गुणा वक्ष्यमाणलक्षणाः, तेऽखण्डा-अस्फुटिताः कर्त्तव्याः, अखण्डा देशविराधनापरित्यागेन, अस्फुटिताः सर्वविराधनापरित्यागेन, तत् श्रुणुत यथा कर्त्तव्यास्तथेति ।।६.७।।

**दस अट्ठ य ठाणाणि, जाइं बालोवरज्झई ।**
**तत्थमन्नयरे ठाणे, निग्गंथत्ताउ भस्सई ।।६.७।।**

**(ति.)** ते चाऽगुणत्यागेन स्युः इत्यगुणास्तावदुच्यते—दशाष्टौ च स्थानानि यानि बालः-अज्ञोऽपराध्यति । तत्र-तेषाम् । अन्यतरे स्थाने-प्रमादाद् वर्त्तमानः । निग्रन्थभावाद् भ्रस्यति ।

**वयछक्कं कायक्कं, अकप्पो गिहिभायाणं ।**
**पलियंकनिसिज्जा य, सिणाणं सोहवज्जणं ।।१।।** [दशवै. निर्युक्ति १७०]

कानि पुनस्तानि स्थानानि ? - इत्याह

प्राणातिपातविरत्यादीनि रात्रिभोजनविरतिषष्ठानि व्रतानि व्रतषट्कम् । अस्यानासेवनेना गुणत्वम् । कायषट्कम्-पृथ्वादयः षट्जीवनिकायाः । एषामरक्षणेनागुणत्वम्। अकल्पशिक्षकस्थापनाल्पादिः । गृहिभाजनम्-कांस्यस्थालम् । पल्यङ्कः-खट्वा । निषद्या-गृहे निषदनम् आसनम् । स्नानम्-देश-सर्वभेदभिन्नम् । अकल्पादीनां पञ्चानामासेवनेनागुणत्वम् । शोभया अवर्जनमगुणः । द्वारगाथेयम् ।

**(स.)** ते च गुणा अगुणपरिहारेणाऽखण्डा अस्फुटिताश्च भवन्ति-इति प्रथमगुणा उच्यन्ते—दस'इति-बालोऽज्ञानी यानि दशाष्टौ अष्टादशस्थानान्यसंयमस्थानानि वक्ष्यमाणलक्षणान्याश्रित्यापराध्यति, तत्सेवनयापराधं प्राप्नोति, कथमपराध्यति ?- इत्याह-तत्रान्यतरेऽष्टादशानामसंयमस्थानानां मध्ये एकतरस्मिन्नपि स्थाने वर्तमानः प्रमादेन निर्ग्रन्थत्वान्निर्ग्रन्थभावाद् भ्रश्यति, निश्चयनयेनापैति, कः ? पूर्वोक्तो बाल इति.

कानि पुनस्तानि स्थानानि ? - इत्याह—वय...इति-व्रतषट्कं प्राणातिपात-

विरमण-मृषावादविरमणा-दत्तादानविरमणा-ब्रह्मविरमण-परिग्रहविरमण-रात्रिभोजन-विरमणरूपं, तथा कायषट्कं पृथिव्यप्तेजोवायुवनस्पति-त्रसकायरूपम्, अकल्पकः शिक्षकस्थापना-कल्पादिर्वक्ष्यमाणः गृहिभाजनं गृहस्थसम्बन्धि-कांस्यभाजनादि प्रतीतं, पर्यङ्कः शयनीयविशेषः प्रतीतः, निषद्या च गृह एकानेकरूपा, स्नानं देशतः सर्वतश्च द्वेधा. शोभावर्जनं च विभूषापरित्यागः, वर्जनशब्दः प्रत्येकमभि-संबद्ध्यते, स्नान-वर्जनमित्यादि. ।।६.७।।

**(सु.)** ते चागुणपरिहारेणाखण्डास्फुटिता भवन्तीत्यगुणास्तावदुच्यन्ते-दस'इति-दशाष्टौ च स्थानानि-असंयमस्थानानि वक्ष्यमाणलक्षणानि यान्याश्रित्य 'बालः-अज्ञोऽपराध्यति तत्सेवनयाऽपराधमाप्नोति । कथमपराध्यति ?-इत्याह-तत्रान्यतरे स्थाने वर्त्तमानः प्रमादेन निर्ग्रंथत्वात्-निर्ग्रन्थभावाद् भ्रश्यति निश्चयनयेनापैति बाल इति, कानि पुनस्तानि स्थानानि ? इत्याह -

**"वयछक्कं कायछक्कं, अकप्पो गिहिभायणं।**

**पलियंकनिसज्जा य, सिणाणं सोहवज्जणं ।।"** (दश. नि. १७०) ।।

वयछक्क'इति, व्रतषट्कं-प्राणातिपातनिवृत्त्यादीनि रात्रिभोजनविरतिषष्ठानि षड्व्रतानि, कायषट्कं-पृथिव्यादयः षड्जीवनिकायाः, अकल्पः-शिक्षकस्थापनाकल्पादि-र्वक्ष्यमाणः, गृहिभाजनं-गृहस्थभाजनं गृहस्थसम्बन्धि कांस्यभाजनादि प्रतीतं, पर्यङ्कः-शयनीयकविशेषः प्रतीतः, निषद्या च-गृहे एकानेकरूपा, स्नानं-देश-सर्वभेदभिन्नं, शोभावर्जनं-विभूषापरित्यागः, वर्जनमिति च प्रत्येकमभिसम्बध्यते शोभावर्जनं स्नानवर्जनमित्यादीति ।।६.७।।

**तत्थिमं पढमं ठाणं, महावीरेण देसियं ।**
**अहिंसा निउणा दिट्ठा, सव्वभूएहि संजमो ।।६.८।।**

**(ति.)** ते चागुणपरिहारेणाखण्डास्फुटिता भवन्तीत्यगुणास्तावदुच्यन्ते-दस'इति तत्रेदम्-अष्टादशसु स्थानेषु प्रथमं स्थानं महावीरेण देशितम् । किं तत्? अहिंसेति-इयमन्यैरप्युक्ता । परं निपुणा-आधाकर्मादिभोगत्यागेन सूक्ष्मा । स्वामिनैव दृष्टा-

साक्षाद् धर्मसाधकत्वेनोपलब्धा । अतोऽस्यामेव श्रीमहावीरदेशितायां सर्वभूतेषु-सर्वभूतविषयः । संयमः-नान्यत्र आधाकर्मादिभोगात् ।।६.८।।

**(स.)** गुणा अष्टादशस्थानेष्वखण्डास्फुटिताः कर्तव्याः, तत्र विधिमाह—तत्थिमं...इति-तत्राष्टादशविधस्थानगणे व्रतषट्के वा महावीरेण भगवतेदं वक्ष्यमाणलक्षणं प्रथमं स्थानमनासेवनद्वारेण देशितं कथितं, किं तत् ?-इत्याह-अहिंसा, न हिंसा अहिंसा जीवदया, इयं च सामान्यतः प्रभूतैर्दर्शितेत्यत आह, किंभूताऽहिंसा ? निपुणा, आधाकर्माद्यपरिभोगतः कृतकारितादिपरिहारेण सूक्ष्मा नागमद्वारेण देशिता, अपि तु दृष्टा साक्षाद्धर्मसाधनत्वेनोपलब्धा, किमितीयमेव निपुणा इत्याह-यतोऽस्यामेव महावीरदेशितायां सर्वभूतेषु सर्वभूतविषयः संयमो नान्यत्रोद्दिश्यकृतादिभोगविधानादिति ।।६.८।।

**(सु.)** गुणा अष्टादशसु स्थानेष्वखण्डास्फुटिताः कर्तव्याः, तत्र विधिमाह—तत्थिमं'इति, तत्राष्टादशविधे स्थानगणे व्रतषट्के वाऽनासेवनाद्वारेणेदं-वक्ष्यमाणलक्षणं प्रथमं स्थानं महावीरेण-भगवता अपश्चिमतीर्थकरेण देशितं-कथितं, यदुत-अहिंसेति। इयं च सामान्यतः प्रभूतैर्देशितेत्याह-निपुणा-आधाकर्म्माद्यपरिभोगतः कृतकारितादि-परिहारेण सूक्ष्मा, नागमद्वारेण देशिता अपि तु दृष्टा-साक्षाद्धर्म-साधन(क)त्वेनोपलब्धा, किमितीयमेव निपुणा ?-इत्याह-यतोऽस्यामेव महावीरदेशितायां सर्वभूतेषु-सर्वभूतविषयः संयमो, नान्यत्र उद्दिश्य-कृतादिभोगविधानादिति ।।६.८।।

**जावंति लोए पाणा, तसा अदुव थावरा ।**
**ते जाणमजाणं वा, न हणे नो हणावए ।।६.९।।**

**(ति.)** तदेव स्पष्टयन्नाह—यावन्तो लोके प्राणाः त्रसा अथवा स्थावराः । तान् जानन्-प्रयोजनेनापि। अजानन् वा-प्रमादेनापि । न हन्यात्, नापि घातयेत् । उभयग्रहणे तृतीयमनुक्तमपि लभ्यते । अतो घ्नतोऽप्यान्यान् नानुजानीयादित्यर्थः ।।६.९।।

**(स.)** एतदेव स्पष्टयन्नाह—जावन्तीति-यतो हि भगवत इयमाज्ञा यावन्तो लोके केचन प्राणिनस्त्रसा द्वीन्द्रियादयः, अथवा स्थावराः पृथिव्यादयः तान् जानन् रागाद्यभिभूतो व्यापादनबुद्ध्या अजानन् वा प्रमादपारतन्त्र्येण, साधुः तान् जीवान् न हन्यात् स्वयं, न चाभिघातयेदन्यैर्न च घ्नतोऽप्यन्यान् समनुजानीयादतो निपुणदृष्टेति।।६.९।।

**(सु.)** एतदेव स्पष्टयन्नाह—जावन्ति'इति, यतो हि भागवत्याज्ञा-यावन्तः केचन लोके प्राणिनस्त्रसा-द्वीन्द्रियादयः, अथवा स्थावराः-पृथिव्यादयः, तान् जानन् रागाद्यभिभूतो व्यापादनबुद्ध्या-ऽजानन् वा प्रमादपारतन्त्र्येण न हन्यात् स्वं, नापि घातयेत् अन्यैः, 'एकग्रहणे तज्जातीय-ग्रहणात्' घ्नतोऽपि अन्यान् न समनुजानीयात्, अतो निपुणदृष्टेति ।।६.९।।

**सव्वजीवा वि इच्छंति, जीविउं न मरिज्जिउं ।**
**तम्हा पाणिवहं घोरं, निग्गंथा वज्जयंति णं ।।६.१०।।**

**(ति.)** अहिंसैव कथं साध्वी ?-इत्याह—[सव्व...]—स्पष्टः ।।६.१०।।

**(स.)** नन्वहिंसैव कथं भव्या ?-इत्यत आह—सव्व इति-तस्मात् कारणान्निर्ग्रन्थाः साधवः प्राणवधं वर्जयन्ति, किंभूतं प्राणवधं? घोरम् रौद्रं दुःखहेतुत्वात्, तस्मात् कस्मात् ? यतः सर्वे जीवा अपि सुखितादिभेदभिन्ना जीवितुमिच्छन्ति, न मर्तुं. कथ ? प्राणवल्लभत्वात् तेषां सर्वेषां, णमिति वाक्यालङ्कारे. ।।६.१०।।

**(सु.)** अहिंसैव कथं साध्वी ? इत्येतदाह—सव्व...इति, सर्वे जीवा अपि दुःखितादिभेदभिन्ना इच्छन्ति जीवितुं, न मर्तुं प्राणवल्लभत्वाद् । यस्मादेवं, तस्मात् प्राणवधं घोरं-रौद्रं दुःखहेतुत्वात्, निर्ग्रन्थाः-साधवो वर्जयन्ति भावतः । णमिति वाक्यालङ्कारे इति ।।६.१०।।

**अप्पणट्ठा परट्ठा वा, कोहा वा जइ वा भया ।**
**हिंसगं न मुसं बूया, नो वि अन्नं वयावए ।।६.११।।**

**(ति.)** उक्तः प्रथमस्थानविधिः, द्वितीयविधिमाह—आत्मार्थम्-अग्लानोऽपि ग्लानोऽहं ममानेन कार्यमित्यादि । परार्थमप्येवमेव। क्रोधाद् वा-त्वं दास इत्यादि । एकग्रहणे तज्जातीयग्रहणमिति मानात्-अबहुश्रुतोऽप्यहं बहुश्रुत इत्यादि । मायातः भिक्षाटना-ऽऽलस्यात्-ममाद्य पीडेत्यादि । लोभात् स्वादिष्टान्नलाभे सति प्रान्तमेषणीयमप्यनेषणीय-मित्यादि[1] । यदि वा भयात्-कृतमप्यकृत्यमपलपति। एवं हास्यादेरपि । हिंसकाम्-

१. दि एवं २.४-९.११.१२ ।।

परपीडाकराम् । न मृषां ब्रूयात् । नाप्यन्यं वादयेत्-ब्रुवतोऽप्यन्यान् नानुजानीयात् ।।

**(स.)** उक्तः प्रथमस्थानविधिः, अथ द्वितीयस्थानविधिमाह—अप्प...इति-साधुर्मृषावचनं न ब्रूयात् स्वयमात्मना, नापि मृषा अन्यं वादयेत्, 'एकग्रहणे तज्जातीय-ग्रहणात् इतिन्यायेन, अन्यान् मृषा ब्रुवतो न समनुजानीयात्, किभूतं मृषा? हिंसकं परपीडाकारि, सर्वमेव किमर्थं न वदेत् ? आत्मार्थमात्मनिमित्तं, कथम ? अग्लान एव ग्लानोऽहं ममानेन कार्यमित्यादिरूपं, तथा परार्थं वा परनिमित्तं वा एवमेव पूर्ववत्. तथा क्रोधाद्वा 'त्वं दास' इत्यादिरूपम्, एकग्रहणेन तज्जातीयानां ग्रहणमितिन्यायात्, मानात्, कथम् ? 'अबहुश्रुत एवाहं बहुश्रुत' इत्यादिरूपं, मायातो वा, कथं ? भिक्षाटनस्यालस्येन मम पादपीडा वर्तत इत्यादिरूपं, लोभाद्वा, कथं ? शोभनतरस्यान्नस्य लाभे सत्यन्तप्रान्त(स्या)स्थाहारस्यैषणीयत्वेप्यनेषणीय-मिदमित्यादिरूपं, यदि वा भयात्, कथं ? किञ्चित् पापं कृत्वा प्रायश्चित्तभयान्न कृतं मयेति वदति, एवं हास्यादिष्वपि योजना कार्या ।।६.११।।

**(सु.)** उक्तः प्रथमस्थानविधिः, अधुना द्वितीयस्थानविधिमाह—अप्पट्ठा'इति, आत्मार्थ-आत्मनिमित्तं—अग्लान एव ग्लानोहं ममानेन कार्यमित्यादि, परार्थं वा-परनिमित्तं वा एवमेव, तथा क्रोधाद् वा 'त्वं दास' इत्यादि, एकग्रहणे तज्जातीयग्रहणमिति मानाद् वा, अबहुश्रुत एव-अहं बहुश्रुत एवमादि, मायातो भिक्षाटन-परिजिहीर्षया 'पादपीडा मम'इत्यादि, लोभात् शोभनतरान्नलाभे सति प्रान्तस्यैषणीयत्वेऽपि अनेषणीयमिदमित्यादि, यदिवा भयात् किंञ्चिद् वितथं कृत्वा प्रायश्चित्तभयान्न कृतमित्यादि, एवं हासादिष्वपि वाच्यम् । अत एवाह-हिंसकं-परपीडाकारि सर्वमेव न मृषा ब्रूयात् स्वयं, नाप्यन्यं वादयेत्, एकग्रहणे तज्जातीयग्रहणात् ब्रुवतोऽप्यन्यान् न समनुजानीयादिति ।।६.११।।

**मुसावाओ य लोयम्मि, सव्वसाहूहिं गरहिउओ ।**
**अविस्सासो य भूयाणं, तम्हा मोसं विवज्जए ।।६.१२।।**

**(ति.)** किमित्येतत् ? - इत्याह—स्पष्टः । नवरम् । भूतानाम्-प्राणिनाम् ।।६.१२।।

**(स.)** किमित्येतदेव मृषावदनं न ? - इत्याह—मुसा...इति-मृषावादो हि लोके सर्वस्मिन्नेव सर्वसाधुभिर्गर्हितो निन्दितोऽस्ति, सर्वत्र तापकारित्वात् प्रतिज्ञातस्या-

परिपालनात्, पुनर्मृषावादादविश्वास्योऽविश्वसनीयश्च भूतानां प्राणानां मृषावादी भवेत्, यस्मादेवं तस्मात् साधु मृषावादं विवर्जयेत् ।।६.१२।।

**(सु.)** किमिति एतद् ?-इत्याह—मुसावाओ'इति, मृषावादो हि लोके सर्वस्मिन्नेव सर्वसाधुभिर्गर्हितो-निन्दितः, सर्वव्रतापकारित्वात्, प्रतिज्ञातापालनात् अविश्वासश्च-अविश्वसनीयश्च भूतानां मृषावादी भवति, यस्मादेवं तस्मात् मृषावादं वर्जयेदिति ।।६.१२।।

**चित्तमंतमचित्तं वा, अणुं वा जइ वा बहुं ।**
**दंतसोहणमित्तं पि, उग्गहं से अजाइया ।।६.१३।।**

**(ति.)** उक्तो द्वितीयस्थानविधिः, तृतीयमाह—स्पष्टः । नवरम् । से-तस्य गृहस्थस्य ।।६.१३।।

**(स.)** उक्तो द्वितीयस्थानविधिः, साम्प्रतं तृतीयस्थानविधिमाह—चित्त...इति-साधवोऽयाचित्वा कदाचनापि न किमपि गृह्णन्ति, यतः साधूनां सर्वमवग्रहयाचने गृहस्थैर्दत्तं ग्राह्यं नान्यथा, किं तद् ? आह—चित्तवद् द्विपदादि, अचित्तवद् वा हिरण्यादि, अल्पं वा मूल्यतः प्रमाणतश्च, यदि वा बहु मूल्य-प्रमाणाभ्यामेव, किं बहुना? दन्तशोधनमात्रमपि तथाविधं तृणाद्यपि, एतावता साधवस्तृणाद्यप्यदत्तं न गृह्णन्ति, किमन्यत् ?।।६.१३।।

**(सु.)** उक्तो द्वितीयस्थानो विधिः। साम्प्रतं तृतीयस्थानविधिमाह—चित्तमंतं'इति, चित्तवत्-द्विपदादि वा अचित्तवद् वा-हिरण्यादि, अल्पं वा-मूल्यतः प्रमाणतश्च, यदि वा बहु-मूल्यप्रमाणाभ्यामेव, किं बहुना ? दन्तशोधनमात्रमपि तथाविधं तृणादि अवग्रहे यस्य तत् तमयाचित्वा न गृह्णन्ति साधवः कदाचनेति ।।६.१३।।

**तं अप्पणा न गिन्हंति, नो वि गिन्हावए परं ।**
**अन्नं वा गिन्हामाणं पि, नाणुजाणंति, संजया ।।६.१४।।**

**(ति.)** स्पष्टः ।।६.१४।।

**(स.)** पुनस्तदेवाह-तं'इति-संयताः तमिति तत् पूर्वोक्तं चित्तवदचित्तवदाद्यात्मना स्वयं न गृह्णन्ति विरतत्वात्, नापि परं प्रति ग्राहयन्ति विरतत्वादेव, तथान्यं वा गृह्णन्तमपि स्वयमेव न समनुजानन्ति नानुमन्यन्ते ।।६.१४।।

(सु.) एतदेवाह—तं'इति, तच्चित्तवदादि आत्मना न गृह्णन्ति विरतत्वात्, नापि ग्राहयन्ति परं विरतत्वादेव, तथाऽन्यं वा गृह्णन्तमपि स्वयमेव न अनुजानन्ति-नानुमन्यन्ते संयता इति ।।६.१४।।

**अबंभचरियं घोरं, पमायं दुरहिट्ठियं ।**
**नायरंति मुणी लोए, भेयाययणवज्जिणो ।।६.१५।।**

(ति.) उक्तस्तृतीयस्थानविधिः, चतुर्थमाह—अब्रह्मचर्यम्-प्रतीतम् । घोरम्-रौद्रं दुर्गतिहेतुत्वात् । किं विशिष्टं ? प्रमादम्-विषयाणां प्रमादरूपत्वात् । दुष्टैरधिष्ठीयते यत् तद् दुरधिष्ठम्-सुसाधूनामसेव्यम् । अतो नाचरन्ति-न सेवन्ते । मुनयः । लोके-जगति, वर्तमाना इति शेषः । भेदः-चारित्रस्य भेदः, सङ्गरूपः । तस्यायतनं स्थानं अब्रह्म । ततस्तद् वर्जिनः ।।६.१५।।

(स.) तृतीयस्थानविधिरुक्तः, अथ चतुर्थस्थानविधिमाह—अबंभेति-मुनयो लोके मनुष्यलोकेऽब्रह्मचर्यं प्रतीतं नाचरन्ति न सेवन्ते, किंभूतमब्रह्म ? घोरं रौद्रानुष्ठानहेतुत्वात्, पुनः किंभूतमब्रह्म ? प्रमादं प्रमादवत्. कथ ? सर्वदा प्रमादमूलत्वात्, पुनः किम्भूतमब्रह्म ? दुरधिष्ठितं दुराश्रयं दुःसेवं विदितजिनवचनेनानन्तसंसारहेतुत्वात्, यतश्चैवमत एव मुनयोऽब्रह्म न सेवन्त इत्यर्थः। किम्भूता मुनयः ? भेदायतनवर्जिनः, भेदश्चारित्र-भेदस्तस्यायतनं स्थानमिदमब्रह्मचर्यमेव, उक्तन्यायात्, तद्वर्जिनश्चारित्रातिचारभीरव इत्यर्थः ।।६.१५।।

(सु.) उक्तः तृतीयस्थानविधिः, चतुर्थस्थानविधिमाह—अबंभ...इति, अब्रह्मचर्यं प्रतीतं, घोरं-रौद्रं रौद्रानुष्ठानहेतुत्वात्, प्रमादं-प्रमादवत् सर्वप्रमादमूलत्वात्, दुरधिष्ठितं-दुराश्रयं दुस्सेवं विदितजिनवचनेनानन्तसंसारहेतुत्वात्, यतश्चैवम् ?-अतो नाचरन्ति-नासेवन्ते मुनयो, लोके-मनुष्यलोके, किं विशिष्टा ? इत्याह-भेदायतनवर्जिनः-भेदः-चारित्रभेदः तदायतनं-तत्स्थानमिदमेवोक्तन्यायात् तद्वर्जिनः चारित्रातिचारभीरव इति ।।६.१५।।

**मूलमेयमहम्मस्स, [1]महादोसमुस्सयं ।**
**तम्हा मेहुणसंसग्गं, निग्गंथा वज्जयंति णं ।।६.१६।।**

१. महादोषनुं उत्पत्तिस्थान १० टि. ।।

**(ति.)** एतदेव निगमयति—स्पष्टः । नवरम् । महादोषाणां-चौर्यप्रवृत्यादीनां, समुच्छ्रयः-उन्नतिर्यत्र तं महादोषसमुच्छ्रयम् ।।६.१६।।

**(स.)** अथ एतदेव निगमयति-मूलं...इति-णमिति वाक्यालङ्कारे. निर्ग्रन्थाः साधवस्तस्मात्कारणान्मैथुनसंसर्गं मैथुनसम्बन्धं योषित आलापाद्यपि वर्जयन्ति, तस्मात् कस्मात् ? यत एतत् अब्रह्मसेवनम्, अधर्मस्य पापस्य मूलं बीजमिति परलोकसम्बन्ध्यपायः, कष्टं पुनरेतन्महादोषसमुच्छ्रयं, महतां दोषाणां चौर्यप्रवृत्त्यादीनां समुच्छ्रयं सङ्घातवदितीहलोकसम्बन्ध्यपायः, कष्टमित्युभयलोककष्टदातृत्वान्मैथुनवर्जनं युक्तं साधूनाम् ।।६.१६।।

**(सु.)** एतदेव निगमयति—मूलमेयं'इति, मूलं-बीजमेतदधर्मस्य पापस्येति पारलौकिकोऽपायः । महादोष-समुच्छ्रयं महतां दोषाणां चौर्यप्रवृत्त्यादीनां समुच्छ्रयं-सङ्घातवदिति ऐहिकोऽपायः । यस्मादेवं तस्मान्मैथुनसंसर्गं इति प्राकृतत्वात्, मैथुनसंसर्गं-मैथुनसम्बन्धं योषिदालापाद्यपि निर्ग्रन्था वर्जयन्ति, णमिति वाक्यालङ्कार इति ।।६.१६।।

**बिडमुब्भेइमं लोणं, तिल्लं सप्पिं च फाणियं ।**
**न ते संनिहिमिच्छंति, नायपुत्तवओरया ।।६.१७।।**

**(ति.)** उक्तश्चतुर्थस्थानविधिः, पञ्चममाह—बिडम्-पक्वम्, अग्नितापादिना प्रासुकम । उद्भेदिमम्-उद्भेदाज्जातम्, सामुद्रम् अप्रासुकं द्विधापि लवणम् । तैलम्। सर्पिः-घृतम् । फाणितम्-गुडम् । इत्यादि । न ते - साधवः । सन्निधिम् इच्छन्ति-कर्तुं न वाञ्छन्ति । ज्ञातपुत्रवचसि रताः ।।६.१७।।

**(स.)** चतुर्थस्थानविधिः प्रोक्तः, अथ पञ्चमस्थानविधिमाह—बिडं...इति-साधव एतेषां सन्निधिं न कुर्वन्ति पर्युषितं, कोऽर्थः ? रात्रौ रक्षितं न स्थापयन्ति, किं विशिष्टाः साधवः ? ज्ञातपुत्रवचोरताः, ज्ञातपुत्रः श्रीवर्धमानस्वामी, तस्य वचने निस्सङ्गताप्रतिपादनतत्परे रता आसक्ताः, केषां सन्निधिं न कुर्वन्ति ? - तान्याह-बिडं गोमूत्रादिपक्वम्, उद्भेद्यं सामुद्रादि, बिडं प्रासुकमुद्भेद्यमप्रासुकमित्येवं द्विप्रकारं लवणं, तथा तैलं, सर्पिश्च घृतं, फाणितं द्रवगुडः, एतच्च लवणाद्यप्येवं द्विप्रकारमन्यच्च रात्रौ न रक्षन्तीत्यर्थः ।।६.१७।।

**(सु.)** प्रतिपादितश्चतुर्थस्थानविधिः, इदानीं पञ्चमस्थानविधिमाह—विडमु...इति,

बिडं-गोमूत्रादिपक्वं, उद्भेद्यं-सामुद्रादि, यद्वा बिडं-प्रासुकं उद्भेद्यमप्रासुकमपि, एवं द्विप्रकारं लवणं, तथा तैलं सर्प्पिश्च फाणितं, तत्र तैलं प्रतीतं, सर्प्पिः-घृतं, फाणितं-द्रवगुडः, एतल्लवणादि एवं प्रकारमन्यच्च न ते साधवः संनिधिमिच्छन्ति-पर्युषितं स्थापयन्ति, ज्ञातपुत्रवचोरताः-भगवद्वर्धमानवचसि निस्सङ्गताप्रतिपादनपरे रताः-सक्ता इति ।।६.१७।।

**लोभस्सेस-ऽणुफासो, मन्ने अन्नयरामवि ।**
**जे सया सन्निही कामे, गिही पव्वइए न से ।।६.१८।।**

**(ति.)** सन्निधिदोषमाह—लोभस्यैषोऽणुस्पर्शः-लोभांशो यत्सन्निधिकरणम् । अतो मन्ये-अहम् । अन्यतरमपि-स्तोकमपि । यः सदा सन्निधिं कामयते स गृही । प्रव्रजितो न सः ।।६.१८।।

**(स.)** अथ सन्निधिदोषमाह—लोह...इति लोभस्य चारित्रविघ्नकारिणश्चतुर्थ-कषायस्यैषोऽनुस्पर्श एषोऽनुभावो यदुत सन्निधीकरणमिति, यतश्चैवमतो मन्ये मन्यन्ते प्राकृतशैल्या एकवचनम्, एवं तीर्थकरगणधरा आहुः—अन्यतरां(रं) स्तोका(क)मपि यः स्यात्, यः कदाचित् सन्निधिं कामयते सेवते कामी, अतः स भावतो गृही गृहस्थः, नासौ प्रव्रजितः, कस्मात् ? दुर्गतिनिमित्तानुष्ठानप्रवृत्तेः, सन्निधीयते नरकादिष्वात्मानेनेति सन्निधिरिति शब्दार्थात्, प्रव्रजितस्य च दुर्गतिगमनाभावादिति ।।६.१८।।

**(सु.)** संनिधिदोषमाह—लोहस्स'इति, लोभस्य-चारित्रविघ्नकारिणश्चतुर्थकषाय-स्यैषो-ऽनुस्पर्शः-एषोऽनुभावो यदुत एतत् सन्निधिकरणमिति, यतश्चैवमतो [ऽहं]-मन्ये, मन्यन्ते प्राकृतशैल्या एकवचनं, एवमाहुः तीर्थकरगणधराः, अन्यतरा(रं)मपि-स्तोका(कं)मपि यः स्यात्, यः कदाचित् संन्निधिं कामयते-सेवते गृहीति-गृहस्थोऽसौ, भावतः प्रव्रजितो नेति, दुर्गतिनिमित्तानुष्ठानप्रवृत्तेः, सन्निधीयते नरकादिष्वात्माऽनयेति, सन्निधिरिति शब्दार्थात् प्रव्रजितस्य च दुर्गतिगमनाभावादिति ।।६.१८।।

**जं पि वत्थं व पायं वा, कंबलं पायपुंछणं ।**
**तं पि संजमलज्जट्ठा, धारिंति परिहरंति य ।।६.१९।।**

**(ति.)** तर्हि वस्त्रादि धारयतां साधूनां कथं न सन्निधिः ? इत्याह—यदपि वस्त्रं

वा, पात्रं वा, कम्बलं, पादप्रोञ्छनम्, तदपि । संयमलज्जार्थम्-संयमार्थं पात्रादि, लज्जार्थं लज्जनीयाङ्गाच्छादनार्थं वस्त्रम् । धारयन्ति परिहरन्ति च-कारणे परिहरन्ति, परिभुञ्जते मूर्च्छारहिता इति ।।६.१९।।

**(स.)** अत्राह-यद्येवं वस्त्रादि धारयतां साधूनां कथं न सन्निधिरित्याह—जं पि'इति-साधवो यद्यप्यागमोक्तं वस्त्रं वा चोलपट्टादि वा १, पात्रं वाऽलांब्वादि २. कम्बलं वर्षाकल्पादि ३, पादप्रोञ्छनं रजोहरणं ४ धारयन्ति पुष्टालम्बनविधानेन, परिहरन्ति च परिभुञ्जते च मूर्छारहिताः, तदपि किमर्थं ? संयमलज्जार्थं संयमार्थं पात्रादि, तद्व्यतिरेकेण पुरुषमात्रेण गृहभाजने सति संयमपालनाभावात्, लज्जार्थं वस्त्रं, तद्व्यतिरेकेणाङ्गनादौ विशिष्टश्रुतपरिणत्यादिरहितस्य निर्लज्जताया उत्पत्तेः, अथवा संयम एव संयमलज्जा, तदर्थं सर्वमेव वस्त्रादि धारयन्तीत्यादि ।।६.१९।।

**(सु.)** आह-यद्येवं वस्त्रादि धारयतां कथं साधुनामसन्निधिरित्याह—जं पि'इति, यदप्यागमोक्तं, वस्त्रं वा-चोलपट्टकादि, पात्रं वा-अल(लं)बुकादि, कम्बलं-वर्षाकल्पादि, पादपुञ्छनं-रजोहरणं, तदपि संयमलज्जार्थमिति, संयमार्थं पात्रादि, तद्व्यतिरेकेण पुरुषमात्रेण गृहस्थभाजने सति संयमपालनाभावात्, लज्जार्थं वस्त्रं, तद्व्यतिरेकेणाङ्गनादौ विशिष्टश्रुतपरिणत्यादिरहितस्य निर्लज्जतोपपत्तेः, अथवा संयम एव लज्जा संयमलज्जा तदर्थं सर्वमेतद् वस्त्रादि धारयन्ति, पुष्टालम्बनविधानेन परिहरन्ति च-परिभुञ्जते च मूर्च्छारहिता इति ।।६.१९।।

**न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा ।**
**मुच्छापरिग्गहो वुत्तो, ईई वुत्तं महेसिणा ।।६.२०।।**

**(ति.)** यतश्चैवं ? अतः—पूर्वार्धं स्पष्टम् । उत्तरार्धस्यार्थः । मूर्च्छा परिग्रहः श्रीवीरेण उक्तः । इत्युक्तं सूत्रे । मर्हर्षिणा-**श्रीसुधर्मस्वामि**ना ।।६.२०।।

**(स.)** न...इति-यतश्चैवं, ततो महर्षिणा **शय्यंभवेन गणधरेण** सूत्र इत्युक्तं, इतीति किं ? ज्ञातपुत्रेण ज्ञातः प्रधानः क्षत्रियः **सिद्धार्थः**, तस्य पुत्रेण **वर्धमानस्वामिना**, नासौ निर्ममत्वेन वस्त्रधारणादिलक्षणः परिग्रह उक्तोऽर्थतः, कस्मात् ? बन्धहेतुत्वाभावात्, किम्भूतेन ज्ञातपुत्रेण ? ताइणा त्रात्रा, स्वपरत्राणसमर्थेन, अपि तु कः परिग्रहो महावीरेणार्थतः प्रोक्तः ?-इत्याह मूर्छा परिग्रह उक्तः, असत्स्वपि वस्त्रादिषु लौल्यं,

कुतः? बन्धहेतुत्वात्. शिष्यः प्राह-ननु वस्त्रादीनामभावेऽपि यदि मूर्च्छा तदा वस्त्रादिसद्भावे सति कथं न मूर्छा ? उच्यते, साधूनां सम्यग्बोधेन मूर्च्छाया बीजभूतस्याबोधस्योपघातात् ।।६.२०।।

**(सु.)** यतश्चैवं ? - अतः—न सो'इति, नासौ निरभिष्वङ्गस्य वस्त्रधारणादिलक्षणः परिग्रह उक्तो बन्धहेत्वभावात्, केन ?, ज्ञातपुत्रेण-ज्ञात-उदारक्षत्रियः सिद्धार्थः, तत्पुत्रेण वर्धमानेन, त्रात्रा-स्वपरपरित्राणसमर्थेन, अपि तु मूर्च्छा-असत्स्वपि वस्त्रादिष्वभिष्वङ्गः परिग्रह उक्तो बन्धहेतुत्वात्, अर्थतस्तीर्थकरेण, ततोऽवधार्य इत्येवमुक्तो महर्षिणा-गणधरेण सूत्रे **शय्यंभवे**नेति ।।६.२०।।

**सव्वत्थुवहिणा बुद्धा, संरक्खणपरिग्गहे ।**
**अवि अप्पणो वि देहंमि, नायरंति ममाइयं ।।६.२१।।**

**(ति.)** प्रायो वस्त्राद्यभावेऽपि तृष्णया मूर्च्छा भवति । [वस्त्रादि] भावे साधूनां कथं न मूर्च्छेत्याह—सर्वत्र-उचितक्षेत्रे काले वा । उपधिना-आगमोक्तेन वस्त्रादिना सतापि, बुद्धा-ज्ञाततत्त्वाः साधवः, संरक्षणाय-षण्णां जीवनिकायानां, वस्त्रादिपरिग्रहः संरक्षणपरिग्रहः । तस्मिन्, एकोऽपि शब्दश्चार्थे, ततो न केवलं संरक्षणपरिग्रहे आत्मनोऽपि च देहे, नाचरन्ति ममायितम्-ममत्वम् ।।६.२१।।

**(स.)** सव्व'इति-बुद्धा यथावद् ज्ञाततत्त्वाः साधवः संरक्षणपरिग्रहे संरक्षणाय षण्णां जीवनिकायानां परिग्रहे सत्यपि नाचरन्ति ममत्वमित्युक्तियोजना, केन ? सर्वत्रोपधिना, सर्वत्र योग्ये क्षेत्रे काले चोपधिनागमोक्तेन वस्त्रादिना, कुतः ? ते परिग्रहे वस्त्रादिरूपे ममत्वं न कुर्वन्तीत्याह-यतस्ते भगवन्त आत्मनोऽपि देह आत्मनो धर्मकायेऽपि ममत्वमात्मीयाभिमानं विशिष्टप्रतिबन्धसङ्गतिं न कुर्वन्ति वस्तुनस्तत्त्वस्य ज्ञानात्, किंभूतेन वस्त्रादिना ? तिष्ठतु दूरे तावदन्यत् सर्वं, देहवत् परिग्रहेऽपि न ममत्वमात्मीयाभिमानं विशिष्टप्रतिबन्धसङ्गतिं न कुर्वन्ति ।।६.२१।।

**(सु.)** आह-वस्त्राद्यभावभाविन्यपि मूर्च्छा कथं वस्त्रादिभावे साधूनां न भविष्यति ?, उच्यते, सम्यग्बोधेन तद्बीजभूताबोधोपघाताद्, आह च-सव्वत्थ...इति, सर्वत्र-उचिते क्षेत्रे काले च, उपधिनाऽऽगमोक्तेन वस्त्रादिना सहापि बुद्धा-यथावद्

विदितवस्तुतत्त्वाः साधवः, संरक्षणपरिग्रह इति-संरक्षणाय षण्णां जीवनिकायानां वस्त्रादिपरिग्रहे सत्यपि नाचरन्ति ममत्वमिति योगः । किंचानेन ?, ते हि भगवन्तः, अप्यात्मनोऽपि देह इति-आत्मनो धर्मकायेऽपि विशिष्टप्रतिबन्धसंगतिं न कुर्वन्ति, ममत्वमात्मीयाभिमानं वस्तुतत्त्वावबोधात्, तिष्ठतु तावदन्यत्, ततश्च देहवदपरिग्रह एवेति ।।६.२१।।

**अहो निच्चं तवा[1]कम्मं, सव्वबुद्धेहिं वन्नियं ।**
**जा य लज्जा समा[2]वत्ती, एग्गभत्तं च भोयणं ।।६.२२।।**

**(ति.)** उक्तः पञ्चमस्थानविधिः, षष्ठमह—अहो-विस्मये । नित्यम्-नित्यकृत्यं । तपःकर्म-तपःप्रधानं कर्म क्रियाकलापः। सर्वबुद्धैः-सर्वैर्जिनैः । वर्णितम्-कथितम् । या च लज्जा प्रतिपन्नाऽनिर्वाहे व्रीडा । समा-समभावा, वृत्तिः-वर्तनम् । एकभक्तं च भोजनम्-एकम्-एकवेलं, भक्तम्-अशनखाद्यरूपं, यत्र भोजने तदेकभक्तं, न पुनः स्वादिमजले अप्येकवेलं, ते अपि दिवसे एव न रात्रौ ।।६.२२।।

**(स.)** उक्तः पञ्चमः स्थानविधिः, अधुना षष्ठस्थानविधिमाह—अहो इति-अहो इत्याश्चर्ये, तपःकर्म तपोऽनुष्ठानं सर्वतीर्थकरैर्वर्णितं देशितं, किंविशिष्टं तपःकर्म ? नित्यमपायस्याभावेन गुणवृद्धिसंभवादप्रतिपात्येव, किंविशिष्टं तप ? - इत्याह-या च वृत्तिर्वर्त्तनं देहपालना, किम्भूता वृत्तिः ? लज्जासमा लज्जा संयमस्तेन समा सदृशी तुल्या, संयमाविरोधिनीत्यर्थः । च पुनरेकं भक्तं भोजनमेकभक्तं द्रव्यतो भावतश्च यस्मिन् भोजने तत्तथा, तत्र द्रव्यत एकं एकसङ्ख्यानुगतं, भावत एकं कर्मबन्धस्या-भावेनाद्वितीयं, तद् दिवस एव रागादिरहितस्य. अन्यथा भावत एकत्वस्याभावादिति ।।६.२२।।

**(सु.)** उक्तः पञ्चमस्थानविधिः, अधुना षष्ठमधिकृत्याह—अहो'इति, अहो नित्यं तपःकर्म्मेति, अहो-विस्मये नित्यं नाम-अपायाभावेन तदन्यगुणवृद्धिसम्भवादप्रतिपात्येव तपःकर्म्म-तपोऽनुष्ठानं, सर्वबुद्धैः-सर्वतीर्थकरैर्वर्णितं-देशितं, किंविशिष्टम् ?-इत्याह-यावल्लज्जासमा वृत्तिः-लज्जा-संयमः तत्समा-सदृशी तुल्या संयमाविरोधिनीत्यर्थः, वर्त्तनं वृत्तिः-देहपालना, एकभक्तं च भोजनं-एकं भक्तं—द्रव्यतो भावतश्च यस्मिन्

१. ०ओ ६-१०.१२ ।। २. ०वि. ६-१२ ।।

भोजने तत्तथा, द्रव्यत एकं-एकसंख्यानुगं, भावत एकं कर्मबन्धाभावाद-द्वितीयं, तद् दिवस एव रागादिरहितस्यान्यथा भावतः एकत्वाभावादिति ।।६.२२।।

**संतिमे सुहुमा पाणा, तसा अदुव थावरा ।**
**जाइं राओ अपासन्तो, कहमेसणियं चरे ? ।।६.२३।।**

**(ति.)** रात्रिभोजने दोषमाह—सन्ति इमे-प्रत्यक्षाः । प्राणाः । त्रसा अथवा स्थावराः, जाइं'इति-ये सूक्ष्मा जीवाः । प्राकृतत्वाल्लिङ्गव्यत्ययः । "यत्तदोर्नित्यसम्बन्धात्" तानिति गम्यम् । तान् जीवान् रात्रावपश्यन् कथमेषणीयं चरेत्-रात्रावीर्याशुद्धिरेव नास्ति ।।६.२३।।

**(स.)** अथ रात्रिभोजने प्राणानामतिपातसम्भवेन कर्मबन्धेन सह सद्वितीयतां दर्शयति—संति...इति-इमे एते प्रत्यक्षमुपलभ्यमानस्वरूपाः प्राणिनः सन्ति जीवा वर्तन्ते, किंविशिष्टाः प्राणिनः? सूक्ष्माः श्लक्ष्णाः, के ते ? त्रसा द्वीन्द्रियादयः अथवा स्थावराः पृथिव्यादयः, यान् प्राणिनो रात्रौ चक्षुषा अपश्यन् साधुः कथमेषणीयं चरिष्यति भोक्ष्यते ? असम्भव एषणीयस्य रात्रौ, कथं ? सत्त्वानां घातात् ।।६.२३।।

**(सु.)** रात्रिभोजने प्राणातिपातसम्भवेन कर्मबन्धसद्वितीयतां दर्शयति-संतिमे'इति, सन्त्येते-प्रत्यक्षोपलभ्यमानस्वरूपाः सूक्ष्माः-श्लक्ष्णाः, प्राणिनो-जीवाः, त्रसा-द्वीन्द्रियादयः, अथवा स्थावराः-पृथिव्यादयो यान् प्राणिनो रात्रावपश्यन् चक्षुषा कथमेषणीयं-सत्त्वानुपरोधेन चरिष्यति-भोक्ष्यते च, असम्भव एव रात्रावेषणीयचरणस्येति ।।६.२३।।

**उदउल्लं बीयसंसत्तं, पाणा निवडिया महिं ।**
**दिया ताइं विवज्जिज्जा, राओ तत्थ कहं चरे ।।६.२४।।**

**(ति.)** पुनस्तद्दोषमाह—उदकार्द्रम्-बीजसंसक्तं-बीजमिश्रमोदनादि, अथवा बीजानि पृथक् संसक्तं-संसक्तिमद् धान्यादि । प्राणाः-सम्पातिमादयः । मह्यम्-निशि निपतिताः सम्भवन्ति। दिवा तानुकार्द्रादीन् वर्जयेत्, रात्रौ तत्र-अचक्खुर्विषये । कथं चरेत् ।।६.२४।।

**(स.)** एवं रात्रिभोजने दोषं कथयित्वा ग्रहणगतं दोषमाह—उद...इति-एतान्युदकार्द्रादीनि दिवा पापभीरुश्चक्षुषा पश्यन् विवर्जयेत्, परं रात्रौ तु तत्र कथं

चरति संयमस्यानुपरोधेन ? असम्भव एव शुद्धचरणस्य, कानि तान्युदकार्द्रादीनि ? इत्याह—उदकार्द्रं पूर्ववत्, एकग्रहणेन तज्जातीयानां सस्निग्धादीनां ग्रहणं, तथा बीजसंसक्तं बीजेन संसक्तं मिश्रं तदोदनादिकमिति शेषः, अथवा बीजानि पृथग्भूतान्येव, संसक्तं चा-ऽऽरनालाद्यपरेण मिश्रं, तथा प्राणिनः संपातिमप्रभृतयो मह्यां पृथिव्यां निपतिताः संभवन्ति. तत उदकार्द्रादीनि रात्रावनालोकनेन वर्जयितुमशक्यत्वेन विशेषतः साधोश्चरणाभावः ।।६.२४।।

**(सु.)** एवं रात्रिभोजने दोषमभिधायाधुना ग्रहणगतमाह—उदउल्लंइति, उदकार्द्र-पूर्ववदेकग्रहणे तज्जातीयग्रहणात् सस्निग्धादि-परिग्रहः । तथा बीजसंसक्तं-बीजैः संसक्तं-मिश्रमोदनादीति गम्यते । अथवा बीजानि पृथग्भूतान्येव संसक्तं चा-ऽऽरनालाद्यपरेणेति । तथा प्राणिनः संपातिमप्रभृतयो निपतिता मह्यां-पृथिव्यां सम्भवन्ति । ननु दिवाप्येतत् सम्भवत्येव ?, सत्यं, किंतु परलोकभीरुश्चक्षुषा पश्यन् दिवा तान्युदकार्द्रादीनि विवर्जयेत्, रात्रौ तु तत्र कथं चरेत् संयमानुपरोधेन ? असम्भव एव शुद्धचरणस्येति ।।६.२४।।

**एयं च दोस दट्ठूणं, नायपुत्तेण भासियं ।**
**सव्वाहारं न भुंजंति, निग्गंथा राइभोयणं ।।६.२५।।**

**(ति.)** इदमुपसंहरन्नाह—एतं दोषम्-प्राणिहिंसारूपं, आत्मविराधनालक्षणम् च दृष्ट्वा ज्ञातपुत्रेण भाषितम् । सर्वाहारम्-चतुर्विधमप्यशनादि न भुञ्जन्ते निग्रन्थाः-साधवः । रात्रिभोजनम् ।।६.२५।।

**(स.)** अथैनमधिकारं पूर्णं कुर्वन्नाह—एअं...इति-निर्ग्रन्थाः साधवः सर्वाहारं चतुर्विधमप्यशनादिकमाश्रित्य रात्रिभोजनं न भुञ्जते, किं कृत्वा ? एतं पूर्वोक्तं प्राणिहिंसारूपं चशब्दादन्यमात्मविराधनादिलक्षणं दोषं चक्षुषा दृष्ट्वा, किंभूतं दोष ? ज्ञातपुत्रेण श्रीमहावीरदेवेन भगवता भाषितं कथितम् ।।६.२५।।

**(सु.)** उपसंहरन्नाह—एयं च'इति, एतदनन्तरोदितं प्राणिहिंसारूपं चशब्दादन्यं चात्मविराधनादिलक्षणं च दोषं दृष्ट्वा मतिचक्षुषा ज्ञातपुत्रेण भगवता भाषितं-उक्तं, सर्वाहारं-चतुर्विधमप्यशनादि-लक्षणमाश्रित्य न भुञ्जन्ते निर्ग्रन्थाः-साधवो रात्रिभोजनमिति ।।६.२५।।

**पुढविकायं न हिंसंति, मणसा वयसा कायसा ।**
**तिविहेण करणजोएणं, संजया सुसमाहिया ।।६.२६।।**

**(ति.)** उक्तं व्रतषट्कम्, अधुना कायषट्कमुच्यते । तत्र पृथ्वीकायमधिकृत्याह— पृथ्वीकायं न हिंसन्ति । मनो-वचन-कायैः । त्रिविधेन करणयोगेन - करणकारणानुमतिरूपेण । संयताः । सुसमाहिताः-सुष्ठु समाधानभाजः ।।६.२६।।

**(स.)** एवं व्रतषट्कं कथितं, अथ कायषट्कं कथ्यते, तत्र पूर्वं पृथिवीकायमाश्रित्याह- पुढवीति-संयताः साधवः पृथिवीकायं न हिंसन्त्यालेखनादिप्रकारेण, केन ? मनसा वाचा कायेन, उपलक्षणमेतदित्याह-त्रिविधेन करणयोगेन मनःप्रभृतिभिः करणकारणानुमोदनारूपेण, किंभूताः संयताः ? सुसमाहिता उद्युक्ताः ।।६.२६।।

**(सु.)** उक्तं व्रतषट्कं, अधुना कायषट्कमुच्यते, तत्रपृथिवीकायमधिकृत्याह— पुढवि'इति, पृथिवीकायं न हिंसन्त्यालेखनादिना प्रकारेण मनसा वाचा कायेन, उपलक्षणमेतदत एवाह-त्रिविधेन करणयोगेन-मनःप्रभृतिभिः करणादिरूपेण, के न हिंसन्तीत्याह-संयताः-साधवः, सुसमाहिता-उद्युक्ता इति ।।६.३६।।

**पुढविकायं विहिंसंतो, हिंसई उ तयस्सिए ।**
**तसे य विविहे पाणे, चक्खुसे य अचक्खुसे ।।६.२७।।**

**(ति.)** अत्रैव हिंसादोषमाह—पृथ्वीकायं विहिंसन् हिनस्त्येव । तुशब्द-एवार्थे । तदाश्रितान्-पृथ्वीकायाश्रितान् । त्रसांश्च-चकारात् स्थावरांश्च । विविधान् प्राणिनः। चाक्षुषांश्च-चक्षुरिन्द्रियग्राह्यानग्रांश्च ।।६.२७।।

**(स.)** अत्रैव हिंसादोषमाह—पुढ...इति-साधुः पृथिवीकायमालेखनादिना प्रकारेण हिंसन् तु निश्चयेन हिनस्त्येव. कानित्याह-प्राणान् द्वीन्द्रियादीन्, किंविधान्? अनेकप्रकारान् त्रसान् चशब्दात्स्थावरानप्कायादीन्, किंभूतान् प्राणान् ? तदाश्रितान् पृथिवीसमाश्रितान्, पुनः किंभूतान् प्राणान् ? चाक्षुषान् चक्षुर्ग्राह्यान् कांश्चित्, पुनः किंभूतान् प्राणान् ? अचाक्षुषान् चक्षुरिन्द्रियेणा-ग्राह्यान्. ।।६.२७।।

**(सु.)**अत्रैव हिंसादोषमाह—पुढवि...इति, पृथिवीकायं हिंसन्नालेखा(खना)दिना प्रकारेण हिनस्त्येव, तुरवधारणार्थो व्यापादयत्येव तदाश्रितान्-पृथिव्याद्याश्रितान् त्रसांश्च

विविधान् प्राणिनो-द्वींद्रियादीन् चशब्दात् स्थावरांश्चाप्कायादीन्, तांश्च चाक्षुषान-चाक्षुषांश्च-चक्षुरिन्द्रियग्राह्यानग्राह्यांश्चेति ।।६.२७।।

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**पुढविकायसमारंभं, जावज्जीवाइ वज्जए ।।६.२८।।**

**(ति.)** निगमयन्नाह—[तम्हा...] स्पष्टः । नवरम् । समारम्भम्-घट्टन-मर्दनादिकम् ।।६.२८।।

**(स.)** यस्मादेवं, ततः किं साधुना कर्तव्यम् ? इत्याह-तम्हा'इति-यस्मादेवं तस्मात् पृथिवीकायसमारंभमालेखनादिना यावज्जीवं साधुर्वर्जयेत्, किं कृत्वा ? एतं पूर्वोक्तं दोषं विज्ञाय पृथिव्याश्रितजीवहिंसालक्षणं दूषणं ज्ञात्वा, किंभूतं दोषं ? दुर्गतिवर्धनं संसारवर्धनम्. ।।६.२८।।

**(सु.)** यस्मादेवं तम्हा'इति, तस्मादेवं विज्ञाय दोषं तत्तदाश्रितजीवहिंसादिलक्षणं दुर्ग्गतिवर्धनं-संसारवर्धनं पृथिवीकायसमारम्भमालेखनादि यावज्जीवमेव वर्जयेदिति विधिः ।।६.२८।।

**आउक्कायं न हिंसंति, मणसा वयस कायसा ।**
**तिविहेण करणजोएणं, संजया सुसमाहिया ।।६.२९।।**

**आउक्कायं विहिंसंतो, हिंसई उ तयस्सिए ।**
**तसे य विविहे पाणे, चक्खुसे य अचक्खुसे ।।६.३०।।**

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**आउक्कायसमारंभं, जावज्जीवाइ वज्जए ।।६.३१।।**

**(ति.)** उक्तः सप्तमस्थानविधिः, अष्टममाह—त्रयमपि प्राग्वत् ।।६.२९-३१।।

**(स.)** सप्तमस्थानविधिरुक्तः, अथाष्टमस्थानविधिः कथ्यते—आउकायमिति-इदं गाथात्रयं, पृथिवीकायगाथात्रयं यथा पूर्वं व्याख्यातं तथा व्याख्येयं, नवरं तत्र पृथिवीनाम्ना, अत्राप्कायनाम्ना. ।।६.२९-३१।।

**(सु.)** अधुनाऽष्टमस्थानविधिमधिकृत्योच्यते-आउक्कायं'इत्यादि, सूत्रत्रयमप्कायाभिलापेन ज्ञेयं ततश्चायमप्युक्त एव ।।६.२९-३१।।

**जायतेयं न इच्छंति, पावगं जलइत्तए ।**
**तिक्खमन्नयरं सत्थं, सव्वओ वि दुरासयं ।।६.३२।।**

**(ति.)** उक्तमष्टमं नवमाह—जाततेजसं पावकम्-अग्निम् । ज्वालयिम्-उत्पादयितुं, वृद्धिं नेतुम् । न इच्छन्ति । तीक्ष्णम् अन्यतरद्-एकं पृथ्व्यादीन् प्रति । शस्त्रं सर्वतोऽपि-समन्तादपि । ज्वालारूपत्वाद् दुराश्रयम्-अनाश्रयणीयमित्यर्थः ।।६.३२।।

**(स.)** साम्प्रतं नवमस्थानविधिं कथयति—जाय...इति-साधवः जाततेजसमग्निकायं मनःप्रभृतिभिरपि ज्वलयितुमुत्पादयितुं वृद्धिं प्रापयितुं नेच्छन्ति, किंभूतं जाततेजसं ? पापकं पाप एव पापकस्तं, कथं ? प्रभूतजीवसंहारकारकत्वात्, पुनः किंभूतं जाततेजसं? तीक्ष्णं छेदकरणस्वरूपमन्यतरं शस्त्रमेकधारादिशस्त्ररूपं न, किन्तु सर्वतो धारशस्त्रम्, अत एव सर्वतोऽपि दुराश्रयं सर्वतोधारत्वेनानाश्रयणीयमित्यर्थः ।।६.३२।।

**(सु.)** सांप्रतं नवमस्थानविधिमाह—जायतेयं'इति-जाततेजाः-अग्निः, तं जाततेजसं, नेच्छन्ति, मनःप्रभृतिभिरपि पापकं पाप एव पापकः, तं, प्रभूतसत्त्वापकारित्वेनाशुभमित्यर्थः। किं नेच्छन्तीत्याह-ज्वालयितुं-उत्पादयितुं वृद्धिं वा नेतुं, किंविशिष्टमित्याह-तीक्ष्णं-छेदकरणात्मकं, अन्यतरशस्त्रं-सर्वशस्त्रं, एकधारादिशस्त्रव्यवच्छेदेन सर्वतोधारशस्त्रकल्पमिति भावः। अत एव सर्वतोऽपि दुराश्रयं सर्वतोधारत्वेनानाश्रणीयमिति ।।६.३२।।

**पाईणं पडिणं वा वि, उड्ढं अणुदिसामवि ।**
**अहे दाहिणओ वा वि, दहे उत्तरओ वि य ।।६.३३।।**

**(ति.)** एतदेव स्पष्टयन्नाह—प्राचीनं प्रतीचीनं वाऽपि-पूर्व-पश्चिमयोर्यदस्ति । ऊर्ध्वम्-ऊर्ध्वदिशि । अनुदिक्षु-सप्तम्यर्थे षष्ठी, विदिक्ष्वपीत्यर्थः । अधो, दक्षिणतश्चापि दहति दाह्यम् । उत्तरतोऽपि च-सर्वासु दिक्षु विदिक्षु वा आसन्नं दाह्यं दहतीत्यर्थः ।।६.३३।।

**(स.)** एतत् एव स्पष्टं कुर्वन्नाह-पाइणं'इति-अग्निरिति शेषः । प्राच्यां पूर्वस्यां

दिशि, तथा प्रतीच्यां पश्चिमायां दिशि, ऊर्ध्वम्, 'अणुदिसामवि' सप्तम्यर्थे षष्ठी, अध इत्यधोदिशि, पुनर्दक्षिणतश्चापि, [उत्तरतोऽपि] दाह्यं वस्तु दहति भस्मसात्करोति, सर्वासु दिक्षु विदिक्षु च जीवसंहारं करोतीत्यर्थः ।।६.३३।।

**(सु.)** एतदेव स्पष्टयन्नाह—पाईणं'इति, प्राच्यां प्रतीच्यां वापि-पूर्वायां पश्चिमायां चेत्यर्थः । ऊर्ध्वमनुदिक्ष्वपि "सुपां सुपो भवन्ति' [ ] इति, सप्तम्यर्थे षष्ठी, विदिक्ष्वपीत्यर्थः, । अधो दक्षिणतश्चापि दहति-दाह्यं भस्मीकरोति, उत्तरतोऽपि च, सर्व्वासु दिक्षु विदिक्षु च दहतीति ।।६.३३।।

**भूयाण एसमाघाओ, हव्ववाहो न संसओ ।**
**तं पईवयावट्ठा, संजया किंचि नारभे ।।६.३४।।**

**(ति.)** यतश्चैवं ? - अतः भूतानाम्-स्थावरादीनाम् । एषः आघातहेतुत्वाद् आघातः । हव्यवाहः-अग्निः । न संशयः । तं प्रदीपार्थम्-दीपनिमित्तम् । प्रतापार्थम्-प्रकर्षेण तापनार्थं शीतापनयनार्थम्। संयताः किञ्चिन्नारभन्ते ।।६.३४।।

**(स.)** यत एवं ततः किं कर्तव्यमित्याह—भूआणं'इति-भूतानां स्थावर-त्रसानामेष हव्यवाहो वह्निराघातो न संशयः, एवमेव तदाघात एवेति भावः, ततः कारणात् संयतास्तं वह्निं प्रदीपार्थं प्रकाशकरणाय प्रतापनार्थं च शीतनाशाय किञ्चित् सङ्घट्टनादिनापि नारभन्ते साधुधर्मनाशनभीत्या.।।६.३४।।

**(सु.)** यतश्चैवम् ?-अतः भूयाणं'इति, भूतानां-स्थावरादीनां एष आघातः आघात-हेतुत्वादाघातः, हव्यवाहः-अग्निः न संशय इत्येवमेवैतद् आघात एवेतिभावः । येनैवं तेन तं हव्यवाहं प्रदीप-प्रतापनार्थं-आलोक-शीतापनोदार्थं संयताः-साधवः किञ्चित् सङ्घट्टनादिनाऽपि नारभन्ते, संयतत्वापगमनप्रसङ्गादिति ।।६.३४।।

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**तेउकायसमारंभं, जावज्जीवाइ वज्जए ।।६.३५।।**

**(ति.)** प्राग्वत् ।।६.३५।।

**(स.)** यस्मादेवं ततः किं कर्तव्यमित्याह—तम्हा...इति-पूर्ववदुक्तिलापनिका, अर्थश्च कार्यः, नवरमग्निकायनाम ग्राह्यम्. ।।६.३५।।

(सु.) यस्मादेवं तम्हा'इति, व्याख्या पूर्ववत् ।।६.३५।।

**अनिलस्स समारंभं, बुद्धा मन्नंति तारिसं ।**
**सावज्जबहुलं चेयं, नेयं ताईहि सेवियं ।।६.३६।।**

(ति.) उक्तो नवमस्थानविधिः, दशममाह—अनिलस्य-वायोः । समारम्भम्-तालवृन्तादिभिः करणम् । बुद्धाः-जिनाः । मन्यन्ते । तादृशम्-वह्न्यारम्भसमम् । सावज्जबहुलं चैतमिति । नैनं तायिभिः । सेवितम्-आचरितम् । इत्यपि बुद्धा मन्यन्ते, इत्यत्रैव सम्बन्धः ।।६.३६।।

(स.) इति नवमस्थानविधिः कथितः, अथ दशमस्थानविधिः कथ्यते—अणिलस्स'इति-बुद्धास्तीर्थकरा अनिलस्य वायुकायस्य समारम्भं व्यजनादिभिः करणं तादृशमग्निकायसमारम्भसदृशं मन्यन्ते जानन्ति, तथैवं वायुकायसमारम्भं सावद्यबहुलं पापभूयिष्ठमितिकृत्वा सर्वकालमेव न एनं तादृग्भिर्जीवरक्षाकारकैः साधुभिः सेवितमाचरितमिति मन्यन्ते बुद्धा एव. ।।६.३६।।

(सु.) उक्तो नवमस्थानविधिः, साम्प्रतं दशममाश्रित्याह—अणिलस्स-अनिलस्य-वायोः समारम्भं-तालवृन्तादिभिः करणं, बुद्धाः-तीर्थकरा मन्यन्ते-जानन्ति तादृशं-जाततेजःसमारम्भसदृशं, सावद्यबहुलं-पापभूयिष्ठं चैतमितिकृत्वा सर्वकालमेव नैनं त्रातृभिः-सुसाधुभिः सेवितं-आचरितं, मन्यन्ते बुद्धा एवेति ।।६.३६।।

**तालियंटेण पत्तेण, साहाविहुयणेण वा ।**
**न ते विइउमिच्छंति, वियावेऊण वा परं ।।६.३७।।**

(ति.) एतदेव स्पष्टयन्नाह—[तालि...] स्पष्टः ।।६.३७।।

(स.) एतदेव स्पष्टीकुर्वन्नाह—तालिअं...इति-ते साधवस्तालवृन्तेन पत्रेण शाखाविधूननेन वा कृत्वात्मनात्मानं वीजितुं नेच्छन्ति, नापि तालवृन्तादिभिः परैरात्मानं वीजयन्ति, नापि वीजयन्तं परमनुमन्यन्ते, तालवृन्तादीनां स्वरूपं यथा षड्जीवनिकायां व्याख्यातं तथा ज्ञेयम्. ।।६.३७।।

(सु.) एतदेव स्पष्टयति—तालियंटेण'इति, तालवृन्तेन पत्रेण शाखाविधूननेन वेत्यमीषां स्वरूपं यथा षड्जीवनिकायिकायां, न ते साधवो वीजितुमिच्छन्त्यात्मानमात्मना,

नापि वीजयन्ति परैरात्मानं तालवृन्तादिभिरेव, नापि वीजयन्तं परमनुमन्यन्त इति ।।६.३७।।

**जं पि वत्थं व पायं वा, कंबलं पायपुंछणं ।**
**न ते वाउमुदीरंति, जयं परिहरंति य ।।६.३८।।**

(ति.) उपकरणात् तद्विराधना-इति परिहरन्नाह—यदपि वस्त्रं वा, पात्रं वा, कम्बलं पादप्रोञ्छनम्-एषां धर्मोपकरणं तेनापि। न ते वातमुदीरयन्ति-अयतं प्रत्युपेक्षणादिक्रियया । यतम् - परिहरन्ति च-परिभुञ्जते ।।६.३८।।

(स.) अथोपकरणाद्या विराधना भवति तां परिहरन्नाह—जं पि'इति-यदपि वस्त्रं वा पात्रं वा कम्बलं वा पादप्रोञ्छनं वा, एतेषां पूर्वव्याख्यातार्थानां यद्धर्मोपकरणं, तेनापि धर्मोपकरणेन ते साधवो न वातमुदीरयन्ति, कया ? अयतनया प्रतिक्रियया, किन्तु यतं परिहरन्ति परिभोगपरिहारेण धारणपरिहारेण च. ।।६.३८।।

(सु.) उपकरणात् तद्विराधनेत्येत् परिहरन्नाह—जं पि'इति, यदपि वस्त्रं वा पात्रं वा कम्बलं वा पादपुञ्छनममीषां स्वरूपं पूर्वोक्तं धर्मोपकरणं यत्, तेनापि न ते वातमुदीरयन्त्यपि, अयतप्रत्युपेक्षणादिक्रियया, किंतु यतं परिहरन्ति, परिभोगपरिहारेण धारणाया परिहारेण चेति ।।६.३८।।

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**वाउकायसमारंभं, जावज्जीवाइ वज्जए ।।६.३९।।**

(ति.) प्राग्वत् ।।६.३९।।

(स.) यत एवायं सुसाधुवर्जितोऽनिलसमारम्भः, ततः किं कार्यम् ? - इत्याह—तम्हा'इति पूर्ववत्...

(सु.) यत एवायं सुसाधुर्वर्जितोऽनिलसमारम्भः, तम्हा'इति पूर्ववत् ।।६.३९।।

**वणस्सइकायं[1] न हिंसंति, मणसा वयस कायसा ।**
**तिविहेण करणजोएणं, संजया सुसमाहिया ।।६.४०।।**

१. अन्यत्र मुद्रिते तु'वणस्सइं न हिंसंति, मणसा वयसा कायसा'इति पाठः । एवं अग्रेऽपि पाठभेदः - वणस्सइसमारंभं इत्यादि ।।

**वणस्सइकायं विहिंसंतो, हिंसई उ तयस्सिए ।**
**तसे य विविहे पाणे, चक्खुसे य अचक्खुसे ।।६.४१।।**

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**वणस्सइकायसमारंभं, जॉवज्जीवाइ वज्जए ।।६.४२।।**

(ति.) उक्तो दशमस्थानविधिः, एकादशमाह—सूत्रत्रयं प्राग्वत् ।।६.४०-४२।।

(स.) एवमुक्तो दशमस्थानविधिः, अथैकादशस्थानविधिः कथ्यते-वणस्सइं'इति-एतद्गाथात्रयव्याख्यानमपि पूर्ववद् ज्ञेयं, नवरं वनस्पतिनाम ग्राह्यम्. ।।६.४०-४२।।

(सु.) उक्तो दशमस्थानविधिः, इदानीं एकादशमाश्रित्योच्यत इति । 'वणस्सइं' इत्यादि सूत्रत्रयं वनस्पत्यभिलापेन ज्ञेयं, ततश्चायमप्युक्त एव ।।६.४०-४२।।

**तसकायं न हिंसंति, मणसा वयस कायसा ।**
**तिविहेण करणजोएणं, संजया सुसमाहिया ।।६.४३।।**

**तसकायं विहिंसंतो, हिंसई उ तयस्सिए ।**
**तसे य विविहे पाणे चक्खुसे य अचक्खुसे ।।६.४४।।**

**तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।**
**तसकायसमारंभं, जावज्जीवाइ वज्जए ।।६.४५।।**

(ति.) उक्तमेकादशं द्वादशमाह—सूत्रत्रयं प्राग्वत् । त्रसकायं न हिंसन्ति-आरम्भप्रवृत्त्येति ज्ञेयम् ।।६.४३-४५।।

उक्तो द्वादशस्थानविधिः, प्रतिपादितं कायषट्कम् । एतत्प्रतिपादनादुक्ता मूलगुणाः। अधुनैतद्वृत्तिभूतोत्तरगुणावसरः । ते चाकल्पादयः षट् । तत्राकल्पो द्विविधः-शिक्षकस्थापनाकल्पः, अकल्पस्थापनाकल्पश्च । तत्राद्यः । अनधीतपिण्डनिर्युक्त्यादिना शैक्षेण आनीतमाहारादि साधूनां न कल्पते । उक्तं च -

अणहीया खलु जेणं, पिंडेसणसिज्जपाएसा ।
तेणाणियाणि जइणो, कप्पंति न पिंडमाईणि ।।१।।

उउबद्धम्मि न अनला, नपुंसका वासावासासु दोवि नो सेहा ।

दिक्खिज्जंति सहे ट्ठवणाकप्पो इमो होइ ।।२।। [ ] ।।६.४३-४५।।

**(स.)** अथ द्वादशविधिरुच्यते-तस'इति-एतद्गाथात्रयस्यापि व्याख्यानं पूर्ववत् कार्यं, नवरं त्रसनाम ग्राह्यम्. ।। इत्युक्तो द्वादशस्थानविधिः । तत्प्रतिपादनेन कायषट्कं कथितं, कायषट्ककथनेन साधूनां मूलगुणा उक्ताः ।।६.४३-४५।।

**(सु.)** द्वादशस्थान विधिरुच्यते—तसकायं'इति, त्रसकायं-द्वीन्द्रियादिरूपं न हिंसन्त्यारम्भ-प्रवृत्त्यादिना प्रकारेण, मनसा वाचा कायेन-तदहितचिन्तनादिना, त्रिविधेन करणयोगेन-मनःप्रभृतिभिः करणादिना प्रकारेण, संयताः-साधवः, सुसमाहिता-उद्युक्ता इति ।।६.४३।।

तत्रैव हिंसादिदोषमाह—त्रसकायं विहिंसन्नारम्भप्रवृत्त्यादिना प्रकारेण हिनस्त्येव तुरवधारणार्थे व्यापादयत्येव तदाश्रितान्-त्रसाश्रितान् त्रसांश्च विविधान् प्राणिनस्तदन्य-द्वीन्द्रियादीन्, चशब्दात् स्थावरांश्च पृथिव्यादीन्, चाक्षुषानचाक्षुषांश्च-चक्षुरिन्द्रियग्राह्या-नग्राह्यांश्चेति सूत्रार्थः ।।६.४४।।

यस्मादेवं तम्हा'इति—तस्मादेतं विज्ञाय दोषं-तदाश्रितजीवहिंसालक्षणं दुर्गतिवर्धनं-संसारवर्धनं त्रसकाय-समारम्भं तेन तेन विधिना यावज्जीवमेव वर्जयेदिति ।।६.४५।।

उक्तो द्वादशस्थानविधिः, प्रतिपादितं कायषट्कम्, एतत्प्रतिपादनादुक्ता मूलगुणाः, अधुनैतद्वृत्तिभूतोत्तरगुणावसरः, ते चाकल्पादयः षडुत्तरगुणाः, यथोक्तं-"अकप्पो गिहि-भायणं" इति, तत्राकल्पो द्विविधः-शिक्षकस्थापनाकल्पः अकल्पस्थापनाकल्पश्च। तत्र शिक्षकस्थापनाकल्पोऽनधीतपिण्डनिर्युक्त्यादिनाऽऽनीतमप्याहारादि न कल्पत इति, उक्तं च-

"अणहीया खलु जेणं पिंडेसणसेज्जवत्थपाएसा ।

तेणाणियाणि जइणो कप्पंति न पिंडमाईणि ।।१।।

उउबद्धंमि ण अणला वासावासे उ दोवि णो सेहा ।

दिक्खिज्जंती पायं ठवणाकप्पो इमो होइ ।।२।।"

**जाइं(णि) चत्तारि भुज्जाइं, इसिणाहारमाइणि ।**
**ताइं तु विवज्जिंतो, संजमं अणुपालए ।।६.४६।।**

**(ति.)** अकल्पस्थापनाकल्पं त्वाह—यानि चत्वार्यभोज्यानि-उद्गमादिदोषैर-कल्पनीयानि । ऋषीणाम्-साधूनाम्। आहारादीनि-आहार-शय्या-वस्त्र-पात्राणि । तु विवर्जयेत्-अगृह्णन् । संयममनुपालयेत् ।।६.४६।।

**(स.)** अधुना मूलगुणानां वृतिभूता ये उत्तरगुणाः, तेषां प्रतिपादनावसरः, जाइं'इति-ते चोत्तरगुणा अकल्पादयः षट्, तत्राकल्पो द्विविधः-शिष्यकस्थापना-कल्पोऽकल्पस्थापनाकल्पश्च, तत्र येन नवीनशिष्येण पिण्डनिर्युक्त्यादि पठितं नास्ति स आहारदोषान् न जानाति, तेनानीत आहारपिण्डो ग्रहीतुं साधूनामकल्पः, स शिष्यकस्थापनाकल्पः, अकल्पस्थापनाकल्पं तु सूत्रकार आह-[जाइं=]यानि चत्वार्यभोज्यानि संयमस्य नाशकारित्वेन साधूनामकल्पनीयानि,-आहारादीनि आहार-शय्या-वस्त्र-पात्ररूपाणि, तानि तु साधुर्विवर्जयेत्, संयमं सप्तदशप्रकारमनुपालयेत्, अकल्पनीयस्याहारादि-चतुष्टयस्यात्यागे संयमस्याभावो भवेत्. ।।६.४६।।

**(सु.)** अधुना अकल्पस्थापनाकल्पं त्वाह—जाणि'इति, यानि चत्वारि अभोज्यानि-संयमापकारित्वेनाकल्पनीयानि, ऋषीणां-साधूनामाहारादीनि,-आहार-वसति-वस्त्र-पात्राणि, तानि तु विधिना विवर्जयन् संयमं-सप्तदशप्रकारं अनुपालयेत् तदत्यागे संयमाभावादिति ।।६.४६।।

**पिंडं सिज्जं च वत्थं च, चउत्थं पायमेव य ।**
**अकप्पियं न इच्छिज्जा, पडिगाहिज्ज कप्पियं ।।६.४७।।**

**(ति.)** एतदेव स्पष्टयति—स्पष्टः ।।६.४७।।

**(स.)** अथैतदेव स्पष्टं कुर्वन्नाह—पिंडं'इति-साधुः (१) पिण्डं (२) शय्यां (३) च वस्त्रं चतुर्थं पात्रमेव च, एतच्चतुष्टयं प्रकटार्थम् अकल्पिकं नेच्छेत्, कल्पिकं तु यथोचितं प्रतिगृह्णीयादिति विधिः. ।।६.४७।।

**(सु.)** एतदेव स्पष्टयति—पिंडं'इति, पिण्डं शय्यां च वस्त्रं च चतुर्थं पात्रमेव च, एतत्स्वरूपं प्रकटार्थं, अकल्पिकं नेच्छेत् प्रतिगृह्णीयात् कल्पिकं-यथोचितमिति ।।६.४७।।

**जे नियागं ममायंति, कीयमुद्देसियाहडं ।**
**वहं ते समणुजाणंति, इई(इइ) वुत्तं महेसिणा ।।६.४८।।**

**(ति.)** अकल्पिके दोषमाह—ये-केचिद् द्रव्यसाध्वादयः । नियागं'इति-नित्यमामन्त्रितं पिण्डम् । ममायंति-गृह्णन्ति । क्रीतमौद्देशिकाहृतं च-एतानि क्षुल्लकाचारकथोक्तवत्। वधम्-त्रसस्थावरादिघातम् । ते समनुजानन्ति-दायकप्रवृत्त्यनुमोदनेन । इत्युक्तं महर्षिणा-श्रीवीरस्वामिना ।।६.४८।।

**(स.)** अथाऽकल्पिके दोषं कथयति—जे इति ये केचन द्रव्यलिङ्गिनो नियागं नित्यमामन्त्रितपिण्डं ममायंति प्रतिगृह्णन्ति, पुनः क्रीतमौद्देशिकमाहृतं च गृह्णन्ति, ते वधं स्थावरादिजीवघातमनुजानन्ति, दातुः प्रवृत्तेरनुमोदनेन, केनेदं कथितम् ?-इत्याह-इत्युक्तं महर्षिणा महामुनिना श्रीवर्धमानस्वामिना. ।।६.४८।।

**(सु.)** अकल्पिके दोषमाह—जे'इति, ये केचन द्रव्यसाध्वादयो द्रव्यलिङ्गधारिणो नियागं ति नित्यमामन्त्रित-पिण्डं ममायंति'इति परिगृह्णन्ति, तथा क्रीतमौद्देशिका-हृतमेतानि यथा क्षुल्लकाचारकथायाम् । वधं-त्रसस्थावरादिघातं ते-द्रव्यसाध्वादयः समनुजानन्ति दातृप्रवृत्त्यनुमोदनेनेत्युक्तं महर्षिणा-वर्द्धमानेनेति ।।६.४८।।

**तम्हा असणपाणाइं, कीयमुद्देसियाहडं ।**
**वज्जयंति ठियप्पाणो, निग्गंथा धम्मजीविणो ।।६.४९।।**

**(ति.)** स्पष्टः । नवरम् । स्थितात्मानः-स्थितः संयमे आत्मा येषां ते तथा ।।६.४९।।

**(स.)** यस्मादेवं तस्मात् किं कर्तव्यम् ?-इत्याह—तम्हा'इति-तस्मात्कारणान्निर्ग्रन्थाः साधवोऽशनादिकं चतुर्विधमपि सदोषं क्रीतम्, औद्देशिकम्, आहृतं च वर्जयन्ति, किंभूता निर्ग्रन्थाः ? स्थितात्मानः, स्थितो निश्चलत्वेनात्मा धर्मे येषां ते स्थितात्मानः संयमैकजीविन इत्यर्थः, उक्तोऽकल्पः, अकल्पकथनाच्च त्रयोदशः स्थानविधिरप्युक्तः. ।।६.४९।।

**(सु.)** यस्मादेवं तम्हा'इति, तस्मादशनपानादि चतुर्विधमपि यथोदितं क्रीतमौद्देशिक-माहृतं वर्जयन्ति, स्थितात्मानो-महासत्त्वाः, निर्ग्रन्थाः-साधवो, धर्मजीविनः-संयमैकजीविन इति ।।६.४९।। उक्तोऽकल्पस्तदभिधानात् त्रयोदशस्थानविधिः ।।

**कंसेसु कंसपाएसु, कुंडमोएसु वा पुणो ।**
**भुंजंतो असणपाणाइं, आयारा परिभस्सइ ।।६.५०।।**

(ति.) उक्तम् अकल्पाख्यं त्रयोदशं स्थानं, चतुर्दशमाह—कांस्येसु-कच्चोलकादिषु। कांस्यपात्रेषु-स्थालादिषु । कुण्डमोदेषु-हस्तिपादाकारमृन्मयभाजनेषु । भुञ्जानः । शुद्धमप्यशनपानादि । आचारात्-साधुसत्कात्। परिभ्रश्यति ।।६.५०।।

(स.) इदानीं चतुर्दस्थानविधिमाह—कंसेसु'इति-साधुराचारात्, साधुसम्बन्धिनः परिभ्रश्यति, भ्रष्टाचारो भवति, किं कुर्वन् साधुः ? अशनपानादिकमन्यदोषरहितमपि भुञ्जानः, केषु भाजनेषु भुञ्जानः ?-इत्याह-कांस्येषु कटोरिकादिषु, पुनः कांस्यपात्रीषु तिलकादिषु, कुण्डमोदेषु हस्तिनः पादाकारेषु मृन्मयादिषु, भुञ्जानः ।।६.५०।।

(सु.) इदानीं चतुर्दस्थानविधिमाह—कंसेसु'इति, कांसेषु-करोटकादिषु, कांस्यपात्रेषु-तिलकादिषु, कुण्डमोदेषु-हस्तिपादाकारेषु मृन्मयादिषु, भुञ्जानोऽशनपानादि तदन्यदोषरहितमपि, आचारात्-श्रमणसम्बन्धिनः, परिभ्रश्यति-अपैतीति ।।६.५०।।

**सीओदगसमारंभे, मत्तघोयणछड्डणे ।**
**जाइं छन्नंति भूयाइं, दिट्ठो तत्थ असंजमो ।।६.५१।।**

(ति.) कथम् ? - इत्याह—शीतोदकेन-सचेतनोदकेन कांस्यभाजनधावनारम्भे । अमत्रधावनछर्दने-कुण्डमोदादिक्षालनजलोज्झने । यानि क्षण्यन्ते-हिंस्यन्ते । भूतानि-अप्कायादीनि । एष तत्र गृहिभाजने । साधोः असंयमाख्यो दोषः स्वामिना दृष्टः ।।६.५१।।

(स.) कथं तेषु भुञ्जानो भ्रष्टाचारो भवेत् ? इत्याह—सीओ इति-गृहिभाजनं कांस्यादिकं, तत्र भोजने भोजनकर्तुः साधोः केवलिना सोऽसंयमो दृष्टः, स कः ? यानि तत्र भूतान्यप्कायादीनि छिद्यन्ते हिंस्यन्ते, क्व ? शीतोदकसमारम्भे सचेतनेनोदकेन भाजनस्य धावनारम्भे क्षालनारम्भे, कथं ? कांस्यादि-भाजनेषु श्रमणा भोक्ष्यन्ते, अथवा श्रमणैरेषु भुक्तमिति हेतोर्भाजनक्षालनं कुर्वन्ति गृहस्थाः, पुनः कुत्र ? मात्रकधावनोज्झने, कुण्डमोदकादिषु भाजनेषु क्षालनजलत्यागे-ऽसंयमो भवेत्. ।।६.५१।।

(सु.) कथम् ?-इति आह—सीओदग...इति, अनन्तरोद्दिष्टभाजनेषु श्रमणा भोक्ष्यन्ते भुक्तं वैभिरिति शीतोदकेन धावनं कुर्वन्ति । तदाह-शीतोदकसमारम्भे-सचेतनोदकेन भाजनधावनारम्भे तन्मात्रकधावनोज्झने-कुण्डमोदादिषु क्षालनजलत्यागे यानि क्षप्यन्ते-हिंस्यन्ते भूतानि-अप्कायादीनि, सोऽत्र-गृहिभाजनभोजने दृष्टः-उपलब्धः, केवलज्ञानभास्वता असंयमस्तस्य भोक्तुरिति ।।६.५१।।

**पच्छाकम्मं पुरेकम्मं, सिया तत्थ न कप्पए ।**
**एयमट्ठं न भुंजंति, निग्गंथा गिहिभायणे ।।६.५२।।**

(ति.) किञ्च...[पच्छा'इति] स्पष्टः । उक्तं चतुर्दशं, ।।६.५२।।

(स.) पच्छा'इति-पुनः किञ्च निर्ग्रन्थाः साधव एतदर्थं पश्चात्कर्म-पुरःकर्मपरिहारार्थं गृहिभाजने कांस्यादिके न भुञ्जते, कथं ? यतः पश्चात्कर्म पुरःकर्म च धर्मवतां साधूनां न कल्पते, पश्चात्कर्म-पुरःकर्मभावस्तु उक्तवदित्येके. अन्ये त्वेवं व्याख्यानयन्ति-भुञ्जन्तु[1] तावत्साधवो वयं तु पश्चाद्[2] भोक्ष्याम इति पश्चात्कर्म, तस्माद् विपरीतं तु पुरःकर्म इति. गृहिभाजनदोष उक्तः, तस्याभिधानाच्चतुर्दशस्थानविधिरप्युक्तः, ।।६.५२।।

(सु.) किञ्च—पच्छाकम्मं'इति, पश्चात्कर्म पुरःकर्म्म स्यात् तत्र-कदाचित् भवेद् गृहिभाजनभोजने, पश्चात्कर्म्म-पुरःकर्म्मभावस्तूक्तवदित्येके । अन्ये तु भुञ्जन्तु तावत् साधवो वयं तु पश्चाद् भोक्ष्यामहे इति पश्चात्कर्म्म, व्यत्ययेन तु पुरःकर्म्मेति व्याचक्षते। एतच्च न कल्पते धर्मचारिणां, यत एवमेतदर्थं-पश्चात्कर्म्मादिपरिहारार्थं न भुञ्जन्ते निर्ग्रन्थाः, क्व ? इत्याह-गृहिभाजने अनन्तरोदित इति ।।६.५२।। उक्तो गृहिभाजनदोष-स्तदभिधानाच्चतुर्दशस्थानविधिः ।।

**आसंदी-पलियंकेसु, मंचमासालएसु वा ।**
**अणायरियमज्जाणं, आसइत्तु सइत्तु वा ।।६.५३।।**

(ति.) पञ्चदशमाह—आसन्दी-आसनविशेषः, चूडीयक इति प्रसिद्धः । पल्यङ्को मञ्चः । आसामस्त्येन शालते, आसनेषु शोभते आशालकः-अवष्टम्भन-युक्तमासनं,

---

१. भुञ्जतामिति साधुः । २. भोक्ष्यामह इति युक्तम् ।

सिंहासन-मित्यर्थः। एष्वनाचरितम् । आर्याणाम्-साधूनाम् । आसितुं शयितुं वा ।।६.५३।।

**(स.)** साम्प्रतं पञ्चदशस्थानगतं विधिमाह—आसंदी'इति-आसन्दी पर्यङ्कः मञ्चश्च, एते त्रयोऽपि प्रसिद्धाः, आशालकस्तु सर्वाङ्गसमन्वित आसनविशेषः, एतेष्वासितुमुपवेष्टुं स्वप्तुं वा निद्रां कर्तुं वा आर्याणां साधूनामनाचरितं, कथं ? सुषिरदोषात्. ।।६.५३।।

**(सु.)** इदानीं पञ्चदशस्थानविधिमाह—आसंदीति, आसन्दी-पर्यङ्कौ प्रतीतौ तयोरासन्दी-पर्यङ्कयोः, मञ्चाऽऽशालकयोश्च मञ्चः प्रतीतः, आशालकस्तु-अवष्टम्भ-समन्वित आसनविशेषः, एतयोरनाचरितमनासेवितमार्याणां-साधूनामासितुं-उपवेष्टुं स्वप्तुं वा-निद्रातिवाहनं वा कर्तुं, शुषिरादिदोषादिति ।।६.५३।।

**नासंदीपलियंकेसु, निसिज्जा न पीठए ।**
**निग्गंथापडिलेहाए, बुद्धवुत्तमहिट्ठगा ।।६.५४।।**

**(ति.)** अपवादमाह—नासन्दी-पर्यङ्कयोः-न निषद्यायाम्-गब्दिका-चक्कलकादि-कायाम् । न पीठके-वेत्रमयादौ । निर्ग्रन्था अप्रतिलेख्य नोपवेशनादि कुर्वन्तीति शेषः। कथम्भूतास्ते? बुद्धोक्ताधिष्ठातारः-जिनोक्तानुष्ठानपराः । यतः आसन्द्यादीनां प्रत्युपेक्षा न शुध्यति । आसन्द्यादिषु अप्रत्युपेक्ष्य साधव उपवेशनं न कुर्वन्ति । अत्र द्वौ नञौ प्रकृत्यर्थं गमयतः । ततश्च एतेषु प्रत्युपेक्ष्य दृष्ट्वा राजकुलादिषु उपविशन्ति ।।६.५४।।

**(स.)** अत्रैव स्थानेऽपवादमार्गमाह—नासं'इति नासन्दीपर्यङ्कयोः न निषद्याया-मेकादिकल्परूपायां, न पीठके वेत्रमयादौ, चक्षुरादिना अप्रत्युपेक्ष्य निषीदनादि न कुर्वन्तीति वाक्यशेषः । किंभूता निर्ग्रन्थाः ? बुद्धोक्ताधिष्ठातारः, बुद्धेन तीर्थकरेण यत्कथितमनुष्ठानं, तत्र तत्पराः, इह चाप्रत्युपेक्षितेष्वासन्दी-पर्यङ्क-निषद्यादिपीठेषु निषीदनस्य निषेधाद्धर्मकथादौ राजकुलादौ प्रत्युपेक्षितेषु निषीदनादि कुर्वन्त्यपि, अन्यथा अप्रत्युपेक्षितेष्विति विशेषणस्यामिलनं स्यात्. ।।६.५४।।

**(सु.)** अत्रैवापवादमाह—नासंदी-इति, नासन्दी-पर्यङ्कयोः प्रतीतयोर्न निषद्यायां-एकादिकल्परूपायां, न पीठके-वेत्रकाष्ठमयादौ निर्ग्रन्थाः-साधवः, अप्रत्युपेक्ष्य-चक्षुरादिना, न निषीदनादि कुर्वन्ति इति वाक्यशेषः, नञ् सर्वत्राभिसम्बध्यते, न कुर्वन्तीति,

किंविशिष्टा निर्ग्रन्थाः?, इत्याह-बुद्धोक्ताधिष्ठातारः-तीर्थकरोक्तानुष्ठानपरा इत्यर्थः, इह चाप्रत्युपेक्षितासन्द्यादौ निषीदनादिनिषेधात् धर्म्मकथादौ राजकुलादिषु प्रत्युपेक्षितेषु निषीदनादिविधिमाह विशेषणान्यथानुपपत्तेरिति ।।६.५४।।

**गंभीरविजया एए, पाणा दुप्पडिलेहगा ।**
**आसंदी पलियंका य, एयमट्ठं विवज्जिया ।।६.५५।।**

**(ति.)** एतदेवाह—यो विशिष्टजयो भवति, तं लोका आश्रयन्ते । ततो लक्षणया विजयशब्देन आश्रयोऽभिधीयते । ततश्च गम्भीरविजयाः-अप्रकाशाश्रयाः । एते आसन्दादयः । एषु प्राणा दुःप्रत्युपेक्षाः उक्तं पञ्चदशं,।।६.५५।।

**(स.)** अत्रैवदोषमाह—गम्भीर'इति-एते आसन्दी-पर्यङ्क-मञ्चादयः गम्भीरविजयाः, गम्भीरोऽप्रकाशो विजय आश्रयो येषां ते गम्भीरविजया अप्रकाशाश्रयाः प्राणिनां भवन्ति, तेन प्राणिन एतेषु दुष्प्रत्युपेक्ष्या भवन्ति, पीड्यन्ते च तेषामुपवेशनादिना, तेनैतदर्थं साधुभिरासन्द्यादयो विवर्जितास्त्यक्ताः. ।।६.५५।।

**(सु.)** अत्रैव दोषमाह—गंभीरविजया'इति, गम्भीरविजया, गम्भीरं-अप्रकाशं, विजयः-आश्रयः अप्रकाशाश्रया, एते-प्राणिनामा-सन्द्यादयः, एवं च प्राणिनो दुष्प्रत्युपेक्षणीया एतेषु भवन्ति, पीड्यन्ते च एतदुपवेशनादिना, आसन्दः पर्यङ्कश्च, चशब्दात् मञ्चादयश्चैतदर्थं विवर्जिताः साधुभिरिति ।।६.५५।। उक्तः पर्यङ्कस्थानविधिः, तदभिधानात् पञ्चदशस्थानम्, ।।

**गोयरग्गपविट्ठस्स, निसिज्जा जस्स कप्पई ।**
**इमेरिसमणायारं, आवज्जइ अबोहियं ।।६.५६।।**

**(ति.)** षोडशमाह—गोचराग्रप्रविष्टः-इह षष्ठी प्रथमार्थे, गृहे निषद्याम्-निषदनं यः साधुः, कल्पते-अनेकार्थत्वात् करोति । स ईदृशम्-वक्ष्यमाणम् । अनाचारं अबोधिकम्-मिथ्यात्वफलम् । आपद्यते ।।६.५६।।

**(स.)** अथ षोडशस्थानमुच्यते—गोअर...इति-गोचराग्रप्रविष्टस्य भिक्षार्थं प्रविष्टस्य साधोर्निषद्या कल्पते, गृह एव निषीदनं समाचरति यः साधुरिति भावः, स साधुः खल्वेवमीदृशं वक्ष्यमाणलक्षण-मनाचारमापद्यते प्राप्नोति. किंभूतमनाचारम् ? अबोधिकम्,

अबोधिर्मिथ्यात्वं तदेव फलं यस्य स तम्. ।।६.५६।।

**(सु.)** इदानीं षोडशस्थानमधिकृत्याह—गोचरग्ग...इति, गोचराग्रप्रविष्टस्य-भिक्षाप्रविष्टस्येत्यर्थः, निषद्या यस्य कल्पते, गृह एव निषीदनं यः समाचरति साधुरितिभावः, स खलु एनमीदृशं वक्ष्यमाणलक्षणं अनाचारमापद्यते-प्राप्नोति, अबोधिकं-मिथ्यात्वफलमिति ।।६.५६।।

**विवत्ती बंभचेरस्स, पाणाणं च वहे वहो ।**
**वणीमगपडिग्घाओ, पडिकोहो अगारिणं ।।६.५७।।**

**(ति.)** अनाचारमाह—विपत्तिर्ब्रह्मचर्यस्य-चिरदर्शनेन मिथोऽनुरागसम्भवात्, तत्र स्त्रियः चिर-संसर्गात्, स्त्रिया आधाकर्मादिकरणात् । प्राणानां च वधे वधः स्यात्-आद्यव्रतविघातः स्यात् । साधौ गृहोपविष्टे वनीपकप्रतीघातो ग्रासानाप्तिः । साध्वाक्षिप्तत्वाच्च स्त्रियः प्रति क्रोधः अगारिणाम्-तत्स्वजनानां तद्भर्तुश्च ।।६.५७।।

**(स.)** तमेवानाचारमाह—विवत्ती'इति-गृहस्थगृहे निषद्याकरण एतेऽनाचारा इति सम्भावनया ब्रह्मचर्यस्य विपत्तिर्नाशो भवतिः, कुतः ? आज्ञाखण्डनदोषात् प्राणिनां च वधे वधो भवति । तथासम्बन्धादाधाकर्मादिकरणेन. तथा वनीपकप्रतिघातो भवेत् - तदाक्षेपेणा-ऽऽदित्साभिधानादिना च पुनरगारिणः प्रतिक्रोधो भवेत् । तत्स्वजनानां निषद्यायास्तस्याश्च तथाक्षेपदर्शनेन. ।।६.५७।।

**(सु.)** अनाचारमाह—विवत्ती'इति, विपत्तिर्ब्रह्मचर्यस्य-आज्ञाखण्डनादोषतः साधुसमाचरणस्य, प्राणिनां च वधे वधो भवति, तथा सम्बन्धादाधाकर्म्मादिकरणेन, वनीपकप्रतीघातः तदाक्षेपणादित्साभिधानादिना, प्रतिक्रोधश्चागारिणां तत्स्वजनानां च स्यात्, तदाऽऽक्षेप-दर्शनेनेति ।।६.५७।।

**अगुत्ती बंभचेरस्स, इत्थीओ आवि संकणं ।**
**कुसीलवड्ढणं ठाणं, दूरओ परिवज्जए ।।६.५८।।**

**(ति.)** तथा—अगुप्तिर्ब्रह्मचर्यस्य-चिरावस्थानेन योषिदिन्द्रियाद्यवलोकनात् । उत्फुल्ल-लोचनायाः पश्यन्त्या स्त्रीतोऽपि शङ्का स्यात् । अतः कुशीलवर्धनं गृहनिषदनं दूरतः परिवर्जयेत् ।।६.५८।।

**(स.)** अगुत्ती'इति-तथा पुनः किं भवेत् ? साधोस्तथा निषद्याकरणेन ब्रह्मचर्यस्या-गुप्तिर्भवेत्, पुनरुत्फुल्ल-गल्ल-लोचनाया अनुभूतगुणायाः स्त्रियाः सकाशाच्छङ्का भवति, ततः कुशीलवर्धनं स्थानमुक्तेन प्रकारेणासंयमवृद्धिकारकं दूरतः परिवर्जयेत् परित्यजेत् साधुः ।।६.५८।।

**(सु.)** तथा—अगुत्ती'इति, अगुप्तिर्ब्रह्मचर्यस्य तदिन्द्रियाद्यवलोकनेन, स्त्रीतश्चापि शङ्का भवति एतत्प्रफुल्ललोचनदर्शनादिना अनुभूतगुणायाः, कुशीलवर्धनं स्थानं-तदुक्तेन प्रकारेणासंयमवृद्धिकारकं, दूरतः परिवर्जयेत्-परित्यजेदिति ।।६.५८।।

**तिन्हमन्नयरागस्स, निसिज्जा जस्स कप्पइ(ई) ।**
**जराए अभिभूयस्स, वाहियस्स तवस्सिणो ।।६.५९।।**

**(ति.)** अत्रापवादमाह—त्रयाणामन्यतरस्य-गोचरप्रविष्टस्य । यस्य-गृहे । निषद्या कल्पते-तस्य प्रागुक्तदोषा न सम्भवन्ति । कस्य पुनः कल्पन्ते ? इत्याह । जरयाऽभिभूतस्य-अतिवृद्धस्य । व्याधितस्य-रोगिणः । तपस्विनः-मासक्षपकादेः । एते च भिक्षाटनं न कार्यन्त एव । आत्मलब्धिकानां त्वेषामेषानुज्ञा, उक्तं षोडशम् ।।६.५९।।

**(स.)** अथ सूत्रेणापवादमाह—तिन्ह...इति-त्रयाणामग्रे वक्ष्यमाणानां मध्येऽन्यतर-स्यैकस्य यस्य गोचरप्रविष्टस्य गृहस्थगृहनिषद्या कल्पते, औचित्येन तस्य निषद्यायाः सेवने न दोष इति वाक्यशेषः, कथं पुनः कल्पते ?-इत्याह-जरयाभिभूतस्यात्यन्तं वृद्धस्य, तथा व्याधितस्य रोगवतोऽत्यन्तमसमर्थस्य, तथा तपस्विनो विकृष्टक्षपकस्य, प्राय एते भिक्षाटनं न कार्यन्ते, परमात्मलब्धिकाद्यास्तु भिक्षाटनं कुर्वन्ति, तद्विषयं चैतत् सूत्रं, तत एतेषां प्रायो दोषा न सम्भवन्ति, परिहरन्ति च वनीपकप्रतिघातादीनि. उक्तो निषद्यास्थानविधिः, तस्य कथनाच्च षोडशस्थानमप्युक्तम्, ।।६.५९।।

**(सु.)** सूत्रेणैवापदमाह—तिण्ह...इति, त्रयाणां वक्ष्यमाणलक्षणानां अन्यतरस्य एकस्य निषद्या गोचर-प्रविष्टस्य गृहे यस्य कल्पते औचित्येन, तस्य तदासेवने न दोष इति वाक्यशेषः, कस्य पुनः कल्पते ?-इत्याह-जरयाऽभिभूतस्यात्यन्तवृद्धस्य, व्याधिमतः-अत्यन्तमशक्तस्य, तपस्विनो-विप्रकृष्टक्षपकस्य, एते च भिक्षाटनं न कार्यन्त एव, आत्मलब्धिकाद्यपेक्षया तु सूत्रविषयः, न चैतेषां प्राय उक्तदोषाः सम्भवन्ति, परिहरन्ति

च वनीपकप्रतिघातादीति ।।६.५९।। उक्तो निषद्यास्थानविधिः, तदभिधानात् षोडश-स्थानं ।।

**वाहिओ वा अरोगी वा, सिणाणं जो उ पत्थए ।**
**वुक्कंतो होइ आयारो, जढो भवइ संजमो ।।६.६०।।**

**(ति.)** सप्तदशमाह—व्याधिमान् वा अरोगी वा । स्नानं यः प्रार्थयते-सेवते । तेन व्युत्क्रान्तो भवत्याचारः-साधूनां स्नाननिषेधात् । जढः-त्यक्तः । संयमः-प्राणिरक्षादिः, अप्कायविराधनात् ।।६.६०।।

**(स.)** अथ सप्तदशस्थानमाह—वाहि...इति-यस्तु साधुः स्नानमङ्गप्रक्षालनं प्रार्थयते सेवते, तेन साधुनाऽऽचारो बाह्यतपोरूपो व्युत्क्रान्तो भवति, कथम् ? अस्नान-परीषहस्यासहनात्, पुनः संयमः प्राणिरक्षणादिकः जढः परित्यक्तो भवति, कस्मात् । अप्कायादिविराधनात्, किंभूतः साधुः ? व्याधितो वा व्याधिग्रस्तो वा, पुनररोगी वा रोगरहितो वा, केनापि स्नानं न कर्तव्यमित्यर्थः ।।६.६०।।

**(सु.)** साम्प्रतं सप्तदशस्थानमाह—वाहिओ वा'इति, व्याधिमान्-व्याधिग्रस्तः, अरोगी वा-रोगविप्रमुक्तो वा, स्नानं-अङ्गप्रक्षालनं, यस्तु प्रार्थयते-सेवत इत्यर्थः, तेनेत्थम्भूतेन व्युत्क्रान्तो भवति आचारो-बाह्यतपोरूपः, अस्नानपरीषहानतिसहनात्, जढः-परित्यक्तो भवति, संयमः-प्राणिनां रक्षणादिको-ऽप्कायादिविराधनादिति ।।६.६०।।

**संतिमे सुहुमा पाणा, घसासु भिलुगासु य ।**
**जे य भिक्खू सिणायंतो, वियडेणुप्पिलावए ।।६.६१।।**

**(ति.)** प्रासुकाम्बुस्नाने कथं संयमत्याग ? इत्याह—सन्तीमे-प्रत्यक्षाः । सूक्ष्माः । प्राणाः-द्वीन्द्रियाद्याः । घसासु-[1]शुषिरभूमिषु। भिलुषासु-[2]भूमिराजिषु । यान्-तान् भिक्षुः स्नानं कुर्वन् । विकटेन-विपुलेनाम्भसा प्रासुकेनापि उत्प्लावयेत् । ततः संयमविराधना ।।६.६१।।

**(स.)** प्रासुकस्नानेन कथं संयमपरित्याग इत्याह—संति'इति-सन्त्येते प्रत्यक्षमुपलभ्य-

१. पोली स्वारभूमीमां १० टि. ।। २. फाटली १० टि. ।।

मानाः सूक्ष्माः श्लक्ष्णाः प्राणिनो द्वीन्द्रियादयः, कासु ? घसासु सुषिरभूमिषु च, पुनर्भिलगासु तथाविधभूमिराजीषु, के ? यान् सूक्ष्मप्राणान् स्नानं कुर्वन् स्नान-जलोज्झनक्रियया विकृतेन प्रासुकेन जलेनोत्प्लावयति, तथा च सति प्राणिविराधना भवेत्, ततश्च संयमपरित्यागः ।।६.६१।।

**(सु.)** प्रासुकस्नानेन कथं संयमपरित्याग ? इत्याह—संतिमे...इति, संतिमे, सन्त्येते प्रत्यक्षोपलभ्यमानस्वरूपाः, सूक्ष्माः-श्लक्ष्णाः, प्राणिनो-द्वीन्द्रियादयः, घसासु-शुषिरभूमिषु, भिलुकासु च-तथाविधभूमिराजीषु च, यांस्तु भिक्षुः स्नपयन् स्नानजलोज्झन-क्रियया विकृतेन-प्रासुकोदकेनोत्प्लावयति, तथा च तद्विराधनातः संयमपरित्याग इति ।।६.६१।।

**तम्हा ते न सिणायंति, सीएण उसिणेण वा ।**
**जावज्जीवं वयं घोरं, असिणाणमहिट्ठगा ।।६.६२।।**

**(ति.)** तस्मात् । ते-साधवः । न स्नान्ति । शीतोदकेन उष्णोदकेन वा । यावज्जीवं व्रतं, घोरम्-दुरनुचरम्, अस्नानम् । अधिष्ठातारः-अस्यैव व्रतस्य कर्तारः ।।६.६२।।

**(स.)** अथ निगमयन्नाह—तम्हा'इति-यस्मादेवं दोषा उक्ताः तस्मात् ते साधवो न स्नानं कुर्वन्ति, केन कृत्वा ? शीतोदकेन वा उष्णोदकेन वा, प्रासुकाप्रासुकेन वेत्यर्थः, यतस्ते साधवो यावज्जीवमाजन्म घोरम्, दुरनुचरमस्नानमाश्रित्य व्रतमधिष्ठातारः, अस्यैव व्रतस्य कर्तारः ।।६.६२।।

**(सु.)** निगमयन्नाह—तम्हा'इति, यस्मादेवमुक्तदोष-प्रसङ्गः तस्मात् ते साधवो न स्नान्ति शीतोदके-नोष्णोदकेन वा प्रासुकेनाऽपासुकेन वेत्यर्थः । किंविशिष्टास्ते ?-इत्याह-यावज्जीवं-आजन्म, व्रतं घोरं-दुरनुचरमस्नानमाश्रित्य अधिष्ठातारः-अस्यैव कर्तार इति ।।६.६२।।

**सिणाणं अदुवा कक्कं, लुद्धं पउमगाणि य ।**
**गायस्सुव्वट्टणट्ठाए, नायरंति कयाइ वि ।।६.६३।।**

**(ति.)** स्नानम् अथवा । कल्कम्-चन्दनकल्कादि । रोध्रम्-गन्धद्रव्यम् । पद्मकानि-कुङ्कुमकेशराणि । अन्यदप्येवंविधं गात्रस्योद्वर्तनार्थं नाचरन्ति कदाचिदपि साधवः उक्तः सप्तदश स्थानविधिः।।६.६३।।

**(स.)** सिणाणं'इति स्नानं पूर्वोक्तम्, अथवा कल्कं चन्दनादि, लोध्रं गन्धद्रव्यं, पद्मकानि च कुङ्कुमकेसराणि, चशब्दादन्यदप्येवंविधं गात्रस्योद्वर्तनार्थमुद् वर्तननिमित्तं कदाचिदपि यावज्जीवमेव साधवो नाचरन्ति उक्तः स्नानविधिः, तस्य कथनेन सप्तदशस्थानमप्युक्तम् ।।६.६३।।

**(सु.)** किञ्च—सिणाणं'इति, स्नानं पूर्वोक्तं, अथवा कल्कं-चन्दनादि, लोध्रं-गन्धद्रव्यं, पद्मकानि च-कुङ्कुमकेसराणि, चशब्दादन्यच्चैवंविधं गात्रस्योद्वर्त्तनार्थं-उद्वर्त्तननिमित्तं नाचरन्ति कदाचिदपि-यावज्जीवमिति भावसाधव इति उक्तोऽस्नानविधिः, तदभिधानात् सप्तदशं स्थानम् ।।६.६३।।

**निगिणस्स वावि मुंडस्स, दीहरोमनहंसिणो ।**
**मेहुणा उवसंतस्स, किं विभूसाइ कारियं ।।६.६४।।**

**(ति.)** अष्टादशमाह—नग्नाः सर्वथा जिनकल्पी, उपचारात् प्रमाणोपेतवस्त्रधार्यपि नग्नः । तस्य मुण्डस्य-कृतलोचस्य । दीर्घरोमनखांशिनः-रोमाणि-कक्षादेः, नखांशाः पाणिपादनखावयवाः । मैथुनादुपशान्तस्य-निर्वृत्तस्य । किं विभूषया कार्यम् ? ।।६.६४।।

**(स.)** सांप्रतमष्टादशं स्थानमुच्यते शोभावर्जननाम—नगिण...इति-शोभायां दोषो नास्ति, यतोऽलङ्कृतश्चापि धर्ममाचरेत्...इत्यादि वचनात् [ ] इति पराभिप्रायमाशङ्क्याह-एवंविधस्य साधोर्विभूषया शोभया किं कार्यं ? न किञ्चिदित्यर्थः, किं भूतस्य साधोः ! नग्नस्य वापि कुचै(चे)लवतोऽप्युपचारनग्नस्य, निरुपचरितनग्नस्य वा जिनकल्पिकस्येति सामान्यविषयमेव सूत्रं, तथा मुण्डस्य द्रव्यतो भावतश्च, पुनर्दीर्घरोमनखवतः,-[दीर्घरोमवतः]कक्षादिषु, दीर्घनखवतो [हस्तादौ] जिनकल्पिकस्य, इतरस्य तु प्रमाणयुक्ता एव नखा भवन्ति, पुनर्मैथुनादुपशान्तस्योपरतस्येति. ।।६.६४।।

(सु.) साम्प्रतमष्टादशं शोभावर्जनास्थानमुच्यते-शोभायां नास्ति दोषः, 'अलङ्कृतश्चापि धर्ममाचरेत्'[ ]इत्यादिवचनात् पराभिप्रायमात्रमाशङ्क्याह—नग्नस्यापि-कुचेलवतोऽपि उपचारनग्नस्य निरुपचरितस्य नग्नस्य वा जिनकल्पिकस्येति सामान्यविषयमेव सूत्रं, मुण्डस्य-द्रव्य-भावाभ्यां, दीर्घरोमनखवतः-दीर्घरोमवतः कक्षादिषु, दीर्घनखवतो हस्तादौ जिनकल्पिकस्य, इतरस्य तु प्रमाणयुक्ता एव नखा भवन्ति यथाऽन्यसाधूनां शरीरेषु तमस्यपि न लगन्ति । मैथुनादुपशान्तस्योपरतस्य किं विभूषया-राढ्या प्रयोजनं (कार्यं) ?, न किञ्चिदिति ।।६.६४।।

**विभूसावत्तियं भिक्खू, कम्मं बंधइ चिक्कणं ।**
**संसारसागरे घोरे, जेणं पडइ दुरुत्तरे ।।६.६५।।**

(ति.) विभूषाया अपायमाह—विभूषाप्रत्ययम्-विभूषानिमित्तम् । शेषं स्पष्टम् ।।६.६५।।

(स.) इत्थं [विभूषा] प्रयोजनस्याभावं कथयित्वापायमाह—विभूसा...इति-साधुस्तत्कर्म बध्नाति, किंभूतं कर्म ? विभूषाप्रत्ययं विभूषानिमित्तं, पुनः किंभूतं कर्म ? चिक्कणं दारुणं, तत् किं ? येन कर्मणा साधुः संसारसागरे भवसमुद्रे पतति, किंभूते संसारे ? घोरे रौद्रे, पुनः किंभूते संसारे ? दुरुत्ता(त्त)रेऽकुशलानुबन्धतोऽत्यन्तदीर्घे. ।।६.६५।।

(सु.) इत्थं प्रयोजनाभावमभिधायापायमाह—विभूस...इति, विभूषाप्रत्ययं-विभूषानिमित्तं भिक्षुः-साधुः कर्म्म बध्नाति चिक्कणं-दारुणं, संसारसागरे घोरे-रौद्रे येन कर्मणा पतति दुरुत्तरे-अकुशलानुबंधतोऽत्यन्तदीर्घ इति ।।६.६५।।

**विभूसावत्तियं चेयं, बुद्धा मन्नंति तारिसं ।**
**सावज्जबहुलं चेयं, नेयं ताईहि सेवियं ।।६.६६।।**

(ति.) मनःसङ्कल्पितविभूषापायमाह—विभूषानिमित्तं चेतः । बुद्धाः-जिनाः । मन्यन्ते । तादृशम्-कर्मबन्धहेतुभूतम्। सावद्यबहुलं चैतत्-आर्त्तध्यानकारि । नेदं साधुभिः तायिभिः । सेवितम्-कृतमित्यर्थः।। उक्तः शोभावर्जनास्थानविधिः । तदभिधानादष्टादशं पदं, तदभिधानाच्चोत्तरगुणाः ।।६.६६।।

(स.) एवं बाह्यविभूषायामपायमुक्त्वा सङ्कल्पविभूषायामामपायमाह—विभूसा...इति-

बुद्धास्तीर्थकरा एवंविधं चेतस्तादृशं मन्यन्ते, रौद्रं कर्मबन्धहेतुभूतं विभूषाक्रियासदृशं जानन्ति, किंभूतं चेतः ? विभूषाप्रत्ययं विभूषानिमित्तं, कोऽर्थः, एवं च यदि मम विभूषा सम्पद्यत इति तत्प्रवृत्तमित्यर्थः, सावद्यबहुलं चैतदार्तध्यानेनानुगतं चेतो नेत्थम्भूतं त्रातृभिरात्मारामैरार्यै साधुभिः सेवितमाचरितं, कुशलचित्तत्वात् तेषां साधूनाम् ।। उक्तः शोभावर्जनास्थानविधिः, तस्याभिधानेन चाष्टादशपदमप्युक्तम्, अष्टादशपदकथनेन चोत्तरगुणा उक्ताः ।।६.६६।।

**(सु.)** एवं बाह्यविभूषापायमभिधाय सङ्कल्पविभूषापायमाह—विभूसाव...इति, विभूषाप्रत्ययं-विभूषानिमित्तं चेत एवं च यदि मम विभूषा सम्पद्यत इति, तत्प्रवृत्त्यङ्गं चित्तमित्यर्थः, बुद्धाः-तीर्थकरा मन्यन्ते-जानन्ति तादृशं रौद्रकर्मबन्धहेतुभूतं विभूषा-क्रियासहितं (सदृशं) सावद्यबहुलं चैतदार्त्तध्यानानुगतं चेतः, नैतदित्थम्भूतं त्रातृभिरात्मा-रामैरार्यैः साधुभिः सेवितमाचरितं, कुशलचित्तत्वात् तेषामिति उक्तः शोभावर्जनस्थानविधिस्तदभिधानादष्टादशं पदं, तदभिधानाच्चोत्तरगुणाः, ।।६.६६।।

**खवंति अप्पाणममोहदंसणो, तवेरया संजमअज्जवेगुणा ।**
**धुणंति पावाइं पुरेकडाइं, नवाइं पावाइं न ते करंति ।।६.६७।।**

**(ति.)** साम्प्रतमुक्तफलप्रदर्शनेनोपसंहरन्नाह—क्षपयन्ति-शोधयन्ति । आत्मानं-जीवं पूर्वोक्तविधिविधानेन, अमोहं पश्यन्तीत्येवं शीलाः अमोहदर्शिनः-यथावत्-स्थितार्थदर्शिनः साधवः । तपसि रताः । किं विशिष्टे ? संयमार्जवौ गुणौ यस्य तस्मिन्-संयमार्जवगुणे-विचालैकारोऽलाक्षणिकः। उत्तरार्धं स्पष्टम् ।।६.६७।।

**(स.)** साम्प्रतमुक्तफलदर्शनेनोपसंहारमाह—खवंति'इति-य एवंविधाः साधव आत्मानं जीवं, तेन चित्तयोगेनानुपशान्तं शमयोजनेन क्षपयन्ति, किंभूताः साधवः ? अमोहदर्शिनः, अमोहं ये पश्यन्तीत्यर्थः, त एव विशेष्यन्ते-पुनः किम्भूताः साधवः ? तपस्यनशनादिलक्षणे रता आसक्ताः, किम्भूते तपसि ?-इत्याह-संयमार्जवगुणे संयमार्जवे गुणौ यस्य तपसस्तस्मिन्, संयमऋजु-भावगुणप्रधान इत्यर्थः, त एवंभूताः साधवः पापानि धुन्वन्ति कम्पयन्ति, किंभूतानि पापानि ? 'पुरेकडाइं' पुराकृतानि जन्मान्तरेषूपार्जितानि, पुनस्ते साधवो नवानि पापानि न कुर्वन्ति, तथाप्रमत्तत्वादिति. ।।६.६७।।

**(सु.)** सांप्रतमुक्तफलप्रदर्शनेनोपसंहरन्नाह—खवंति'इति, क्षपयन्त्यात्मानं तेन तेन चित्तयोगेनानुपशान्तं शमयोजनेन जीवं, किंविशिष्टा ? - इत्याह-अमोहदर्शिनः-

अमोहं ये पश्यन्ति, यथावत् पश्यन्ति य इत्यर्थः, त एव विशेष्यन्ते-तपसि-अनशनादिलक्षणे रताः-सक्ताः, किंविशिष्टे तपसि ?-इत्याह-संयमार्जवगुणे, प्राकृतत्वादेकारः, संयमार्जवे गुणौ यस्य तपसस्तस्मिन्, संयमऋजुभावप्रधाने शुद्ध इत्यर्थः, ते एवंभूता धुन्वन्ति-कम्पयन्ति अपनयन्ति, पापानि पुराकृतानि-जन्मान्तरोपात्तानि, नवानि-प्रत्यग्राणि पापानि न ते साधवः कुर्वन्ति, तथा अप्रमत्तत्वादिति ।।६.६७।।

**सओवसंता अममा अकिंचणा, सविज्जविज्जा अणुगया जसंसिणो ।**
**उउप्पसन्ने विमलेव चंदमा, सिद्धिं विमाणाइं उविंति ताइणो त्ति बेमि ।।६.६८।।**

**(ति.)** सदोपशान्ताः । अममाः । अकिञ्चनाः-स्वर्ण—मिथ्यात्वादिद्रव्यरहिताः । स्वविद्या-सिद्धान्तरूपा, [1]तस्याविद्या वेदनं स्वविद्याविद्या, तयानुगता यशस्विनः ऋतौ प्रसन्ने-शरदादौ । विमल इव चन्द्रमाः-निःकर्मत्वेन विमलात्मानः । सिद्धिम्-सावशेषकर्माणः विमानानि-सौधर्मादीनि । उपयन्ति । तायिनः-साधवः । इति ब्रवीमि-इति प्राग्वत् समाप्ता **महाचारकथाऽध्ययने तिलकाचार्यटीका** ।।६.६८।।

**(स.)** किञ्च—सओव...इति-ताइणो'इति त्रातारः, स्वस्य परस्य चापेक्षया, साधवः सिद्धिं मुक्तिं व्रजन्ति, तथा केऽपि साधवः शेषकर्माणो विमानानि सौधर्मावतंसकादीन्युपयान्ति सामीप्येन गच्छन्ति, किंविशिष्टाः साधवः ? सदोपशान्ताः सर्वकालमेव क्रोधरहिताः, पुनः किंभूताः साधवः ? अममाः सर्वत्र ममत्वशून्याः, पुनः किंभूताः साधवः ? अकिञ्चना हिरण्यादिद्रव्येण मिथ्यात्वादिभावेन च किञ्चनेन मुक्ताः, पुनः किंभूताः साधवः ? स्वात्मीया विद्या स्वविद्या परलोकोपकारिणी केवलश्रुतरूपा, स्वविद्या चासौ विद्या च स्वविद्यविद्या, तया स्वविद्यविद्यया अनुगता युक्ताः, न पुनः परविद्यया इहलोकोपकारिण्या, पुनः किंभूताः साधवः ? यशस्विनः, शुद्धेन परलोकसम्बन्धिना यशसा सहिताः, किंभूताः साधवः? ऋतौ प्रसन्ने परिणते शरत्कालादौ विमल इव चन्द्रमाः, चन्द्रमा इव विमला इत्येवंकल्पास्ते भावमलरहिता इत्यर्थः, ब्रवीमीति पूर्ववत्. ।।६.६८।।

**।। इति दशवैकालिकसूत्रे [2]धर्मार्थकामाख्ये षष्ठेऽध्ययने श्रीसमयसुन्दरोपाध्याय-विरचिता शब्दार्थवृत्तिः समाप्ता. ।।६।।**

---

१. स्वविद्या चासौ विद्या च तया १० टि. ।। २. 'धम्म-त्थ-कामज्झयणं छट्ठं-इति मुद्रिते वृत्तिग्रन्थे ।।

(सु.) किं च—असोवसंता'इति, सदोपशान्ताः-सर्वकालमेव क्रोधरहिताः अममाः-सर्वत्र ममत्वशून्याः, अकिञ्चना-हिरण्यादिमिथ्यात्वादि-द्रव्यभावकिञ्चनविनिर्मुक्ताः, स्वा-आत्मीया विद्या स्वविद्या-परलोकोपकारिणी केवलश्रुतरूपा तया स्वविद्यया विद्यया अनुगता-युक्ताः, न पुनः परविद्यया इहलोकोपकारिण्येति, त एव विशेष्यन्ते-यशस्विनः-शुद्धपारलौकिकयशोवन्तः, त एवंभूता ऋतौ प्रसन्ने-परिणते शरत्कालादौ विमल इव चन्द्रमाः-चन्द्रमा इव विमलाः, इत्येवंकल्पाः, ते भावमलरहिताः सिद्धिं-निर्वृत्तिं तथा सावशेषकर्माणो विमानानि-सौधर्मावतं-सकादीन्युपयान्ति-सामीप्येन गच्छन्ति, त्रातारः-स्वपरापेक्षया साधव इति ।।२७७।। ब्रवीमीति पूर्ववदेव ।।

**दशवैकालिकश्रुतस्कन्धषष्ठाध्ययनव्याख्या सुमतिसाधु विहिता समाप्तेति ।**

# ।। सप्तमं अध्ययनं-वाक्यशुद्धि ।।

**चउण्हं खलु भासाणं, परिसंखाय पन्नवं ।**
**दुण्हं तु विणयं सिक्खे, दो न भासिज्ज सव्वसो ।।७.१।।**

**(ति.)** अनन्तराध्ययने वसत्यागतस्य स्वाचारः सविस्तरः कथयितव्य इत्युक्तम्, तच्च वचनदोषगुणाभिज्ञेन निरवद्यवचसा वाच्यमित्यनेन सम्बन्धेनायातं वाक्यशुद्ध्यध्ययनं व्याख्यायते । तस्येदमादिसूत्रम् —खलुशब्दोऽवधारणे । चतसृणामेव भाषाणाम्-नातोऽन्या भाषा विद्यते । परिसङ्ख्याय-सर्वैः प्रकारैर्ज्ञात्वा । प्रज्ञावान् । द्वयोः-भाषयोः । विनयम्-विनीयतेऽनेन कर्मेति विनयः । तं विनयं प्रयोगं शिक्षेत । द्वे च भाषे न भाषेत सर्वशः-सर्वथा ।।७.१।।

**(स.)** अथ वाक्यशुद्ध्याख्यं सप्तममध्ययनं प्रारभ्यते—चउन्हम्'इति-व्याख्यातं **धर्मार्थकामकथा**नामकं षष्ठमध्ययनम्, अथ **वाक्यशुद्धि**नामकं सप्तममध्ययनं व्याख्यायते, अस्याध्ययनस्य पूर्वाध्ययनेनायं सम्बन्धः-पूर्वाध्ययन एवमुक्तम्, गोचरीप्रविष्टस्य साधोः केनापि पृष्टं, त्वं स्वकीयमाचारं कथय ? तदा तेन स्वाचारं जानतापि महाजनसमक्षं विस्तरतस्तत्रैव न वक्तव्य आचारः, किन्तूपाश्रये गुरवः कथयिष्यन्ति-इति वक्तव्यम्, इह सप्तमेऽध्ययने तु उपाश्रयगतेनापि तेन गुरुणा वचनदोषगुणाभिज्ञेन निरवद्य-वचनेन कथयितव्यम्-इत्येतदुच्यते-उक्तं च-

"सावज्जऽणवज्जाणं वयणाणं जो न याणइ विसेसं ।
वोत्तुं पि तस्स न खमं किमङ्ग पुण देसणं काउं [ ]"

इत्यनेन सम्बन्धेनायातमिदमध्ययनं. तत्र सूत्रं, प्रज्ञावान् बुद्धिमान् साधुर्द्वाभ्यां सत्यासत्यामृषाभ्यां भाषाभ्यां विनयं शुद्धप्रयोगं शिक्षेत जानीयात्, तुरवधारणे, द्वाभ्यामेवाभ्यां, तव विनय इति कोऽर्थः ? विनीयतेऽनेन कर्म इति विनयस्तं विनयं, पुनर्द्वे असत्यासत्यामृषे न भाषेत सर्वशः सर्वैः प्रकारैः ? किं कृत्वा ? चतसृणां भाषाणां सत्यादीनां परिसंख्याय सर्वैः प्रकारैर्ज्ञात्वा, किं ? स्वरूपमिति शेषः खलुशब्दोऽवधारणार्थे, भाषाचतुष्टयमेवास्ति, नान्या भाषा वर्तते.।।७.१।।

(सु.) व्याख्यातं महाचारकथाध्ययनं, इदानीं वाक्यशुद्ध्याख्यमध्ययनमारभ्यते, अस्य चायमभिसम्बन्धः इहानन्तराध्ययने गोचरप्रविष्टेन सता स्वाचारं पृष्टेन तद्विदाऽपि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्यमिति, अपि त्वालये गुरवो वा कथयन्तीति वक्तव्यमित्येतदुक्तं, इह त्वालयगतेनापि तेन गुरुणा वा वचनदोषगुणाभिज्ञेन निरवद्यवचसा कथयितव्यमित्येतदुच्यते, उक्तं च-"सावज्जणवज्जाण" मिति अनेन सम्बन्धेनायातमिदमध्ययनमिति, तच्चेदम्-'चउण्हं'चतसृणां, खलुशब्दोऽवधारणे, चतसृणामेव, नातोऽन्या भाषा विद्यत इति । भाषाणां-सत्यादीनां परिसङ्ख्याय-सर्वैः प्रकारैर्ज्ञात्वा, स्वरूपमिति वाक्यशेषः । प्रज्ञावान्-प्राज्ञो बुद्धिमान् साधुः, किम् ?-इत्याह-द्वाभ्यां सत्यासत्यामृषाभ्यां, तुरवधारणे, द्वाभ्यामेव आभ्यां, विनयं-शुद्धप्रयोगं, विनीयतेऽनेन कर्म्मेतिकृत्वा, शिक्षेत-जानीयात्, द्वे-असत्या-सत्यामृषे न भाषेत सर्व्वशः-सर्वैः प्रकारैरिति ।।७.१।।

**जा य सच्चा अवत्तव्वा, सच्चामोसा य जा मुसा ।**
**जा य बुद्धेहिं नाइन्ना, न तं भासिज्ज पन्नवं ।।७.२।।**

(ति.) विनयमाह—या च सत्या अवक्तव्या-इत्थं गतो मृग इति व्याधेन पृष्टे, तस्याग्रे गतो मृग इति, सत्यमपि न वाच्यं, सावद्यत्वात् । सत्यामृषा च-अत्र नगरे दश दारका जाता इत्यादिका । या मृषा-सर्वथाप्यसत्या । या च बुद्धैरनाचीर्णा-असत्यामृषा आमन्त्रिणी हे हो हला'इत्यादिका । राज्ञो राजानं प्रत्याज्ञापनी यथा'अस्मै द्विजाय स्वदेशे मदादेशादेको महीयान् ग्रामो देय 'इत्यादिका कर्कशा, न तां भाषेत प्रज्ञावान् ।।७.२।।

(स.) विनयमेवाह-जा'इति-प्रज्ञावान् बुद्धिमान् साधुस्तां भाषां न भाषेत. न इत्थंभूतां वाचमुदाहरेत्, तां काम् ? - इत्याह—या च सत्या भाषा सा यदार्थतत्त्वमङ्गीकृत्यावक्तव्या सावद्यत्वेनानुच्चारणीया, यथा अमुत्र स्थिता पल्लीति कौशिकनामतापसभाषावत्,

"तत्सत्यमपि न ब्रूयात् परपीडाकरं वचः ।

तत्सत्यस्य प्रसादेन कौशिको नरकं गतः [ ]"

या च सत्यामृषा साप्यवक्तव्या न वक्तव्या, यथा 'दश दारका जाताः, मृषा च भाषा सर्वैव न वक्तव्या, या च भाषा बुद्धैस्तीर्थकरैर्गणधरैश्च नाचीर्णा, असत्यामृषा

आमन्त्रण्याज्ञापन्यादिलक्षणा अविधिपूर्वकं खरादिना प्रकारेण तामपि न भाषेत, इति गाथार्थः यथाभूता च भाषा न वाच्या सोक्ता ।।७.२।।

**(सु.)** विनयमेवाह–जा य सच्चा...इति, या च सत्या पदार्थतत्त्वमङ्गीकृत्य, अवक्तव्या-अनुच्चारणीया सावद्यत्वेन-'अमुत्र स्थिता पल्ली'इति कौशिकभाषावत्, सत्यामृषा वा यथा-दश दारका जाता इत्येवंलक्षणा, मृषा च संपूर्णैव, चशब्दस्य व्यवहितः सम्बन्धः, या च बुद्धैः-तीर्थकर-गणधरैरनाचरिता असत्यामृषा-आमन्त्रण्याज्ञापन्यादिलक्षणा अविधिपूर्वकं स्वरादिना प्रकारेण, न तां भाषेत, नेत्थंभूतां वाचमुदाहरेत् प्रज्ञावान्-बुद्धिमान् साधुरिति सूत्रार्थः ।।७.२।।

**असच्चमोसं सच्चं च, अणवज्जमकक्कसं ।**
**समुप्पेहमसंदिद्धं, गिरं भासिज्ज पन्नवं ।।७.३।।**

**(ति.)** उक्ता अवाच्या, वाच्यामाह–असत्यामृषां, सत्यां, च अनवद्याम्, अकर्कशाम । समुत्प्रेक्ष्य-विचार्य स्वपरोपकारिणी । असन्दिग्धाम्-स्फुटाम् । गिरं भाषेत् प्रज्ञावान् ।।७.३।।

**(स.)** अथ यथाभूता वाच्या, तामाह–असच्च...इति, प्रज्ञावान् बुद्धिमान्, कः ? साधुः, एवमसत्यामृषामुक्तलक्षणां गिरं भाषां भाषेत, ब्रूयात्, किंभूतां गिरम् ? सत्याम् इयं च भाषा सावद्यापि कर्कशापि भवत्यत आह, किंभूतां गिरम् ? अनवद्याम्, अवद्यं पापं तेन रहितां, पुनः किंभूतां गिरम ? अकर्कशां कठोरवचनरहितां, किं कृत्वा भाषेत ? समुत्प्रेक्ष्य स्वस्य परस्य चोपकारकारिणी इति बुद्ध्या पर्यालोच्य, पुनः किंभूतां गिरम् ? असन्दिग्धां स्पष्टां तत्कालं प्रतिपत्तिहेतुम् ।।७.३।।

**(सु.)** यथाभूता अवाच्या भाषा तथाभूतोक्ता, साम्प्रतं यथाभूता वाच्या तथाभूतामाह–असच्चमोसं'इति, असत्यामृषामुक्तलक्षणां, सत्यां चोक्तलक्षणामेव, इयं च सावद्यापि सकर्कशापि भवति, अत आह-असावद्यां-अपापां, अकर्कशामतिशयोक्त्या ह्यमत्सरपूर्वां, संप्रेक्ष्य-स्वपरोपकारिणीति बुद्ध्या आलोच्यासंदिग्धां-स्पष्टामक्षेपेण प्रतिपत्तिहेतुं, गिरं-वाचं, भाषेत-ब्रूयात्, प्रज्ञावान्-बुद्धिमान् साधुरिति ।।७.३।।

**एयं च अट्ठमन्नं वा, जं तु नामेइ सासयं ।**
**स भासं सच्चामोसं पि, तं पि धीरो विवज्जए ।।७.४।।**

**(ति.)** सत्यामृषां पुनर्विशेषण प्रतिषेधयति—एतं चार्थम्-अनन्तरप्रतिषिद्धं सावद्यं कर्कशम्-अन्यं वा-एवंजातीयम् । एतन्मध्याद् यः कश्चिदर्थी नामयति-[1]अननुगुणं करोति । शाश्वतम्-मोक्षम् । तम् अर्थं स्वीकृत्य स-साधुः । पूर्वोक्तभाषाभाषकत्वेनाधिकृतः। भाषां सत्यामृषामपि-अपिशब्दाद् या सत्या तामपि धीरो विवर्जयेत् ।।७.४।।

**(स.)** सांप्रतं सत्यामृषाभाषाप्रतिषेधार्थमाह—एअं'इति-धीरो बुद्धिमान् साधुः, एतं चार्थं पूर्वं प्रतिषिद्धं सावद्यकर्कशवचनविषयं च, एतज्जातीयमेतत्सदृशं प्राकृतत्वात्, यस्तु नामयति, शाश्वतम्, अत्र य एवं कश्चिदर्थो नामयति, कोऽर्थः ? अननुगुणं करोति, कोऽर्थः ? मोक्षमनुकूलं न करोति, स शाश्वतं मोक्षमाश्रित्य पूर्वोक्तभाषाभाषकत्वेनाधिकृतो भाषां सत्यामृषामपि पूर्वोक्ताम्, अपिशब्दात् सत्यापि या तथाभूता, तामपि भाषां विवर्जयेत्. ।।७.४।।

**(सु.)** साम्प्रतं सत्यामृषाप्रतिषेधार्थमाह—एअं च'इति, एतं चार्थमनन्तरप्रतिषिद्धं सावद्यकर्क्कशविषयमन्यं वा, एवंजातीयं प्राकृतशैल्या, यस्तु नामयति शाश्वतं, य एव कश्चिदर्थो नामयति-अननुगुणं करोति, शाश्वतं-मोक्षं, तमाश्रित्य स साधुः पूर्वोक्तभाषाभाषकत्वेनाधिकृतो भाषां सत्यामृषामपि पूर्वोक्तां, अपिशब्दात् सत्यापि या तथाभूता तामपि धीरो-बुद्धिमान् विवर्जयेत्-न ब्रूयादिति भावः । आह-सत्यामृषाभाषाया ओघत एव प्रतिषेधात् तथाविधसत्यायाश्च सावद्यत्वेन, गतार्थं सूत्रमिति, उच्यते, मोक्षपीडाकरं सूक्ष्ममप्यर्थं अङ्गीकृत्यान्यतरभाषा-भाषणमपि न कर्त्तव्यमित्यतिशय-प्रदर्शनपरमेतददुष्टमेवेति ।।७.४।।

**वितहं पि तहामुत्तिं, जं गिरं भासई नरो ।**
**तम्हा सो पुट्ठो पावेणं, किं पुण जो मुसं वए ? ।।७.५।।**

**(ति.)** आह परः-ओघतः सत्यामृषा, सावद्यरूपा सत्या च, प्रागेव निषिद्धा किं पुनरिदम्? मोक्षपीडाकरम् अर्थमङ्गीकृत्य कापि भाषा न भाषणीयेति प्रदर्शनार्थमिति। तथा ओघतोऽग्रेऽपि मृषा प्रतिषिद्धा, विशेषतः पुनराह — तथामूर्त्यपि स्वीकृत-पुरुषवेषमपि स्त्र्यादिकम् आश्रित्य, यां गिरं भाषते नरः 'इयं स्त्री आगच्छति-इत्यादि।

१. प्रतिकूलम् १० टि. ।।

तदपि वितथम् । तस्मादपि भाषणात् । स्पृष्टः-बद्धः । स मृषाभाषणकर्मणा । किं पुनर्यः सर्वथा मृषा वक्ति । स सुतरां बध्यत एव ।।७.५।।

**(स.)** सांप्रतं मृषाभाषायाः संरक्षणार्थमाह—वितहं'इति वितहमिति-यो नरो वितथमसत्यं तथामूर्त्यपि कथञ्चित् तत्स्वरूपं वस्तु पुरुषनेपथ्यस्थितवनिताद्यप्यङ्गीकृत्य यां गिरं भाषते, यथेयं स्त्री आगच्छति गायति वेत्यादिरूपाम्, असावपि नरस्तस्माद् भाषणादेवंभूताद् भाषणात् पूर्वमेव भाषणाभिसन्धिकाले पापेन कर्मणा स्पृष्टो बद्धः किं पुनर्यो मृषा प्राणघातकारिणीं वाचं वदेत्, स वक्तातिशयेन पापकर्मणा बद्ध्यत इत्यर्थः ।।७.५।।

**(सु.)** सांप्रतं मृषाभाषासंरक्षणार्थमाह—वितहं'पि, वितथं-अतथ्यं तथामूर्त्यपि-कथञ्चित् तत्स्वरूपमपि वस्तु, अपिशब्दस्य व्यवहितः सम्बन्धः, एतदुक्तं भवति-पुरुषनेपथ्यस्थितवनिताद्यप्यङ्गीकृत्य यां गिरं भाषते नरः, इयं स्त्री आगच्छति, गायति च'इत्यादिरूपां, तस्माद् भाषणादेवम्भूतात् पूर्वमेवासौ वक्ता भाषणाभिसन्धिकाले स्पृष्टः पापेन-बद्धः कर्म्मणा, किं पुनर्यो मृषां वक्ति ?, भूतोपघातिनीं वाचं स सुतरां बाध्य(बद्ध्य)त-इति ।।७.५।।

**तम्हा गच्छामो वक्खामो, अमुगं वा णे भविस्सइ ।**
**अहं वा णं करिस्सामि, एसो वा णं करिस्सइ ।।७.६।।**

**(ति.)** यस्मादेवं ? - तस्माद् गमिष्याम एव प्रातरितोऽन्यत्र । वक्ष्याम एव तत् तद्दोषध[1]-निमित्तम् । अमुकं वा नः कार्यं वसत्यादिकं भविष्यत्येव । अहं वेदं लोचादि करिष्यामि नियमेन । एष वा साधुरस्माकं विश्रामणादि करिष्यत्येवेति ।।७.६।।

**(स.)** पुनः कीदृशीं भाषां साधुर्न वदेत् ?-इत्याह—तम्हा'इति-यस्माद् वितथं तथामूर्त्यपि वस्त्वङ्गीकृत्य भाषमाणो बद्ध्यते पापकर्मणा, तस्माद् वयं गमिष्याम एव श्व इतोऽन्यत्र, वक्ष्याम एव श्वस्तत्तदौषधनिमित्तममुकं वा. नोऽस्माकं वसत्यादि कार्यं भविष्यत्येव, अहं चेदं लोचादि करिष्यामि नियमेन, एष वा साधुरस्माकं विश्रामणादिकं करिष्यत्येव. ।।७.६।।

**(सु.)** तम्हा'इति, यस्माद् वितथं तथामूर्त्यपि वस्त्वङ्गीकृत्य भाषमाणो बंद्ध्यते

---

१. दोष. १.२, ०दोषध. ३.४, ०दौषध. ५ ।।

तस्माद् 'गमिष्याम एव श्व इतोऽन्यत्र, वक्ष्याम एव श्वस्तत्तदौषधनिमित्तमिति, अमुकं वा नः कार्यं वसत्यादि भविष्यत्येव, अहं चेदं लोचादि करिष्यामि नियमेन, एष वा साधुरस्माकं विश्रामणादि करिष्यत्येवेति ॥७.६॥

**एवमाइ उ जा भासा, एसकालम्मि संकिया ।**
**संपयाईयमट्ठे वा, तं पि धीरो विवज्जए ॥७.७॥**

**(ति.)** एवमादि-कापि या भाषा, एष्यत्काले शङ्किता । साम्प्रतातीतेऽपि वा-काले । तामपि धीरो विवर्जयेत् । निश्चितं न वदेत् । निश्चितोक्तस्यान्यथाभावेन व्यभिचारात् मृषावादापत्तिरिति ॥७.७॥

**(स.)** तर्हि किं कर्तव्यं ?-इत्याह-एवं'इति-धीरः पण्डितः साधुरेवमाद्या या भाषा, आदिशब्दात् पुस्तकं ते दास्याम्येवेत्यादिग्रहणम्, एष्यत्काले भविष्यत्कालविषया बहुविघ्नत्वान्मुहूर्तादीनां शङ्किता किमिदमित्थमेव भविष्यति ?, उतान्यथा'इत्य-निश्चितगोचरा, तथा साम्प्रतातीतार्थयोरपि या शङ्किता, साम्प्रतार्थे स्त्रीपुरुषयोरनिश्चये सत्येष पुरुष इति. अतीतार्थेऽप्येवमेव बलीवर्द-तत्स्त्र्याद्यनिश्चये तदा गौरस्माभिर्दृष्ट इति याप्येवंभूता भाषा शङ्किता, तामपि विवर्जयेत्, तथाभावनिश्चयाभावेन व्यभिचारतो मृषात्वस्योपपत्तेर्विघ्नतो गमनादौ गृहस्थमध्ये लाघवादिप्रसङ्गात् सर्वमेव सावसरं वक्तव्यमिति रहस्यम् ॥७.७॥

**(सु.)** एवमाइ उ इति, एवमाद्या तु या भाषा, आदिशब्दात् पुस्तकं ते दास्याम्येवेत्येव-मादिपरिग्रहः, एष्यत्काले-भविष्यत्कालविषया, बहुविघ्नत्वान्मुहूर्त्तादीनां शङ्किता-किमिदमित्थमेव भविष्यति, उतान्यथेत्यनिश्चितगोचरा, तथा साम्प्रतातीतार्थयोरपि या शङ्किता, साम्प्रतार्थे स्त्रीपुरुषाविनिश्चये एष पुरुष इति, अतीतार्थेऽप्येवमेव बलीवर्द-तत्स्त्र्याद्यनिश्चये तदात्र गौरस्माभिर्दृष्ट इति । याप्येवंभूता भाषा शङ्किता तामपि धीरो विवर्जयेत्, तत्तथाभावनिश्चयाभावेन व्यभिचारतो मृषात्वोपपत्ते-र्विघ्नतोऽगमनादौ गृहस्थमध्ये लाघवादिप्रसङ्गात्, सर्वमेव सावसरं वक्तव्यमिति ॥७.७॥

**अईयम्मि य कालम्मि, पच्चुपन्नमणागए ।**
**जमट्ठं तु न जाणिज्जा, एवमेयं ति नो वए ॥७.८॥**

**(ति.)** किञ्च–[अईयम्मि...] स्पष्टः । अयमज्ञातभाषणप्रतिषेधः ।।७.८।।

**(स.)** अईअं'इति-पुनः किञ्च साधुरतीते च काले, तथा प्रत्युत्पन्ने वर्तमाने, अनागते च काले यमर्थं तु न जानीयात् सम्यगेवमयमिति, तमर्थमङ्गीकृत्यैवमेतदिति न वदेन्न ब्रूयात्, अयमज्ञातस्यार्थस्य भाषणे निषेध उक्तः ।।७.८।।

**(सु.)** किञ्च–अईअंमि इति, अतीते च काले तथा प्रत्युत्पन्ने-वर्त्तमाने अनागते च यमर्थं तु न जानीयात् 'सम्यगेवमयमिति, तमङ्गीकृत्य'एवमेतदिति न ब्रूयादिति, अयमज्ञातभाषण-प्रतिषेधः ।।७.८।।

**अईयम्मि य कालम्मि, पच्चुपन्नमणागए ।**
**जत्थ संका भवे जं तु, एवमेयं ति[१] नो वए ।।७.९।।**

**(ति.)** [अईयम्मि....इति] स्पष्टः ।।७.९।।

**(स.)** अइअंमि'इतिसाधुरतीते काले च प्रत्युत्पन्ने, अनागते यत्रार्थे शङ्का सन्देहो भवेत्, तं शङ्कितमर्थमाश्रित्यैवमेतदिति निश्चयं न वदेत्, अयमपि निषेधः शङ्कितस्य भाषणे प्रतिषेधरूपः ।।७.९।।

**(सु.)** अईयम्मि-अतीते च काले प्रत्युत्पन्नेऽनागते यत्रार्थे शङ्का भवेदिति तमप्यर्थमाश्रित्यैवमेतदिति न ब्रूयादिति, अयमपि विशेषतः शङ्कितभाषणप्रतिषेधः ।।७.९।।

**अईयम्मि य कालम्मि, पच्चुपन्नमणागए ।**
**निसंकियं भवे जं तु, एवमेयं ति आलवे ।।७.१०।।**

**(ति.)** [अईयम्मि...इति] स्पष्टः ।।७.१०।।

**(स.)** तर्हि कीदृशं वचनं वदेत् ?-इति,-आह–अईअम्मि'इति-साधुरतीते च काले, प्रत्युत्पन्ने वर्तमानकाले, अनागते च काले यदर्थजातं निःशङ्कितं शङ्कारहितं. निस्सन्देहं भवेत्, तुशब्दात्-यन्निष्पापं च भवेत्, तत्'एवमेतदितिनिर्दिशेत्, अन्ये त्वाचार्या इत्थं वदन्ति, स्तोकं स्तोकमिति परिमितया वाचा निर्दिशेत्. ।।७.१०।।

**(सु.)** अईयंमि, अतीते च काले प्रत्युत्पन्ने अनागते निःशङ्कितं भवेत्, यदर्थजातं

१. 'नालवे-१.-३.५ ।।

तुशब्दात् अनवद्यं, तदेवमेतदिति निर्दिशेत्, अन्ये पठन्ति—स्तोकस्तोकमिति, तत्र परिमितया वाचा निर्दिशेदिति ।।७.१०।।

**तहेव फरुसा भासा, गुरुभूओवघाइणी ।**
**सच्चा वि सा न वत्तव्वा, जओ पावस्स आगमो ।।७.११।।**

**(ति.)** यथा अज्ञातं शङ्कितं वा 'एवमेतत्'इति न वाच्यम् । तथैव-कस्यचित् पूर्वं दासस्य सतः कुत्रापि गतस्य । गुरुभूतस्य-प्रधानीभूतस्य । उपघातिनी-छायापातकरी त्वं दासोऽभूत्'इत्येवंरूपा फरुसा भासा सत्यापि न वक्तव्या । यतः-तस्यासमाधानेन। स्वस्य पापस्यागमः स्यात् ।।७.११।।

**(स.)** पुनः कीदृशीं भाषां न वदेत्-इत्याह—तहेव...इति-तथैव साधुना परुषा कठोरा भाषा भावस्नेहरहिता न वक्तव्या, पुनर्या किंभूता भाषा ? गुरुभूतोपघातिनी बहुप्राणघातकारिणी भवति, सा सर्वथा सत्यापि बाह्यार्थतया भावमङ्गीकृत्य-यथा कश्चित् क्वचित् कुलपुत्रत्वेन प्रतीतस्तं प्रति-अयं दास इति न वदेत्, यतो यस्या भाषायाः सकाशात् पापस्यागमो भवेत्,

**(सु.)** तहेव'इति, तथैव, परुषा भाषा-निष्ठुरा साधुभावस्नेहरहिता गुरुभूतोपघातिनी-महाभूतोपघातवती, यथा [भवति तथा] कश्चित् कस्यचित् कुलपुत्रत्वेन प्रतीतः, तं दासमित्यभिदधतः, सर्वथा सत्यापि सा बाह्यार्थातथाभावमङ्गीकृत्य न वक्तव्या, यतो यस्या भाषायाः सकाशात् पापस्यागमः-अकुशलबन्धो भवति ।।७.११।।

**तहेव काणं काणि(ण) त्ति, पडगं पडगि(ग) त्ति वा ।**
**वाहियं वा वि रोगि त्ति, तेणं चौर त्ति नो वए ।।७.१२।।**

**(ति.)** अप्रीत्यादिदोषप्रसङ्गात् । अर्थः सुगमः ।।७.१२।।

**(स.)** पुनः कीदृशीं भाषां न वदेत् ? इत्याह-तह...इति, साधुस्तथैव काणं भिन्नाक्षं पुरुषं प्रति-अयं काण इति नो वदेत्, तथा पण्डकं प्रत्ययं पण्डको नपुंसक इति नो वदेत्, तथा व्याधिमन्तं प्रति-अयं रोगीति नो वदेत्, तथा स्तेनं चौरं प्रति-अयं चौर इति नो वदेत्. कुतः ? अप्रीतिलज्जानाशस्थिररोगबुद्धिविराधनादिदोषा अनुक्रमेण भवन्ति. ।।७.१२।।

**(सु.)** तहेव'इति, तथैवेति पूर्ववत्, काणं-भिन्नाक्षं काण इति, तथा पण्डकं-

नपुंसकं पण्डक इति वा, व्याधिमन्तं वापि रोगी इति, स्तेनं-चौरं चौर इति नो वदेत्, अप्रीति-लज्जा-नाश-स्थिररोग-बुद्धि-विराधनादिदोषप्रसङ्गादिति ।।७.१२।।

**एएणऽन्नेण अट्ठेण, परो जेणुवहम्मइ ।**
**आयारभावदोसन्नू, न तं भासिज्ज पन्नवं ।।७.१३।।**

**(ति.)** एतेनान्येनार्थेन-उक्तेन सता । परो येनोपहन्यते । आचारभावदोषज्ञः-यतिः । न तं भाषेत प्रज्ञावान् ।।७.१३।।

**(स.)** ततः किं कर्तव्यमित्याह—एएण'इति-प्रज्ञावान् बुद्धिमान् साधुस्तमर्थं न भाषेत, किंभूतः साधुः ? बुद्धिमान् आचारभावदोषज्ञः, आचारभावस्य दोषान् जानातीत्याचारभावदोषज्ञः, तमर्थं कं ? येन-एतेनान्येन वा उक्तेन कथितेनार्थेन केनचित् प्रकारेण परोऽन्य उपहन्यते पीडावान् भवति. ।।७.१३।।

**(सु.)** एएणं ति, एतेनान्येन वाऽर्थेनोक्तेन सता परो येनोपहन्यते, येन केनचित् प्रकारेण आचारभावदोषज्ञो यतिर्न तं भाषेत प्रज्ञावान् तमर्थमिति ।।७.१३।।

**तहेव होले गोलि त्ति, साणे वा वसुल(लि) त्ति य ।**
**दमए दूहए वा वि, नेवं भासिज्ज पन्नवं ।।७.१४।।**

**(ति.)** तथैव होले गोल इति । श्वा वा [१]पांशुल इति । द्रमको दुर्भगो वापि नैव भाषेत प्रज्ञावान् । होलादिशब्दा देशान्तरेषु सम्बोधने नैष्ठुर्यवाचका इति नोच्यन्ते ।।७.१४।।

**(स.)** पुनः साधु कीदृशीं भाषां न भाषेत ? इत्याह—तहेव'इति बुद्धिमान् साधुस्तथैव तां भाषां न भाषेत, तां काम् ? इत्याह-होल १ गोल २ इति, श्वा ३ वसुल ४ इति, द्रमक ५ इति, दुर्भग इति, इह होलादिशब्दास्तत्तद्देशेषु प्रसिद्धनिष्ठुरतादिवाचका अप्रीत्युत्पादकाश्च, अतस्तेषां प्रतिषेधः प्रोक्तः इति स्त्रीपुरुषयोः सामान्येन भाषणनिषेधः कृतः ।।७.१४।।

**(सु.)** तहेव इति, तथैव, होले गोले इति श्वा वा वसुल इति, द्रमको दुर्भगश्चापि नैवं भाषेत प्रज्ञावान्, इह होलादिशब्दास्तत्तद्देशप्रसिद्धितो नैष्ठुर्यादिवाचकाः, अतस्तत्प्रतिषेध इति ।।७.१४।।

---

१. वसुल छीनाल १० टि. ।।

**अज्जिए पज्जिए वा वि, अम्मो माउसिय त्ति य ।**
**पिउस्सिए भायणिज्ज त्ति, धूए नत्तुणिइ(अ) त्ति य ।।७.१५।।**

**(ति.)** एवं सामान्येन स्त्रीपुंसयोराभाषणनिषेधं विधायाधुना स्त्रीमधिकृत्याह– आर्यिके ! प्रार्यिके ! वापि । अम्ब ! मातृस्वसः ! इति । पितृस्वसः ! भागिनेयी इति । दुहितः । नप्तृके ! इति च । एतानि आमन्त्रणवचनानि प्रतीतानि । नवरम् । पितुर्मातुर्माता-आर्यिका । तस्यापि माता प्रार्यिका ।।७.१५।।

**(स.)** अथ स्त्रियमाश्रित्याह–अज्जिए इति । साधुरेतानि वचनानि न वदेत्, तानि कानि ? - तदाह-हे आर्यिके, हे प्रार्यिके, वा हे अंब, हे मातृष्वसः, हे पितृष्वसः, हे भागिनेयि, हे दुहितः, हे नप्त्रि ! एतानि वचनानि स्त्रिया आमन्त्रणे वर्तन्ते, तत्रैषां शब्दानामर्थस्त्वेवं-तत्र मातुः पितुर्या माता सा आर्यिका, तस्या अपि माता अन्या सा प्रार्यिका, अन्येषां पदार्थः सुगम एव. ।।७.१५।।

**(सु.)** एवं स्त्रीपुरुषयोः सामान्येन भाषणप्रतिषेधं कृत्वा अधुना स्त्रियमधिकृत्याह– अज्जिए'इति, आर्यि(र्जि)के प्रार्यि(र्जि)के वापि अम्ब मातृष्वस इति च पितृष्वसः भागिनेयी-इति, दुहितः नप्तृ इति च, एतानि स्त्र्यामन्त्रणवचनानि वर्त्तन्ते, तत्र मातुः पितुर्वा माता आर्यिका, तस्या अपि या अन्या माता सा प्रार्यिका, शेषाभिधानानि प्रकटार्थानि एवेति सूत्रार्थः ।।७.१५।।

**हले हलि त्ति अन्नि त्ति, भट्टे सामिणि गोमिणि ।**
**होले गोले वसुलि त्ति, इत्थियं नेवमालवे ।।७.१६।।**

**(ति.)** हले ! हले ! अन्ये ! भट्टे ! स्वामिनि ! । होले ! गोले ! वसुले ! इति-एतानि नानादेशापेक्षया गौरवकुत्सागर्भाणि स्त्र्यामन्त्रणानि । ततः स्त्रियं नैतैरालपेत् । एवमालापनेऽनुरागा-ऽप्रीतिक-प्रवचनलाघवादिदोषाः ।।७.१६।।

**(स.)** हले ! इति-पुनः किञ्च साधुः स्त्रियं प्रति नैवं हो(ह)लादिशब्दैरालपेत्. कथम्? एवमालपनं कुर्वतः साधोः स्वगर्हा-तत्प्रद्वेष-वचनलाघवादयो दोषा भवन्ति, के ते होलादिशब्दा इत्याह-पूर्वं[1] ये उक्ताः, पुनः हले हले इत्येवमन्ने इति, तथा भट्टे स्वामिनि, गोमिनि, होले, गोले, वसुले, इति, एतान्यपि नानादेशापेक्षया स्त्रीणामामन्त्रणवचनानि गौरव-कुत्सादिगर्भाणि वर्तन्ते. ।।७.१६।।

१. १४मी गाथायाम् ।।

**(सु.)** हले ! हले ? त्ति, हले ? इत्येवं ! अन्ने इत्येवं तथा भट्टे ! स्वामिनि ! गोमिनि, तथा हले ! गोले ! वसुले ! इत्येतान्यपि नानादेशापेक्षया स्त्र्यामन्त्रणवचनानि गौरव-कुत्सादिगर्भाणि वर्त्तन्ते, यतश्चैवं ?-अतः स्त्रियं नैवं हो(ह)लादिशब्दैरालपेदिति, दोषाश्चैवमालपनं कुर्वतः सङ्ग-गर्हा-तत्प्रद्वेष-प्रवचनलाघवादय इति ।।७.१६।।

**नामधिज्जेण णं बूया, इत्थिगुत्तेण वा पुणो ।**
**जहारिहमभिगिज्ज, आलविज्ज लविज्ज वा ।।७.१७।।त्रिभिर्विशेषकम् ।**

**(ति.)** कथं तर्ह्यालपेत् ? इत्याह—नामधेयेन-प्रशस्तेन नाम्नैव । स्त्रीगोत्रेण वा-हे काश्यपगोत्रे इत्यादि । यथार्हम्-यथायोग्यं, वयोदेशैश्चर्याद्यपेक्षपया । गुणदोषानालोच्य बालां युवतिं वृद्धां च—बाले !, भद्रे !, धर्मशीले ! इत्येवं आ-ईषल्लपेत् । बहुतरं वा कार्यवशात् लपेत् ।। उक्तः स्त्रीं प्रत्यालापनिषेधो विधिश्च ।।७.१७।।

**(स.)** अथैवं पूर्वोक्तप्रकारेणालपनं न कुर्यात् ? तर्हि कथं कुर्यात् ? इत्याह—नाम...इति—साधुर्नामधेयेन नाम्नैव क्वचित् कारणे एतां स्त्रियं ब्रूयात्-यथा हे देवदत्ते इति, अथ नाम्नोऽस्मरणे गोत्रेण वा ब्रूयात् स्त्रियं, यथा हे काश्यपगोत्रे इति, परं यथायोग्यं यथार्हमभिगृह्य वयोदेशैश्वर्याद्यपेक्षया गुणदोषानालोच्य तदालपेत् लपेत् वा, ईषत् सकृद् वा लपनमालपनं, लपनं वारंवारम्, अतोऽन्यथा, तत्र च या वृद्धा मध्यदेशे ईश्वरा धर्मप्रिया अन्यथोच्यते धर्मशीला इत्यादिना, अन्यथा च यथा न लोकोपघात इति - उक्तः स्त्रियमधिकृत्यालपननिषेधो विधिश्च ।।७.१७।।

**(सु.)** यदि नैवमालपेत् ? कथंतर्हि आलपेत् ? - इत्याह—नामधिज्जेणं'इति, नामधेयेनेति-नाम्नैव नामधेयेनैनां ब्रूयात्, स्त्रियं क्वचित्कारणे, यथा देवदत्ते ! इत्येवमादि, नामास्मरणादौ गौत्रेण वा पुनर्ब्रूयात् स्त्रियं, यथा काश्यपगोत्रे ! इत्येवमादि, यथार्ह-यथायोग्यं वयोदेशैश्वर्याद्यपेक्षया अभिगृह्य-गुणदोषानालोच्याऽऽलपेल्लपेद् वा, ईषत् सकृद् वा लपनं आलपनं, लपनमतोऽन्यथा, तत्र वयोवृद्धा मध्यदेशे ईश्वरा धर्म्मप्रिया, अन्यत्रोच्यते धर्मशीले इत्यादि, अन्यथा च यथा न लोकोपघात इति उक्तः स्त्रियमधिकृत्यालपन-प्रतिषेधो विधिश्च, ।।७.१७।।

**अज्जए पज्जए वा वि, बप्पो चुल्लपिउ त्ति य ।**
**माउला भायणिज्ज[१] त्ति, पुत्ते नत्तुणिय त्ति य ।।७.१८।।**

१. भाइणिज्ज' पाठोयमन्यत्र मुद्रितः ।।

(ति.) सांप्रतं पुरुषमाश्रित्याह—आर्यकः-पितामहो मातामहश्च । प्रार्यकः-प्रपितामहः प्रमातामहश्च । बप्पः-वप्ता । चुल्लपिउ त्ति-पितृव्यः । मातुलः, भागिनेयः पुत्रः । नप्तेति च-पौत्रः ।।७.१८।।

(स.) साम्प्रतं पुरुषमधिकृत्याह—अज्जए इति । साधुरिति न वदेत्, इतीति किं? आर्यकः प्रार्यकश्चापि, बप्पचुलकपितेति च, तथा मातुल भागिनेयेति, पुत्र नप्त इति च, इह भावार्थः स्त्रियामिव द्रष्टव्यः, नवरं चुल्लवप्पः पितृव्योऽभिधीयते. ।।७.१८।।

(सु.) सांप्रतं पुरुषमधिकृत्याह—अज्जए पज्जए'इति, आर्यकः प्रार्यकश्चापि बप्पश्चुल्लपितेति च, तथा मातुल भागिनेय इति, पुत्रः नप्त इति च, इह भावार्थः स्त्रियामिव द्रष्टव्यः, नवरं चुल्लबप्पः-पितृव्योऽभिधीयत इति ।।७.१८।।

**हे हो(भो) हलि त्ति अन्नि त्ति, भट्टे सामिय गोमिय ।**
**हाले गोले वसुलि त्ति, पुरिसं नेवमालवे ।।७.१९।।**

(ति.) हे ! भो !, हला !, अन्य !, भर्त्तः !, स्वामिन् !, गोमिन् !, होल !, गोल !, वसुल ! इति पुरुषं नैवमालपेत् । अत्र भावार्थः पूर्ववत् ।।७.१९।।

(स.) हे ! भो ! इति-किञ्च हे अन्न ! हे भट्ट ! हे स्वामिन् ! हे होल ! हे गोल ! हे वसुलेति साधुः पुरुषं नैवमालपेदिति. ।।७.१९।।

(सु.) हे भो हलि त्ति, अन्ने त्ति भट्ट स्वामिन् गोमिन् होल गोल वसुलि त्ति पुरुषं नैवमालपेदित्यत्रापि भावार्थः पूर्ववदेवेति ।।७.१९।।

**नामधिज्जेण णं बूया, पुरिसं गुत्तेण वा पुणो ।**
**जहारिहमभिगिज्ज, आलविज्ज लविज्ज वा ।।७.२०।।त्रिभिर्विशेषकम् ।**

(ति.) कथं तर्ह्यालपेत्—अर्थः प्राग्वत् । उक्तः पुरुषालापनिषेध-विधी ।।७.२०।।

(स.) यदि नैवमालपेत् ?, तर्हि कथमालपेदित्याह—नाम...इति । व्याख्या पूर्ववत्, नवरं पुरुषाभिलापेनार्थयोजना कार्या - उक्तः पुरुषमप्याश्रित्यालपनप्रतिषेधो विधिश्च ।।७.२०।।

(सु.) यदि नैवमालपेत् ? कथं तर्ह्यालपेत् ? इत्याह—नामधिज्जेणं ति पूर्ववदेव,

नवरं पुरुषाभिलापेन योजना कार्येति उक्तः पुरुषमप्याश्रित्यालपनप्रतिषेधो विधिश्च ।।७.२०।।

**पंचेंदियाण पाणाणं, एस इत्थि अयं पुमं ।**
**जाव णं न विजाणिज्जा, ताव जाइ त्ति आलवे ।।७.२१।।**

**(ति.)** अधुना पञ्चेन्द्रियतिर्यग्गतं वाग्विधिमाह–स्पष्टः । नवरम् । जाइ त्ति आलवे-जात्या आलपेत् । एषः-प्रश्नादिकार्ये। दूरे गां दृष्ट्वा, इतो गोरूपाद् वामेन दक्षिणेन वा मार्ग ? इत्यादिकं गोपालादि पृछ्यते । अन्यथा लिङ्गव्यत्ययेनौक्तौ मृषावाददोषः स्यात् ।

आह परः-एकेन्द्रियाणां नारकाणां च नपुंसकत्वे सत्यपि मृत्तिका, पाषाण, आपो, घनरसः, ज्वलनः, पवनः, तरुः, लता, शङ्खः, शुक्तिका, कीटिका, मत्कोटकः, भृङ्गी, भृङ्गः नारक इत्यादीनां लिङ्गव्यत्ययेनोच्यमानत्वान्न मृषावादः ?

गुरुराह-व्यवहारसत्येन सत्यमेवैतत् । यथा दह्यते गिरिः । गलति भाजनम् । अनुदरा कन्या । ततो नात्र मृषादोषः ।।७.२१।।

**(स.)** पञ्चेन्द्रियतिर्यक्सम्बन्धिनं वचनविधिमाह-पञ्चिदि...इति । पञ्चेन्द्रियाणां प्राणिनां गवादीनां क्वचिद् दूरदेशे स्थितानाम्-'एषा स्त्री गौः, अयं पुमान् बलीवर्दः, यावदेतद्विशेषेण न विजानीयात् तावन्मार्गे प्रश्नादौ प्रयोजने समुत्पन्ने सति जातिं निमित्तमाश्रित्यालपेत्, अस्माद् गोरूपजातात् कियद् दूरेणेत्येवमादि, अन्यथा लिङ्ग-व्यत्यय-सम्भवान्मृषावादस्योत्पत्तिः स्यात्, बालगोपालादीनामपि विपरिणाम इत्येवमादयो दोषा भवन्ति ।।७.२१।।

**(सु.)** अधुना पञ्चेन्द्रियतिर्यग्गतं वाग्विधिमाह–पंचिंदियाणं इति, पञ्चेन्द्रियाणां प्राणिनां गवादीनां क्वचिद्विप्रकृष्ट-देशावस्थितानाम'एषा स्त्री गौः, अयं पुमान बलीवर्दः, यावदेतद्विशेषेण न विजानीयात्, तावन्मार्गप्रश्नादौ प्रयोजने उत्पन्ने सति जातिमाश्रित्यालपेत्, अस्माद् गोरूपजातात् कियद् दूरेणेत्येवमादि, अन्यथा लिङ्ग-व्यत्ययसम्भवात् मृषावादापत्तिः, गोपालादीनामपि विपरिणाम इत्येवमादयो दोषा इति । आक्षेप-परिहारौ तु वृद्धविवरणादवसेयौ, तच्चेदं "जइ लिंगवच्चए दोसो ता कीस पुढवाईए नपुंसगत्तेऽवि, पुरिसित्थिनिद्देसो पयट्टइ, जहा पत्थरो मट्टिया

करओ उस्सा मुम्मुरो जाला वाओ वाउली अंबओ अंबिलिआ, किमिओ जलूगा मक्कोडओ कीडिया भमरओ मच्छिया इच्चेवमादि ?,-आयरिओ आह-जणवयसच्चेण ववहारसच्चेण य एवं पयट्टइ त्ति न इत्थ दोसो, पंचिंदिएसु पुण ण एयमंगीकीरइ, गोवालादीण वि ण सुदिट्ठधम्मि त्ति विपरिणामसंभवाओ, पुच्छियसामायारिकहणे वा गुणसंभवादिति" ।।७.२१।।

**तहेव मणुसं पसुं, प[क्]खिं वा वि सरीसि(स)वं ।**
**थूले पमेइले वज्झे, पायमित्त य नो वए ।।७.२२।।**

**(ति.)** तथैव मनुष्यं पशुं पक्षिणं । सरीसृपम्-अजगरादिकम् । स्थूलः-अत्यन्तमांसलो मनुष्यादिः । तथा प्रमेदूरः-मेदस्वी । वध्यः-व्यापाद्यः । पाक्यः-पाकप्रायोग्यः, कोलप्राप्तः। इति वा-इत्यादि । नो वदेत् । अप्रीत्यादिदोषप्रसङ्गात् ।।७.२२।।

**(स.)** तहेव'इति-किञ्च साधुस्तथैवोक्तपूर्वं मनुष्यमार्यादिकं पशुमजादिकं पक्षिणं वापि हंसादिकं सरीसृपमजगरादिकं प्रतीति न वदेत्, इतीति किम् ? अयं स्थूलोऽत्यन्तमांसलो मनुष्यादिः, तथायं प्रमेदुरः प्रकर्षेण मेदःसम्पन्नः. तथायं वध्यो मारणीयः. अयं पाक्यः पाकप्रायोग्यः, केचिद्वदन्ति-पाक्यः कालप्राप्त इत्येवं वचनं न वदेत्, कथम् ? अप्रीतिव्यापत्त्याशङ्कादिदोषप्रसङ्गात्. ।।७.२२।।

**(सु.)** किञ्च—तहेव'इति, तथैव यथैवोक्तं प्राक्, मानुष्यं-आर्यादिकं, पशुं-अजादिकं, पक्षिणं वापि-हंसादिकं, सरीसृपं-अजगरादिकं, स्थूलः-अत्यन्तमांसलोऽयं मनुष्यादिः, तथा प्रमेदुरः-प्रकर्षेण मेदःसम्पन्नः तथा बध्यो-व्यापादनीयः, पाक्य इति च नो वदेत्, पाक्यः-पाकप्रायोग्यः, कालप्राप्त इत्यन्ये, नो वदेत्-न ब्रूयात् तदप्रीति-तद्व्यापत्त्या-शङ्कादिदोषप्रसङ्गादिति ।।७.२२।।

**परिवूढ त्ति णं बूया, बूया उवचिय त्ति य ।**
**संजाए पीणिए वा वि, महाकाइ त्ति आलवे ।।७.२३।।**

**(ति.)** कारणे त्वेवं ब्रूयात्—परिवृद्धः-परिसमन्ताद् वृद्धः, वृद्धिं गतः । अयं स्थूलमनुष्यादिरिति । ब्रूयादुपचितमिति च । सञ्जातः । प्रीणितः-सस्निग्धः । महाकाय इति चालपेत् ।।७.२३।।

**(स.)** कारणे तूत्पन्न एवं वदेदित्याह—परि...इति । साधुः स्थूलं मनुष्यादिकं प्रतीति वदेत्, इतीति किम् ? अयं परिवूढो बलोपेतः, अयमुपचितः, अयं सञ्जातः, अयं प्रीणितः अयं महाकाय इति ब्रूयादालपेत्. ।।७.२३।।

**(सु.)** कारणे पुनरुत्पन्ने, एवं वदेत्—इत्याह-'परिवूढ'इति, परिवृद्ध इति एनं-स्थूलं मनुष्यादिं ब्रूयात्, तथा ब्रूयादुपचित इति च, संजातः प्रीणितश्चापि सस्निग्धः महाकाय इति चालपेत् परिवृद्धं, पलोपचितं परिहरेदित्यादाविति ।।७.२३।।

**तहेव गाओ दुज्झाओ, दम्मा गोरहगत्ति य ।**
**वाहिमा रहजोगत्ति, नेवं भासिज्ज पन्नवं ।।७.२४।।**

**(ति.)** तथैव । गावो दोह्याः-दोहार्ह्या । दम्याः-दमनयोग्याः । गोरथिकाः-गोभिराकृष्यो रथः गोरथः शकटं, तत्र योज्यन्त इति 'क्रीतादित्वात्'इकणि गोरथिकाः [1]कल्होडाः । वाह्या रथयोग्या इति नैव भाषेत प्रज्ञावान् । अधिकरणदोषप्राप्तेः ।।७.२४।।

**(स.)** पुनः कीदृशीं भाषां न वदेत् ?-इत्याह—तहेव'इति-प्रज्ञावान् साधुर्नैवं भाषां भाषेत, एवं किम् ?-इत्याह-एता गावो दोह्या दोहार्हाः, आसां गवां दोहनसमयो वर्तत इत्यर्थः, एते गोरथका कल्होडका दम्याः, तथैते वाह्याः सामान्येन ये केचित्, तानाश्रित्य रथयोग्याः, कुतो न भाषेत् ? उच्यते-अधिकरणलाघवादिदोषा भवन्ति, ।।७.२४।।

**(सु.)** किञ्च—तहेव...इति, तथैव यथैव गावो दोह्या-दोहार्हा-दोहसमय आसां वर्त्तते इत्यर्थः, दम्या-दमनीया गोरथका इति च, गोरथकाः कल्होडकास्तथा वाह्याः सामान्येन ये क्वचित् तानाश्रित्य रथयोग्या इति च नैवं भाषेत प्रज्ञावान् साधुः, अधिकरण-लाघवादिदोषादिति ।।७.२४।।

**जुवं गवित्ति णं बूया, धेणुं रसदइ[2]ति य ।**
**हस्से महल्लए आवि, वए संवहणित्ति य ।।७.२५।।**

**(ति.)** कार्ये तु दिगुपलक्षणादौ एवं ब्रूयात्—दम्यं गां युवेति ब्रूयात् । धेनुं रसदेति। गोरथिकं ह्रस्वम् । वाह्यं महल्लकं वदेत् । रथयोग्यं संवहनः-धुर्योऽयमिति ।।७.२५।।

1. बे के त्रण वर्षनुं वाछरडुं । २. 'सरदयत्ति' इति मुद्रितमन्यत्र ।

**(स.)** प्रयोजने तु क्वचिदेवं भाषेत इत्याह—जुवं'इति । साधुर्युवा गौरिति दम्योगौर्युवा इति ब्रूयात्, धेनुं गां रसदा इति ब्रूयात्, रसदा गौरिति, तथा ह्रस्वं महल्लकं वापि गोरथकं ह्रस्वं वाह्यं महल्लकं वदेत्, संवहनमिति च रथयोग्यं संवहनं धुर्यं वदेत् ।।७.२५।।

**(सु.)** प्रयोजने तु क्वचिदेवं भाषेत-इत्याह—जुवं गवेत्ति, युवा गौरिति दम्यो गौर्युवेति ब्रूयात्, धेनुं-गां रसदेति च ब्रूयात्, रसदा गौरिति, तथा ह्रस्वं महल्लकं वापि गोरथकं ह्रस्वं वाह्यं महल्लकं वदेत्, संवहनमिति च रथयोग्यं संवहनं वदेत्, क्वचिद् दिगुपलक्षणादौ प्रयोजन इति ।।७.२५।।

**तहेव गंतुमुज्जाणं, पव्वयाणि वणाणि य ।**
**रुक्खा महल्ल पेहाए, नेवं भासिज्ज पन्नवं ।।७.२६।।**

**(ति.)** अपि च—तथैव गत्वोद्यानं पर्वतान् वनानि च । वृक्षान् महतः प्रेक्ष्य नैवं वक्ष्यमाणं भाषेत प्रज्ञावान् ।।७.२६।।

**(स.)** पुनः कीदृशीं भाषां साधुर्न वदेत् ? इत्याह—तहेव'इति । प्रज्ञावान् साधुरेवं भाषां न भाषेत, किं कृत्वा ? तथैव पूर्ववदुद्यानं जलक्रीडास्थानं गत्वा, तथा पर्वतान् प्रतीतान्, तथा वनानि च, तत्र वृक्षान् महतो महाप्रमाणानुत्प्रेक्ष्य दृष्ट्वा. ।।७.२६।।

**(सु.)** तहेव गंतुं'इति, तथैवेति पूर्ववत्, गत्वा उद्यानं-जनक्रीडास्थानं तथा पर्वतान् प्रतीतान् तथा वनानि च, तत्र वृक्षान् महतो-महाप्रमाणान् प्रेक्ष्य-दृष्ट्वा नैवं भाषेत प्रज्ञावान्-साधुरिति ।।७.२६।।

**अलं पासायखंभाणं, तोरणाण गिहाण य ।**
**फलिहग्गलनावाणं, अलं उदगदोणिणां ।।७.२७।।**

**(ति.)** अलम्-पर्याप्ताः, समर्था, योग्याः । प्रासादानां, स्तम्भानाम् । तोरणानाम्-नगरसत्कानाम् । गृहाणाम्-सामान्यवेश्मनाम् । तथा परिघा-ऽर्गला-नावाम् । तथा अलं उदकद्रोणीनाम्-उदकद्रोण्यः-अरघट्टजलधारिकाः ।।७.२७।।

**(स.)** एवं किं न भाषेतेत्याह—अलं'इति । एते वृक्षाः प्रासादस्तम्भानां, तथा परिघा-ऽर्गला-नावां—तत्र नगरद्वारे परिघः, गोपाटादिष्वर्गला, नौस्तु प्रसिद्धा,

आसामलमेतेः वृक्षाः, तथोदकद्रोणीनां, उदकद्रोण्योरघट्टजलधारिकाः, एतेषां प्रासाद-स्तम्भादीनामेते वृक्षा योग्या इति साधुर्न वदेत् ।।७.२७।।

**(सु.)** कथमित्याह—अलमिति, अलं-पर्याप्ता एते वृक्षाः प्रासाद-स्तम्भयोः, अत्रैकस्तम्भः प्रासादः, स्तम्भस्तु स्तम्भ एव, तयोरलं, तथा तोरणानां-नगरतोरणादीनां गृहाणां च-कुटीरकादीनामलमिति योगः, तथा परिघा-ऽर्गला-नावां वा, तत्र नगरद्वारे परिघः, गोपुर-कपाटादिषु अर्गला, नौः प्रतीता, आसां अलं एते वृक्षाः, तथोदकद्रोणीनामलं, उदकद्रोण्योऽरहट्टजलधारिका इति ।।७.२७।।

**पीढए चंगबेरे य, नंगले मइयं सिया ।**
**जंतलट्ठी व नाभी वा, गंडिया व अलंसिया ।।७.२८।।**

**(ति.)** इह चतुर्थ्यर्थे प्रथमा । पीठकाय-काष्ठासनाय । चङ्गबेरम्-काष्ठपात्री तस्यै । लाङ्गलाय मयिकम्-उप्तबीजाच्छादनं तस्मै । यन्त्रयष्ट्यै वा । नाभिः-शकटचक्रतुम्बं तस्मै । गण्डिका-सुवर्णकाराणाम् अधिकरणी तस्यै । अलम्-योग्याः । स्युरेते वृक्षाः ।।७.२८।।

**(स.)** पुनराह—पीढए'इति पीठकायालमेते वृक्षाः, अत्र पीठकादिशब्देषु सर्वत्र चतुर्थ्यर्थे प्रथमास्ति, परमर्थस्तु चतुर्थ्यैव कार्यः, तथा च चङ्गबेरं काष्ठपात्री, तस्मै अलं, तथा लाङ्गलं हलं तस्मै, तथा महिकाय, महिकमुप्तबीजाच्छादनं, तथा यन्त्रयष्ट्यै वा, तथा नाभये वा, नाभिः शकटरथाङ्गं, गण्डिकायै वा, गण्डिका सुवर्णकाराधिकरण-स्थापनी, एते वृक्षा अलं समर्था—एवं भाषां साधुर्न भाषेत ।।७.२८।।

**(सु.)** तथा—पीढए इति, पीठकायालमेते वृक्षाः, पीठकं प्रतीतं तदर्थं, "सुपां सुपो भवन्ति'[ ]इति चतुर्थ्यर्थं प्रथमा, एवं सर्वत्र योजनीयं, तथा 'चंगबेरा य'इति चंगबेरा-काष्ठपात्री तथा नङ्गले त्ति नांगलं-हलं, तथा अलं मयिकाय स्यात्, मयिकं-उप्तबीजाच्छादनं, तथा यन्त्रयष्टयै वा, यंत्रयष्टिः प्रसिद्धा, नाभये वा, नाभिः-शकटरथाङ्गं गण्डिकायै वाऽलं स्युरेते वृक्षा इति, नैवं भाषेत प्रज्ञावानिति वर्त्तते, गण्डिका सुवर्णकाराणामधिकरणी-स्थापनी भवतीति ।।७.२८।।

**आसणं सयणं जाणं, हुज्जा वा किंचुवस्सए ।**
**भूओवघाइणिं भासं, नेवं भासिज्ज पन्नवं ।।७.२९।।**

**(ति.)** आसनम्-आसन्दिकादि । शयनम्-पर्यङ्कः । यानम्-वाहनम् । भवेत् किञ्चिदुपाश्रये-द्वारपत्रादिः । एतैर्वृक्षैरित्येतां भूतोपघातिनीम्-सत्त्वपीडाकरीम् । भाषां नैवं भाषेत । प्रज्ञावान्-साधुः । दोषश्चात्र तद्वनस्वामी व्यन्तरादिः कुप्येत् । संयमात्मविराधनैव ।।७.२९।।

**(स.)** पुनः—आसणं'इति । प्रज्ञावान् साधुरेवंविधां भूतोपघातिनीं प्राणिसंहारकारिणीं भाषां न भाषेत, एवं काम् ?-इत्याह-एतेषु वृक्षेष्वासनम्-आसन्दकादि, शयनं पर्यङ्कादि, यानं युग्यादि भवेत्, वा किञ्चिदुपाश्रये वसतौ, अन्यद् वा द्वारपात्रादि । दोषाश्चात्र तद्वनस्वामी व्यन्तरादिर्वा कुप्येत्, सलक्षणो वा वृक्ष इति गृह्णीयात्, अनियमितभाषिणो लाघवं चेत्यादयः ।।७.२९।।

**(सु.)** तथा—आसणं'इति, आसनं-आसन्दकादि, शयनं-पर्यङ्कादि, यानं-युग्यादि, भवेद् वा किंचिदुपाश्रये-वसतावन्यद् वा द्वारपात्राद्येतेषु वृक्षेष्विति, भूतोपघातिनीं-सत्त्वपीडाकारिणीं भाषां नैव भाषेत प्रज्ञावान् साधुरिति, दोषाश्चात्र तद्वनस्वामी व्यन्तरादिः कुप्येत्, सलक्षणो वा वृक्ष इत्यभिगृह्णीयात्, अनियमितभाषिणो लाघवं चेत्येवमादयो योज्याः ।।७.२९।।

**तहेव गंतुमुज्जाणं, पव्वयाणि वणाणि य ।**
**रुक्खा महल्ल पेहाए, एवं भासिज्ज पन्नवं ।।७.३०।।**

**(ति.)** अत्रैव विधिमाह—विश्रमणाय मार्गप्रश्नकथनादौ, कार्ये महावृक्षप्रेक्षणे चैवं वदेत् ।।७.३०।।

**(स.)** अत्रैव विधिमाह—तहेव'इति-वस्तुतः पूर्ववदेव, नवरं महतो वृक्षान् वीक्ष्य[१] प्रज्ञावान् साधुरेवं भाषेत. ।।७.३०।।

**(सु.)** अत्रैव विधिमाह—तहेव'इति-वस्तुतः पूर्ववदेव, नवरमेवं भाषेत ।।७.३०।।

**जाइमंता इमे रुक्खा, दीहवट्टा महालया ।**
**पयायसाला विडिमा, वए दरिसणि त्ति य ।।७.३१।।**

**(ति.)** जातिमन्तः-उत्तमजातयः । इमे-अशोकादयो वृक्षा । दीर्घवृत्ता महालयाः-दीर्घा-नालिकेर्यादयः, वृक्षाः-सहकाराद्याः, महालयाः-वटाद्याः । प्रजातशालाः-

१. दृष्ट्वेति पाठन्तरम् ।

निःपन्नशाखाः । विटपिनः[1] । वदेद् दर्शनीया इति ।।७.३१।।

**(स.)** एवं किं ? - इत्याह—जाइमन्ता इति-साधुरिति वदेत्, इतीति किम् ? एते वृक्षा जातिमन्त उत्तमजातीया अशोकादयोऽनेकप्रकारा वा उपलभ्यमानस्वरूपाः, पुनः दीर्घा नालिकेरी-प्रभृतयः, पुनर्वृत्ता नन्दिवृक्षादयः, पुनर्महालया वटादयः, पुनरेते प्रजातशाखा उत्पन्नडाला विटपिनः प्रशाखावन्तः, पुनरेते दर्शनीया इति वदेत्, एवमपि कदा वदेत ? प्रयोजने विश्रमण-तदासन्नमार्गकथनादावुत्पन्ने सति, अन्यदा नेति. ।।७.३१।।

**(सु.)** जाइमंता'इति, जातिमन्तः-उत्तमजातीया अशोकादयोऽनेकप्रकारा वा एते-उपलभ्यमानस्वरूपा वृक्षा, दीर्घ-वृत्ता-महालयाः-दीर्घा नालिकेरिप्रभृतयो, वृत्ता नन्दिवृक्षादयो, महालया वटादयः, प्रजातशाखा-उत्पन्नडाला, विटपिनः-प्रशाखावन्तो वदेद् दर्शनीया इति, एते च प्रयोजने उत्पन्ने विश्रमण-तदासन्नमार्गकथनादौ वदेन्नान्यदेति ।।७.३१।।

**तहा फलाणि पक्खाणि, पायखज्जाणि नो वए ।**
**वेलोइमाइं टालाइं, वहिमाइं त्ति नो वए ।।७.३२।।**

**(ति.)** तथा । फलानि-आम्रफलादीनि । पक्वानि । पाकखाद्यानि-पाकेन खाद्यानि। गर्ताप्रक्षेप-कोद्रव-पलालादिना विपाच्य भक्षणयोग्यानि इति नो वदेत् । वेलोचितानि-ग्रहणकालप्राप्तानि । टालानि-टालनीयानि, अबद्धास्थीनि अद्यापि कोमलानि । द्वैधिकानि-द्वेधीभावकरणयोग्यानि । नो वदेत् । गृहिणां साधुवचनात् तद्ग्रहणादौ साधोः संयमविराधना ।।७.३२।।

**(स.)** पुनः किं न वदेदित्याह—तहा'इति-साधुरिति नो वदेत्, इतीति किं ? तथा फलान्याम्रादीनि पाकप्राप्तानि जातानि, तथा पाकखाद्यानि बद्धास्थीनि गर्ताप्रक्षेपकोद्रव-पलालादिना विपाच्य भक्षणयोग्यानीति, तथा वेलोचितानि पाकातिशयतो ग्रहण-कालोचितानि, अतः परं कालं न विषहन्त इत्यर्थः, तथा टालान्यबद्धास्थीनि कोमलानीति, तथा द्वैधिकानीति पेशीसम्पादनेन द्वैधीभावकरणयोग्यानि वेति नो वदेत्, दोषाः पुनरत्रैते—ऊर्ध्वं च नाश एवामीषां न शोभनानि वा प्रकारान्तरभोगेनेत्यवधार्य

१. प्रशाखावन्तः १० टि. ।।

गृहिप्रवृत्त्याधिकरणादय इति. ।।७.३२।।

**(सु.)** तहा फलाइं पक्काइं...इति, तथा फलानि-आम्रफलादीनि पक्वानि-पाकप्राप्तानि, तथा पाकखाद्यानि-बद्धास्थीनि गर्त्ताप्रक्षेप-कोद्रव-पलालादिना विपाच्य भक्षणयोग्यानीति नो वदेत्, तथा वेलोचितानि-पाकातिशयतो ग्रहणकालोचितानि, अतः परं कालं न विषहन्तीत्यर्थः, टालानि-अबद्धास्थीनि कोमलानीति यदुक्तं भवति, तथा द्वैधिकानीति-पेशीसम्पादनेन द्वैधीभावकरणयोग्यानि वेति नो वदेत्, दोषाः पुनरत्रात ऊर्ध्वं नाश एवामीषां, न शोभनानि वा प्रकारान्तरभोगेनेत्यवधार्य गृहिप्रवृत्तावधिकरणादय इति ।।७.३२।।

**असंथडा इमे अंबा, बहुनिवट्टिमाफला ।**
**वइज्ज बहुसंभूया, भूयरूव त्ति वा पुणो ।।७.३३।।**

**(ति.)** मार्गदर्शनादौ च कार्ये एवं वदेत्—असंस्तृताः-फलभारं संस्तरीतुं निवोढुं न समर्थाः । इमे आम्राः-एतेन पक्वार्थ उक्तः । बहुनिवृत्तफलाः-बहु यावन्निर्वृत्तानि-बद्धास्थीनि फलानि येषु ते, तथा-अनेन पाकखाद्यार्थ उक्तः । वदेत् । बहुसम्भूतानि-पाकातिशयाद् ग्रहणकालोचितानि फलानि येषु ते, तथा-एतेन वेलोचितार्थ उक्तः । भूतरूप इति वा पुनः-भूतरूपाणि अबद्धा-स्थीनि-कोमलानि फलानि येषु ते, तथा-अनेन टालाद्यर्थ उक्तः ।।७.३३।।

**(स.)** प्रयोजने पुनमार्गदर्शनादावेवं वदेदित्याह—असंथडा'इति-असमर्था एते आम्रा अतिभारेण नम्रा न शक्नुवन्ति फलानि धारयितुमित्यर्थः । आम्रग्रहणं प्रधानवृक्षाणामुपलक्षणम्, एतेन पक्वार्थ उक्तः, तथा बहूनि-निर्वर्तितानि बद्धास्थीनि फलानि येषु ते तथा, अनेन पाकखाद्यार्थ उक्तः वदेद् बहुसंभूताः, बहूनि संभूतानि रूपाणि पाकातिशयतो ग्रहणकालोचितानि फलानि येषु ते तथाविधाः, अनेन वेलोचितार्थ उक्तः, तथा भूतरूपा इति वा पुनर्वदेत्, भूतानि रूपाण्यबद्धास्थीनि कोमलफलरूपाणि येषु ते तथा, अनेन टालाद्यर्थ उपलक्षित इति. ।।७.३३।।

**(सु.)** प्रयोजने पुनरमार्गदर्शनादौ चैवं वदेदित्याह—असंथडा...इति, असमर्था एते आम्राः = अतिभारेण न शक्नुवन्ति फलानि धारयितुमित्यर्थः, आम्रग्रहणं प्रधानवृक्षोपलक्षणं, एतेन पक्वार्थ उक्तः, तथा बहुनिर्वर्त्तित-फलाः-बहूनि निर्वर्त्तितानि-

बद्धास्थीनि फलानि येषु ते तथा, अनेन पाकखाद्यार्थ उक्तः, वदेद् बहुनि-संभूतानि-पाकातिशयतो ग्रहणकालोचितानि फलानि येषु ते तथाविधाः, अनेन वेलोचितार्थ उक्तः, तथा भूतरूपा इति वा पुनर्वदेद् भूतानि रूपाणि-अबद्धास्थीनि कोमलफलरूपाणि येषु ते तथा, अनेन टालाद्यर्थ उपलक्षित इति ।।७.३३।।

**तहेवोसहिओ पक्काओ, नीलियाओ छवीइ य ।**
**लाइमा भज्जिमाउ त्ति, पिहुखज्ज त्ति नो वए ।।७.३४।।**

**(ति.)** तथैवौषधयः-शाल्याद्याः । पक्वः । नि(नी)लिकाश्छवयः-वल्लच पलकादयः। फलिकाः । लवनयोग्याः । भर्जनयोग्याः । पृथुकखाद्या इति नो वदेत् । दोषः संयमविराधना ।।७.३४।।

**(स.)** पुनराह—तहा'इति-तथैव तेनैव प्रकारेणौषधयः शाल्यादिलक्षणाः पक्वा इति नो वदेत्, तथा नीलाश्छवय इति वल्ल-चवलकादिफललक्षणाः, तथा लवनवत्यो लवनयोग्याः, भर्जनवत्य इति भर्जनयोग्याः, तथा पृथुकभक्ष्या इति नो वदेत्, पृथुकभक्षणयोग्या इति नो वदेदिति पदं सर्वत्र संबद्ध्यते, पृथुका अर्धपक्वशाल्यादिषु क्रियन्ते, अभिधानदोषाः पूर्ववत्. ।।७.३४।।

**(सु.)** तह...इति, तथैवौषधयः-शाल्यादिलक्षणाः पक्वा इति तथा नीलाश्छवय इति, वल्ल चनकादिफललक्षणाः, तथा लवनवत्यो-लवनयोग्याः, भर्जनवत्य इति-भर्जनयोग्याः, पृथुकभक्ष्या इति नो वदेत् पृथुकभक्षणयोग्याः, नो वदेदिति सर्वत्र सम्बध्यते, पृथुका अर्द्धपक्वशाल्यादिषु क्रियन्ते, अभिधानदोषाः पूर्ववदिति ।।७.३४।।

**रूढा बहुसंभूया, थिरा [१]उसढाइ य ।**
**गब्भियाओ पसुयाओ, संसाराउ त्ति आलवे ।।३५।।**

**(ति.)** कार्ये तु मार्गदेशनादौ एवमापते(मालपे)द्, इत्याह—रूढाः-प्रादुर्भूताः । बहुसम्भूताः-निःपन्नप्रायाः । स्थिराः-उत्खायान्यत्र रोपितत्वादचाल्याः । उत्सृताः-प्रवृद्धाः । गर्भिताः-अनिर्गतशीर्षाः । प्रसूताः-निर्गतशीर्षाः। संसाराः-सञ्जाततन्दुलाः। इत्यालपेत् ।।७.३५।।

१. अन्यत्र 'ओ ओस...इति पाठः मुद्रितः ।

**(स.)** प्रयोजने पुनर्मार्गदर्शनादावेवमालपेदित्याह—रूढा इति-साधुरेवमालपेत्, एवं किमित्याह-रूढाः प्रादुर्भूताः, बहुसंभूता निष्पन्नप्रायाः, स्थिरा निष्पन्नाः. उत्सृता इति वा उपघातेभ्यो निर्गता इति वा, तथा गर्भिता अनिर्गतशीर्षकाः, प्रसूता निर्गतशीर्षकाः, संसाराः सञ्जाततन्दुलादिसारा इत्येवमालपेत्, पक्वाद्यर्थयोजना स्वधिया कार्या. ।।७.३५।।

**(सु.)** प्रयोजने पुनर्मार्गदर्शनादावेवमालपेत्-इत्याह—रूढा...इति, रूढाः-प्रादुर्भूताः, बहुसंभूता-निष्पन्नप्रायाः, स्थिरा-निष्पन्नाः, उत्सृता इति वा-उपघातेभ्यो निर्गता वा, तथा गर्भिता-अनिर्गतशीर्षकाः प्रसूता-निर्गतशीर्षकाः, संसाराः-संजाततण्डुलादिसारा इत्येवमालपेत्, पक्वाद्यर्थयोजना स्वधिया कार्येति ।।७.३५।।

**तहेव संखडिं नच्चा, किच्चं कज्जं ति नो वए ।**
**तेणगं वा वि वज्झि त्ति, सुत्तित्थि त्ति य आवगा ।।७.३६।।**

**(ति.)** तथैव । सङ्खण्ड्यन्ते प्राणिनो यस्यां सा सङ्खण्डिका । पित्रादिनिमित्तं सांवत्सरिकादिका कृत्या कार्यैवेषा'इति यतिर्न वदेत्-मिथ्यात्वोपबृंहणात् । स्तेनकं वापि वध्योऽयम्'इति नो वदेत्-प्राणातिपातदोषात् । सुतीर्था'इति चापगा चकाराद् दुस्तीर्थेति न वदेत्, अधिकरणदोषात् ।।७.३६।।

**(स.)** वाग्विधिप्रतिषेधाधिकारेऽनुवर्तमान इदमपरमाह—तहेव'इति-साधुः सङ्खडिं ज्ञात्वा, एषा पित्रादिनिमित्तं करणीया एवेति नो वदेत्, मिथ्यात्वस्योपबृंहणादोषात्, ननु सङ्खडीति कः शब्दार्थः ? उच्यते संखण्ड्यन्ते प्राणिनामायूंषि यस्यां प्रकरणक्रियायां सा सङ्खडी, तथा स्तेनकं चौरं ज्ञात्वायं वध्य इति नो वदेत्, तदनुमतेस्तेन-निश्चयादिदोषप्रसङ्गात्, तथापगा नद्यः सुतीर्थाः, चशब्दाद् दुस्तीर्णा एता इति केनापि पृष्टः सन् नो वदेत्, अधिकरणविघातादिदोषप्रसङ्गात्. ।।७.३६।।

**(सु.)** वाग्विधिप्रतिषेधाधिकारेऽनुवर्त्तमाने इदमपरमाह—तहेव...इति, तथैव संखडिं ज्ञात्वा संखण्ड्यन्ते प्राणिनामायूंषि यस्यां प्रकरणक्रियायां सा संखडी, तां ज्ञात्वा, करणीयेति पित्रादिनिमित्तं कृत्यैवैषा'इति नो वदेत्, मिथ्यात्वोपबृंहणदोषात्, तथा स्तेनकं वापि वध्य इति नो वदेत्, तदनुमतत्वेन निश्चयादिदोषप्रसङ्गात्, सुतीर्था इति च, चशब्दाद् दुस्तीर्था इति वा आपगा-नद्यः, केनचित् पृष्टः सन् नो वदेत्, अधिकरणविघातादि-दोष-प्रसङ्गादिति ।।७.३६।।

**संखडिं संखडिं बूया, पणियट्ठि त्ति तेणगं ।**
**बहुसमाणि तित्थाणि, आवगाणं वियागरे ।।७.३७।।**

**(ति.)** सङ्खण्डिकां सङ्खण्डिकैवैषा'इति ब्रूयात् । प्रकर्षेण नीतोऽर्थोऽनेनेति प्रणीतार्थोऽयम्'इति स्तेनकं वदेत् । बहुसमानि तीर्थानि । आपगानाम्-नदीनाम् । व्यागृह्णीयात् ।।७.३७।।

**(स.)** प्रयोजने उत्पन्ने सति, पुनः साधुरेवं वदेत्-इत्याह—सङ्खडिं-इति-साधुः सङ्खडिमिति ब्रूयात् साधुकथनादौ सङ्कीर्णा सङ्खडीत्येवमादि, पणितार्थ इति तथा स्तेनकं वदेच्छैक्षकादिकर्मविपाकदर्शनादौ, पणितेनार्थोऽस्येति पणितार्थः, प्राणद्यृत(पणद्यूत)प्रयोजन इत्यर्थः, तथा बहुसमानि तीर्थान्यापगानां नदीनामिति व्यागृणीयात्, साध्वादिविषय इति. ।।७.३७।।

**(सु.)** प्रयोजने पुनरेवं वदेत्-इत्याह-संखडिं...इति, संखडिं संखडिं ब्रूयात्, साधुकथनादौ संकीर्णा संखडिरित्येवमादि, पणितार्थ इति स्तेनकं वदेत्, शैक्षकादिककर्मविपाकदर्शनादौ, पणितेनार्थोऽस्येति पणितार्थः, पणद्यूतप्रयोजन इत्यर्थः। तथा बहुसमानि तीर्थानि आपगानां-नदीनां व्यागृणीयात् साध्वादिविषय इति ।।७.३७।।

**तहा नईओ पुन्नाओ, कायतिज्ज त्ति नो वए ।**
**नावाहिं तारिमाउ त्ति, पाणिपिज्ज त्ति नो वए ।।७.३८।।**

**(ति.)** तथा नद्यः-पूर्णाः कायतरणीया इति नो वदेत् । नौभिस्तरणीया इति, तटस्थैः पाणिपेया इति च-न वदेत्-साधुवचनतः प्रवृत्त्यादिदोषात् ।।७.३८।।

**(स.)** वाग्विधिप्रतिषेधाधिकार एवेदमाह—तहा'इति-साधुरिति नो वदेत्, इतीति किं ? नद्यः पूर्णा भृताः, कथं ? प्रवृत्तश्रवणनिर्वर्त्तनादिदोषात्, तथा कायतरणीयाः शरीरतरणयोग्या इत्येवं नो वदेत्, साधुवचनेन नो विघ्न इति प्रवर्तनादिप्रसङ्गात्, तथा नौभिर्द्रोणीभिस्तरणीयास्तरणयोग्या इत्येवं नो वदेत्, अन्यथा विघ्नशङ्कया तत्प्रवर्तनात्. तथा प्राणिपेया इति नो वदेत्, अन्यथा प्रर्वतनादिदोषादिति. ।।७.३८।।

**(सु.)** वाग्विधिप्रतिषेधाधिकार एव इदमाह—तहा नईओ'इति, तथा नद्यः पूर्णा-भृता इति नो वदेत्, प्रवृत्तश्रवणनिवर्त्तनादि-दोषात्, तथा कायतरणीयाः-शरीरतरणयोग्या

इत्येवं नो वदेत्, साधुवचनतोऽविघ्नमिति प्रवर्तनादिदोषप्रसङ्गात्, तथा नौभिः-द्रोणीभिस्तरणीयाः-तरणयोग्या इत्येवं नो वदेत्, अन्यथा विघ्नशङ्कया तत्प्रवर्त्तनात्, तथा प्राणिपेयाः-तटस्थप्राणिपेया नो वदेदिति, तथैव प्रवृत्तनिवर्त्तनादिदोषादिति ।।७.३८।।

**बहुवाहडा अगाहा, बहुसलिलुप्पिलोदगा ।**
**बहुवित्थडोदगा यावि, एवं भासिज्ज पन्नवं ।।७.३९।।**

**(ति.)** साधुमार्गकथनादौ चैवं भाषेत, इत्याह—बहुभृताः । अगाधाः-गम्भीराः । बहूनां सलिलानां उत्पीलं उदकं यासां ताः बहुसलिलोत्पीलोदकाः-प्रतिश्रोतोवाहिता-परसरितः । बहुविस्तीर्णोदकाः-स्वतीर-प्लावितप्रसृतजलाः । एवं भाषेत प्रज्ञावान् ।।७.३९।।

**(स.)** प्रयोजने साधुर्मार्गकथनादावेवं भाषेत-इत्याह—बहु...इति-प्रज्ञावान् साधुरेवं भाषेत वक्ष्यमाणं, परं न तु तदागत पृष्टोऽहं न जानामीति ब्रूयात्, कथं प्रत्यक्षमृषावादित्वेन तत्प्रद्वेषादि-दोषप्रसङ्गात्, एवं किमित्याह-बहुधा भृताः प्रायशो भृता इत्यर्थः, तथा अगाहा इति बह्वगाधाः प्रायो गम्भीराः, बहुसलिलोत्पीलोदकाः प्रतिस्रोतोवाहितापरसरित इत्यर्थः, तथा बहुधा विस्तीर्णोदकाश्च स्वतीरप्लावनप्रवृत्तजलाश्चेति. ।।७.३९।।

**(सु.)** प्रयोजने तु साधुमार्गकथनादावेवं भाषेतेत्याह—बहुवाहडा...इति, बहुधा भृताः प्रायशो भृता इत्यर्थः, तथा अगाहा इति बह्वगाधाः प्रायोगम्भीराः, तथा बहुसलिलोत्पीलोदकाः-प्रतिश्रोतोवाहितापरसरित इत्यर्थः, तथा बहुविस्तीर्णोदकाश्च-स्वतीरप्लावनप्रवृत्तजलाश्च, एवं भाषेत प्रज्ञावान् साधुः, न तु तदाऽऽगतपृष्टो न वेद्म्यहमिति ब्रूयात्, प्रत्यक्षमृषावादित्वेन तत्प्रद्वेषादिदोषप्रसङ्गादिति ।।७.३९।।

**तहेव सावज्जं जोगं, परस्सट्ठाइ निट्ठियं ।**
**कीरमाणं ति वा नच्चा, सावज्जं न लवे मुणी ।।७.४०।।**

**(ति.)** तथैव सावद्यं योगम्-व्यापारम् । परस्यार्थाय-परस्य निमित्तम् । निष्ठितम्-निःपन्नम् । क्रियमाणं वा-वा'शब्दाद् भाविनं वा । ज्ञात्वा सावद्यं न वदेत्-केनापि पृष्टो न कथयेत् मुनिः ।।७.४०।।

**(स.)** वाग्विधिप्रतिषेधाधिकार एवेदमाह—तहेव...इति-तथैव मुनिः साधुः सावद्यं योगं सपापं व्यापारमधिकरणसभादिविषयं परस्यार्थाय परनिमित्तं निष्ठितं निष्पन्नं न ब्रूयात्, तथा क्रियमाणं, वाशब्दाद्-भविष्यत्कालभाविनं वा ज्ञात्वा सावद्यं नालपेत् सपापं न ब्रूयात्. ।।७.४०।।

**(सु.)** वाग्विधिप्रतिषेधाधिकार एवेदमाह—तहेव...इति, तथैव सावद्यं-सपापं, योगं-व्यापारं अधिकरणं सभादिविषयं परस्यार्थाय-परनिमित्तं निष्ठितं-निष्पन्नं तथा क्रियमाणं वा वर्त्तमानं वाशब्दात् भविष्यत्काले भाविनं वा, ज्ञात्वा सावद्यं नालपेत् सपापं न ब्रूयान्मुनिः-साधुरिति ।।७.४०।।

**सुकडि त्ति सुपक्कि त्ति, सुच्छिन्ने सुहडे मडे ।**
**सुनिट्ठिए सुलट्ठि त्ति, सावज्जं वज्जए मुणी ।।७.४१।।**

**(ति.)** अथैकेनैव श्लोकेन सावद्यवर्जनाऽनवद्याऽवर्जनं चाह—सुकृतमिति-सुष्ठु कृतं सभादि । सुपक्वमिति-सुष्ठु पक्वं सहस्रपाकादि । सुच्छिन्नमिति-सुष्ठु च्छिन्नं वनादि । सुहृतमिति-सुष्ठु हृतं क्षुद्रस्य वित्तम् । सुमृतमिति-सुष्ठु मृतः प्रत्यनीकः । अत्रापि सुशब्दोऽनुवर्तते । सुनिष्ठितमिति-सुष्ठु निष्ठितं वित्ताभिमानिनो वित्तम् । सुलष्टेति-सुष्ठु-सुन्दरा कन्या । इत्येव सावद्यं वर्जयेत् मुनिः-अनुमत्यादिदोषप्रसङ्गात्। निरवद्यं न वर्जयेद् यथा । सुकृतमिति-सुष्ठु कृतं वैयावृत्यमनेन । सुपक्वमिति-सुष्ठु पक्वं ब्रह्मचर्यं साधोः । सुच्छिन्नमिति-सुष्ठु च्छिन्नं स्नेहबन्धनमनेन । सुहृतमिति-सुष्ठु हृतं शिष्यस्य कोपकरणमुपसर्गे । सुमृत इति-सुष्ठु मृतः पण्डितमरणेन साधुः । अत्रापि सुशब्दोऽनुवर्तते । सुनिष्ठितमिति-सुष्ठु निष्ठितं कर्माप्रमत्तसंयतस्य । सुलष्टेति-सुष्ठु-सुन्दरा, साधुक्रियेत्येवमादीति ।।७.४१।।

**(स.)** तत्र निष्ठितं नैवं वदे (ब्रूया) दित्याह—सुकडि त्ति-मुनिः साधुरिति सावद्यं सपापमिति वक्ष्यमाणप्रकारेण वर्जयेत्, इतीति किं ? तदाह-सुकृतमिति सुष्ठु कृतं सभादि. सुपक्कं इति सुष्ठु पक्वं सहस्रपाकादि, सुच्छिन्ने'इति सुष्ठु छिन्नं वनादि, सुहडे'इति सुष्ठु हृतं क्षुद्रस्य वित्तं, मडे'इति सुष्ठु मृतः प्रत्यनीक इति, अत्रापि सुशब्दोऽनुवर्तते, सुनिट्ठिए'इति सुष्ठु निष्ठितं वित्ताभिमानिनो वित्तं, सुलट्ठि त्ति सुष्ठु सुन्दरा कन्येत्येवं सावद्यमालपनं वर्जयेन्मुनिः, अनुमत्यादिदोष-प्रसङ्गात्, निरवद्यं निष्पापं तु वदेत्,

इदमेव पद्यमर्थान्तरेण व्याख्यानयति-सुकडे'इति सुष्ठु कृतं वैयावृत्यमनेन, सुपक्कि त्ति सुपक्वं ब्रह्मचर्यं साधोः, सुछिन्नमिति सुष्ठु छिन्नं स्नेहबन्धनमनेन, सुहृतमिति सुष्ठु हृतं शिष्यकोपकरणमुपसर्गे, सुमृतमिति सुष्ठु मृतः पण्डितमरणेन साधुरिति, अत्र सुशब्दोऽनुवर्तते, सुनिष्ठितं कर्म अप्रमत्तसंयतस्य, सुलट्ठि त्ति सुन्दरा साधुक्रिया इत्येवमादिरिति. ।।७.४१।।

**(सु.)** तत्र निष्ठितं नैव ब्रूयात्-इत्याह—सुकडि...इति, सुष्ठु कृतं सुकृतं सभादि, सुपक्कमिति, सुष्ठु पक्वं सहस्रपाकादि, सुच्छिन्नमिति-सुष्ठु छिन्नं तद् वनादि, सुहृतमिति-सुष्ठु हृतं क्षुद्रस्य वित्तमिति, सुमृत इति-सुष्ठु मृतः प्रत्यनीक इति, अत्रापि सुशब्दोऽनुवर्त्तते, सुनिष्ठितमिति सुष्ठु निष्ठितं वित्ताभिमानिनो वित्तं, सुलट्ठि त्ति-सुष्ठु सुन्दरा कन्या इति, सावद्यमालपनं वर्जयेन्मुनिरनुमत्यादिदोषप्रसङ्गात्, निरवद्यं तु न वर्जयेत्, यथा-सुकृतमिति सुष्ठु कृतं वैयावृत्यमनेन, सुपक्वमिति-सुष्ठु पक्वं ब्रह्मचर्यं साधोः, सुच्छिन्नमिति-सुष्ठु छिन्नं स्नेहबन्धनमनेन, सुहृतमिति सुष्ठु हृतं शिक्षकोपकरणमुपसर्गे, सुमृत इति-सुष्ठु मृतः पण्डितमरणेन साधुरिति, अत्रापि सुशब्दोऽनुवर्त्तते, सुनिष्ठितं-सुष्ठु निष्ठितं कर्म्माप्रमत्तसंयतस्य, सुलट्ठ त्ति-सुष्ठु सुन्दरा साधुक्रियेत्येवमादिरिति ।।७.४१।।

**पयत्तपक्क त्ति व पक्कमालवे, पयत्तच्छिन्न त्ति व छिन्नमालवे ।**
**पयत्तलट्ठ त्ति व कम्महेउयं, पहारगाढ त्ति व गाढमालवे ।।७.४२।।**

**(ति.)** उक्तानुक्तापवादविधिमाह—प्रयत्नपक्वमेतत् । पक्वम्-सहस्रपाकादिग्ला-नार्थम् । प्रयत्नछिन्नमिति । छिन्नम् दुःकर्म तपसा । प्रयत्नलष्टेति-प्रयत्नेन पालनया लष्टा-सुन्दरा कन्या दीक्षार्हा। इत्येवमालपेत् कर्महेतुकम्-सर्वमपि सुकृतादि कर्मनिमित्त-मित्यालपेत् । प्रहारगाढमिति-गाढप्रहारं नरम् । गाढमित्यालपेत्-पुनः पुनरालपेदित्य-स्याख्यानं भूयोऽप्येतदालपतां न दोष इति ज्ञापनार्थम् ।।७.४२।।

**(स.)** उक्तानुक्तविधिमाह—पयत्त...इति-साधुर्ग्लानप्रयोजने प्रयत्नपक्वमिति वा प्रयत्नपक्वमेतत्, पक्वं सहस्रपाकादि एवमालपेत्, तथा प्रयत्नछिन्नमिति वा प्रयत्नछिन्नमेतद् वनादि, साधुनिवेदनादावेवमालपेत्, तथा 'पयत्तलट्ठा'इति वा प्रयत्नसुन्दरा कन्या दीक्षिता सती सम्यक्पालनीयेति, कर्महेतुकमिति सर्वमेव कृतादिकर्मनिमित्त-मालपेदिति योगः, गाढप्रहारमिति वा कञ्चन गाढमालपेत् गाढप्रहारं

ब्रूयात् क्वचित् प्रयोजने, एवं हि तदप्रीत्यादयो दोषाः परिहृता भवन्तीति. ।।७.४२।।

**(सु.)** उक्तानुक्तापवादविधिमाह—पयत्त...इति, प्रयत्नपक्वमिति वा प्रयत्नपक्वमेतत्, पक्वं सहस्रपाकादि ग्लानादिप्रयोजने एवमालपेत्, तथा प्रयत्नच्छिन्नमिति वा-प्रयत्नच्छिन्नमेतच्छिन्नं-व्रणा(वना)दि साधुनिवेदनादावेवमालपेत्, तथा प्रयत्नलष्टेति चेति प्रयत्नसुन्दरा कन्या दीक्षिता सती सम्यक् पालनीयेति, कर्महेतुकमिति सर्वमेव वा कृतादि कर्म्मनिमित्तमालपेदिति योगः, तथा गाढप्रहारमिति वा कञ्चन गाढमालपेत्-गाढप्रहारं ब्रूयात्, क्वचित् प्रयोजने, एवं हि तदप्रीत्यादयो दोषाः परिहृता भवन्ति इति ।।७.४२।।

**सव्वुक्कसं परग्घं वा, अउलं नत्थि एरिसं ।**
**अवक्कियमवत्तव्वं, अचियत्तं चेव नो वए ।।७.४३।।**

**(ति.)** क्वचिद् व्यवहारे प्रक्रान्ते पृष्टोऽपृष्टो वा साधुर्नैवं ब्रूयात्—एतन्मध्ये इदं सर्वोत्कृष्टं परार्घं वा-प्रकृष्टार्घं महार्घम् । इदम् अतुलं नास्तीदृशमन्यत्र । अवक्कियं-असंस्कृतं सुलभमीदृशमन्यत्रापि । अवक्तव्यम्-अनन्तगुणमप्यस्त्येतत् । अप्रीति-करमेतदिति नो वदेत्-अधिकरणादिदोषप्रसङ्गात् ।।७.४३।।

**(स.)** क्वचिद् व्यवहारे प्रक्रान्ते पृष्टोऽपृष्टो वा नैवं वदेदित्याह—सव्वुक्कसं'इति-साधुरेवं वक्ष्यमाणं नो वदेत्, एवं किम् ?-इत्याह-एतन्मध्य इदं सर्वोत्कृष्टं स्वभावेन सुन्दरमित्यर्थः, परार्घं वा उत्तमार्घं वा महार्घं क्रीतमित्यर्थः, अतुलं नास्तीदृगन्यत्रापि क्वचित्, 'अविक्किअं इति' असंस्कृतं सुलभमीदृशमन्यत्रापि, अवक्तव्यमित्यनन्तगुणमेतदेव. 'अविअत्तं' वा अप्रीतिकरं चैतत्, इत्येवं नो वदेत् साधुः, अधिकरणा-ऽन्तरायादि-दोषप्रसङ्गादिति. ।।७.४३।।

**(सु.)** क्वचिद् व्यवहारे प्रक्रान्ते पृष्टो वा अपृष्टो वा नैवं वदेदित्याह—सव्वुक्कं'इति, एतन्मध्ये इदं सर्वोत्कृष्टं-स्वभावेन सुन्दरमित्यर्थः, परार्घं चोत्तमार्घं वा महार्घं क्रीतमिति भावः, अतुलं-नास्तीदृशमन्यत्रापि क्वचित्, अविक्किय...इति-असंस्कृतं सुलभमी-दृशमन्यत्रापि, अवक्तव्यमित्यनन्तगुणमेतदेव अचियत्तं वा-अप्रीतिकरं चैतदिति नो वदेद्, अधिकरणान्तरायादिदोषप्रसङ्गादिति ।।७.४३।।

**सव्वमेयं वइस्सामि, सव्वमेयं ति नो वए ।**
**अणुवीई सव्वं सव्वत्थ, एवं भासिज्ज पन्नवं ।।७.४४।।**

**(ति.)** किञ्च—केनचित् साधुना साधोः सन्देशे कथिते 'त्वया सर्वमिदं वाच्यम्'इत्युक्ते सर्वमेतद् वक्ष्यामि'इति न वदेत्-सर्वस्य स्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात् मृषावाददोषः। स्वयमपि सन्दे(न्दि)शता सर्वमेतत् त्वया वक्तव्यमिति न वाच्यम्-प्रागुक्त एवात्र दोषः । अतोऽनुविचिन्त्य सर्वं सर्वत्र । एवम्-यथा मृषावादो न स्यात् तथा भाषेत प्रज्ञावान् ।।७.४४।।

**(स.)** सव्वं'इति पुनः किञ्च सर्वमेतद् वक्ष्यामीति केनचित् कस्यचित् सन्दिष्टे सर्वमेतत् त्वया वक्तव्यमिति सर्वमेतद् वक्ष्यामीति साधुर्नो वदेत्, सर्वस्य तथा स्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, तथा सर्वमेतदिति नो वदेत्, कस्यचित् सन्देहं प्रयच्छन् सर्वमेतदित्येवं वक्तव्यमिति नो वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, असम्भवाभिधाने मृषावादादयो यतश्च दोषा भवन्ति, एवमतोऽनुचिन्त्यालोच्य सर्वं वाच्यं, सर्वेषु कार्येषु, यथासम्भवाद्यभिधानादिना मृषावादो न भवत्येवम् ।।७.४४।।

**(सु.)** किञ्च—सव्वमेयं...इति, सर्वमेतद् वक्ष्यामीति केनचित् कस्यचित् संदिष्टे सर्व्वमेतत् त्वया वक्तव्यमिति, सर्वमेतद् वक्ष्यामीति नो वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, तथा सर्वमेतदिति नो वदेत्, कस्यचित् संदेशं प्रयच्छन्, सर्वमेतदित्येवं वक्तव्यमिति नो वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, असंभवाभिधाने मृषावादः, यतश्चैवं ?-अतो-ऽनुचिन्त्यालोच्य सर्वं वाच्यं सर्वेषु कार्येषु यथाऽसंभवाद्यभिधानादिना मृषावादो न भवत्येवं भाषेत प्रज्ञावान् साधुरिति ।।७.४४।।

**सुक्कीयं वा सुविक्कीयं, अकिज्जं किज्जमेव वा ।**
**इमं गिण्ह इमं मुंच, पणीयं नो वियागरे ।।७.४५।।**

**(ति.)** किञ्च—केनचित् क्रीते दर्शिते सुक्रीतमिति । विक्रीते सुविक्रीतमिति । क्रीते दर्शिते अक्रेयमिदम् । क्रेयमेवेदमिति वा । इदं गृहाण पण्यं महार्घ्यं भविष्यति। इदं मुञ्च- समर्घं भविष्यति । इति न व्यागृणीयात् ।।७.४५।।

**(स.)** सुक्कीअं'इति-किञ्च साधुरेवं न व्यागृणीयात्, एवमिति किं ? यदाह-'सुक्कीअं'इति' केनचित् किञ्चित् क्रीतं दर्शितं सत् सुक्रीतमिति योगः, तथा

'सुविक्कीअं'इति' किञ्चित् केनचिद् विक्रीतं दृष्ट्वा पृष्टः सन् सुविक्रीतमिति न व्यागृणीयात्, तथा केनचित् क्रीते पृष्टेऽक्रेयं क्रयार्हमेव वा न भवतीति न व्यागृणीयात्, तथैवमेव क्रेयमेव वा क्रयार्हमिति तथेदं गुडादि गृहाण ? आगामिनि काले महार्घं भविष्यतीति, तथेदं मुञ्च घृतादि ? आगामिनि काले समर्घं भविष्यतीति, पणितं पण्यं क्रयाणकं, नैवं व्यागृणीयात्, अप्रीत्यधिकरणादिदोषप्रसङ्गादिति. ।।७.४५।।

**(सु.)** किञ्च—सुक्कीयं वा...इति, सुक्रीतं चेति केनचित् किञ्चित् क्रीतं दर्शितं सत् सुक्रीतमिति न व्यागृणीयादिति योगः, तथा सुविक्रीतमिति किञ्चित् केनचिद् विक्रीतं दृष्ट्वा पृष्टः सन् सुविक्रीतमिति न व्यागृणीयात्, तथा केनचित् क्रीते पृष्टः, अक्रेयं-क्रयार्हमेव न भवतीति न व्यागृणीयात्, तथैवमेव क्रेयमेव वा-क्रयार्हमिति, तथेदं-गुडादि गृह्णीयादा(गृहाणा)गामिनि काले महार्घं भविष्यतीति, तथेदं मुञ्च घृतादि, आगामिनि काले समर्घं भविष्यति-इतिकृत्वा पणितं-पण्यं नैव व्यागृणीयात्, अप्रीत्यधिकरणादिदोष-प्रसङ्गादिति ।।७.४५।।

**अप्पग्घे वा महग्घे वा, कए वा विक्कए वि वा ।**
**पणियट्ठे समुप्पन्ने, अणवज्जं वियागरे ।।७.४६।।**

**(ति.)** अल्पार्घे वा । महार्घे वा । क्रये वा । विक्रयेऽपि वा । पणितार्थे-पण्यवस्तुनि । समुत्पन्ने-केनचित् पृष्टः सन् । अनवद्यम्-अपापं व्यागृणीयात् । यथात्र तपस्विनां नाधिकार इति ।।७.४६।।

**(स.)** अत्रैव विधिमाह—अप्पग्घ इति-अल्पार्घे वा महार्घे वा, कस्मिन्नित्याह-क्रये वा विक्रये वापि पणितार्थे वा पण्यवस्तुनि समुत्पन्ने केनचित् पृष्टः सन् साधुरनवद्यमपापं व्यागृणीयात्. यथा नाधिकारस्तपस्विनां व्यापारस्याभवादिति. ।।७.४६।।

**(सु.)** अत्रैव विधिमाह—अप्पग्घे वा...इति, अल्पार्घे वा महार्घे वा, कस्मिन्नित्याह-क्रये वा विक्रयेऽपि वा पणितार्थे-पण्यवस्तुनि समुत्पन्ने केनचित् पृष्टः सन्ननवद्यं-अपापं व्यागृणीयात् यथा नाधिकारोऽत्र तपस्विनां, व्यापाराभावादिति ।।७.४६।।

**तहेवासंजयं धीरो, आस एहि करेहि वा ।**
**सय चिट्ठ वयाहि त्ति, नेवं भासिज्ज पन्नवं ।।७.४७।।**

**(ति.)** तथैवासंयतम्-गृहस्थम् । धीरः-साधुः । आस्व इह । एहि इतोऽत्र । कुरु वा इदं कार्यं । शेष्व निद्रया । तिष्ठ क्षणम् । व्रज ग्रामम् । नैवं भाषेत प्रज्ञावान् ।।७.४७।।

**(स.)** तहेव'इति-पुनः किञ्च प्रज्ञावान् बुद्धिमान् धीरः पण्डितो यतिरसंयतं गृहस्थं प्रतीति न भाषेत, इतीति किं ? त्वमिहैवास्वोपविश, त्वमेह्यत्र, त्वमिदं सञ्चयादि कुरु, तथा निद्रया त्वं शेष्व, तथा त्वमत्र तिष्ठोर्ध्वस्थानेन, तथा त्वं व्रज ग्राममिति. ।।७.४७।।

**(सु.)** किञ्च तहेव...इति, तथैवासंयतं-गृहस्थं धीरो-यतिः, आस्वेहैव, एहीतोऽत्र, कुरु वेदं-संचयादीति, तथा शेष्व निद्रया, तिष्ठोर्ध्वस्थानेन व्रज ग्राममिति नैवं भाषेत प्रज्ञावान्-साधुरिति ।।७.४७।।

**बहवे इमे असाहू, लोए वुच्चंति साहूणो ।**
**न लवे असाहु साहु त्ति, साहू साहु त्ति आलवे ।।७.४८।।**

**(ति.)** अपि च—बहवः इमे-आजीवकादयोऽसाधवः । लोके-लोकमध्ये । उच्यन्ते साधवः। अतो नालपेदसाधुं साधुमिति-मृषावादप्रसङ्गात् । साधुं साधुमित्यालपेत् ।।७.४८।।

**(स.)** बहवे इति-पुनः किञ्च लोके प्राणिलोके प्राणिसङ्घात एते बहव उपलभ्यमानस्वरूपा आजीवकादयो मोक्षसाधकयोगमाश्रित्य साधव उच्यन्ते सामान्येन, परमसाधुं साधुं नालपेत्, मृषावादप्रसङ्गात्, अपि तु साधुं प्रति साधुमालपेत्, न तु तमपि नालपेत्, उपबृंहणा प्रशंसा गुणानां तस्या अकरणेऽतिचारदोषः स्यात्. ।।७.४८।।

**(सु.)** बहवे'इति, बहव एते-उपलभ्यमानस्वरूपा आजीविकादयः असाधवो निर्वाणसाधकयोगापेक्षया लोके तु प्राणिलोके प्राणिसंघात उच्यन्ते साधवः सामान्येन, तत्र नालपेत् असाधुं साधुं मृषावादप्रसङ्गात्, अपि तु साधुं साधुमित्यालपेत्, न तु तमपि नालपेत्, उपबृंहणातिचारदोषप्रसङ्गादिति ।।७.४८।।

**नाणदंसणसंपन्नं, संजमे य तवे रयं ।**
**एवं गुणसमाउत्तं, संजयं साहूमालवे ।।७.४९।।**

**(ति.)** किंविशिष्टं साधुं 'साधुम्' इति आलपेत् ? इत्याह–[नाण...इति] स्पष्टः ।।७.४९।।

**(स.)** किंविशिष्टं साधुं 'साधुं' आलपेत् ? इत्याह–नाण'इति-एवंविधं संयतं साधुमालपेत्, किंभूतं संयतं? ज्ञान-दर्शनसम्पन्नं, ज्ञान-दर्शनाभ्यां सम्पूर्णं समृद्धं, पुनः किंभूतं संयतं ? संयमे सप्तदशभेदे च पुनः, तपसि द्वादशभेदे, रतं यथाशक्ति तत्परम्, एवं पूर्वोक्तगुणसमायुक्तं न तु द्रव्यलिङ्गधारिणम्. ।।७.४९।।

**(सु.)** किंविशिष्टं साधुं 'साधुम्' इति आलपेत् ? इत्याह–[नाण...इति], नाण...इति, ज्ञानदर्शनसंपन्नं-समृद्धं, संयमे तपसि च रतं यथाशक्त्या एवं गुणसमायुक्तं संयतं साधुमालपेत्, न तु द्रव्यलिङ्गधारिणमपीति ।।७.४९।।

**देवाणं मणुयाणं च, तिरियाणं च वुग्गहे ।**
**अमुयाणं जओ होउ, मा वा होउ त्ति नो वए ।।७.५०।।**

**(ति.)** तथा–देवानाम्-देवासुराणाम्, मनुजानाम्-राजादीनाम्, तिरश्चाम्-महिषादीनाम्। व्युद्ग्रहे । अमुकानां जयो भवतु । मा वा भवतु-इति नो वेदत्-तत्पक्षपाति-द्वेषप्रसङ्गात्।।७.५०।।

**(स.)** देवाणं'इति-किञ्च साधुरिति नो वदेत्, इतीति किं ? अमुकानां देवानां जयो भवतु वा मा भवतु-इति नो वदेत्, कथम् ? अधिकरण-तत्स्वाम्यादि-द्वेषप्रसङ्गात्, क्व सति ? देवानां देवासुराणां मनुजानां च नरेन्द्रादीनां, तिरश्चां च महिषादीनां विग्रहे सङ्ग्रामे सति. ।।७.५०।।

**(सु.)** किञ्च–देवाणं'इति, देवानां-देवासुराणां, मनुजानां च-नरेन्द्रादीनां, तिरश्चां च-महिषादीनां विग्रहे-सङ्ग्रामे सति, 'अमुकानां देवादीनां जयो भवतु 'मा वा भवतु' इति च नो वदेत्, अधिकरणतत्स्वाम्यादिद्वेषदोषप्रसंगादिति ।।७.५०।।

**वाउ[१] वुट्ठं च सीउण्हं, खेमं धायं सिवं ति वा ।**
**कया णु हुज्ज एयाणि, मा वा होउ त्ति नो वए ।।७.५१।।**

१. वाओ'इति मुद्रितोऽन्यत्र पाठः ।।

**(ति.)** वायुर्वातः-मलयमारुतादिः । वृष्टम्-वर्षणम् । शीतम्-उष्णम् । क्षेमम्-राजादिविड्वरशून्यम् । ध्रातम्-सुभिक्षम्, शिवमिति वा । कदा नु भवेयुरेतानि मा वा भवेयुरिति घर्माद्यभिभूतो न वदेत्-उभयथापि केषाञ्चित् सत्त्वानां पीडासम्भवात् ।।

**(स.)** वाओ इति.-पुनः किञ्च घर्मादिनाऽभिभूतो यतिरेवं नो वदेत्, अधिकरणादिदोष-प्रसङ्गात्, वातादिषु सत्सु सत्वपीडाप्राप्तेः, तद्वचनतस्तथाभवनेऽप्यार्तध्यानभावादित्येवं नो वदेत्, तत् किं ? वातो मलयमारुतादिः, वृष्टं वा वर्षणं, शीतोष्णं प्रतीतं, क्षेमं राजविड्वरशून्यं, पुनर्ध्रातं सुभिक्षं, शिवमिति वा उपसर्गरहितं, कदा नु भवेयुरेतानि वातादीनि, मा वा भवेयुरिति. ।।७.५१।।

**(सु.)** वाओ'इति, वातो-मलयमारुतादिः, वृष्टं वा प्रवर्षणं, शीतोष्णं प्रतीतं, क्षेमं-राजविड्वरशून्यं, ध्रातं-सुभिक्षं, शिवमिति चोपसर्गरहितं कदा नु भवेयुः, 'एतानि वातादीनि मा भवेयुः'इति, घर्माद्यभिभूतो नो वदेद्, अधिकरणादिदोषप्रसङ्गात्, वातादिषु सत्सु सत्त्वपीडापत्तेस्तद्वचनतस्तथाऽभवनेऽप्यार्त्तध्यानभावादिति ।।७.५१।।

**तहेव मेहं व नहं व माणवं, न देवदेव त्ति गिरं वइज्जा ।**
**समुच्छिए उन्नइए वा पओए, वइज्ज वा वुट्ठं बलाहग त्ति ।।७.५२।।**

**(ति.)** तथैव मेघं वा, नभो वा, मानवं वा प्रति देवदेव इति गिरं नो वदेत् - मृषावादप्रसङ्गात् । कथं तर्हि वदेत् ? उन्नतं मेघं दृष्ट्वा सम्मूर्च्छित उन्नतो वा पयोदः । वदेद् वा वृष्टो बलाहकः इति ।।७.५२।।

**(स.)** किं नो वदेत् ? इत्याह—तहेव'इति-साधुस्तथैव मेघं वा नभो वाऽऽकाशं मानवं वाश्रित्य नो देवदेव इति गिरं वदेत्, मेघमुन्नतं दृष्ट्वोन्नतो देव इति नो वदेत्, एवं नभ आकाशं मानवं राजानं दृष्ट्वा देव इति नो वदेत्, कथं ? मिथ्या-लाघवादिप्रसङ्गात्, कथं तर्हि वदेत् ? इत्याह-मेघमुन्नतं वीक्ष्य[१] संमूर्च्छित उन्नतो वा पयोद इति वदेत्, अथवा वृष्टो बलाहक इति वेदत्, ।।७.५२।।

**(सु.)** तहेव...इति, तथैच मेघं वा नभो मानवं वाश्रित्य नो देवदेव'इति गिरं वदेत्, मेघमुन्नतं दृष्ट्वा 'उन्नतो देव' इति नो वदेत्, एवं नभः-आकाशं मानवं-राजानं देवं'इति नो वदेत् मिथ्यावादलाघवादिप्रसङ्गात्, कथं तर्हि वदेत् ? इत्याह मेघमुन्नतं दृष्ट्वा सम्मूर्छित उन्नतो वा पयोद इति, वदेद् वा वृष्टो बलाहक इति ।।७.५२।।

१. दृष्ट्वेति क. पु. ।

**अंतलिक्खि त्ति णं बूया, गुज्झाणुचरिय त्ति य ।**
**रिद्धिमंतं नरं दिस्स, रिद्धिमंतं ति आलवे ।।७.५३।।**

**(ति.)** णं'इति एतन्नभः अन्तरिक्षमिति ब्रूयात् । गुह्यकानुचरितमिति वा-गमनागमनेन देवैः सेवितमित्यर्थः । तथा ऋद्धिमन्तं नरं दृष्ट्वा ऋद्धिमानयमित्यालपेत् ।।७.५३।।

**(स.)** पुनराकाशमाश्रित्याह—अंतलिक्ख'इति-साधुरिह नभोऽन्तरिक्षमिति ब्रूयात्, गुह्यानुचरितमिति वा, सुरसेवितमित्यर्थः, एवं किल मेघोऽपि तदुभयशब्दवाच्य एव, तथा ऋद्धिमन्तं सम्पदा सहितं नरं दृष्ट्वा, किमित्याह-ऋद्धिमन्तमिति ऋद्धिमानयमित्येवमालपेत्, कथं व्यवहारतो मृषावादादि-परिहारार्थम्. ।।७.५३।।

**(सु.)** नभ आश्रित्याह—अंतलिक्ख...इति, इह नभोऽन्तरिक्षमिति ब्रूयात्, गुह्यानुचरितमिति वा सुरसेवितमित्यर्थः, एवं किल मेघोऽप्येतदुभयशब्दवाच्य एव, तथा ऋद्धिमन्तं-संपदुपेतं नरं दृष्ट्वा, किम् ?-इत्याह-ऋद्धिमन्तमिति ऋद्धिमानयमित्येवमालपेत् व्यवहारतो मृषावादादिपरिहारार्थम् ।।७.५३।।

**तहेव सावज्जणुमोयणी गिरा, ओहारिणी जा य परोवघाइणी ।**
**सो कोह लोह भय हास माणवो, न हासमाणो वि गिरं वइज्जा ।।७.५४।।**

**(ति.)** तथैव सावद्यानुमोदिनी गीः-यथा, सुष्ठु हतो ग्राम इति । अवधारिणी-यथा, इदमित्थमेव । या च परोपघातिनी-यथा, मासं न दोषाय'इति । स-इति तां क्रोधाद् लोभाद् भयाद् हास्यात् । मानवः-साधुः । हसन्नपि गिरं नो वदेत्-प्रभूत-कर्मबन्धहेतुत्वात् ।।७.५४।।

**(स.)** तहेव'इति-पुनः किंच मानवः पुमान् साधुर्हसन्नप्येवं गिरं न वदेत्, कस्मात् ? प्रभूतकर्महेतुत्वात्, एवं काम् ?-इत्याह-तथैव पूर्वोक्तप्रकारेण सुष्ठु हतो ग्राम इति सावद्यानुमोदिनी गीर्-वाणी भाषा, तां नो वदेत्, तथेत्थमेवेत्यसंशयकारिण्यवधारिणी भाषा, तामपि नो वदेत्, पुनर्या च परोपघातिनी, यथा मांसं न दोषाय, से इति तामेवंभूतामपि नो वदेत्, कस्मात् ?-मानव एवंभूतां सपापां भाषां वदति ?-इत्याह-क्रोधाद् वा लोभाद् वा भयाद् वा, उपलक्षणत्वात् प्रमादादेर्वा. ।।७.५४।।

(सु.) किञ्च—तहेव'इति, तथैव सावद्यानुमोदिनी गीः-वाक्, यथा सुष्ठु हतो ग्राम इति, तथा अवधारिणी-इदमित्थमेवेति, संशयकारिणी वा, या च परोपघातिनी, यथा-मांसमदोषाय, से इति तामेवंभूतां, क्रोधात् लोभाद् भयाद् वा हासाद् वा, मानप्रेमादीनामुपलक्षणमेतन्मानवः-पुमान् साधुर्न हसन्नपि गिरं वदेत्, प्रभूतकर्मबन्ध-हेतुत्वादिति ।।७.५४।।

**[१]सव्वक्कसुद्धिं समुपेहिया मुणी, गिरं च दुट्ठं परिवज्जए सया ।**
**मियं अदुट्ठं अणुवीइ भासए, सयाण मज्झे लहई पसंसणं ।।७.५५।।**

(ति.) वाक्यशुद्धिफलमाह—सती चासौ वाक्यशुद्धिश्च सद्वाक्यशुद्धिः, स्ववाक्यस्य वा शुद्धिः स्ववाक्यशुद्धिस्ताम्, अथवा स मुनिः वाक्यशुद्धिम् । समुत्प्रेक्ष्य गिरं तु । दुष्ट(ष्टा)म्-सावद्यादिरूप(पा)म् । परिवर्जयेत् सदा । मिताम् अदुष्टाम् अनुविचिन्त्य भाषमाणः सतां मध्ये लभते प्रशंसनम् ।।७.५५।।

(स.) अथ वाक्यशुद्धिफलमाह—सु(स)वक्क'इति-मुनिर्दुष्टां गिरं परिवर्जयेत्, किं कृत्वा ? स्ववाक्यशुद्धिं स्वकीयवाक्यशुद्धिं सद्वाक्यशुद्धिं शोभनां वाक्यशुद्धिं वा संप्रेक्ष्य सम्यग् दृष्ट्वा सदा सर्वदा, तर्हि कीदृशीं वदेत् इत्याह-मितं स्वरतः परिणाम-तश्चादुष्टं देशकालोपपन्नादि विचिन्त्य पर्यालोच्य भाषमाणः सतां साधूनां मध्ये प्रशंसनं प्रशंसां प्राप्नोतीत्यर्थः. ।।७.५५।।

(सु.) वाक्यशुद्धिफलमाह—सवक्क'इति, सद्वाक्यशुद्धिं स्ववाक्यशुद्धिं वा सवाक्य-शुद्धिं वा, सतीं शोभनीं(नां), स्वां आत्मीयां, स इति वक्ता, वाक्यशुद्धिं संप्रेक्ष्य-सम्यग् दृष्ट्वा मुनिः-साधुः, गिरं तु दुष्टां-यथोक्तलक्षणां परिवर्ज्जयेत् सदा, किंतु मितं स्वरतः परिमाणतश्च, अदुष्टं-देशकालोपपन्नादि अनुविचिन्त्य-पर्यालोच्य भाषमाणः सन् सतां-साधूनां मध्ये लभते प्रशंसनं-प्राप्नोति प्रशंसामिति ।।७.५५।।

**भासाय(इ) दोसे य गुणे य जाणिया, तीसे य दुट्ठे परिवज्जए सया**
**छसु संजए सामिणीए सया जए, वयज्ज बुद्धे हियमाणुलोमियं ।।७.५६।।**

(ति.) यतश्चैवमतः—भाषाया दोषांश्च गुणांश्च ज्ञात्वा, तस्याश्च दुष्टाया भाषायाः

१. मुद्रितोऽन्यत्र 'सुवक्क...इति पाठः ।।

परिवर्जकः सदा षट्सु-जीवनिकायेषु । संयतः श्रामण्ये सदा यतः । वदेत् बुद्धः हितम् । अनुलोम्नि भवम् आनुलोमिकम्-अत्यन्तमनुकूलं प्रियङ्करम् ।।७.५६।।

**(स.)** यतश्चैवं ?-ततः साधुः किं कुर्यात् ? इत्याह—भासाइ'इति-साधुरेवंविधः सन् हितानुलोमं हितं परिणामसुन्दरमनुलोमं मनोहारि वचनं वदेत्, किं कृत्वा ? भाषायाः पूर्वकथिताया दोषान् गुणांश्च ज्ञात्वा, किंविशिष्टः साधुः ? तस्या दुष्टाया भाषायाः परिवर्जकः, पुनः किंविशिष्टः साधुः ? 'छसु संजए', षट्सु जीवनिकायेषु संयतः, पुनः किंविशिष्टः साधुः ? श्रामण्ये श्रमणभावे चारित्रपरिणामभेदे सदा सर्वकालमुद्युक्तः, पुनः किंविशिष्टः साधुः ? बुद्धः ज्ञाततत्त्वः ।।७.५६।।

**(सु.)** यतश्चैवं ?-अतः—भासाए'इति-भाषाया उक्तलक्षणाया दोषांश्च गुणांश्च ज्ञात्वा-यथावदवेत्य तस्याश्च दुष्टाया भाषायाः परिवर्जको-विवर्जकः सदा, एवम्भूतः सन् षड्जीवनिकायेषु संयतः, तथा श्रामण्ये-श्रमणभावे चरणपरिणामगर्भे चेष्टिते सदा यतः-सर्वकालमुद्युक्तः सन् वदेत् बुद्धो हितानुलोमं-हितं परिणामसुन्दरं अनुलोमं-मनोहारीति ।।७.५६।।

**परिक्खभासी सुसमाहियंदिए, चउक्कासायावगए अणिस्सिए ।**
**से निद्धुणे धुन्नमलं पुरे कडं, आराहए लोगमिणं तहा परं ।।७.५७[1]।। त्ति बेमि**

**(ति.)** परीक्ष्यभाषी-आलोचितवक्ता । सुसमाहितेन्द्रियः । अपगतकषायचतुष्कः। अनिश्रितः-निश्रारहितः । स-साधुः । [2]निधनुयात्-अपनयेत् । धून्योऽपनेयो, मलः कर्मरूपः स धून्यमलः, तम् । पुराकृतम् । [3]आराधयेत् । इहलोकं परलोकं च । ब्रवीमि-इति पूर्ववत् ।।७.५७।। **तिलकाचार्यटीकायां वाक्यशुद्धि-अध्ययनं समाप्तम् ।।**

**(स.)** अथोपसंहरन्नाह—परिक्खभासी'इति-स एवंविधः साधुरेनं मनुष्यलोकं वाक्संयतत्वेनाराधयति प्रगुणीकरोति, किं कृत्वा ? धूनमलं पापमलं पुराकृतं जन्मान्तरे कृतं, निर्धूय प्रस्फोट्य, तथा परलोकमाराधयति निर्वाणलोकं यथासम्भवमनन्तरं पारम्पर्येण वा, किंविशिष्टः साधुः ? परीक्ष्यभाषी आलोच्यभाषी, पुनः किंविशिष्टः साधुः ? सुसमाहितेन्द्रियः सुप्रणिहितेन्द्रिय इत्यर्थः. पुनः किंभूतः साधुः ? अपगतचतुष्कषायः क्रोधादिकषाय-निरोधकर्ता इति भावः. पुनः किंभूतः साधुः ?

१. सुवक्कसुद् धी अज्झयणं सम्मत्तं ।।७।। इति मुद्रिते ।। २. निर्धूय १० टि. ।। ३. आराधयति १० टि. ।।

अनिश्रितो द्रव्य-भावनिश्रारहितः प्रतिबन्धविप्रमुक्तः, ब्रवीमीति पूर्ववत्. ।।७.५७।।

**इति श्रीसमयसुन्दरोपाध्यायविरचितायां दशवैकालिकशब्दार्थवृत्तौ वाक्यशुद्ध्यध्ययनं समाप्तम्. श्रीरस्तु ७.**

**(सु.)** उपसंहरन्नाह—परिक्ख इति, परीक्ष्यभाषी-आलोचितवक्ता तथा सुसमाहितेन्द्रियः-सुप्रणिहितेन्द्रिय इत्यर्थः, अपगतचतुष्कषायः-क्रोधादिनिरोधकर्त्तेति भावः, अनिश्रितो-द्रव्य-भावनिश्रारहितः, प्रतिबन्धविमुक्त इति हृदयं, स इत्थंभूतो निर्धूय-प्रस्फोट्य **धून्नमलं**-पापमलं, पुराकृतं-जन्मान्तरकृतं, किम् ? इत्याह आराधयति-प्रगुणीकरोति, लोकमेनं-मनुष्यलोकं वाक्संयतत्वेन, तथा परमिति-परलोकमाराधयति निर्वाणलोकं, यथासम्भवमन्तरं पारम्पर्येण चेत्यर्थः ।।३३४।। ब्रवीमीति पूर्ववदेवेति ।।

**इति श्रीसुमतिसाधुविरचितायां दशवैकालिकटीकायां सप्तमस्य वाक्यशुद्ध्यध्ययनस्य व्याख्यानं समाप्तम् ७ ।।**

# ।। अष्टमम् आचारप्रणिध्यध्ययनम् ।।

**आयारपणिहिं लद्धुं, जहा कायव्व भिक्खुणा ।**
**तं भे उदाहरिस्सामि, आणुपुव्विं सुणेह मे ।।८.१।।**

**(ति.)** अनन्तराध्ययने वाक्यशुद्धिरुक्ता । सा चाचारे [1]प्रणिहितस्य भवतीत्यनेन सम्बन्धेनायातमाचारप्रणिध्यध्ययनं व्याख्यायते । तच्चेदम्-आचारः-साध्वनुष्ठेयः, तस्य प्रकृष्टो निधिः प्रणिधिः तं, लब्ध्वा-प्राप्य । यथा कर्तव्यं भिक्षुणा । तम्-प्रकारम् । भे-भवद्भ्यः । उदाहरिष्यामि-कथयिष्यामि । आनुपूर्व्या । श्रुणुत मे-मम कथयतः । श्रीगौतमादयः स्वशिष्यानाहुः ।।८.१।।

**(स.)** व्याख्यातं वाक्य शुद्ध्यध्ययनं—नाम सप्तममध्ययनम्, अथाचारप्रणिधि-नामकमष्टममध्ययनं प्रारभ्यते, अस्य चायमभिसम्बन्धः-इतः पूर्वाध्ययने साधुना वचनगुणदोषान् जानता निष्पापं वचनं वक्तव्यमित्युक्तं, इह तु निष्पापं वचनमाचारे स्थितस्य भवति-इत्याचारे यत्नः कार्य इत्येतदुच्यत इति, अनेन सम्बन्धेनायातमिदमध्ययनं व्याख्यायते, तथाहि-[आयार...इति]

श्रीमहावीरदेवः स्वकीयशिष्यान् गौतमादीनेवमाह—तमाचारप्रणिधिं, भे भवद्भ्य उदाहरिष्यामि कथयिष्याम्यानुपूर्व्या परिपाट्या, यूयं श्रुणुत मे मम कथयत इति शेषः, तं कं ? यमाचारप्रणिधिं लब्ध्वा प्राप्य, भिक्षुणा साधुना यथा येन प्रकारेण विहितानुष्ठानं कर्तव्यम् ।।८.१।।

**(सु.)** व्याख्यातं वाक्यशुद्ध्यध्ययनं, इदानीमाचारप्रणिध्याख्यमारभ्यते, अस्य चायमभिसम्बन्धः । इहानन्तराध्ययने साधुना वचनदोषगुणाभिज्ञेन निरवद्यवचसा वक्तव्यमित्येतदभिहितं, इह तु तन्निरवद्यं वच आचारे प्रणिहितस्य भवतीति तत्र यत्नवता भवितव्यमित्येतदुच्यते उक्तं च-

"पणिहाणरहियस्सेह निरवज्जं पि भासियं ।
सावज्जतुल्लं विन्नेयं, अज्झत्थेणेह संवुडं ।।१।।"

इत्यनेनाभिसम्बन्धेनायातमिदमध्ययनमिति, तद्यथा-आचारमित्यादि, आचार-

---

१. स्थितस्य १० टि. ।।

प्रणिधिमुक्तस्वरूपां लब्ध्वा-प्राप्य यथा-येन प्रकारेण कर्त्तव्यं विहितानुष्ठानं भिक्षुणा-साधुना, तं प्रकारं भे-भवद्भ्य उदाहरिष्यामि-कथयिष्याम्यानुपूर्व्या-परिपाट्या श्रुणुत ममेति गौतमादयः स्वशिष्यानाहुरिति ।।८.१।।

**पुढवि-दग-अगणि-वाऊ[१], तण-रुक्ख-सबीयगा ।**
**तसा य पाणा जीव त्ति, इई वुत्तं महेसिणा ।।८.२।।**

**(ति.)** तं प्रकारमाह—पृथव्युदकाग्निवायवः । तृणवृक्षसबीजाः । त्रसादयः । प्राणाः-प्राणिनः । जीवा इति । इत्युक्तं महर्षिणा-श्रीवीरजिनेन्द्रमुखात् श्रीगौतमस्वामिना ।।८.२।।

**(स.)** अथ तं प्रकारमाह—पुढवि-इति महर्षिणा श्रीवर्धमानेन गौतमेन वा इत्येवमुक्तं, एवं किम् ?-इत्याह-एते जीवाः, एते के ?-इत्याह-पृथिव्युदकाग्निवायवः, पुनस्तृण-वृक्षाः सबीजाः, एते पञ्चैकेन्द्रियाः पूर्ववत्, त्रसाश्च प्राणिनो द्वीन्द्रियादयः, एते सर्वेऽपि जीवा ज्ञेयाः ।।८.२।।

**(सु.)** पुढवि'इति, पृथिव्युदकाग्निवायवस्तृणवृक्षसबीजा एते पञ्चैकेन्द्रियकायाः पूर्ववत्, त्रसाश्च प्राणिनो द्वीन्द्रियादयो 'जीवा' इत्युक्तं महर्षिणा-वर्द्धमानेन गौतमेन वेति ।।८.२।।

**तेसिं अत्थणजोएण, निच्चं होयव्वयं सया ।**
**मणसा कायवक्केणं, एवं हवइ संजए ।।८.३।।**

**(ति.)** यतश्चैवम् ?-अतः—तेषाम्-जीवानाम्। अक्षणयोगेन-अहिंसाव्यापारेण। नित्यं भवितव्यम्-वर्त्तितव्यं स्यात्। भिक्षुणा मनसा कायेन वाक्येन। एवम्-वर्तमानः। संयतो भवति। नान्यः ।।८.३।।

**(स.)** यतश्चैते जीवास्ततः किं कर्तव्यमित्याह—तेसिं-इति-भिक्षुणैतेषां पृथिव्यादिजीवानामक्षणयोगेनाहिंसाव्यापारेण नित्यं भवितव्यं वर्तितव्यं स्यात्, केन ? मनसा कायेन वाक्येन, एभिः कारणैरित्यर्थः, एवं वर्तमानोऽहिंसकः सन् संयतः सम्भवति नान्यः ।।८.३।।

---

१. मारुअ १० टि. ।।

**(सु.)** यतश्चैवं ? अतः तेसिं'इति, तेषां-पृथिव्यादीनां अक्षणयोगेन-अहिंसाव्यापारेण नित्यं भवितव्यं-वर्तितव्यं स्याद् भिक्षुणा मनसा कायेन वाक्येन-एभिः करणैरित्यर्थः, एवं वर्त्तमानोऽहिंसकः सन् भवति संयतो, नान्य(था) इति ।।८.३।।

**पुढविं भित्तिं सिलं लेलुं, नेव भिंदे न संलिहे ।**
**तिविहेणं करणजोएणं, संजए सुसमाहिए ।।८.४।।**

**(ति.)** विशेषविधिमाह—अर्थः प्राग्वत् ।।८.४।।

**(स.)** एवं सामान्येन षड्जीवनिकायस्याहिंसायां संयतत्वं कथयित्वा, तद्गतविधिं विधानतो विशेषेणाह—पुढविं-इति-संयतः साधुः पृथिवीं शुद्धां, भित्तिं, तटीं, शिलां पाषाणरूपां, लेष्टुमिट्टालखण्डं, नैव भिद्यान्न सँलिखेत्, तत्र भेदनं द्वैधीभावाद् व्यापादनं, सँलेखनमीषल्लेखनं, त्रिविधेन त्रिकरणयोगेन न करोति मनसा वचसा कायेन, किंभूतः संयतः ? सुसमाहितः समाधिमान् शुद्ध इत्यर्थः ।।८.४।।

**(सु.)** एवं सामान्येन षड्जीवनिकायाहिंसायां संयतत्वमभिधायाधुना तद्गतविधीन् विधानतो विशेषेणाह—पुढविं...इति, पृथिवीं शुद्धां, भित्तिं-तटीं, शिलां पाषाणात्मिकां लेष्टुं-इट्टालखण्डं नैव भिन्द्यात् न संलिखेत्, तत्र भेदनं-द्वैधीभावोत्पादनं, संलेखनं-ईषल्लेखनं, त्रिविधेन करणयोगेन, न करोति मनसेत्यादिना, संयतः-साधुः, सुसमाहितः शुद्धभाव इति ।।८.४।।

**सुद्धपुढवीइ[1] न निसीए, ससरक्खंमिअ आसणे।**
**पमज्जित्तु निसीइज्जा, जाइत्ता जाइ उग्गहं ।।८.५।।**

**(ति.)** तथा—शुद्धायाम्-सचित्तायां वा अनन्तर्हितायाम्। पृथिव्यां न निषीदेत्। सरजस्के-पृथ्वीकायरजोगुण्डिते। आसने च न निषीदेत्। अचेतनां तु पृथ्वीं 'जाणित्ता'-ज्ञात्वा। प्रमृज्य-रजोहरणेन प्रोञ्छनकं क्षिप्त्वा निषीदेत्। 'जाइत्ता उग्गहं' याचित्वा-अवग्रहं यस्य पृथिवी तं याचित्वानुज्ञाप्यावग्रहमित्यर्थः उक्तः पृथिवीकायविधिः ।।८.५।।

**(स.)** सुद्ध...इति-पुनः किञ्च संयतः शुद्धपृथिव्यां, शस्त्रेण या नोपहता, तस्यां पृथिव्यां न निषीदेत्, तथा पुनरासने पीठकादौ न निषीदेत्, निषीदनग्रहणात् स्थान-

१. ०पुढवीं न'इति मुद्रितोऽन्यत्र पाठः ।।

त्वग्वर्तपरिग्रहः, किंभूत आसने ? सरजस्के पृथिवीरजोवगुण्डिते वा, तर्हि कथं कुर्यात्? अचेतनां पृथिवीं ज्ञात्वा रजोहरणेन प्रमृज्य निषीदेत्, किं कृत्वा ? अवग्रहं याचित्वा, कोऽर्थः ? यस्य गृहस्थादेः सम्बन्धिनी पृथिवी वर्तते, तं गृहस्थमनुज्ञाप्यादेशं लात्वेत्यर्थः इति पृथिवीकायविधिरुक्तः ।।८.५।।

**(सु.)** सुद्ध'इति, शुद्धपृथिव्यां अशस्त्रोपहतायामनन्तरितायां न निषीदेत्, तथा सरजस्के-पृथिवीरजोगुण्डिते वा आसने-पीठकादौ न निषीदेत्, निषीदनग्रहणात् स्थान-त्वग्वर्त्तनपरिग्रहः, अचेतनायां तु प्रमृज्य तां रजोहरणेन निषीदेत्, ज्ञात्वेत्यचेतनां ज्ञात्वा याचयित्वाऽवग्रहमिति, यस्य सम्बन्धिनी पृथिवी तमवग्रहमनुज्ञाप्येत्यर्थः उक्तः पृथिवीकायविधिः ।।८.५।।

**सीओदगं न सेविज्जा, सिलावुट्ठं हिमाणि य ।**
**उसिणोदगं तत्तफासुयं, पडिगाहिज्ज संजए ।।८.६।।**

**(ति.)** अप्कायविधिमाह—सीतोदकम्-पृथव्युद्भवम्। न सेवेत। शिलावृष्टं हिमानि च-शिलाः-करका, वृष्टम्-वर्षणम्, हिमं प्रतीतम्। तर्ह्ययं कथं वर्तेत ? इत्याह। उष्णोदकं तप्तप्राशुकम्-तप्तं त्रिदण्डोत्कलितं सन् प्रासुकम्। नोष्णोदकमात्रं प्रतिगृह्णीयात् संयतः ।।८.६।।

**(स.)** अथाऽप्कायविधिमाह—सीओदगं'इति संयतः साधुः शीतोदकं पृथिवीतदुद्भवं सच्चित्तोदकं सचित्तपानीयं न सेवेत. तथा शिलावृष्टिं हिमानि च न सेवेत, अत्र शिलाग्रहणेन करकाः परिगृह्यन्ते, वृष्टं वर्षणं, हिमं प्रसिद्धं, प्राय उत्तरापथे भवति, आह-यद्येवं तर्हि कथं साधुर्वर्त्तेत ? इत्याह—उष्णोदकं क्वथितोदकं तप्तप्रासुकं तप्तं सत् प्रासुकं त्रिदण्डोद्वृत्तं नोष्णोदकमात्रं प्रतिगृह्णीयाद्वृत्त्यर्थम्, एतच्च सौवीरादीनामुपलक्षणम्. ।।८.६।।

**(सु.)** अधुना अप्कायविधिमाह—सीओदगं'इति, शीतोदकं-पृथिव्युद्भवं, सच्चित्तोदकं न सेवेत, तथा शिलावृष्टं हिमानि च न सेवेत, अत्र शिलाग्रहणेन करकाः परिगृह्यन्ते, वृष्टं वर्षणं, हिमं प्रतीतं प्राय उत्तरापथे भवति, यद्येवं ? कथमयं वर्त्तेत ?-इत्याह-उष्णोदकं-क्वथितोदकं तप्तप्रासुकं-तप्तं सत् प्रासुकं त्रिदण्डोद्वृत्तं, नोष्णोदकमात्रं परिगृह्णीयात्, वृत्त्यर्थं संयतः-साधुः, एतच्च सौवीराद्युपलक्षणमिति ।।८.६।।

**उदउल्लं अप्पणो कायं, नेव पुंछे न संलिहे ।**
**समुप्पेह तहाभूयं, नो णं संघट्टए मुणी ।।८.७।।**

**(ति.)** उदकार्द्रम्-नद्युत्तरणे बहिर्गतस्य वा वृष्टौ। आत्मनः कायं नैव पुंछे–'पुसः अभिमर्दने' [पा.धा.१७३७] नैव पुंसेत्[1] नाभिमर्दयेत् वस्त्रतृणादिना। न संलिखेत्-पाणिना। समुत्प्रेक्ष्य। तथाभूतम्-जलक्लिन्नम्। नैनं सङ्घट्टयेत् मुनिः ।।८.७।।

**(स.)** उदउल्लं'इति-पुनर्मुनिर्नदीमुत्तीर्णो भिक्षायां प्रविष्टो वा वृष्टिहत उदकार्द्रमुदकबिन्दुव्याप्तमात्मनः कायं शरीरं सस्निग्धं वा नैव पुञ्छयेत्, वस्त्रतृणादिभिर्न संलिखेत्, पाणिना हस्तेनापि, किं कृत्वा ? समुत्प्रेक्ष्य निरीक्ष्य, तथाभूतमुदकार्द्रादिरूपं कायं नैनं संघट्टयेत्, मनागपि न संस्पृशेत्. उक्तोऽप्कायविधिः ।।८.७।।

**(सु.)** तथा-उदउल्लं इति, नदीमुत्तीर्णः भिक्षाप्रविष्टो वा वृष्टिहतः उदकार्द्र-उदकबिन्दु-चितमात्मनः कायं-शरीरं, सस्निग्धं वा नैव पुञ्छयेद् वस्त्रतृणादिभिः न संलिखेत् पाणिना-हस्तेन, अपि तु संप्रेक्ष्य-निरीक्ष्य तथा भूतमुदकार्द्रादिरूपं नैव कायं संघट्टयेन्मुनिर्मनागपि न संस्पृशेदिति । उक्तोऽप्कायविधिः ।।८.७।।

**इंगालं अगणिं अच्चिं, अलायं वा सजोइयं ।**
**न उंजिज्जा न घट्टिज्जा, नो णं निव्वावए मुणी ।।८.८।।**

**(ति.)** अथ तेजस्कायविधिमाह–अस्यार्थः प्राग्वत् ।।८.८।।

**(स.)** अथ तेजस्कायविधिमाह–इङ्गालं'इति-मुनिरग्निं प्रत्येवं न कुर्यात्, एवं किम् ?-इत्याह-अङ्गारं ज्वालारहितम्, अग्नि-अयःपिण्डातानुगं, तथार्चिः प्रदीपादेश्छिन्नज्वाला, तथा अलातमुल्मुकं वा सज्योतिः साग्निकमित्यर्थः, किम् ?-इत्याह-नोत्सिञ्चेन्न घट्टयेत्, तत्रोत्सिञ्चनसुत्सेचनं प्रदीपादेर्घट्टनं मिथश्चालनं, तथा नैनमग्निं निर्वापयेदभावमापादयेत् इति तेजस्काय उक्तः ।।८.८।।

**(सु.)** तेजःस्कायविधिमाह–इंगालिं इति, अङ्गारं-ज्वालारहितं, अग्निं-अयःपिण्डानुगं, अर्च्चिः-छिन्नज्वाला, अलातं-उल्मुकं वा सज्योतिः-साग्निकमित्यर्थः, किम् ?-इत्याह-नोत्सिञ्चयेन्न घट्टयेत्, तत्रोञ्जनमुत्सेचनं प्रदीपादेः, घट्टनं-मिथश्चालनं, तथा नैनमग्निं निर्वापयेत्-अभावमापादयेन्मुनिः-साधुरिति । प्रतिपादितस्तेजःकायविधिः ।।८.८।।

१. 'पुंस्' तु चुरादिकः, तथापि 'अनित्यो णिचू चुरादीनाम्' इति न्यायात् 'पुंसेत्' इति नाऽसाधु ।।

**तालविंटेण[1] पत्तेण, साहाविहूयणेण वा ।**
**न वीइज्ज अप्पणो कायं, बाहिरं वा वि पुग्गलं ।।८.९।।**

**(ति.)** अथ वायुकायविधिमाह—[तालि...इति] अस्याप्यर्थः प्राग्वत् ।।८.९।।

**(स.)** अथ वायुकायविधिमाह—तालिअंटेण...इति-मुनिरात्मनः कायं न वीजयेद्बाह्यं वापि पुद्गलमुष्णोदकादिं, केन न वीजयेत् ? इत्याह-तालवृन्तेन व्यजनविशेषेण, तथा पत्रेण पद्मिनीपत्रादिना तथा शाखया वृक्षडालरूपया विधूपनेन व्यजनेन वा. इति वायुकायविधिः प्रतिपादितः ।।८.९।।

**(सु.)** तालियंटेणं'इति, तालवृन्तेन-व्यजनविशेषेण, पत्रेण-पद्मिनीपत्रादिना, शाखया-वृक्षडालरूपया विधूवनेन वा-व्यजनेन वा, किम् ?-इत्याह-न वीजयेदात्मनः कायं-स्वशरीर-मित्यर्थः, बाह्यं वापि पुद्गलं-उष्णोदकादीति, प्रतिपादितो वायुकायविधिः ।।८.९।।

**तणरुक्खं न छिंदिज्जा, फलं मूलं च कस्सई ।**
**आमगं विविहं बीयं, मणसा वि न पत्थए ।।८.१०।।**

**(ति.)** वनस्पतिकायविधिमाह— [तणरुक्खं...इति] स्पष्टः ।।८.१०।।

**(स.)** अथ वनस्पतिकायविधिमाह—तण...इति-साधुस्तृणवृक्षं न छिन्द्यात्, तत्र तृणानि दर्भादीनि, वृक्षाः कदम्बादयः, तथा वृक्षादेः कस्यचित् फलं मूलकं वा न छिन्द्यात् तथा आमकं शस्त्रेण यन्त्रोपहतम्, एवंविधं विविधमनेकप्रकारं बीजं साधुर्मनसापि न प्रार्थयेत्, कथं पुनर्भक्षयेत् ? ।।८.१०।।

**(सु.)** वनस्पतिविधिमाह—तण'...इति, तृणवृक्षमित्येकवद्भावः, तृणानि-दर्भादीनि, वृक्षाः-कदम्बकादयः, एतान् न छिन्द्यात्, फलं मूलकं वा कस्यचिद् वृक्षादेर्न छिन्द्यात् तथा आमं-अशस्त्रोपहतं विविधं-अनेकप्रकारं बीजं मनसापि न प्रार्थयेत्, किं पुनरश्नीयादिति ।।८.१०।।

**गहणेसु न चिट्ठिज्जा, बीएसु हरी(रि)एसु वा ।**
**उदगंमि तहा निच्चं, उत्तिंगपणगेसु वा ।।८.११।।**

---

१. 'तालिअंटेण पत्तेण, साहाए विहुणेण वा । न वीइज्जऽप्पणो कायं....।। इत्यादि पाठोऽन्यत्र मुद्रितः ।।

**(ति.)** तथा—गहनेषु-वननिकुञ्जेषु । न तिष्ठेत् । बीजेषु-गृहाङ्गणप्रसारितेषु । शाल्यादिषु। उदके तथा नित्यम्-"जत्थ जलं तत्थ वणं" इति [ ] वचनात् उभयविराधना । उत्तिङ्ग-पनकयोर्वा-उत्तिङ्गः-सिलिध्रातपत्राणि, पनकः-पञ्च-वर्णाप्युल्लिः। सर्वत्र सङ्घट्टादिदोषः ।।८.११।।

**(स.)** पुनः किं न कुर्यादित्याह—गहणेसु...इतिसाधुर्गहनेषु वनेषु निकुञ्जेषु न तिष्ठेत्, सङ्घट्टनादिदोषप्रसङ्गात्, तथा बीजेषु प्रसारितशाल्यादिषु वा, तथा हरितेषु (वा) दूर्वादिषु न तिष्ठेत्, उदके तथा नित्यं, तत्रोदकमनन्तवनस्पतिविशेषः, यथोक्तं-'उदए अवए पणए' [ ] इत्यादि, उदकमेवेत्यन्ये, तत्र नियमतो वनस्पतिभावात्, तथा उत्तिङ्ग-पनकयोर्वा न तिष्ठेत्, तत्रोत्तिङ्गः सर्पच्छत्रादिः, पनक उल्लिवनस्पतिरिति । उक्तो वनस्पतिकाय[1]विधिः ।।८.११।।

**(सु.)** तथा—गहणेसु, गहनेषु-वननिकुञ्जेषु च न तिष्ठेत्, सङ्घट्टनादिदोषप्रसङ्गात्, तथा बीजेषु-प्रसारितशाल्यादिषु, हरितेषु वा-दूर्वादिषु न तिष्ठेत्, उदके तथा नित्यं, अत्रोदकं-अनन्तवनस्पतिविशेषः, यथोक्तं-"उदए अवए पणए" [ ] इत्यादि, उदकमेवान्ये, तत्र नियमतो वनस्पतिभावात्, उत्तिङ्ग-पनकयोर्वा न तिष्ठेत्, तत्रोत्तिङ्गः-सर्पच्छत्रादिः पनकः-उल्लिवनस्पतिरिति, उक्तो वनस्पतिविधिः ।।८.११।।

**तसे पाणे न हिंसिज्जा, वाया अदुव कम्मुणा ।**
**उवरओ सव्वभूएसु, पासि(से)ज्ज विविहं जगं ।।८.१२।।**

**(ति.)** त्रसविधिमाह—त्रसान् प्राणान् न हिंस्याद् । वाचा अथवा । कर्मणा-कायेन । तदन्तर्गतत्वान्मनसापि । उपरतः-निवृत्तो हिंसातः । सर्वभूतेषु पश्येद् विविधं जगत्-कर्मपरतन्त्र(त्रं) निर्वेदायेति उक्तः स्थूलविधिः ।।८.१२।।

**(स.)** अथ त्रसकायविधिमाह—तस इति-साधुस्त्रसान् प्राणिनो द्वीन्द्रियादीन् न हिंस्यात्, कथम् ?-इत्याह-वाचा वचनेन, अथ वा कर्मणा कायेन, मनसोऽपि ग्रहणं कार्यं, तस्य तयोरन्तर्गतत्वात्, पुनः साधुरुपरतः सन्, केषु ? सर्वभूतेषु. दूरीकृतदण्डः सन्, पश्येत् विविधं जगत् कर्मपरतन्त्रं नरकादिगतिरूपं निर्वेदायेति सूत्रार्थः. उक्तः स्थूलविधिः ।।८.१२।।

---

१. वनस्पतिविधिरित्यपि दृश्यते ।

**(सु.)** त्रसविधिमाह—त्रसप्राणिनो-द्वीन्द्रियादीन् न हिंस्यात्, कथम् ?-इत्याह—वाचा अथवा कर्मणा-कायेन, मनसस्तदन्तर्गतत्वादग्रहणं, अपि चोपरतः सर्व्वभूतेषु निक्षिप्तदण्डः सन् पश्येद् विविधं जगत्-कर्म्मपरतन्त्रं नरकादिगतिरूपं निर्वेदायेति उक्तः स्थूलविधिः ।।८.१२।।

**अट्ठ सुहुमाणि[1] पेहाए, जाइं जाणित्तु संजए।**
**दयाहिगारी भूएसु, आस चिट्ठ सइज्ज वा ।।८.१३।।**

**(ति.)** अथ सूक्ष्मविधिमाह—अष्टौ । सूक्ष्माणि प्रेक्ष्य-वक्ष्यमाणानि । यानि ज्ञात्वा संयतः । दयाधिकारी भूतेषु । आसीत तिष्ठेत् शयीत वा ।।८.१३।।

**(स.)** सूक्ष्मविधिमाह—अट्ठ...इति-संयतः साधुरष्टौ सूक्ष्माण्यग्रे वक्ष्यमाणानि प्रेक्ष्य निरीक्ष्योपयोगत आसीत तिष्ठेच्छयीत वेति योगः, किंभूतानि सूक्ष्माणि ?-इत्याह-यानि ज्ञात्वा-संयतो ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च, भूतेषु दयाधिकारी भवति, अन्यथा दयाधिकार्येव न स्यात्, तानि प्रेक्ष्य तद्रहित एवासनादि कुर्यात्, अन्यथा तेषां सातिचारतेति. ।।८.१३।।

**(सु.)** अथ सूक्ष्मविधिमाह—अट्ठ'इति, अष्टौ सूक्ष्माणि वक्ष्यमाणानि प्रेक्ष्योपयोगतः आसीत तिष्ठेत् शयीत वेति योगः, किंविशिष्टानि ?-इत्याह-यानि ज्ञात्वा संयतो ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च दयाधिकारी भूतेषु भवति, अन्यथा दयाधिकार्येव नेति, तानि प्रेक्ष्य तद्रहित एवासनादीनि कुर्यात्, अन्यथा तेषां विराधनेन सातिचारतेति ।।८.१३।।

**कयराणि अट्ठ सुहुमाणि, जाइ पुच्छिज्ज संजए ।**
**इमाणि ताणि मेहावी, आइक्खिज्ज वियक्खणो ।।८.१४।।**

**(ति.)** कश्चिदाह—कतराण्यष्टौ सूक्ष्माणि यानि पृच्छेत् संयतः । इमानि तानि । मेधावी-मर्यादावर्त्ती । आचक्षीत विचक्षणः ।।८.१४।।

**(स.)** कानि पुनस्तान्यष्टौ ? - इत्याह-कयराइं'इति-कतराणि तान्यष्टौ सूक्ष्माणि? यानि दयाधिकारित्वस्याभावभयात्-पृच्छेत् संयतः, अनेन दयाधिकारिण एवंविधेषु

---

१. सुहुमाइं....सएहि वा ।। इति पाठोऽन्यत्र मुद्रितः ।।

प्रयत्नविधिमाह—स ह्यवश्यं तदुपकारकाण्यपकारकाणि च पृच्छति तत्रैव भावप्रतिबन्धादिति, अमूनि च तान्यनन्तरवक्ष्यमाणान्याचक्षीत विचक्षण इत्यनेनाप्येतदेवाह-मर्यादावर्तिना तज्ज्ञेन तत्प्ररूपणा कार्या, एवं हि श्रोतुस्तदुपादेयबुद्धिर्भवति, अन्यथा तु विपर्यय इति. ।।८.१४।।

(सु.) आह—कयराणि'इति, कतराणि तान्यष्टौ सूक्ष्माणि यानि दयाधिकारित्वाभावभयात् पृच्छेत् संयतः, ? अनेन दयाधिकारिण एवैवंविधेषु यत्नमाह, स ह्यवश्यं तदुपकारकाण्यपकारकाणि च पृच्छति, तत्रैव भावप्रतिबन्धादिति, अमूनि तान्यनन्तरं वक्ष्यमाणानि मेधावी आचक्षीत विचक्षण इति, अनेनाप्येतदेवाह-मर्यादावर्त्तिना तज्ज्ञेन तत्प्ररूपणा कार्या, एवं हि श्रोतुस्तत्रोपादेयबुद्धिर्भवति, अन्यथा विपर्यय इति ।।८.१४।।

**सिणेहं पुप्फसुहमं च, पाणुत्तिगं तहेव य ।**
**पणगं बीय हरियं च, अंडसुहुमं च अट्ठमं ।।८.१५।।**

(ति.) तथाहि—स्नेहम्-स्नेहसूक्ष्मम्, अवश्याय-हिम-महिका-करक-हरतनुरूपम् । पुष्पसूक्ष्मम्-वटोडुम्बरपुष्पाणि तानि तद्वर्णानि सूक्ष्माणि'इति न लक्ष्यन्ते । प्राणसूक्ष्मम्-अनुद्धरिः कुन्थुः स हि चलन्नेव विभाव्यते, न स्थितः, सूक्ष्मत्वात् । उत्तिङ्गसूक्ष्मम्-कीटकानगरादि। पनकसूक्ष्मम्-पञ्चवर्णाप्युल्लिः । बीजसूक्ष्मम्-शाल्यादिबीजस्य मुखमूले यल्लोके तुषमुख-मित्युच्यते । हरितसूक्ष्मम्-अभिनवोत्पन्नं पृथ्वीसमानवर्णमेव । अण्डसूक्ष्मम्-मक्षिका-कीटिका-गृहोलिका-ब्राह्मणी-कृकलासाद्यण्डम् ।।८.१५।।

(स.) सिणेहं...इति-स्नेहसूक्ष्ममवश्याय-हिम-मिहिका-करक-हरतनुरूपं, पुष्पाणि तानि तद्वर्णानि सूक्ष्माणीति न लक्ष्यन्ते, 'पाणि...इति' प्राणिसूक्ष्मम्-अनुद्धरिः कुन्थुः, स हि चलत् विभाव्यते, न स्थितः, सूक्ष्मत्वात्, उत्तिङ्गसूक्ष्मं कीटिकानगरं, तत्र कीटिका अन्ये च सूक्ष्मसत्त्वा भवन्ति, तथा पनकमिति पनकसूक्ष्मं प्रायः प्रावृट्काले भूमि-काष्ठादिषु पञ्चवर्णस्तद्द्रव्यलीनः पनक इति, तथा बीजसूक्ष्मं शाल्यादिबीजस्य मुखमूले कणिका, या लोकेषु तुषमुखमित्युच्यते, हरितं चेति हरितसूक्ष्मं च, तथात्यन्तमभिनवमुद्भिन्नं पृथिवीसमानवर्णमेवाण्डसूक्ष्मं चाष्टममिति. एतच्च मक्षिका-कीटिका-गृहकोकिला-ब्राह्मणी-कृकलासादीनामण्डमिति. ।।८.१५।।

(सु.) सिणेहं'इति, स्नेहमिति स्नेहसूक्ष्मं-अवश्याय-हिम-महिका-करक-हरतनुरूपं,

पुष्पसूक्ष्मं चेति वटोदुम्बराणां पुष्पाणि, तानि तद्वर्णानि सूक्ष्माणीति न लक्ष्यन्ते, प्राणीति, प्राणिसूक्ष्ममनुद्धरिः कुन्थुः, स हि चलन् विभाव्यते, न स्थितः, सूक्ष्मत्वात्, उत्तिंगं तथैव चेति, उत्तिंगसूक्ष्मं-कीटिकानगरं, तत्र कीटिका अन्ये च सूक्ष्मसत्त्वा भवन्ति, तथा पनकमिति, पनकसूक्ष्मं प्रायः प्रावृट्काले भूमि-काष्ठादिषु पञ्चवर्ण-स्तद्द्रव्यलीनः पनक इति, तथा बीजसूक्ष्मं-शाल्यादिबीजस्य मुखमूले कणिका, या लोके तुषमुखमित्युच्यते, हरितं चेति हरितसूक्ष्मं, तच्चाऽत्यन्ताभिनवोद्भिन्नं पृथिवीसमान-वर्णमेवेति, अण्डसूक्ष्मं चाष्टममिति, एतच्च मक्षिका-कीटिका-गृहकोकिला-ब्राह्मणी-कुकलासा-ऽऽद्यण्डकमिति ।।८.१५।।

**एवमेयाणि जाणित्ता, सव्वभावेण संजए ।**
**अप्पमत्तो जए निच्चं, सव्विंदियसमाहिए ।।८.१६।।**

**(ति.)** एवम्-उक्तेन प्रकारेण । एतानि-सूक्ष्माणि । ज्ञात्वा । सर्वभावेन-सर्वात्मना। संयतः । अप्रमत्तः-निद्रादिप्रमादरहितः । सर्वेन्द्रियसमाधिना नित्यम् सर्वकालं मनोवाक्कायैः तद्विराधनावर्जने यतेत । सम्भवति हि प्रायेण सर्वेषामपि सूक्ष्माणां विराधना । वटोडुम्बरपुष्पाणामपि प्रत्यासन्नभावे सम्भवति परितापनादोषः ।

अत्राह परः—षड्जीवनिकायिकाध्ययने विस्तरेण, महाचारकथायां सङ्क्षेपेण षड्जीवनिकायरक्षासाधूनामुक्ता । किं पुनरत्र ? उच्यते—चारित्रस्य हि रहस्यं षड्जीवनिकायरक्षा । अतोऽत्रादरख्यापनार्थं द्विस्त्रिरुक्तेऽपि न दोषः ।।८.१६।।

**(स.)** पुनः सूत्रं—एवं...इति-साधुर्नित्यं सर्वकालं यतेत, मनो-वचन-कायेन कृत्वा जीवानां संरक्षणं प्रति, किं कृत्वा ? एवं पूर्वोक्तप्रकारेणैतान्यष्टौ सूक्ष्माणि ज्ञात्वा, केन ? सर्वभावेन सूत्रादेशेन शक्तेरनुरूपेण, किंभूतः संयतः ? संयमवान्, पुनः किंभूतः साधुः ? अप्रमत्तः प्रमादनिद्रारहितः, पुनः किंभूतः साधुः ? सर्वेन्द्रियसमाहितः सर्वेषामिन्द्रियाणां विषयेषु रागद्वेषावगच्छन्. ।।८.१६।।

**(सु.)** एवमेआणि'इति, एवमुक्तेन प्रकारेण एतानि सूक्ष्माणि ज्ञात्वा सूत्रादेशेन सर्वभावेन-शक्त्यनुरूपेण स्वरूपसंरक्षणादिना संयतः साधुः, किम् ?-इत्याह-अप्रमत्तो-निद्रादिप्रमादरहितो यतेत मनो-वाक्-कायैः संरक्षणं प्रति, नित्यं-सर्वकालं सर्वेन्द्रिय-समाहितः-शब्दादिषु रागद्वेषौ अगच्छन्निति ।।८.१६।।

**धुवं च पडिलेहित्ता(ज्जा[1]), जोगसा पायकंबलं ।**
**सिज्जमुच्चारभूमिं च, संथारं अदुवाऽऽसणं ।।८.१७।।**

**(ति.)** तथा–ध्रुवम्-नित्यं यथोक्तकालम् । योगसा-सति काययोगसामर्थ्ये । पात्र-कम्बलम्-पात्रग्रहणेऽन्यत्रोपधिकम्बलग्रहणात् शेषोपधिं च प्रत्युपेक्षेत । शय्याम्-वसतिं द्विकालं त्रिकालं वा । उच्चारभूमिं, च चकारात् प्रश्र(स्र)वणभूमिं कालभूमिं च। सन्ध्यायां संस्तारकम् अथवा आसनं पादप्रोच्छनं काष्ठासनं वा ।।८.१७।।

**(स.)** पुनः साधुः किं कुर्यात् ? इत्याह–धुवं...'इति-ध्रुवं च नित्यं च यो यस्य काल उक्तोऽनागतः परिभोगे च तस्मिन् प्रत्युपेक्षेत, केन ? सिद्धान्तविधिना, क्व सति ? योगे सति सामर्थ्ये सति, किं प्रत्युपेक्षेत इत्याह-पात्रकम्बलं, पात्रग्रहणादलाबु ! दारुमयादिपरिग्रहः, कम्बलग्रहणादूर्णा-सूत्रमयपरिग्रहः, तथा शय्यां वसतिं द्विकालं त्रिकालमुच्चारभुवं चाऽनापातवदादि स्थण्डिलं, तथासनमपवादेन गृहीतं पीठफलकादि साधुः सर्वं यतनया प्रत्युपेक्षेतेत्यर्थः. ।।८.१७।।

**(सु.)** तथा–धुवं'इति, तथा ध्रुवं च-नित्यं च यो यस्य काल उक्तोऽनागतः परिभोगे च तस्मिंस्तत्प्रत्युपेक्षेत सिद्धान्तविधिना, योगे सति सामर्थ्ये अन्यूनातिरिक्तं, किं तदित्याह-पात्र-कम्बलं, पात्रग्रहणादलाबु-दारुमयादिपरिग्रहः, कम्बलग्रहणादूर्णा-सूत्रमयपरिग्रहः, तथा शय्यां-वसतिं द्विकालं त्रिकालं च, उच्चारभुवं च-अनापातवदादि स्थंडिलं तथा संस्तारकं-तृणमयादिरूपं, अथवाऽऽसनं-अपवादगृहीतं पीठकादि प्रत्युपेक्षेतेति ।।८.१७।।

**उच्चारं पासवणं खेलं, सिंघाणजल्लियं ।**
**फासुयं पडिलेहित्ता, परिट्ठाविज्जा संजए ।।८.१८।।**

**(ति.)** तथा-[उचारं-इति] स्पष्टः । नवरम् । फासुयं ति-प्रासुकं स्थण्डिलं प्रत्युपेक्ष्य ।।८.१८।।

**(स.)** पुनः साधुः किं कुर्यादित्याह–उच्चारं'इति-संयतः साधुरेतानि परिष्ठापयेदुत्सृजेत्, किं कृत्वा ? प्रासुकं, स्थण्डिलमिति शेषः, प्रत्युपेक्ष्य एतानि कानि ?-

१. टीकासु 'प्रत्युपेक्षेत' इत्यर्थो वर्तते, अतः 'पडिलेहिज्जा' पाठोऽत्र साधुः ।। तथाऽन्यत्र पडिलेहिज्जा' इति मुद्रितः ।

इत्याह-उच्चारं प्रस्रवणं श्लेष्म सिंहाण—जल्लं च, एतानि सर्वाणि प्रसिद्धानि. इत्युपाश्रयस्थानविधिरुक्तः. ।।८.१८।।

**(सु.)** तथा—उच्चारं'इति, उच्चारं प्रश्रवणं श्लेष्म सिंघानं जल्लमिति प्रतीतानि, एतानि प्रासुकं प्रत्युपेक्ष्य स्थण्डिलमिति वाक्यशेषः, परिष्ठापयेदुत्सृजेत् संयत इति, उपाश्रयस्थानविधिरुक्तः, ।।८.१८।।

**[1]पविसिज्ज परागारं, पाणट्ठा भोयणस्स वा ।**
**जयं चिट्ठे मियं भासे, न य रूवेसु मणं करे ।।८.१९।।**

**(ति.)** उपाश्रयस्थानविधिरुक्तः गोचरप्रवेशमधिकृत्याह—[पविसिज्ज इति] पूर्वार्द्धं सुगमम् । तिष्ठेत्-उचितदेशे । मितं भाषेत-आगमनकार्यादि । न च रूपेषु-दातृकान्तादिषु । मनः कुर्यात् ।।८.१९।।

**(स.)** अथ गोचरप्रवेशमधिकृत्याह—पवि० इति-साधुर्यतं यतनया गवाक्षादि विलोकनेन विना उचितदेशे तिष्ठेत्, किं कृत्वा ? परस्य गृहस्थस्यागारं गृहं, पानार्थं भोजनस्य वा ग्लानादेरौषधार्थं वा प्रविश्य, पुनः साधुर्मितं यतनया भाषेतागमनप्रयोजनादि, परं न च रूपेषु दातृकान्तादिषु मनः कुर्यात्, एवंभूतान्येतानीति न मनो निवेशयेत्, रूपग्रहणेन रसादयोपि ग्राह्याः. ।।८.१९।।

**(सु.)** गोचरप्रवेशमधिकृत्याह—पविसित्तु, प्रविश्य परागारं-परगृहं, पानार्थं भोजनस्य वा ग्लानादेः औषधार्थं वा यतं-गवाक्षाद्यनवलोकयंस्तिष्ठेदुचितदेशे, मितं यतनया भाषेतागमन-प्रयोजनादि, न रूपेषु-दातृकान्तादिषु मनः कुर्यादेवम्भूतान्येतानीति न मनो निवेशयेत्, रूपग्रहणं रसाद्युपलक्षणमिति ।।८.१९।।

**बहुं सुणेइ कन्नेहिं, बहुं अच्छीहिं पिच्छई ।**
**न य दिट्ठं सुयं सव्वं, भिक्खू अक्खाउमरिहइ ।।८.२०।।**

**(ति.)** तथा बहिर्गतः साधुः केनचित् किञ्चित् पृष्टः, एवं ब्रूयात्—चारित्रोपघात-सम्भवात् । बहुम्-शोभनाशोभनम् ।।८.२०।।

---

१. पविसित्तु'इति पाठः, मुद्रितोऽन्यत्र । तथा टीकान्तेरेषु 'प्रविश्य' इत्यर्थो विहितः ।।

**(स.)** अथ गोचरादिगत एव साधुः केनचित् तथाविधं पृष्टः किं ? ब्रूयादित्याह, अथवा साधुरुपदेशस्याधिकारे सामान्येनैवमाह—बहुं'इति-बह्वनेकप्रकारं शोभनमशोभनं चा साधुः श्रुणोति कर्णाभ्यां शब्दसमूहमिति शेषः, तथा बह्वनेकप्रकारमेव शोभनमशोभनं चाक्षिभ्यां पश्यति, रूपसमूहमिति शेषः, परं न च दृष्टं श्रुतं सर्वं स्वस्य परस्योभयस्य चाहितमपि तव पत्नी रुदति, इत्येवमादिकं भिक्षुराख्यातुं कथयितुं नार्हति चारित्रस्य घातात्, अर्हति च स्वपरोभयहितं 'दृष्टस्ते शिष्यो राजानमुपशामयन्, एतादृशं तु वचनं कथयेत्'. ।।८.२०।।

**(सु.)** गोचरादिगत एव केनचित् तथाविधं पृष्टः एवं ब्रूयात्-इत्याह-बहुं'इति, अथवोपदेशाधिकार एव सामान्येनाह-बहुं'इति, बहु-अनेकप्रकारं शोभनाशोभनं श्रुणोति कर्णाभ्यां, शब्दजातमिति गम्यते, तथा बहु-अनेकप्रकारमेव शोभनाशोभनभेदेनाक्षिभ्यां पश्यति, रूपजातमिति गम्यते, एवं-न च दृष्टं श्रुतं सर्वं स्व-परोभयाहितमपि 'श्रुता ते पत्नी रुदति'इत्येवमादि भिक्षुराख्यातुमर्हति, चारित्रोपघातित्वात्, अर्हति च स्व-परोभयहितं दृष्टि(दृष्ट)स्ते राजानमुपशामयन् शिष्य इत्येवमादीति ।।८.२०।।

**सुयं वा जइ वा दिट्ठं, न लविज्जोवघाइयं ।**
**न य केण उपायेणं, गिहिजोगं समायरे ।।८.२१।।**

**(ति.)** एतदेव स्पष्टयन्नाह—श्रुतं वा अन्यतः, यदि वा दृष्टं स्वयमेव न लपेत् । उपघातेन निर्वृतं औपघातिकम् "चौरोऽयमित्यादि" । न च केनाप्युपायेन परोपरोधादिना स्वयं वा तदावर्जनार्थम् । गृहियोगम्-गृहिव्यापारं बालक्रीडनादिकं गृहरक्षादिकं वा साधुः समाचरेत् ।।८.२१।।

**(स.)** पुनरेतदेव स्पष्टयन्नाह—सुअं...इति-साधुः श्रुतं वान्यतो यदि वा दृष्टं वा स्वयमेव वा एतादृशं वचनं नालपेन्न भाषेत. कीदृशं वचनं ?-औपघातिकमुपघातेन निर्वृत्तं, तत्फलं वा औपघातिकं यथा 'त्वं चौर' इत्यादि, अतोऽन्यल्लपेदपीति गम्यते, तथा न च केनचिदुपायेन सूक्ष्मयापि भङ्ग्या गृहियोगं गृहसम्बन्धं तद्बालग्रहणादिरूपं गृहिव्यापारं प्रारम्भरूपं समाचरेत् कुर्यान्न चेति. ।।८.२१।।

**(सु.)** एतदेव स्पष्टयन्नाह—सुयं'इति, श्रुतं वा अन्यतो यदि वा दृष्टं स्वयमेव न

लपेन्न भाषेत, औपघातिकं-उपघातेन निर्वृत्तं तत्फलं वा, यथा-चौरस्त्वमित्यादि; अतोऽन्यल्लपेदपीति गम्यते, तथा न च केनचिदुपायेन सूक्ष्मयापि भङ्ग्या गृहियोगं-गृहिसम्बन्धं तद्बालग्रहणादिरूपं गृहिव्यापारं वा-प्रा(आ)रंभरूपं समाचरेत्-कुर्यादिति ।।८.२१।।

**निट्ठाणं रसनिज्जूढं, भद्दगं पावगं ति वा ।**
**पुट्ठो वा वि अपुट्ठो वा, लाभालाभं न निद्दिसे ।।८.२२।।**

**(ति.)** निष्ठानम्-सर्वगुणोपेतं प्रभूतमन्नम् । रसनिर्यूढम्-तद्विपरीतं कदशनम् । आद्यं भद्रकं । द्वितीयं पापकं । पृष्टो वापि परेण 'कीदृग् लब्धम्'इति अपृष्टो वा स्वयमेव साधुः भद्रकादेर्लाभालाभं न निर्दिशेत् ।।८.२२।।

**(स.)** निट्ठाणं'इति-पुनः किञ्च साधुर्निष्ठानादेर्लाभमलाभं च न निर्दिशेत्, किमाश्रित्य ? निष्ठानं सर्वगुणैः सहितं रसनिर्यूढमेतत्, विपरीतं कदशनमेतद्-आश्रित्याद्यं भद्रकं द्वितीयं पापकमिति वा, किम्भूतः साधुः ? पृष्टः केनापि कीदृग् ? लब्धमिति पृष्टो न निर्दिशेत्, अद्य साधु लब्धमसाधु वा कथं शोभनमिदमशोभनं वेदं नगरम्. ।।८.२२।।

**(सु.)** किञ्च—निट्ठाणं'इति, निष्ठानं-सर्वगुणोपेतं संभृतमन्नं रसनिर्यूढम्, एतद्विपरीतं कदशनं, एतदाश्रित्याद्यं भद्रकं द्वितीयं पापकमिति वा, पृष्टो वापि परेण कीदृग् लब्धमित्यपृष्टो वा स्वयमेव लाभालाभं निष्ठानादेर्न निर्दिशेद्, अद्य साधु लब्धमसाधु वा शोभनमिदं अपरमशोभनं वेति ।।८.२२।।

**न य भोयणंमि गिद्धो, चरे उंच्छं अयंपिरो ।**
**अफासुयं न भुंजिज्जा, कीयमुद्देसियाहडं ।।८.२३।।**

**(ति.)** किञ्च—न च भोजने गृद्धः विशिष्टवस्तुलाभायेश्वरादिकुलेषु चरेत् । अपि तु उञ्छन् । अज्ञातकुलेषु स्तोकस्तोकं प्राणवृत्त्यर्थं गृह्णन् । अजल्पनशीलः-धर्मलाभमात्राभिधायी चरेत् । अप्रासुकम्-सचित्तं सचित्तमिश्रं वा कथञ्चिद् गृहीतमपि न भुञ्जीत। क्रीतमौद्देशिकाहृतं च ।।८.२३।।

**(स.)** पुनः किञ्च—न...इति-साधुर्भोजने गृद्धः सन् प्रधानवस्तुप्राप्तिनिमित्तं

धनसमृद्धानां गृहे मुखमङ्गलिकया न चरेत्, अपि तु उञ्छं भावतो ज्ञाताज्ञातमजल्पनशीलः सन् धर्मलाभमात्रकथकः सन् चरेत्, तत्राप्यप्रासुकं सचित्तं सन्मिश्रादिकं कथञ्चिद् गृहीतमपि न भुञ्जीत, अथवा क्रीतमौद्देशिकमाहृतं प्रासुकमपि न भुञ्जीत. ।।८.२३।।

**(सु.)** किञ्च—न यं'इति, न च भोजने गृद्धः सन् विशिष्टवस्तु-लाभायेश्वरादिषु कुलेषु मुखमङ्गलिकया चरेत्, अपितु उञ्छं भावतो-ज्ञाताज्ञातम्, अजल्पनशीलो धर्मलाभमात्रा-भिधायी चरेत्, तत्राप्यप्रासुकं-सचित्तं सन् मिश्रादि कथंचिद् गृहीतमपि न भुञ्जीत, तथा क्रीतमौद्देशिकाहृतं प्रासुकमपि न भुञ्जीत, एतद् विशोध्यविशोधि-कोट्युपलक्षणमिति ।।८.२३।।

**संनिहिं च न कुव्विज्जा, अणुमायं पि संजए ।**
**मुहाजीवी असंबद्धे, हविज्ज जगनिस्सिए ।।८.२४।।**

**(ति.)** सन्निधिं च न कुर्वीत अणुमात्रमपि संयतः मुधाजीवी । असम्बद्धः । गृहस्थैः पद्मिनीपत्रवदुदकेन भवेत् । जगद्भ्यो निसृत इव जगन्निःसृतः—जगत्सु स्वर्गमर्त्यपातालरूपेषु निराकाङ्क्षत्वात् सिद्धिसुखाभिलाषुक इत्यर्थः ।।८.२४।।

**(स.)** पुनः किञ्च—संनिहिं च...इति-संयतः साधुः सन्निधिं च प्राङ्निरूपितस्वरूपं न कुर्यादणुमात्रमपि स्तोकमात्रमपि, किम्भूतः संयतः ? मुधाजीवी, अर्थः पूर्ववत्. पुनः किम्भूतः संयतः ? असम्बद्धो गृहस्थैर्नलिनीपत्रोदकवत्, एवंभूतः सन् भवेज्जगन्निश्रित-श्चराचरसंरक्षणप्रतिबद्धः. ।।८.२४।।

**(सु.)** संनिहिं च'इति, सन्निधिं च प्राङ्निरूपितस्वरूपं, न कुर्यादणुमात्रमपि-स्तोकमात्रमपि, संयतः-साधुः, तथा मुधाजीवी'इति पूर्ववत्, असम्बद्धः पद्मिनीपत्रोदक-वद् गृहस्थैः, एवंभूतः सन् भवेत्, जगन्निश्रितश्चराचर-संरक्षणप्रतिबद्ध इति ।।८.२४।।

**लूहवित्ती सुसंतुट्ठे, अप्पिच्छे सुभरे सिया ।**
**आसुरत्तं न गच्छिज्जा, सुच्चा णं जिणसासणं ।।८.२५।।**

**(ति.)** किञ्च—रूक्षैर्वल्ल-चणकैर्वृत्तिर्यस्य स रूक्षवृत्तिः । सुसन्तुष्टो येन तेन वा सुसन्तोषी। अल्पेच्छः-अल्पाहारः । दुर्भिक्षादावपि सुभरः स्यात् । आसुरत्तं-क्रोधभावं

न गच्छेत् । श्रुत्वा जिनशासनम्-क्रोधविपाकप्रतिपादकं वीतरागवचः । जहा ठाणाङ्गे—चउहिं ठाणेहि जीवा आसुरत्ताए कम्मं पगरंति, तं जहा- [1]कोहसीलयाए, पाहुडसीलयाए, संसत्ततवोकम्मेणं, निमित्ताजीवणयाए जाव जन्नं मए एस पुरिसे अन्नाणी मिच्छद्दिट्ठी अक्कोसइ हणइ वा तं न मे एस किंचि अवरज्झइ त्ति किं तु मम एयाणि वेयणिज्जाणि कम्माणि अवरज्झंति सम्ममहियासमाणस्स निज्जरा एवं भविस्सइ त्ति ।।८.२५।।

**(स.)** लूहवित्ती'इति-किंभूतः साधुः ? आसुरत्वं च क्रोधभावं न गच्छेत्, किं कृत्वा? जिनशासनं श्रुत्वा, क्वचित् स्वपक्षादौ क्रोधविपाकप्रतिपादकं वीतरागवचनमाकर्ण्य, किंभूतः साधुः ? रूक्षवृत्तिः, रूक्षैर्वल्ल-चणकादिभिर्वृत्तिरस्येति रूक्षवृत्तिः, पुनः किंभूतः साधुः ? सुसन्तुष्टः, येन केन सन्तोषगामी, पुनः किंभूतः साधुः ? अल्पेच्छः, न्यूनोदरतया आहारपरित्यागी सुभरः स्यादल्पेच्छत्वात्, एवं दुर्भिक्षादाविति फलं प्रत्येकं वा स्यादिति क्रियायोगः, रूक्षवृत्तिः स्यादिति. ।।८.२५।।

**(सु.)** किञ्च—लूह...इति, रूक्षैः-वल्ल-चनकादिभिर्वृत्तिरस्येति रूक्षवृत्तिः, सुसन्तुष्टो येन वा तेन वा सन्तोषगामी, अल्पेच्छो न्यूनोदरतया आहारपरित्यागी, सुभरः स्यादल्पेच्छत्वादेव दुर्भिक्षादाविति फलं, प्रत्येकं वा स्यादिति क्रियायोगः, रूक्षवृत्तिः स्यादित्यादि, तथा आसुरत्वं-क्रोधभावं न गच्छेत्, क्वचित् स्वपक्षादौ श्रुत्वा जिनशासनं-क्रोधविपाकप्रतिपादकं वीतरागवचनं—जहा-"चउहिं ठाणेहिं जीवा आसुरत्ताए कम्मं पकरिंति, तंजहा-कोहसीलयाए पाहुडसीलयाए, जहा ठाणे जाव जं णं मए एस पुरिसे अण्णाणी मिच्छादिट्ठी अक्कोसइ हणइ वा, तं ण मे एस किंचि अवरज्झइ त्ति, किं तु मम एयाणि वेयणिज्जाणि कम्माणि अवरज्झंति त्ति सम्ममहियासमाणस्स निज्जरा एव भविस्सइ" त्ति ।।८.२५।।

**कन्नसुक्खेहिं सद्देहिं, पिम्मं नाभिनिवेसए ।**
**दारुणं कक्कसं फासं, काएण अहियासए ।।८.२६।।**

**(ति.)** तथा—कर्णसौख्येषु-कर्णसौख्यकारिषु । शब्देषु वेणु-वीणादिसम्बन्धिषु । प्रेम रागं नाभिनिवेशयेत्-न कुर्यात् । दारुणम्-अनिष्टम् । कर्कशम्-कठिनम् । स्पर्शं

१. कलहशीलनया ३ टि. ।।

कायेन अधिसहेत । तत्र द्वेषं न कुर्यात् । इत्याद्यन्तयो रागद्वेषनिराकरणेन सर्वेन्द्रियविषयेषु तन्निषेधो ज्ञेयः ।।८.२६।।

**(स.)** कन्न...इति-पुनः किञ्च साधुः शब्देषु वेणु-वीणासम्बन्धिषु न प्रेमाभिनिवेशयेत्, न तेषु रागं कुर्यादित्यर्थः, किंभूतेषु शब्देषु ? कर्णयोः सौख्यहेतुषु, पुनः किं कुर्यात् साधुः? स्पर्शं प्राप्तं सन्तं कायेनातिसहेत, न तत्र द्वेषं कुर्यात्, किंभूतं स्पर्शं ? दारुणं रौद्रमनिष्टमित्यर्थः, पुनः किंभूतं स्पर्शं ? कर्कशं कठिनम्, अनेनाद्यन्तयोर्द्वयोर्निवारणेन सर्वेन्द्रियविषयेषु रागद्वेष-प्रतिषेधो वक्तव्यः ।।८.२६।।

**(सु.)** तथा—कन्न...इति, कर्णसौख्यहेतवः-कर्णसौख्याः शब्दा-वेणुवीणादिसम्बन्धिनः तेषु प्रेम-रागं नाभिनिवेशयेत्-न कुर्यादित्यर्थः, तथा दारुणमनिष्टं कर्क्कशं-कठिनं स्पर्शमुपनतं सन्तं कायेनाधिसहेत्, न तत्र द्वेषं कुर्यात्, इत्यनेनाद्यन्तयो रागद्वेषनिराकरणेन सर्वेन्द्रियविषयेषु राग-द्वेषप्रतिषेधो वेदितव्य इति ।।८.२६।।

**खुहं पिवासं दुस्सिज्जं, सीउण्हं अरइं भयं ।**
**अहियासए अव्वहिओ, देहे [1]दुःक्खं महाफलं ।।८.२७।।**

**(ति.)** किञ्च—क्षुधं पिपासां दुःशय्याम्-विषमभूम्यादिरूपाम् । शीतोष्णम् । अरतिम्-मोहनीयोद्भवाम् । भयम्-इत्यादिकम् । देहे दुःखम् अव्यथितः-व्यथामगणयन्नधिसहेत। इदं सोढं सन् महाफलम्-मोक्षसाधकमित्यर्थः ।।८.२७।।

**(स.)** खुहं'इति-किञ्च संसारे तत् सर्वमधिसहेत, तत् किम् ?-इत्याह-क्षुधं बुभुक्षां, पिपासां तृषं, दुःशय्यां विषमभूम्यादिरूपां, शीतोष्णं प्रसिद्धम्, अरतिं मोहनीयकर्मोद्भवां, भयं व्याघ्रादिसमुद्भवं, किंभूतः साधुः ? अव्यथितोऽदीनमनाः सन् 'देहदुःखं महाफलं' सञ्चिन्त्येति शेषः, तथा च शरीरे सत्येतद् दुःखं, शरीरं वा सम्यगतिसह्यमानं च मोक्षफलमेवेदमिति. ।।८.२७।।

**(सु.)** किञ्च—खुहं'इति, क्षुधं-बुभुक्षां, पिपासां-तृषं, दुःशय्यां-विषमभूम्यादिरूपां, शीतोष्णं प्रतीतं, अरतिं-मोहनीयोद्भवां, भयं-व्याघ्रादिसमुत्थम्, [2]अतिसहेत्, एतत्

१. 'देहदुक्खं' इत्यन्यत्र । २. अधिसहेत् इति पाठः टीकान्तरेषु ।।

सर्वमेव अव्यथितोऽदीनमनाः सन्, देहे दुःखं महाफलं संचिन्त्येति वाक्यशेषः, तथा च शरीरे सत्येतद्दुःखं, शरीरं चाऽसारं, सम्यगतिसह्यमानं च मोक्षफलमेवेदमिति ।।८.२७।।

**अत्थंगयम्मि आइच्चे, पुरत्था य अणुग्गए ।**
**आहारमइयं सव्वं, मणसा वि न पत्थए ।।८.२८।।**

**(ति.)** अपि च—[अत्थं...इति] स्पष्टः । नवरम् । आहारमइयम्-आहारात्मकम् ।।८.२८।।

**(स.)** अत्थं...इति-पुनः किञ्च साधुराहारात्मकं सर्वमाहारजातं समस्तमेवं सति मनसापि न प्रार्थयेत्, किमङ्ग पुनर्वाचा कर्मणा वेति, एवं सतीति किम् ? आदित्ये सूर्येऽस्तंगतेऽस्तपर्वतं प्राप्तेऽदर्शनीभूते वा पुरस्ताच्चानुद्गते प्रत्यूषस्यनुदित इत्यर्थः. ।।८.२८।।

**(सु.)** किञ्च—अत्थं इति, अस्तं गते आदित्ये-अस्तपर्व्वतं प्राप्ते अदर्शनीभूते वा, पुरस्तात् चानुद्गते-प्रत्यूषस्यनुदित इत्यर्थः, आहारात्मकं सर्व्वं-निरवशेषमाहारजातं मनसापि न प्रार्थयेत्, किमङ्ग पुनर्वाचा कर्मणा वेति ।।८.२८।।

**अतिंतिणे अचवले, अप्पभासी मियासणे ।**
**भविज्ज उयरे दंते, थोवं लद्धं न खिंसए ।।८.२९।।**

**(ति.)** अलभ्यमाने आहारे किं वाच्यम् ? इत्याह—अतिन्तिणः-अलाभेऽपि न यत्किञ्चनभाषी । अच[प]लः । अल्पभाषी-कारणेऽपि मितभाषी । मिताशनः-अल्पभोजी भवेत् । उदरे दान्तः-दान्तोदरः, येन तेन वा आहारेण निर्वृत्तः । स्तोकं लब्ध्वा 'न खिंसए-'देयं दातारं वा न हीलयेत् ।।८.२९।।

**(स.)** दिवा लभ्यमानेऽप्याहारे किमित्याह—अतिं...इति-साधुः-अतिन्तिणो भवेत्, अतिन्तिणो नाम अलाभेऽपि न यत् किञ्चनभाषी, तथा साधुः-अचपलो भवेत्, सर्वत्र स्थिर इत्यर्थः, तथा-अल्पभाषी भवेत् कारणे परिमितवक्ता, तथा मिताशनो भवेत्, मितभोजी स्यात्, तथा उदरे दान्तः, येन वा तेन वा वृत्तिशीलः, तथा स्तोकं लब्ध्वा न खिंसयेद् देयं दातारं वा न हीलयेत्. ।।८.२९।।

**(सु.)** दिवाप्यलभ्यमानेऽप्याहारे किं ?-इत्याह—अतिंतिण...इति, अतिन्तिनो भवेत्, अतिन्तिनो नामालाभेऽपि नेषद् यत्किञ्चनभाषी, तथा अचपलो भवेत्-सर्वत्र स्थिर इत्यर्थः, तथा अल्पभाषी-कारणे परिमितवक्ता, तथा मिताशनः-मितभोक्ता भवेदित्येवंभूतो भवेत्, तथोदरे दान्तो-येन वा तेन वा वृत्तिशीलः, तथा स्तोकं लब्ध्वा न खिंसयेत्-देयं दातारं वा न हेलयेदिति ।।८.२९।।

**न बाहिरं परिभवे, अत्ताणं न समुक्कसे ।**
**सुय-लाभे न मज्जिज्जा, जच्चा तवसि[1] बुद्धिए ।।८.३०।।**

**(ति.)** मदवर्ज्जनार्थमाह—न बाह्यम्-आत्मनोऽन्यं परिभवेत् । आत्मानं न समुत्कर्षेत । श्रुत-लाभाभ्यां न मद्येत्-श्रुतवानहं लाभवानहमिति । जात्या-जातिसम्पन्नोऽहम् । **तपसि**-तपोविषये तपस्यहम् । बुद्ध्या-बुद्धिमानहम् । उपलक्षणं चैतत् कुल-बल-रूपाणां, ततश्चाष्टविधेनापि मदेन न माद्येत् ।।८.३०।।

**(स.)** मदवर्ज्जनार्थमाह—न'इति, न बाह्यमात्मनोऽन्यं परिभवेत्, सामान्येनेत्थम्भूतोऽहमिति. तथा श्रुतलाभाभ्यां श्रुतेन श्रुतज्ञानेन. लाभेनाहारादिप्राप्त्या न माद्येत—'पण्डितोऽहं लब्धिमानहमिति. तथा जात्या **तापस्येन** बुद्ध्या वा न माद्येत, यथा अहं जातिसम्पन्नः, अहं तपस्वी, अहं बुद्धिमानित्येवम्, उपलक्षणं चैतत् कुल-बल-रूपाणां, यथा-कुलसम्पन्नोऽहं रूपसम्पन्नोऽहमित्येवं न माद्येतेत्यर्थः ।।८.३०।।

**(सु.)** मदवर्ज्जनार्थमाह—न बाहिरं इति, न बाह्यमात्मनोऽन्यं परिभवेत्, तथाऽऽत्मानं न समुत्कर्षयेत्, सामान्येनेत्थंभूतोऽहमिति, श्रुत-लाभाभ्यां न माद्येत, पण्डितो लब्धिमानहं इत्येवं तथा जात्या **तपस्त्वेन** बुद्ध्या वा न माद्येतेति वर्त्तते, जातिसम्पन्नः तपस्वी बुद्धिमान् अहमित्येवं, उपलक्षणं चैतत् कुल-बल-रूपाणां, कुलसम्पन्नो बलसम्पन्नोऽहं, रूपसम्पन्नोऽहमित्येवं न माद्येदिति ।।८.३०।।

**से जाणमजाणं वा, कट्टु आहम्मियं पयं ।**
**संवरे खिप्पमप्पाणं, बिइयं[2] तं न समायरे ।।८.३१।।**

**(ति.)** आभोगानाभोगसेवितार्थमाह—स-साधुः । जानन्, अजानन् वा । कृत्वा

१.'तवस्सि'बुद्धीए इति अन्यत्र मुद्रितः, वृत्तौ च तत्र 'तापस्येन, तपस्त्वेन' इति ताद्धितोऽर्थः २.'बीअं'इति मुद्रितपाठभेदः ।।

आधाकर्मिकं पदम्-कथञ्चिद् रागद्वेषाभ्यां मूलोत्तरगुणविराधनम् । संवृणुयात्-निवर्त्तयेत्। क्षिप्रमात्मानम्-आलोचनादिना । द्वितीयम्-द्वितीयवारम् । पुनः तं न समाचरेत् ।।८.३१।।

**(स.)** अथ ओघतः आभोगा-ऽनाभोगसेवितमर्थमाह—स इति-साधुर्जानन्, अजानन् वा आभोगतोऽनाभोगतश्चेत्यर्थः आत्मानं क्षिप्रं भावतो निवृत्त्यालोचनादिना प्रकारेण संवरेत्, किं कृत्वा ? अधार्मिकं पदं कथञ्चिद् रागद्वेषाभ्यां मूलोत्तरगुणविराधनामिति भावः, परं न पुनर्द्वितीयं तत् समाचरेदनुबन्धदोषात्. ।।८.३१।।

**(सु.)** ओघत आभोगाना-ऽऽभोगसेवितार्थमाह-से'इति, स-साधुः जानन्नजानन् वा-आभोगतोऽनाभोगतश्चेत्यर्थः, कृत्वा आ(अ)धार्मिकं पदं कथञ्चिद् रागद्वेषाभ्यां मूलोत्तरगुणविराधनमिति भावः, संवरेत् क्षिप्रमात्मानं भावतो निवृत्या(निवर्त्या)लोचनादिना प्रकारेण, तथा द्वितीयं पुनस्तन्न समाचरेदनुबन्धदोषादिति ।।८.३१।।

**अणायारं परक्कम्म, नेव गूहे न निन्हवे ।**
**सूई सया वियडभावे, असंसत्ते जियंदिए ।।८.३२।।**

**(ति.)** एतदेवाह—अनाचारम्-सावद्यव्यापारम् । पराक्रम्य-आसेव्य, गुरुपार्श्वे आलोचयन्,-न निगूहेत्, न निन्हुयात्-तत्र गूहनं—क्वचित् कथनं, निन्हवः-एकान्तापलापः । किंविशिष्टः ? शुचिः-अकलुषमतिः । सदा विकटभावः-प्रकटभावः । असंसक्तः-गृहस्थसंसक्तिरहितः । जितेन्द्रियः ।।८.३२।।

**(स.)** पुनरेतदेवाह—अणायारं'इति-साधुरनाचारं सपापयोगं पराक्रम्या-ऽऽसेव्य गुरुसमीप आलोचयन्, न निगूहेत्-न निह्नुवीतेति, तत्र निगूहनं किञ्चित् कथनं, निह्नवः सर्वथापलापः, किम्भूतः साधुः ? शुचिः, न कलुषमतिः, सदा विकटभावः, प्रकटभावः ।, पुनः साधुः असंसक्तः अप्रतिबद्धः कुत्रापि, किम्भूतः पुनः साधुः ? जितेन्द्रियोऽप्रमादः सन्. ।।८.३२।।

**(सु.)** एतदेवाह—अणायारं इति, अनाचारं-सावद्ययोगं पराक्रम्य-आसेव्य गुरुसकाशे आलोचयन्न निगूहेत-न निह्नुवीत, तत्र गूहनं-किञ्चित् कथनं, निह्नव-एकान्तापलापः, किंविशिष्टः सन्नित्याह-शुचिः-अकलुषमतिः, सदा विकटभावः-प्रकटभावः, असंसक्तः-अप्रतिबद्धः क्वचिज्जितेन्द्रियो-जितेन्द्रियप्रमादः सन्निति ।।८.३२।।

**अमोहं वयणं कुज्जा, आयरियस्स महप्पणो ।**
**तं परिगिज्ज वायाए, कम्मुणा उववायए ।।८.३३।।**

**(ति.)** अमोघम्-अवन्ध्यम् । वचनं कुर्यात् । आचार्याणां महात्मनाम्-श्रुतादिभिर्गुणै-स्तद्वचनम् अभिगृह्य वाचाभ्युपगम्य । कर्मणा-क्रियया । उपपादयेत्-सम्पादयेत् ।।८.३३।।

**(स.)** पुनराह–अमोहं'इति-साधुराचार्याणां वचनम्'इदं कुर्वित्यादिरूपम्'अमोघं सफलं कुर्यात्, एवमित्यङ्गीकारेण, किम्भूतानामाचार्याणां ? महात्मनां श्रुतादिभिर्गुणै-स्तद्वचनं परिगृह्य वाचा एवम्'इत्यङ्गीकारेण, कर्मणा उपपादयेत् क्रियया सम्पादयेत्. ।।८.३३।।

**(सु.)** अमोहं'इति, अमोघं-अवन्ध्यं वचनमिदं कुर्वित्यादिरूपं कुर्यादि(मि)त्येव-मित्यभ्युपगमेन, केषामित्याह-आचार्याणां महात्मनां श्रुतादिभिर्गुणैः, तत्परिगृह्य वाचा एवमित्यभ्युपगमेन कर्मणोपपादयेत्-क्रियया सम्पादयेदिति ।।८.३३।।

**अधुवं जीवियं नच्चा, सिद्धिमग्गं वियाणिया ।**
**विणियट्टिज्ज भोगेसु, आउं परिमियमप्पणो ।।८.३४।।**

**(ति.)** तथा–अध्रुवं जीवितं ज्ञात्वा । सिद्धिमार्गं-सम्यग्ज्ञान-दर्शन-चारित्ररूपम् । तथा आयुः परिमितम्-[१]वर्षशतान्तर्गतम् । आत्मनो विज्ञाय । भोगेभ्यः-कर्मबन्धहेतुभ्यः निवर्तेत् ।।८.३४।।

**(स.)** पुनराह–अधुवं'इति-साधुर्भोगेभ्यः कर्मबन्धस्य हेतुभ्यो निवर्त्तेत, किं कृत्वा? जीवितमध्रुवमनित्यं मरणासन्नं ज्ञात्वा, पुनः किं कृत्वा ? सिद्धिमार्गं सम्यग्दर्शन-चारित्र-लक्षणं विज्ञाय, तथा अध्रुवमप्यायुः परिमितं संवत्सरशतादिमानेन विज्ञायात्मनो निवर्त्तेत भोगेभ्य इत्यर्थः. ।।८.३४।।

**(सु.)** अधुवं'इति, अध्रुवं-अनित्यं मरणाशङ्कि जीवितं सर्वभावनिबन्धनं ज्ञात्वा, तथा सिद्धिमार्गं-सम्यग्ज्ञानदर्शनचारित्रलक्षणं विज्ञाय विनिवर्तेत भोगेभ्यो बन्धैकहेतुभ्यः, तथाऽध्रुवमप्यायुः परिमितं संवत्सरशतादिमानेन विज्ञायात्मनो विनिवर्त्तेत भोगेभ्य इति ।।८.३४।।

१. वर्षशतान्तम् ६-१०.१२. अयं मूलपाठः १० टिप्पण्यामपि ।।

**जरा जाव न पीलेइ, वाही जाव न वड्ढई ।**
**जाविंदिया न हायंति, ताव धम्मं समायरे ।।८.३५।।**

**(ति.)** स्पष्टः ।।८.३५।।

तथा -

**बलं[1] थाम च पेहाए, सद् धामारुग्गमप्पणो।**
**स्थितं कालं च विन्नाय, तहऽप्पाणं निजुंजए ।।८.३५।।**

**(ति)** न विवृता.

**(स.)** उपदेशाधिकारे प्रक्रान्त इदमेव समर्थयन्नाह-बलमिति-साधुरात्मानं नियोजयेत्, किं कृत्वा ? बलं मानसं स्थाम शारीरं प्रेक्ष्य विचार्य, पुनः श्रद्धामारोग्यमात्मनः पुनः क्षेत्रं कालं च विज्ञाय. साधुस्तावन्तं कालं धर्मं चारित्रधर्मं समाचरेत्, तावन्तं कियन्तं कालमित्याह-यावज्जरा वयोहानिरूपा न पीडयति, पुनर्यावद्व्याधिः क्रियासामर्थ्यशत्रुर्न वर्धते, पुनर्यावदिन्द्रियाणि क्रियासामर्थ्यस्योपकारीणि श्रोत्रादीनि न हीयन्ते, तावत्, अत्रान्तरे प्रस्ताव इति कृत्वा धर्मं समाचरेत्. ।।८.३५।।

**(सु.)** बलं थामं ति, (बलं-शारीरिकं स्थाम-हस्तादिविशेषोत्थं पेहाए प्रेक्ष्य श्रद्धामारोग्यं आत्मनः, क्षेत्रं "चिक्खल्लपाणथंडिल्ले" त्यादि १३ गुणोपेतं विज्ञायात्मनः (कालं-यौवनादिवयोरूपं) नियोजयेद्धर्मे ।।८.३५।। 'धलं' इति गाथा बृहल्लघुवृत्त्योर-व्याख्याता अन्यकृतेति) उपदेशाधिकारे प्रक्रान्ते इदमेव समर्थयन्नाह—जरा'इति, जरा-वयोहानिलक्षणा यावन्न पीडयति, व्याधिः-क्रियासामर्थ्यशत्रुर्यावन्न वर्द्धते, यावदिन्द्रियाणि-क्रियासामर्थ्यो-पकारीणि श्रोत्रादीनि न हीयन्ते तावदत्रान्तरे प्रस्ताव इतिकृत्वा धर्मं समाचरेच्चारित्र-धर्ममिति ।।८.३५।।

**कोहं माणं च मायं च, लोभं च पाववड्ढणं ।**
**वमे चत्तारि दोसाउ, इच्छंतो हियमप्पणो ।।८.३६।।**

**(ति.)** स्पष्टः । नवरम् । वमेत्-त्यजेत् । चतुरोऽपि दोषान्-दोषकारिणः कषायान्।।

---

१. गाथेयं समयसुन्दरगणिना विवृता क्रमभङ्गश्चात्र । सुमतिसाधुना च विवृता यथाक्रमम् ।

**(स)** अथ धर्मस्योपायमाह—कोहमिति-साधुः क्रोधं मानं मायां लोभं च पापवर्धनं पापस्य हेतवः, यतश्चैवं ? तत एतांश्चतुरो दोषान् क्रोधादीन् वमेत् त्यजेत्, किं कुर्वन् ? आत्मनो हितमिच्छन्, एतद् वमने हि सर्वसम्पदिति ।।८.३६।।

**(सु)** तदुपायमाह—कोहं इति, क्रोधं मानं च मायां च, लोभं च पापवर्धनं, सर्व एते पापहेतव इति पापवर्द्धनव्यपदेशः, यतश्चैवम् ?-अतो वमेच्चतुरो दोषान् एतानेव क्रोधादीन् हितमिच्छन्नात्मनः, एतद्वमने हि सर्वसम्पदिति ।।८.३६।।

**कोहो पीइं पणासेइ, माणो विणयनासणो ।**
**माया मित्ताइं नासेइ, लोभो सव्वविणासणो ।।८.३७।।**

**(ति.)** क्रोधादीनां सामर्थ्यमाह—(कोहो...इति) ।।८.३७।।

**(स.)** अवमने त्विह लोक एव कष्टमाह-कोह...इति-क्रोधः प्रीतिं प्रणाशयति, क्रोधान्धस्य वचनतः प्रीतेर्विच्छेददर्शनात्, मानो विनयनाशनः, गर्वेण विनयकरणस्यादर्शनात्, माया मित्राणि नाशयति, कौटिल्यवतो मित्रत्यागदर्शनात्, लोभः सर्वविनाशनः, परमार्थतस्त्रयाणामपि प्रीत्यादीनां नाशदर्शनात्. ।।८.३७।।

**(सु.)** अवमनेत्विह लोक एवापायमाह—कोहो'इति, क्रोधः-प्रीतिं प्रणाशयति, क्रोधान्धवचनतस्तदुच्छेददर्शनात्, मानो विनयनाशनः, अवलेपेन मूर्खतया तदकरणोपलब्धेः, माया मित्राणि नाशयति, कौटिल्यवर्त्तिनस्त्याग-दर्शनात्, लोभः-सर्वविनाशनः, तत्त्वतस्त्रयाणामपि तद्भावभावित्यादिति ।।८.३७।।

**उवसमेण हणे कोहं, माणं मद्दवया जिणे ।**
**मायं [1]चज्जवभावेण, लोभं संतुट्ठिए जिणे ।।८.३८।।**

**(ति.)** स्पष्टौ (स्पष्टः)।।८.३८।।

**(स.)** यत एवं ?- ततः किं कर्तव्यम् ?-इत्याह-उवसमेण'इति-साधुः क्रोधमुपशमेन क्षान्तिरूपेण हन्यात्, कथम् ? उदयनिरोधोदय-प्राप्ताफलीकरणेन, एवं मानं मार्दवेनानुत्सिक्ततया जयेत्, उदय-निरोधादिनैव, मायां च ऋजुभावेनाशठतया जयेदुदयनिरोधादिनैव, एवं लोभं सन्तोषतो निस्पृहत्वेन जयेत्, तदुदयनिरोधोदयप्राप्ताफलीकरणेनेति. ।।८.३८।।

१. चूर्णिसम्मतोऽयं पाठः । 'मायं मज्ज...लोभं संतोसओ' पाठः हा. टी. - स.टी मध्येऽपि सम्मतः ।।

**(सु.)** यत एवम् ? - अतः 'उवसमेणं' इति, उपशमेन-क्षान्तिरूपेण हन्यात् क्रोधं, उदयनिरोधोदय-प्राप्ताफलीकरणेन, एवं मानं मार्दवेन-अनुत्सृ(च्छ्रि)ततया जयेत्, उदयनिरोधादिनैव, मायां चार्ज्जवभावेनाशठतया जयेदुदयनिरोधादिनैव, एवं लोभं सन्तोषतः निःस्पृहत्वेन जयेत् तदुदयनिरोधोदयप्राप्ताफलीकरणेनेति ।।८.३८।।

**कोहो य माणो य अणिग्गहीया, माया य लोभो य पवड्ढमाणा ।**
**चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुणो[1] भवस्स ।।८.३९।।**

**(ति.)** क्रोधादिभ्यः परलोकापायमाह—स्पष्टम् । नवरम् । कसिणो-कृत्स्नाः कृष्णा वा । भवस्य-भवद्रुमस्य ।।८.३९।।

**(स.)** क्रोधादीनामेव परलोके कष्टमाह—कोह इति-एते कषायाश्चत्वारोऽपि पुनर्भवस्य पुनर्जन्मवृक्षस्य मूलानि तथाविधकर्मरूपाणि सिञ्चन्ति, अशुभभावजलेनेति शेषः, किम्भूताः कषायाः ? कृत्स्नाः सम्पूर्णाः कृष्णा वा क्लिष्टाः, के कषायाः ? क्रोधश्च, मानश्च, एतौ द्वावनिगृहीतौ उच्छृङ्खलौ, माया च लोभश्च, एता द्वौ विवर्धमानौ वृद्धिं गच्छन्तौ सन्तौ. ।।८.३९।।

**(सु.)** क्रोधादीनामेव परलोकापायमाह—कोह'इति, क्रोधश्च मानश्चानिगृहीतौ-उच्छृङ्खलौ, माया च लोभश्च विवर्धमानौ-वृद्धिं गच्छन्तौ, चत्वार एते क्रोधादयः कृत्स्नाः-सम्पूर्णाः, कृष्णा वा-क्लिष्टाः कषायाः सिञ्चन्त्यशुभभावजलेन मूलानि तथाविधकर्म्मरूपाणि पुनर्भवस्य-पुनर्जन्मतरोरिति ।।८.३९।।

**रायणिएसु विणयं पउंजे, धुवसीलयं सययं न हावइज्जा ।**
**कुम्मु व्व अल्लीणपलीणगुत्तो, परक्कमिज्जा तवसंजमंमि ।।८.४०।।**

**(ति.)** यत एवं ?-अतः कषायनिग्रहार्थमिदमाह—रत्नाधिकेषु-चिरदीक्षितेषु । विनयम्-अभ्युत्थानादिरूपं, प्रयुञ्जीत । ध्रुवशीलताम्-अष्टादशशीलाङ्गसहस्र-पालनरूपाम् । सततम्-यथाशक्त्या । न हापयेत्। कूर्म इव । आ-ईषत् लयनं आलीनम् । प्रकर्षेण लयनं प्रलीनम् । ताभ्यां गुप्तः-अङ्गोपाङ्गानि, सम्यक् संयम्य स्थितः । पराक्रामेत् । तपःप्रधाने संयमे इति ।।८.४०।।

१. 'पुणब्भवस्स' इत्यन्यत्र मुद्रितः ।।

(स.) यतश्चैवम् ? - अतः कषायनिग्रहार्थमिदं कुर्यात्-इत्याह-रायणिएसु...इति-साधू रत्नाधिकेषु चिरदीक्षितादिषु विनयमभ्युत्थानादिरूपं प्रयुञ्जीत, पुनर्ध्रुवशीलता-मष्टादशशीलाङ्गसहस्रपालनरूपां सततं निरन्तरं यथाशक्ति न हापयेत्, पुनः कूर्म इव कच्छपवदालीनप्रलीनगुप्तः, अङ्गान्युपाङ्गानि च सम्यक्संयम्येत्यर्थः. पराक्रमेत प्रवर्तेत तपःसंयमे तपःप्रधाने संयम इति. ।।८.४०।।

(सु.) यतश्चैवम् ? - अतः कषायनिग्रहार्थमिदं कुर्यात्-इत्याह-रायणिएसु...इति,-साधू रत्नाधिकेषु-चिरदीक्षितादिषु विनयं-अभ्युत्थानादिरूपं प्रयुञ्जीत, तथा ध्रुवशीलतां-अष्टादशशीलाङ्गसहस्रपालनरूपां, सततं-अनवरतं यथाशक्त्या न हापयेत्, तथा कूर्म्म इव-कच्छप इव आलीनप्रलीनगुप्तः अङ्गोपाङ्गानि सम्यक् संयम्येत्यर्थः, पराक्रमेत-प्रवर्त्तेत तपःसंयमे-तपःप्रधाने संयमे इति ।।८.४०।।

**निद्दं च न बहु मन्निज्जा, सप्पहासं विवज्जए ।**
**मिहो कहाहिं न रमे, अज्झयणंमि[1] रओ सया ।।८.४१।।**

(ति.) निद्रां च न बहु मन्येत-प्रकामशायी न स्यात् । सप्रहासम्-अत्यन्तहास्यं विवर्जयेत् । मिथः कथासु-रहोवार्तासु न रमते । **अध्ययने**-सूत्रवाचनादौ रतः सदा साधुरित्यर्थः ।।८.४१।।

(स.) निद्दं इति-पुनः किञ्च साधुर्निद्रां च न बहु मन्येत न प्रकामशायी स्यात्; पुनः स साधुः प्रहासमतीवहासरूपं विवर्जयेत्, पुनः परस्परं कथासु राहस्यिकीषु न रमेत, तर्हि किं कुर्यात् ?-इत्याह-**स्वाध्याये** वाचनादौ रतः तत्परः स्यात् सदा.।।८.४१।।

(सु.) किञ्च—निद्दं च'इति, निद्रां च न बहु मन्येत न प्रकामशायी स्यात्, सप्रहासं च-अतीवप्रहासरूपं विवर्जयेत्, मिथःकथासु-राहस्यिकीषु न रमेत, स्वाध्याये-वाचनादौ रतः सदा, एवंभूतो भवेदिति ।।८.४१।।

**जोगं च समणधम्मम्मि, जुंजे अनलसो धुवं ।**
**जुत्तो य समणधम्मम्मि, अट्ठं लहइ अणुत्तरं ।।८.४२।।**

(ति.) तथा—योगम् मनो-वाक्-कायरूपम् । श्रमणधर्मे-क्षान्त्यादौ । अनलसो

१. अन्यत्र मुद्रितोऽयं पाठस्तु एवं । सज्झायम्मि'इति । वृत्त्यन्तरेपि 'स्वाध्याये' इति विवृत्तम् ।।

युञ्जीत । ध्रुवम्-निश्चितम् । सामान्येन सर्वत्र विशेषतोऽनुप्रेक्षाकाले मनोयोगम्, अध्ययनकाले वाग्योगं, प्रत्युपेक्षाकाले काययोगम् । फलमाह-युक्तश्च व्यापृतः । श्रमणधर्मेऽर्थं लभतेऽनुत्तरम्-केवलज्ञानरूपम् ।।८.४२।।

**(स.)** जोगं'इति-एवं योगं च त्रिविधं मनो-वाक्-कायव्यापारं श्रमणधर्मे क्षान्ति-प्रमुखलक्षणे युञ्जीत, किंभूतः साधुः ? अनलस उत्साहवान्, ध्रुवं कालादीनामौचित्येन नित्यं सम्पूर्णं, सर्वत्र प्रधानोपसर्जनभावेन वा अनुप्रेक्षाकाले मनोयोगम्, अध्ययनकाले वाग्योगं प्रत्युपेक्षणाकाले काययोगमिति. फलमाह—युक्त एवं व्यापृतः, कुत्र ? श्रमणधर्मे दशविधे, लभते अर्थं प्राप्नोत्यनुत्तरं भावार्थं ज्ञानादिरूपमिति. ।।८.४२।।

**(सु.)** तथा—जोगं च'इति, योगं च त्रिविधं-मनो-वाक्-कायव्यापारं श्रमणधर्मे-क्षान्त्यादिलक्षणे युञ्जीत, अनलसः-उत्साहवान्, ध्रुवं-कालाद्यौचित्येन नित्यं, सम्पूर्णं, सर्वत्र प्रधानोपसर्जनभावेन वा, अनुप्रेक्षाकाले मनोयोगं, अध्ययनकाले वाग्योगं प्रत्युपेक्षणाकाले काययोगमिति, फलमाह-युक्त एवं व्यापृतः श्रमणधर्मे दशविधे अर्थं लभते-प्राप्नोत्यनुत्तरं भावार्थं ज्ञानादिरूपमिति ।।८.४२।।

**इहलोगपारत्तहियं, जेण गच्छइ [1]सोगइं ।**
**बहुस्सुयं पज्जुवासिज्जा, पुच्छिज्जत्थविणित्थयं ।।८.४३।।**

**(ति.)** एतदेवाह—बहुश्रुतम्-आगमधरम् पर्युपासीत । तत्पार्श्वे अर्थविनिश्चयम् । इहलोकपरत्र हितम्-कल्याणावहम् । पृच्छेत् । येन-ज्ञातेन । सुगतिं-सिद्धिलक्षणाम्। पारम्पर्येण गच्छति ।।८.४३।।

**(स.)** पुनरेतदेवाह—इह'इति-इह लोके परत्र लोके च हितं, कथम् ? इह लोकेऽकुशलप्रवृत्ति-दुःखनिरोधेन, परलोके च कुशलानुबन्धत उभयलोकहितमित्यर्थः, येनार्थेन ज्ञानादिना करणभूतेन साधुः सुगतिं पारम्पर्येण सिद्धिमित्यर्थः, गच्छति ।

अथोपदेशाधिकार उक्तव्यतिकरसाधनस्योपायमाह-बहुश्रुतमागमवृद्धं साधुः पर्युपासीत सेवेत, तं सेवमानश्च साधुः पृच्छेदर्थविनिश्चयमपायरक्षकं कल्याणावहं वा अर्थावितथभावमिति.।।८.४३।।

**(सु.)** एतदेवाह—इहलोअ'इति, इहलोक-परत्रहितमिहाकुशल-प्रवृत्तिदुःखनिरोधेन,

१.'सुग्गइं' इति मुद्रितः पाठान्तरः ।

परत्र कुशलानुबन्धतः, उभयलोकहितमित्यर्थः, येनार्थेन ज्ञानादिना करणभूतेन गच्छति सुगतिं, पारम्पर्येण सिद्धिमित्यर्थः, उपदेशाधिकारे उक्तव्यतिकरसाधनोपायमाह-बहुश्रुतं आगमवृद्धं पर्युपासीत-सेवेत, सेवमानश्च पृच्छेदर्थविनिश्चयमपायरक्षकं कल्याणावहं वाऽर्थावितथभावमिति ।।८.४३।।

**हत्थं पायं च कायं च, पणिहाय जिइंदिए ।**
**अल्लीणगुत्तो निसीए, सगासे गुरुणो मुणी ।।८.४४।।**

**(ति.)** तदुपास्ति विधिमाह—हस्तं पादं च कायं च । प्रणिधाय-सङ्कोच्य । जितेन्द्रियः-अनन्यव्यापारेन्द्रियः। आ-सामस्त्येन लीनः-लयवान्, उपयुक्तः । गुप्तः-तिसृभिर्गुप्तिभिः । निषीदेद् गुरोः सकाशे मुनिः ।।८.४४।।

**(स.)** हत्थं'इति-पुनः किञ्च मुनिर्गुरोः सकाशे समीपे निषीदेत्.?

कीदृशस्सन् ?-आलीनगुप्त ईषल्लीन उपयुक्त इत्यर्थः । किं कृत्वा निषीदेत् ? हस्तं च पादं च कायं च प्रणिधाय संयम्य, पुनः किं कृत्वा ? जितेन्द्रियो निभृतो भूत्वा. ।।८.४४।।

**(सु.)** पयुर्पासीनश्च—हत्थं'इति, हस्तं पादं च कायं च प्रणिधायेति संयम्य, जितेन्द्रियो निभृतो भूत्वा, आलीनगुप्तो निषीदेत्, ईषल्लीन उपयुक्त इत्यर्थः, सकाशे गुरोर्मुनिरिति ।।८.४४।।

**न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ ।**
**न य ऊरं समासिज्जा, चिट्ठिज्जा गुरुणंऽतिए ।।८.४५।।**

**(ति.)** क्व निषीदेत् ? इत्याह—न पक्षतः-पार्श्वतः । न पुरतः । नैव कृत्यानाम्-गुरूणां पृष्ठतः । न च स्वयमप्यूरुं समासृज्य । ऊरोरुपर्यूरुं कृत्वा तिष्ठेद् गुर्वन्तिके-अविनयादिदोषप्रसङ्गात्।। उक्तः कायप्रणिधिः ।।८.४५।।

**(स.)** न'इति-पुनः किं कार्य ? साधुः कृत्यानामाचार्याणां न पक्षतः पार्श्वतो निषीदेत्, एवं न पुरतोऽग्रतः, नापि पृष्ठतो मार्गतः, यथासङ्ख्यमविनय-वन्दमानान्तराया-ऽदर्शनादिदोषाः प्रभवन्ति, पुनस्तत्र ऊरुं समाश्रित्य ऊरोरुपर्यूरुं कृत्वा न तिष्ठेत्, गुरोरन्तिकेऽविनयादिदोषप्रसङ्गात्. - इत्युक्तः कायप्रणिधिः, ।।८.४५।।

**(सु.)** किञ्च—न पक्खओ'इति, न पक्षतः-पार्श्वतः, न पुरतो-ऽग्रतो, नैव कृत्या-नामाचार्याणां पृष्ठतो मार्गतो निषीदेदिति वर्त्तते, यथासंख्यमविनय-वन्दमानान्तराया-ऽदर्शनादिदोष-प्रसङ्गात्, न चोरुं समाश्रित्योरोरुपर्यूरुं कृत्वा तिष्ठेद् गुर्वन्तिके, अविनयादिदोषप्रसङ्गादिति उक्तः कायप्रणिधिः ।।८.४५।।

**अपुच्छिओ न भासिज्जा, भासमाणस्स अंतरा ।**
**पिट्ठिमंसं न खाइज्जा, मायामोसं विवज्जए ।।८.४६।।**

**(ति.)** वाग्प्रणिधिमाह—अपृष्टः-निःकारणम् । न भाषेत । भाषमाणस्य-गुरोः । अन्तरा-विचाले, यथा, नेदमितत्थं, किं तर्ह्येवमिति । पृष्ठिमांसंपरोक्षदोषकीर्त्तनरूपम् । न खादेत्-न भाषेत । मायामृषां च-मायाप्रधानां मृषां वाचम् । वर्जयेत् ।।८.४६।।

**(स.)** अथ वाक्यप्रणिधिमाह—अपुच्छिओ इति-साधुरपृष्टः सन् निष्कारणं न भाषेत, पुनर्भाषमाणस्यान्तरापि न भाषेत. न चेदम्, 'इत्थं तर्ह्येवमिति. तथा पृष्ठिमांसं परोक्षदोषकीर्तनरूपं, न खादेन्न भाषेत, पुनर्मायामृषां मायाप्रधानं मृषावादं विवर्जयेदिति. ।।८.४६।।

**(सु.)** वाक्प्रणिधिमाह—अपुच्छिओ'इति, अपृष्टो निष्कारणं न भाषेत, भाषमाणस्य चान्तरेण न भाषेत, 'नेदमित्थं किं तर्हि, एवमिति, तथा पृष्ठिमांसं परोक्षदोषकीर्त्तनरूपं न खादेत् न भाषेत, मायामृषां-मायाप्रधानां मृषावाचं विवर्ज्जयेदिति ।।८.४६।।

**अप्पत्तियं जेण सिया, आसु कुप्पिज्ज वा परो ।**
**सव्वसो तं न भासिज्जा, भासं अहियगामिणिं ।।८.४७।।**

**(ति.)** किञ्च—न विद्यते प्रीतिर्यत्र तद् अप्रीतिकम् । येन कस्यचिन्न स्यात् । आशु-शीघ्रम्। कुप्येद् वा परः । सर्वशः-सर्वथा । ताम्-भाषाम् । न भाषेत । अहितगामिनीम्-अहिते नरकादौ गमयतीत्येवं शीला अहितगामिनी, ताम् ।।८.४७।।

**(स.)** अप्पत्तिअं'इति—पुनः किञ्च साधुरित्थंभूतां भाषां न भाषेत. इत्थं कीदृशीं? प्राकृतशैल्या 'येन'इति यया भाषयाऽप्रीतिरप्रीतिमात्रं भवेत्, तथा आशु शीघ्रं कुप्येद् वा परो रोषकार्यं दर्शयेत्, सर्वत्र सर्वास्वस्वस्थासु तामीदृशीं भाषां न भाषेत, पुनरहितगामिनी-मुभयलोकविरुद्धां न भाषेत. ।।८.४७।।

**(सु.)** किञ्च—अप्पत्तियं'इति, अप्रीतिर्येन स्यादिति प्राकृतशैल्या येनेति-यया भाषया भाषितया अप्रीतिमात्रं भवेत्, तथा आशु-शीघ्रं, कुप्येद् वा परो रोषकार्यं दर्शयेत्, सर्वशः-सर्वावस्थासु तामित्थंभूतां न भाषेत भाषां, अहितगामिनीमुभय-लोकविरुद्धामिति ॥८.४७॥

**दिट्ठं मियं असंदिद्धं, पडिपुन्नं [1]वियं जियं ।**
**अयंपिरमणुव्विग्गं, भासं निसर अत्तवं ॥८.४८॥**

**(ति.)** यादृशीं भाषेत तामाह—दृष्टाम्-दृष्टार्थविषयाम् । मिताम् । असन्दिग्धाम्। प्रतिपूर्णाम्-स्वरादिभिः। वियंजियं,-अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु [ ] व्यक्ताम् अलल्ल-मन्मनाम् अकम्प्रां-निश्चलाम् । अनुद्विग्नाम्-नोद्वेगकारिणीम् । भाषां निसृजेत्-वदेत् । आत्मवान्-सचेतनः ॥८.४८॥

**(स.)** भाषणस्योपायमाह—दिट्ठं'इति-आत्मवान् सचेतनः साधुरीदृशीं भाषां निसृजेद् ब्रूयात्, ईदृशीं कीदृशीम् ?-इत्याह-दृष्टां दृष्टार्थविषयां, पुनर्मितां स्वरूप-प्रयोजनाभ्यां स्तोकां, पुनरसन्दिग्धां शङ्कारहितां, पुनः प्रतिपूर्णां स्वरादिभिः, **व्यक्तां** प्रकटां, पुन**र्जितां** परिचितां, पुनरजल्पन-शीलां, न उच्चैर्न नीचैर्लग्नविलग्नां, पुनरनुद्विग्नां, नोद्वेगकारिणीमेवंभूतां भाषां साधुर्ब्रूयात्. ॥८.४८॥

**(सु.)** भाषणोपायमाह—दिट्ठं'इति, दृष्टां-दृष्टार्थविषयां, मितां-स्वरूप-प्रयोजनाभ्याम्, असंदिग्धां-निःशङ्कितां, प्रतिपूर्णां स्वरादिभिः **व्यक्तां**-अलल्लां, **जितां** परिजि(चि)ताम्, अजल्पनशीलां नोच्चैर्लग्नविलग्नाम्, अनुद्विग्नां-नोद्वेगकारिणीमेवंभूतां भाषां, निसृजेत् ब्रूयात्, आत्मवान् सचेतन इति ॥८.४८॥

**आयार-पन्नत्तिधरं, दिट्ठीवायमहिज्जगं ।**
**[2]वइविक्खलियं नच्चा, न तं उवहसे मुणी ॥८.४९॥**

**(ति.)** विशेषोपदेशंमाह—आचाराङ्गम् । प्रज्ञप्तिः-भगवत्यङ्गं तयोर्धारिणम् । दृष्टिवादाध्येतारम्। कथञ्चिद् वाचि लिङ्गवचनादिभिः स्खलितं ज्ञात्वा । न तम्

१. (ति) टीकायां 'वियंजियं पदं बियंजियं' 'व्यक्ताम् इति. तत्राधारः वृद्धविवरणं 'वियंजियं' इति पाठः [दस. चुण्णि. मुनि-पुण्यविजयसंपादिते [वि.२०६०] पृष्ठ १९७] । चूर्णौ तु वियं जियं इति द्वौ पदौ विवृतौ-(स)(सु) टीके चूर्णि मनुसृते]॥
२. 'वायवि. - मुद्रितः पाठभेदः ॥

उपहसेत् मुनिः-उपहासस्य ज्ञानावरणीयकर्मबन्धहेतुत्वात् । अधीतदृष्टिवादस्य च वाक्स्खलितं न सम्भवत्येव ॥८.४९॥

**(स.)** अथ प्रस्तुतस्योपदेशस्याधिकारेण इदमाह—आयार'इति-मुनिस्तमाचारादिधरं नोपहसेत्, किम्भूतं तम् ? आचार-प्रज्ञप्तिधरम्,. आचारधरः स्त्रीलिङ्गादीनि जानाति, प्रज्ञप्तिधरस्तान्येव सविशेषणानि, इत्येवंभूतं, पुनः किंभूतं ? दृष्टिवादमधीयानं प्रकृति-प्रत्ययलोपा-ऽऽगम-वर्णविकारादिविज्ञं, किं कृत्वा नोपहसेत् ? तं तादृशं वाग्विस्खलितं ज्ञात्वा विविधमनेकप्रकारैर्लिङ्गभेदादिभिः स्खलितं विज्ञाय नोपहसेत्, किन्त्वेवं जानाति वदति च, अहो खल्वाचारादिधरस्य वचन एवं कौशलम्, इह च दृष्टिवादमधीयान-मित्युक्तम्, अत इदं गम्यते नाधीतदृष्टिवादं, तस्य ज्ञानाप्रमादातिशयतः स्खलनासम्भवात्, यद्येवंभूतस्यापि स्खलितं सम्भवति, न चैवमुपहसेदित्युपदेशः, ततोऽन्यस्य सुतरां सम्भवति न चासौ हसितव्य इति. ॥८.४९॥

**(सु.)** प्रस्तुतोपदेशाधिकार एवेदमाह—आयार...इति, आचार-प्रज्ञप्तिधरमिति आचारधरः-स्त्रीलिङ्गादीनि जानाति प्रज्ञप्तिधरस्तान्येव सविशेषाणीत्येवंभूतं, तथा दृष्टिवादमधीयानं प्रकृति-प्रत्यय-लोपा-ऽऽगम-वर्ण-विकारादिवेदिनं वाग्विस्खलितं ज्ञात्वा विविधमनेकैः प्रकारैः लिङ्गभेदादिभिः स्खलितं विज्ञाय न तमाचारादि-धरमुपहसेन्मुनिः, 'अहो नु खल्वाचारादिधरस्य वाचि कौशलं'इत्येवं, इह च दृष्टिवाद-मधीयानमित्युक्तम्, अत इदं गम्यते नाधीतदृष्टिवादं, तस्य ज्ञानाप्रमादा-तिशयतः स्खलनाऽसम्भवात्, यद्येवंभूतस्यापि स्खलितं सम्भवति न चैनमित्युपहसेदित्यु-पदेशस्ततोऽन्यस्य सुतरां सम्भवति, नासौ हसितव्य इति ॥८.४९॥

**नक्खत्तं सुमिणं जोगं, निमित्तं मंत भेसजं ।**
**गिहिणो तं न आइक्खे, भूयाहिगरणं पयं ॥८.५०॥**

**(ति.)** अन्यं चोपदेशमाह—नक्षत्रम्-यात्राद्यर्थम् अश्विन्यादि । स्वप्नम्-स्वप्नस्य शुभाशुभविचारः । योगं-वशीकरणादि । निमित्तम्-अतीतादि । मन्त्रः-वृश्चिकमन्त्रादिः। भेषजम्-अतीसाराद्योषधम् । गृहिणः पृच्छतः तन्नाख्येयात् । भूताधिकरणं पदम् । नक्षत्रादौ साधुना कथिते गृहस्थेनारम्भे क्रियमाणे भूतानाम्-एकेन्द्रियानाम्, अधिको रण इव रणो यत्र पदे विनाशहेतुत्वात् तद्भूताधिकरणं, पदं-स्थानं, ततश्चैषां प्रश्ने

साधूनां नाधिकारः कथने इति वाच्यम् ।।८.५०।।

**(स.)** नक्खत्तं'इति-पुनः किंच साधुर्गृहिणा पृष्टः सन्नेतानि गृहिणामसंयतानां नाचक्षीत न ब्रूयात्, एतानि कानि ?-इत्याह-नक्षत्रमश्विन्यादि, स्वप्नं शुभाशुभ-फलमनुभूतादि, योगं वशीकरणादि, निमित्तमतीतादि, मन्त्रं वृश्चिकमन्त्रादि, भेषजमतिसारादीनां रोगाणामौषधम्, एतत् षट्कं किंविशिष्टम् ?-इत्याह-भूताधिकरणं पदं, भूतान्येकेन्द्रियादीनि सङ्घट्टनादिनाधिक्रियन्ते व्यापाद्यन्तेऽस्मिन्निति. ततश्च तदप्रीतिपरिहारार्थमिदं ब्रूयात्, यतस्तपस्विनामत्र नक्षत्रादौ नाधिकारः. ।।८.५०।।

**(सु.)** किञ्च—नक्खत्तं'इति, गृहिणा पृष्टः सन्-नक्षत्रं-अश्विन्यादि, स्वप्नं-शुभाशुभफलमनुभूतादि, योगं-वशीकरणादि, निमित्तमतीतादि, मन्त्रं-वृश्चिकमन्त्रादि, भेषजं-अतीसाराद्यौषधं, गृहिणां-असंयतानां तदेतन्नाचक्षीत, किंविशिष्टम् ?-इत्याह-भूताधिकरणं पदमिति भूतानि-एकेन्द्रियादीनि संघट्टनादिनाऽधिक्रियन्तेऽस्मिन्निति, ततश्च तदप्रीति-परिहारार्थमित्येवं ब्रूयात्-अनधिकारोऽत्र तपस्विनामिति ।।८.५०।।

**अन्नत्थपगडं लेणं, भइज्ज सयणासणं ।**
**उच्चारभूमिसंपन्नं, इत्थी-पसुविवज्जियं ।।८.५१।।**

**(ति.)** अन्यार्थम्-न साध्वर्थं, प्रकृतम्-निर्वर्त्तितम् । लयनम्-उपाश्रयः । शयना-ऽऽसने विद्यते यत्र, मत्वर्थीयेऽचि—शयनासनम्-फलकपीठयुक्तमित्यर्थः । उच्चारभूमि-सम्पन्नम्-उच्चार-प्रश्र(स्र)वणभूमियुक्तम् । स्त्री-पशु-पण्डकविवर्जितम्-एकग्रहणे सजातीयग्रहणात् । भजेत्-आश्रयेत् ।।८.५१।।

**(स.)** अन्नट्ठं'इति-पुनः किञ्च साधुरेवं लयनं स्थानं वसतिरूपं भजेत् सेवेत, किम्भूतं लयनम् ? अन्यार्थं प्रकृतं, न साधुनिमित्तं कृतं, तथा शयनासनमप्यन्यार्थंप्रकृतं संस्तारकपीठकादि सेवेत, पुनः किम्भूतं लयनम् ? उच्चारभूमिसंपन्नमुच्चारप्रस्रवणादिभूम्या संयुक्तं, कथम् ? उच्चारादिभूमिरहिते स्थाने वारवारमुच्चारादिनिर्गमने दोषा भवन्ति, पुनः किम्भूतं लयनं ? स्त्रीपशुविवर्जितं, 'एकग्रहणेन तज्जातीयानां ग्रहणमिति न्यायात्, स्त्रीपशुपण्डकविवर्जितं, स्त्रीप्रमुखालोकनादिरहितमित्यर्थः. ।।८.५१।।

**(सु.)** किञ्च—अन्नट्ठं'इति, अन्यार्थं प्रकृतं, न साधुनिमित्तमेव निवर्त्तितं, लयनं-स्थानं वसतिरूपं भजेत्-सेवेत, शयनासनमित्यन्यार्थं प्रकृतं संस्तारकपीठकादि सेवेतेत्यर्थः,

एतदेव विशेष्यते-उच्चारभूमिसम्पन्नं-उच्चार-प्रश्रवणादिभूमियुक्तं, तद्रहिते असकृत् तदर्थं निर्गमनादिदोषात् तथा स्त्रीपशुविवर्जितमिति, एकग्रहणे तज्जातीयग्रहणात् स्त्रीपशुपण्डक-विवर्जितं रूपा(स्त्र्या)द्यालोकनादिरहितमिति ।।८.५१।।

**विवित्ता य भवे सिज्जा, नारीणां न लवे कहं ।**
**गिहिसंथवं न कुज्जा, कुज्जा साहूहिं संथवं ।।८.५२।।**

**(ति.)** उपाश्रये धर्मकथाविधिमाह—विविक्ता-अन्यसाधुभिर्विरहिता । शय्या-वसतिः, यदि भवेत् ततः । नारीणाम्-केवलानाम् । न लपेत् कथाम्-शङ्कादोषप्रसङ्गात् । साधुसहितायां च तासामपि कथयेत् । तथा गृहिसंस्तवम्-गृहिभिः परिचयम् । न कुर्यात्-स्नेहादिसम्भवात् । साधुभिः संस्तवं कुर्यात्-तत्संस्तवे चारित्रस्थैर्यसम्भवः ।।८.५२।।

**(स.)** तदित्थंभूतं लयनं सेवमानस्य साधोः धर्मकथाविधिमाह—विवित्ता'इति-साधुर्यद्येवंविधा शय्या वसतिर्भवेत्, तदा नारीणां स्त्रीणां कथां न कथयेत्, कथं ? शङ्कादिदोषप्रसङ्गात् योग्यतां विज्ञाय पुरुषाणां कथयेत्, नारीणां त्वविविक्तायां वसतौ कथयेदपि, किम्भूता शय्या वसतिः ? विविक्ता तदन्यसाधुभिर्वर्जिता, यत्रान्ये साधवो न सन्ति, चशब्दात् तथाविधभुजङ्ग-प्रायैकपुरुषसंयुक्ता भवेत्, तथापि न नारीणां कथां कथयेत्, तथा पुनः साधुर्गृहिसंस्तवं न कुर्यात्, स्नेहादिदोषसम्भवात्, साधुभिस्तु समं संस्तवं परिचयं काले कल्याणमित्रयोगेन कुशलपक्षवृद्धिभावं कुर्यादिति.।।८.५२।।

**(सु.)** तदित्थंभूतं लयनं सेवमानस्य धर्मकथाविधिमाह—विवित्ता य'इति, विविक्ता च तदन्यसाधुभिर्विवर्जिता, चशब्दात् तथाविध-भुजङ्गप्रायैकपुरुषसंयुक्ता भवेच्छय्या-वसत्यादि ततो नारीणां-स्त्रीणां न कथयेत् कथां, शङ्कादिदोषप्रसङ्गादौचित्यं विज्ञाय पुरुषाणां तु कथयेत्, अविविक्तायां नारीणामपीति, तथा गृहिसंस्तवं-गृहिपरिचयं न कुर्यात् तत्स्नेहादिदोषसम्भवात्, कुर्यात् साधुभिः सह संस्तवं-परिचयं, कल्याणमित्रयोगेन कुशलपक्षवृद्धिभावत इति ।।८.५२।।

**जहा कुक्कुडपोयस्स, निच्चं कुललओ भयं ।**
**एवं खु बंभयारिस्स, इत्थीविग्गहओ भयं ।।८.५३।।**

**(ति.)** कथञ्चिद् गृहस्थसंस्तवोऽपि भवतु । स्त्रीसंस्तवस्तु न कार्य एव । तद्गतं विधिमाह—यथा कुर्कुटपोतस्य नित्यम् । कुललतः-मार्जारात् । भयम् । एवं खु बंभयारिस्स इत्थीविग्गहओ भयं—यथा कुर्कुटपोतस्य नित्यं कुललतो मार्जाराद् भयं । एवं खु-निश्चये, ब्रह्मचारिणः स्त्रीविग्रहात्-स्त्रीशरीराद् भयम् ।।८.५३।।

**(स.)** कथञ्चिद् गृहिसंस्तवभावेऽपि स्त्रीसंस्तवो नैव कर्तव्य इत्यत्र कारणमाह—जहा-इति-यथा कुक्कुटपोतस्य कुक्कुटबालस्य नित्यं सर्वकालं कुललतो मार्जाराद् भयं, एवं ब्रह्मचारिणः साधोः स्त्रीविग्रहात् स्त्रीशरीराद् भयं, विग्रहग्रहणं मृतशरीरादपि भयख्यापनार्थम्. ।।८.५३।।

**(सु.)** कथंचिद् गृहिसंस्तवभावेऽपि स्त्रीसंस्तवो न कर्त्तव्य एवेत्यत्र कारणमाह—जहा'इति, यथा कुर्कुटपोतस्य-कुर्कुटशिशोर्नित्यं-सर्वकालं, कुललतो मार्जाराद् भयं एवं ब्रह्मचारिणः साधोः स्त्रीविग्रहात्-स्त्रीशरीराद् भयं, विग्रहग्रहणं मृतविग्रहादपि भयख्यापनार्थमिति ।।८.५३।।

**चित्तभित्तिं न निज्झाए, नारिं वा सुयलंकियं ।**
**भक्खरं पिव दट्ठूणं, दिट्ठिं पडिसमाहरे ।।८.५४।।**

**(ति.)** यतश्चैवं ? - अतः चित्रभित्तिगतामपि स्त्रियं न निध्यायेत् । नारीं वा सुष्ठु अलङ्कृतां-उपलक्षणत्वादनलङ्कृतामपि । कथञ्चिद् दर्शनेऽपि भास्करमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेत्-निवर्तयेत् ।।८.५४।।

**(स.)** यतश्चैवं, ततः किं कार्यम् ? - इत्याह-चित्तभित्तिं-इति-एवंविधामपि नारीं साधुर्न निध्यायेन्न पश्येत्, किम्भूतां नारीं ? चित्रगतां, पुनः किम्भूतां नारीं ? स्वलङ्कृतामलङ्कारैः शोभिताम्, उपलक्षणत्वादनलङ्कृतामपि न निरीक्षेत, कथञ्चिद् दर्शनयोगेऽपि भास्करमिव सूर्यमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेन्निवर्तयेदिति. ।।८.५४।।

**(सु.)** यतश्चैवं ? अतः चित्तभित्तिं इति, चित्रभित्तिं-चित्रगतां स्त्रियं न निरीक्षेत-न पश्येत्, नारीं वा सचेतनामेव स्वलङ्कृतां, उपलक्षणमेतदनलङ्कृतां च न निरीक्षेत, कथंचिद् दर्शनयोगेऽपि भास्करमिवादित्यमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेत् द्रागेव निवर्त्तयेदिति ।।८.५४।।

**हत्थ-पाय-पलिछिन्नं[1], कन्न-नासविगत्तियं ।**
**अवि वाससयं नारिं, बंभयारी विवज्जए ।।८.५५।।**

**(ति.)** किं बहुना ? परिच्छिन्नहस्त-पादाम् । विकृत्तकर्ण-नाशाम् । अपि वर्षशतिकां नारीम् । आस्तां तरुणीं, ब्रह्मचारी विवर्जयेत् ।।८.५५।।

**(स.)** हत्थ...इति-किं बहुना ? ब्रह्मचारी साधुरीदृशीमपि नारीं विवर्जयेत्, किमङ्ग पुनस्तरुणीं नारीं सुतरामेव विवर्जयेत्, किंविशिष्टां नारीम् ? हस्त-पादपरिच्छिन्नां, यस्या हस्तौ पादौ छिन्नौ वर्तेते, पुनः किम्भूतां नारीम् ? कर्ण-नासाविकृत्तां, कर्णौ नासा च विकृत्तौ यस्यास्तां, पुनः किम्भूतां नारीम् ? वर्षशतिकाम्, एतादृशीं वृद्धामपि वर्जयेत्, कः कानिव ? महाधनो यथा चौरान् वर्जयेत्. ।।८.५५।।

**(सु.)** किं बहुना ? हत्थ इति, हस्त-पादप्रतिच्छिन्नां-प्रतिच्छिन्नहस्त-पादां कर्ण-नासाविकृत्तामिति-विकृत्तकर्ण-नासामपि वर्षशतिकां नारीं, एवं वृद्धामपि किमङ्ग पुनस्तरुणीं ?, तां तु सुतरामेव, ब्रह्मचारी-चारित्रधनो महाधन इव तस्करान् विवर्जयेदिति ।।८.५५।।

**विभूसा इत्थिसंसग्गी[2], पणीयं रसभोयणं ।**
**नरस्स-ऽत्तगवेसिस्स, विसं तालउडं जहा ।।८.५६।।**

**(ति.)** अपि च—विभूषा-नखकेशादिसंस्काररूपा । स्त्रीसंसर्गः । प्रणीतरसभोजनम्-गलत्स्नेहरसाभ्यवहारः । नरस्य आत्मगवेषिणो विषं तालपुटं यथा-यथेदं विषं मृत्यवे भवति तथा साधोरात्मविमर्शनतत्परस्य विभूषादिकं धर्मशरीरमृत्यवे ।।८.५६।।

**(स.)** विभूसा'इति-अपिच नरस्यात्मगवेषिण एतत् सर्वं विभूषादि तालपुटविषं, यथा तालमात्रव्यापत्तिकरविषकल्पं, तत् किम् ?-इत्याह-विभूषा वस्त्रादिराढा शोभा, स्त्रीसंसर्गो येन केनचित् प्रकारेण स्त्रीसम्बन्धः, प्रणीतरसभोजनं गलत्स्नेहरसभक्षणम्. ।।८.५६।।

**(सु.)** अपि च—विभूसा...इति, विभूषा-वस्त्रादिराढा, स्त्रीसंसर्गः-येन केनचित् प्रकारेण स्त्रीसम्बन्धः, प्रणीतरसभोजनं-गलत्स्नेहरसाभ्यवहारः, एतत् सर्वमेव विभूषादि नरस्यात्मगवेषिणः-आत्महितान्वेषणपरस्य, विषं तालपुटं यथा-तालमात्रव्यापत्ति-करविषकल्पमहितमिति ।।८.५६।।

१. पडिच्छिन्नम् मुद्रितमन्यत्र । २. संसग्गो' इत्यन्यत्र मुद्रितम् ।

**अंग-पच्चंगसंठाणं, चारुल्लविय-पेहियं ।**
**इत्थीणं तं न निज्झाए, कामरागविवड्ढणं ।।८.५७।।**

**(ति.)** स्पष्टः ।।८.५७।।

**(स.)** अंग...इति-पुनः किञ्च साधुः स्त्रीणामेतानि न निध्यायेन्न निरीक्षेत न पश्येत्, कुत ? इत्याह-कामरागविवर्धनमिति, एतन्निरीक्ष्यमाणं मोहदोषान्मैथुनाभिलाषं वर्धयति, अत एवास्य प्राक् स्त्रीणां निरीक्षणप्रतिषेधाद्-गतार्थतायामपि प्राधान्यख्यापनार्थं भेदेनोपन्यासः कृतः, एतानि कानि ?-इत्याह-अङ्गानि शिरःप्रभृतीनि, प्रत्यङ्गानि नयनादीनि, एतेषां संस्थानं विन्यासविशेषं, तथा चारु शोभनं लपितं जल्पितं प्रेक्षितं निरीक्षितं स्त्रीणां सम्बन्धि सर्वम्. ।।८.५७।।

**(सु.)** किञ्च—अंगपच्चंग...इति, अङ्ग-प्रत्यङ्गसंस्थानमिति, अङ्गानि-शिरःप्रभृतीनि, प्रत्यङ्गानि-नयनादीनि, एतेषां संस्थानं-विन्यासविशेषं, तथा चारु शोभनं लपित-प्रेक्षितं लपितं-जल्पितं, प्रेक्षितं-निरीक्षितं, स्त्रीणां सम्बन्धि, तदङ्ग-प्रत्यङ्ग-संस्थानादि न निरीक्षेत-न पश्येत्, कुत ? इत्याह-कामरागविवर्द्धनमिति, एतद्धि निरीक्ष्यमाणं मोहदोषान्मैथुनाभिलाषं वर्द्धयति, अत एवास्य प्राक् स्त्रीणां निरीक्षणप्रतिषेधात् गतार्थतायामपि प्राधान्यख्यापनार्थो भेदेनोपन्यास इति ।।८.५७।।

**विसएसु मणुन्नेसु, पिम्मं नाभिनिवेसए ।**
**अणिच्चं तेसु विन्नाय, परिणामं पुग्गलाण य[१] ।।८.५८।।**

**(ति.)** विषयेषु मनोज्ञेषु प्रेम ना-ऽभिनिवेशयेत् । अमनोज्ञेषु च द्वेषमिति ज्ञेयम् । किं कृत्वा ?-तेषु-विषयेषु पुद्गलानां परिणामम् अनित्यं विज्ञाय । ते हि विषयपुद्गलाः मनोज्ञा अपि अमनोज्ञाः, अमनोज्ञा अपि मनोज्ञाः कालक्रमेण भवन्ति । ततो न तेषु रागद्वेषौ कार्यावित्यर्थः ।।८.५८।।

**(स.)** विसएसु'इति-पुनः किञ्च साधुर्विषयेषु शब्दादिषु, प्रेम रागं नाभिनिवेशयेन्न कुर्यात्, किम्भूतेषु विषयेषु? मनोज्ञेष्विन्द्रियाणामनुकुलेषु, अमनोज्ञेषु च द्वेषं न कुर्यात्, किं कृत्वा ? तेषां पुद्गलानां तुशब्दाच्छब्दादिविषयसम्बन्धिनामनित्यतया परिणामं विज्ञाय जिनवचनानुसारेण, कथं ? विज्ञायते हि मनोज्ञा अपि क्षणादमनोज्ञतया परिणमन्ति, अमनोज्ञा अपि क्षणान्मनोज्ञतया परिणमन्ति, ततस्तयोरुपरि रागद्वेषकरण निरर्थकमिति. ।।८.५८।।

१. 'उ' इति पाठोन्यत्र मूलतः, तथैव च 'तु' इति विवृतः ।

**(सु.)** किञ्च—विसएसु'इति, विषयेषु-शब्दादिषु, मनोज्ञेषु-इन्द्रियानुकूलेषु, प्रेम-रागं नाभिनिवेशयेत्-न कुर्यात्, एवममनोज्ञेषु द्वेषं, आह-उक्तमेवेदं प्राक् "कन्नसोक्खेहि'-इत्यादौ" (८.२६) किमर्थं पुनरुपन्यास इति ?, उच्यते-कारणविशेषाभिधानेन विशेषोपलम्भार्थ-मिति, आह च-अनित्यमेवपरिणामानित्यतया तेषां-पुद्गलानां, **तु**शब्दात् शब्दादिविषय-सम्बन्धिनामितियोगः, विज्ञाय-अवेत्य जिनवचनानुसारेण, किम् ?-इत्याह-परिणामं-पर्यायान्तरापत्तिलक्षणं, ते हि मनोज्ञा अपि क्षणादमनोज्ञतया परिणमन्ति, अमनोज्ञा अपि मनोज्ञतयेति, तुच्छं रागद्वेषयोर्निमित्तमिति ।।८.५८।।

**[१]पुग्गलाण परीणामं, तेसिं नच्चा जहा तहा ।**
**विणीयतण्हो विहरे, सीईभूएण अप्पणा ।।८.५९।।**

**(ति.)** एतदेव स्पष्टयन्नाह—तेषां शब्दादिपुद्गलानां यथा तथा-मनोज्ञा-ऽमनोज्ञतया परिणामं ज्ञात्वा । विनीततृप्तः-शब्दादिषु विगताभिलाषो विहरेत् । शीतीभूतेन-क्रोधाद्यग्न्यपगमात् । प्रशान्तेन आत्मना ।।८.५९।।

**(स.)** एतदपि स्पष्टयन्नाह—पोग्गलाणं'इति-शीतीभूतेन क्रोधादीनां त्यागात् प्रशान्तेनात्मना विहरेत्, किं कृत्वा ? तेषां पूर्वोक्तानां पुद्गलानां परिणामं-यथा मनोज्ञा अमनोज्ञतया भवन्ति, तथा ज्ञात्वा, किम्भूतः साधुः ? विनीततृष्णो गताभिलाषः शब्दादिषु. ।।८.५९।।

**(सु.)** एतदपि स्पष्टयन्नाह—पोग्गलाणं'इति, पुद्गलानां-शब्दादिविषयान्तर्गतानां परिणाम्, उक्तलक्षणं तेषां ज्ञात्वा-विज्ञाय, यथा मनोज्ञेतररूपतया भवन्ति, तथा ज्ञात्वा, विनीततृष्णः-अपेताभिलाषः शब्दादिषु विहरेत्, शीतीभूतेन-क्रोधाद्यग्न्युपगमात् प्रशान्तेनात्मनेति ।।८.५९।।

**[२]जाए सद्धाए निक्खंतो, परियायट्ठाणमुत्तमं ।**
**तमेव अणुपालिज्जा, गुणे आयरियसम्मए ।।८.६०।।**

**(ति.)** किञ्च—यया श्रद्धया निःक्रान्तः—भववैराग्यपरिणामरूपया । पर्यायस्थानम्-प्रव्रज्यारूपम्। मोक्षलक्षणोत्तमपदप्राप्तिहेतुत्वाद् उत्तमं प्राप्तः । तामेव-श्रद्धाम् ।

१. 'पोग्गलाणं' इति पाठोन्यत्र मुद्रितः ।
२. जाइ सद्धाइ निक्खंतो...। तमेव अनुपालिज्जा... इति मुद्रितोन्यत्र पाठः ।।

अनुपालयेत्-प्रवर्द्धमानां कुर्यात् । क्व गुणे ? लोकोत्तरगुणरूपे । आचार्यसम्मते-उपलक्षणत्वात् तीर्थकरादिबहुमते ।।८.६०।।

**(स.)** जाइ'इति-पुनः किञ्च साधुस्तामेव श्रद्धामप्रतिपातितया प्रवर्धमानां गुणेषु मूलगुणादिलक्षणेषु पालयेत्, किम्भूतेषु गुणेषु ? आचार्यसम्मतेषु तीर्थकरादिमतेषु, तां कां ? यया श्रद्धया प्रधानगुणस्वीकाररूपया निष्क्रान्तोऽविरतिकर्दमात्, दीक्षास्थानमुत्तमं प्रधानं प्राप्तः. ।।८.६०।।

**(सु.)** किञ्च—जाइ'इति, यया श्रद्धया-प्रधानगुणस्वीकरणरूपया निष्क्रान्तोऽविरति-जम्बालात्, पर्यायस्थानं-प्रव्रज्यारूपं उत्तमं-प्रधानं प्राप्त इत्यर्थः, तामेव श्रद्धामप्रति-पातितया प्रवर्धमानामनुपालयेद् यत्नेन, क्व ? इत्याह-गुणेषु-मूलगुणादिलक्षणेषु आचार्यसंमतेषु-तीर्थंकरादिबहुमतेषु, अन्ये तु श्रद्धाविशेषणमित्येतद् व्याचक्षते, तामेव श्रद्धामनुपालयेद्-गुणेषु, किंभूतां आचार्यसम्मतां, न तु स्वाग्रहकलङ्कितामिति ।।८.६०।।

**तवं चिमं संजमजोगयं च, सज्झायजोगं च सया अहिट्ठए ।**
**सूरेव सेणाइ सम्मत्तमाउहे, अलमप्पणो होइ अलं परेसिं ।।८.६१।।**

**(ति.)** आचारप्रणिधिफलमाह—तपश्चेदम्-अनशनादि । संयमयोगकं च—पृथिव्यादिविषयम्, संयमव्यापारं स्वार्थे कः । स्वाध्याययोगं च—सूत्रार्थवाचनादिकम् । अधिष्ठाता-तपःप्रभृतीन् कर्ता, तृन् प्रत्ययस्य निष्ठादित्वात् कर्मणि न षष्ठी । इह तपोऽभिधानाद् ग्रहणेऽपि स्वाध्यायस्य प्राधान्यख्यापनार्थं पृथक्करणम् । स एवम्भूतः सूर इव-सुभट इव । चतुरङ्गया सेनया-साधुः कषायेन्द्रियसेनया निरुद्धः सन् । समस्तायुधसंपूर्णः-तपःप्रभृतिखड्गाद्यायुधः। अलमात्मनो भवति-संरक्षणाय । अलं परेषाम्-उपासकानाम् ।।८.६१।।

**(स.)** अथाचारप्रणिधिफलमाह—तवं'इति-साधुरेवंविधः सन् शूर इव विक्रान्तसुभट इव, अलमत्यर्थमात्मनः संरक्षणाय, अलं च परेषां निवारणाय भवति, किम्भूतः साधुः? तपश्चेदमनशनादि द्वादशभेदरूपं सर्वसाधुप्रसिद्धं, संयमयोगं च पृथिव्यादिविषय-संयमव्यापारं च स्वाध्याययोगञ्च वाचनादिव्यापारं च सदा सर्वकालमधिष्ठाता तपःप्रभृतीनां कर्ता इत्यर्थः, किम्भूतः शूरः ? सेनया चतुरङ्गबलरूपया इन्द्रिय-

कषायादिसेनया विरुद्धः सन् समाप्तायुधः सम्पूर्णतपःप्रभृतिखड्गायुधः.।।८.६१।।

**(सु.)** आचारप्रणिधिफलमाह—तवं चिमं'इति, तपश्चेदमनशनादिरूपं साधुलोकप्रतीतं, संयमयोगं च-पृथिव्यादिविषयं संयमव्यापारं च, स्वाध्यायादियोगं च-वाचनादिव्यापारं, सदा-सर्वकालमधिष्ठाता-तपःप्रभृतीनां कर्तेत्यर्थः, इह च तपोऽभिधानात् तद्ग्रहणेऽपि स्वाध्याययोगस्य प्राधान्यख्यापनार्थं भेदेनाभिधानमिति । स एवंभूतः शूर इव-विक्रान्तभट इव सेनया-चतुरङ्गरूपया इन्द्रियकषायादिसेनया निरुद्धः सन्, समाप्तायुधः-संपूर्णतपःप्रभृति-खड्गाद्यायुधः, अलं-अत्यर्थमात्मनो भवति, संरक्षणायै अलं च परेषां निवा(राक)रणायेति ।।८.६१।।

**सज्झाय सज्झाणरयस्स ताइणो, अपावभावस्स तवे रयस्स ।**
**विसुज्झई जंसि मलं पुरेकडं, समीरियं रूप्पमलं व जोइणा ।।८.६२।।**

**(ति.)** एतदेव स्पष्टयन्नाह—स्वाध्याय-सद्ध्यानरतस्य तायिनः । अपापभावस्य तपसि रतस्य विशुद्ध्यते योऽस्य । मलः-कर्मरूपः । पुराकृतः । समीरितः-प्रेरितः । रूप्यमल इव । ज्योतिषा-अग्निना ।।८.६२।।

**(स.)** एतदेव स्पष्टयन्नाह—सज्झायः...इ-अस्य साधोर्यन्मलं कर्ममलं तद् विशुद्ध्यते अपैति दूरे यातीत्यर्थः, किम्भूतं मलं ? पुराकृतं. जन्मान्तरेषु उपात्तमुपार्जितं, केन किंवत् ? यथा रूप्यमलं, किम्भूतं रूप्यमलं ? समीरितं प्रेरितं, केन ? ज्योतिषाग्निना, किम्भूतस्य साधोः ? स्वाध्यायसद्ध्यानरतस्य, स्वाध्याय एव सद्ध्यानं स्वाध्याय सद्ध्यानं, तत्र रतस्यासक्तस्य, पुनः किम्भूतस्य साधोः ? त्रातुः, स्वस्य परस्योभयेषां च रक्षणशीलस्य, पुनः किम्भूतस्य साधोः ? अपापभावस्य, लब्ध्यादीनां या अपेक्षा तया रहिततया शुद्धचित्तस्य, पुनः किम्भूतस्य साधोः ? तपस्यनशनादौ द्वादशविधे रतस्य, एवंविधस्य शुद्धस्य साधोः पापं दूरे यातीति परमार्थः. ।।८.६२।।

**(सु.)** एतदेव स्पष्टयन्नाह—सज्झाय इति, स्वाध्याय एव सद्ध्यानं स्वाध्यायसद्ध्यानं, तत्र रतस्य-आसक्तस्य त्रातुः-स्वपरोभयत्राणशीलस्य अपापभावस्य-लब्ध्याद्यपेक्षारहिततया शुद्धचित्तस्य तपसि-अनशनादौ यथाशक्त्या रतस्य, विशुद्ध्यते अपैति, यदस्य साधोर्मलं-कर्ममलं पुराकृतं-जन्मान्तरोपात्तं, दृष्टान्तमाह—समीरितं-प्रेरितं, रूप्यमलमिव ज्योतिषा-अग्निनेति ।।८.६२।।

**से तारिसे दुक्खसहे जिइंदिए, सुएण जुत्ते अममे, अकिंचणे ।**
**विरायई कम्मघणंसि अवगए, कसिणब्भपुडावगमे व चंदमि[1] त्ति बेमि ।।६३।।**

**(ति.)** ततश्च—स तादृशः-अनन्तरोदितगुणः साधुः । दुःखसहः-परीषहसहः । जितेन्द्रियः श्रुतेन युक्तः । अममोऽकिञ्चनः विराजते । कर्मघने-ज्ञानावरणीयादिकर्ममेघ । अपगते-सति सञ्जातकेवलालोकः । कृष्णाभ्रपुटावगमे-शरदि । इव चन्द्रमाः इति ब्रवीमि-इति पूर्ववत् ।। **श्रीतिलकाचार्य टीकायामष्टममध्ययनं समाप्तम्**

**(स.)** ततश्च साधुः कीदृशो भवेत् ?-इत्याह-से'इति, स तादृशः पूर्वोक्तगुणयुक्तः साधुर्विराजते, क इव ? चन्द्रमा इव, क्व सति ? कृत्स्नाभ्रपुटापगमे समस्तानाम-भ्रपुटानामपगमे नाशे सति, अयं भावः-यथा शरत्काले चन्द्रमाः शोभते तथा साधुरप्यपगतकर्मघनः समासादितकेवलालोको विराजत इत्यर्थः किम्भूतः साधुः ? दुःखसहः परीषहपीडासहः, पुनः किम्भूतः साधुः ? जितेन्द्रियः पराजितश्रोत्रादि-पञ्चेन्द्रियविषयः, पुनः किम्भूतः साधुः ? श्रुतज्ञानेन युक्तो विद्यावानित्यर्थः, पुनः किम्भूतः साधुः ? अममः सर्वत्र ममतारहितः, पुनः किम्भूतः साधुः ? अकिञ्चनः किञ्चनरहितः, ब्रवीमीति पूर्ववत्. ।।८.६३।।

**इति श्रीदशवैकालिके सूत्रे श्रीसमयसुन्दरोपाध्यायविरचितायां दीपिकायामष्ट-माध्ययनं सम्पूर्णं. श्रीरस्तु.**

**(सु.)** ततश्च—से तारिसे'इति, स तादृश अनन्तरोदितगुणयुक्तः साधुर्दुःखसहः-परीषहजेता, जितेन्द्रियः-पराजितश्रोत्रेन्द्रियादिः, श्रुतेन युक्तो-विद्यावानित्यर्थः, अममः-सर्वत्र ममत्वरहितः, अकिञ्चनो-द्रव्यभावकिञ्चनरहितः, विराजते-शोभते, कर्म्मघने-ज्ञानावरणीयादिकर्ममेघे अपगते सति, निदर्शनमाह—कृत्स्नाभ्रपुटापगमे इव चन्द्रमा इति, यथा कृत्स्ने अभ्रपुटे कृष्णे वा अपगते सति चन्द्रमा विराजते शरदि, तद्वदसावपगतकर्म्मघनः समासादितकेवलालोको विराजते ।।८.६३।। ब्रवीमीति पूर्ववत्।।

**।। इति सुमति० वृत्तौ 'आचारप्रणिध्याख्यमष्टममध्ययनं समाप्तम् ।।**

१. 'चंदिमि' इति पाठोन्यत्र मुद्रितः ।।

## ।। नवमं अध्ययनं-विनयसमाधिः तत्र प्रथमोद्देशकः ।।

**थंभा व कोहा व मयप्पमाया, गुरुस्सगासे विणयं न[1] सिक्खे ।**
**सोचे व ऊ तस्स अभूइभावो, फलं व कीयस्स वहाय होइ ।।९.१।।**

**(ति.)** अनन्तराध्ययने निरवद्ये वचसि यतितव्यमित्युक्तम् । तच्च विनयसम्पन्नस्यैव भवति-इत्यनेन सम्बन्धेनायातं विनयसमाध्यध्ययनं व्याख्यायते । तस्य चेदमादि सूत्रम्—अहं गुरोः सकाशात् । जात्यादिभिरुत्तम इति स्तम्भात् । अहं गुरुभिर्गाढमाक्रुष्ट इति क्रोधात् । अयमेतदपि न वेत्ति ? इति मदेन लाघवभयात् । शक्तोऽपि न शक्नोमि'इति मायातः । प्रमादाद्-निद्रादेः । गुरोः सकाशे । विनयम्-ग्रहणासेवनारूपम् । न शिक्षेत । स एव-स्तम्भादिर्विनयशिक्षाविघ्नहेतुः । तस्य अभूतिभावः-असम्पद्भावः । वधाय भवति—गुणादिभावप्राणविनाशाय भवति । फलमिव कीचकस्य-कीचको वंशः, स हि फले सञ्जाते सति विनश्यति-इत्यर्थः ।।९.१.१।।

**(स.)** थंभेति-अथ विनयसमाध्याख्यं नवममध्ययनं व्याख्यायते, तस्य नवमाध्ययनस्य चत्वार उद्देशाः, तत्र प्रथमोद्देशकमाह, इह चायं सम्बन्धः-पूर्वाध्ययने निष्पापं वचनमाचारे प्रणिहितस्य सम्यक् स्थितस्य भवतीति तत्र यत्नवता भाव्यम्—इत्येतदुक्तम्, इह त्वाचारप्रणिहितो यथायोग्यविनयसम्पन्न एव भवति, इत्येतदुच्यते,

तथाहि-शिष्यो गुरोः सकाशे-आचार्यादेः समीपे, विनयमासेवनारूपं शिक्षारूपं च न शिक्षते, नोपादत्ते, न गृह्णातीत्यर्थः, कस्मात् ? स्तम्भाद् वा, 'कथमहं जात्यादिमान् जात्यादिहीनस्य गुरोः समीपे शिक्षे ? तथा क्रोधात् कथञ्चिदसत्यकरणप्रेरितो रोषाद् वा, तथा मायातः 'शूलं मे बाधत' इत्यादिकपटेन, तथा प्रमादात् प्रक्रान्तमुचितमजानन् निद्रादीनां व्यासङ्गेन, स्तम्भादीनां क्रमेणोपन्यासश्च इत्थमेवामीषां विनयस्य विघ्नतामाश्रित्य ख्यापनार्थः, तदेवं स्तम्भादिभ्यो गुरोः समीपे विनयं न शिक्षते, अन्ये **त्वाचार्या एवं पठन्ति—गुरोः समीपे विनये न तिष्ठति,** विनये न वर्त्तते, विनयं नासेवत इत्यर्थः । इह स एव स्तम्भादिर्विनय-शिक्षाविघ्नहेतुस्तस्य जडमतेरभूतिभाव इति, अभूतेर्भावोऽभूतिभावः, असम्पद्भाव इत्यर्थः, किम् ?-इत्याह-वधाय भवति,

---

१. 'न तिट्ठइ' टीकान्तरे पाठान्तरत्वेन विवृतम्' न तिष्ठति इति । 'विणयं न चिट्ठे' - चूर्णिपाठः,

गुणलक्षणभावप्राणविनाशाय भवति. दृष्टान्तमाह-फलमिव कीचकस्य, कीचको वंशस्तस्य फलं यथा वधाय भवति, तस्मिन् सति तद्विनाशनात्, तद्वदिति. ।।९.१.१।।

**(सु.)** व्याख्यातमाचारप्रणिध्ययनम् । अधुना विनयसमाध्याख्यमारभ्यते-अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने निरवद्यं वच आचारे प्रणिहितस्य भवतीति, तत्र यत्नवता भवितव्यमित्येतदुक्तं, इह त्वाचारप्रणिहितो यथोचितविनयसंपन्न एव भवतीत्येतदुच्यते । उक्तं च-

"आयारपणिहाणंमि, से सम्मं वट्टई बुहे ।
णाणाईणं विणीए जे, मुक्खट्ठा निव्विगिच्छए ।।१।।"

इत्यनेन सम्बन्धेनायातमिदमध्ययनमिति-थंभा व'इत्यादि, स्तम्भाद् वा मानाद् वा जात्यादिनिमित्तात् क्रोधाद् वा-अक्षान्ति-लक्षणात्, माया-प्रमादादिति, मायातो-निकृतिरूपायाः, प्रमादात्-निद्रादेः सकाशात्, किम् ?-इत्याह-गुरोः सकाशे-आचार्यादेः समीपे विनयमासेवनाशिक्षादिभेदभिन्नं न शिक्षते-नोपादत्ते, तत्र स्तम्भात् 'कथमहं जात्यादिमान् जात्यादिहीनसकाशे शिक्षामि'इति, एवं क्रोधात् क्वचिद् वितथकरणचोदितो रोषाद् वा'इति, मायातः 'शूलं मे बाधत' इत्यादिव्याजेन, प्रमादात् प्रक्रान्तोचितमनवबुद्ध्यमानो निद्रादिव्यासङ्गेन, स्तम्भादिक्रमोपन्यास-श्चेत्थमेवामीषां विनयविघ्नहेतुतामाश्रित्य प्राधान्यख्यापनार्थः, तदेवं स्तम्भादिभ्यो गुरोः सकाशे विनयं न शिक्षते, अन्ये **तु पठन्ति—गुरोः सकाशे विनये न तिष्ठति**-विनये न वर्त्तते, विनयं नासेवत इत्यर्थः। इह च स एव तु स्तम्भादिर्विनयशिक्षाविघ्नहेतुस्तस्य जडमतेः, अभूतिभाव इति-अभूतेर्भावोऽभूतिभावः, असंपद्भाव इत्यर्थः, किम् ?-इत्याह-वधाय भवति-गुणलक्षणभावप्राणविनाशाय भवति, दृष्टान्तमाह-फलमिव कीचकस्य-कीचको-वंशः, तस्य यथा फलं वधाय भवति, सति तस्मिंस्तस्य विनाशात्, तद्वदिति ।।९.१.१।।

**जे यावि मंदि त्ति गुरुं विइत्ता, डहरो इमो अप्पसुउं[1] त्ति नच्चा ।**
**हीलंति मिच्छं पडिवज्जमाणा, करंति आसायण ते गुरूणं ।।९.१.२।।**

**(ति.)** किंच—ये चापि-केचन द्रव्यसाधवः मन्द इति गुरुं विदित्वा-सत्प्रज्ञाविकल इति, कारणान्तरस्थापितमप्राप्तवयसम् । डहरोऽयम्-अप्राप्तवयाः । अल्पश्रुतः-

१. 'अप्पसुअं'त्ति' इति मुद्रितपाठभेदः ।।

अनधीतागमः। इति विज्ञाय । मन्दादिशब्दैः हीलयन्ति । असूयया वा महाप्राज्ञस्त्वं, वयोवृद्धस्त्वं, बहुश्रुतस्त्वम् इत्येवं निन्दया मिथ्यात्वं प्रतिपद्यमानाः ।

आसायणमिच्छत्तं, आसायणवज्जणा उ सम्मत्तं ।

आसायणानिमित्तं, कुव्वइ दीहं च संसारं ।।१।। [ ]

इत्यजानन्त इव कुर्वन्ति । आशातनां न केवलं तस्य गुरोः तत्प्रतिष्ठापकानां च गुरूणां, ते दुःसाधव इति ।।९.१.२।।

**(स.)** जे इति-किञ्च ये चापि केवलद्रव्यसाधवोऽगम्भीरा भवन्ति, ते द्रव्यसाधवो गुरूणामाचार्याणामाशातनां लघुतापादनरूपां तत्स्थापनाया अबहुमानेन कुर्वन्ति, एकस्य, गुरोराशातनायां सर्वेषां गुरूणामाशातना इति हेतोर्गुरूणामिति बहुवचनं, मन्द इति ज्ञात्वा, सत्प्रज्ञाविकल इति ज्ञात्वा, तथा पुनः कारणान्तरस्थापितमप्राप्तवयसं गुरुं प्रत्ययं डहरोऽप्राप्तवयाः खल्वयं, तथायं गुरुरल्पश्रुतोऽनधीतसिद्धान्त इति ज्ञात्वा हीलयन्ति, किं कुर्वन्तो हीलयन्ति ? मिथ्यात्वं प्रतिपद्यमानाः, गुरुर्न हीलनीय इति तत्त्वमन्यथा जानन्तः, अतो गुरोर्हीलना न कार्या इत्याह. ।।९.१.२।।

**(सु.)** जे यावि'इति, ये चापि केचन द्रव्यसाधवोऽगम्भीराः, किम् ?-इत्याह-मन्द इति गुरुं विदित्वा-क्षयोपशमवैचित्र्यात् तन्त्रयुक्त्यालोचनाऽसमर्थः सत्प्रज्ञाविकल इति स्वमाचार्यं ज्ञात्वा । तथा कारणान्तरस्थापितमप्राप्तवयसं डहरोऽयं-अप्राप्तवयाः खल्वयं, तथा अल्पश्रुत इत्यनधीतागम इति विज्ञाय, किम् ?-इत्याह-हीलयन्ति-सूयया असूयया वा खिंसयन्ति, सूयया 'अतिप्रज्ञः त्वं वयोवृद्धो बहुश्रुत' इति, असूयया तु 'मन्दप्रज्ञस्त्वम्'इत्याद्यभिदधति, मिथ्यात्वं प्रतिपद्यमाना इति, गुरुर्न हीलनीय इति तत्त्वमन्यथाऽवगच्छन्तः, कुर्व्वन्त्याशातनां-लघुतापादनरूपां, ते-द्रव्यसाधवः गुरूणां-आचार्याणां, तत्स्थापनाया अबहुमानेन, 'एकगुर्व्वाशातनायां सर्वेषामाशातना'इति बहुवचनं, अथवा कुर्वन्त्याशातनां स्वसम्यग्दर्शनादिभावापह्रासरूपां ते गुरूणां सम्बन्धिनीं, तन्निमित्तत्वादिति ।।९.१.२।।

**पगईइ मंदा वि भवंति एगे, डहरा वि य जे सुयबुद्धोववेया ।**
**आयारमंतो गुणसुंट्ठियप्पा, जे हीलिया सिहिरिव भास कुज्जा ।।९.१.३।।**

**(ति.)** प्रकृत्या-स्वभावेनैव कर्मवैचित्र्याद् वयोवृद्धा अपि । मन्दाः-असत्प्रज्ञाः

तथाविधबुद्धिरहिता भवन्ति । ये च डहरा अपि-वयसा लघीयांसोऽपि । श्रुतबुद्ध्युपपेताः-सत्प्रज्ञावन्तः । द्वयेऽपि आचारवन्तः-ज्ञानाद्याचाराराधकाः । गुणेषु-संग्रहोपग्रहादिषु, सुस्थित आत्मा येषां ते सुस्थितात्मानः ते, न हीलनीयाः ये हीलिताः शिखीव-अग्निरिव हीलकान् । भस्मसात्कुर्युः ।।९.१.३।।

**(स.)** पगईइ इति-ये साधवस्ते गुरून् प्रत्येवं जानन्ति, प्ररूपयन्ति परं न तु हीलयन्ति, एवं किमित्याह-एके केचन वयोवृद्धाः प्रकृत्या स्वभावेन कर्मवैचित्र्यान्मन्दा अपि सद्बुद्धिरहिता अपि भवन्ति, तथान्ये केचन डहरा अप्यपरिणता अपि वयसा अमन्दा भवन्तीति वाक्यशेषः, किंविशिष्टा इत्याह-ये श्रुतबुद्ध्या उपेताः सहिताः, तथा सत्प्रज्ञावन्तः, श्रुतेन बुद्धिभावेन वा भाविनीं वृत्तिमाश्रित्याल्पश्रुता अपि सर्वथा आचारवन्तो ज्ञानाद्याचारसहिताः. पुनः किंविशिष्टाः ? गुणसुस्थितात्मानः, गुणेषु सुष्ठु भावसारं स्थित आत्मा येषां ते तथाविधा न हीलनीयाः, ये हीलिताः खिंसिताः शिखीव अग्निरिव इन्धनसमूहं भस्मसात्कुर्युः, ज्ञानादिगुणसमूहमपनयेयुरिति. ।।९.१.३।।

**(सु.)** अतो न कार्या हीलना, इत्याह—पगईए...इति, प्रकृत्या-स्वभावेन कर्मवैचित्र्यात् मन्दा अपि-सद्बुद्धिरहिता अपि भवन्त्येके-केचन वयोवृद्धा अपि, तथा डहरा अपि च-अपरिणता अपि च वयसा अन्ये अमन्दा भवन्तीति वाक्यशेषः, किंविशिष्टा ?-इत्याह-ये श्रुतबुद्ध्युपपेतास्तदा सत्प्रज्ञावन्तः, श्रुतेन बुद्धिभावेन वा भाविनीं वृत्तिमाश्रित्य अल्पश्रुता इति, सर्वथा आचारवन्तः-ज्ञानाद्याचारसमन्विताः गुणसुस्थितात्मानः-गुणेषु-सङ्ग्रहोपग्रहादिषु, सुष्ठु-भावसारं स्थित आत्मा येषां ते तथाविधाः, न हीलनीयाः, ये हीलिताः-खिंसिताः शिखीव-अग्निरिवेन्धनसङ्घातं भस्मसात्कुर्युः-ज्ञानादिगुण-सङ्घातमपनयेयुरिति ।।९.१.३।।

**जे आवि नागं डहरं ति नच्चा, आसायए से अहियाय होइ ।**
**एवायरियं पि हु हीलयंतो, नियच्छई जाइपहं खु मंदे ।।९.१.४।।**

**(ति.)** विशेषेण डहरहीलनदोषमाह—यश्चापि-कश्चित् । नागम्-सर्पम् । डहर इति-बाल इति । ज्ञात्वा आशातयति-यष्ट्यादिना घट्टयति । स घट्टमानः । से-तस्य घट्टकस्य । अहिताय भवति । एवम् आचार्यमपि-लघीयांसमपि । हीलयन् । जातिपथम्-द्वीन्द्रियादिजाति-मार्गम्। मन्दः-अज्ञः । खु-निश्चयेन । नितरां गच्छति-याति । अनन्तं संसारं परिभ्रमतीत्यर्थः ।।९.१.४।।

**(स.)** अथ विशेषेण डहरस्य हीलनेदोषमाह—जे'इति-यश्चापि कश्चिदज्ञो नागं सर्पं डहर इति बाल इति ज्ञात्वा आशातयति क्षुद्रकाष्ठादिना कदर्थयति, स नागः कदर्थ्यमानः, **से** तस्य कदर्थनाकारकस्याहिताय भवति, भक्षणेन प्राणनाशनात्, एष दृष्टान्तः, अथोपनयः—एवमाचार्यमपि कारणतोऽपरिणतमेव स्थापितं हीलयन्निर्गच्छति जातिपन्थानं द्वीन्द्रियादिजातिमार्गं मन्दोऽज्ञः संसारे परिभ्रमति. ।।९.१.४।।

**(सु.)** विशेषेण डहरहीलनादोषमाह—जे यावि इति, यश्चापि कश्चिदज्ञो नागं-सर्पं, डहर इति-बाल इति, ज्ञात्वा-विज्ञाय, आशातयति-कलिञ्चादिना कदर्थयति, स कदर्थ्यमानो नागः, से-तस्य कदर्थकस्य-अहिताय भवति, भक्षणेन प्राणनाशनात्, एष दृष्टान्तः, अयमर्थोपनयः—एवमाचार्यमपि कारणतोऽपरिणतमेव स्थापितं हीलयन् निर्गच्छति जातिपन्थानं-द्वीन्द्रियादिजातिमार्गं, मन्दः-अज्ञः, संसारे परिभ्रमतीति ।।९.१.४।।

**आसीविसो[1] आवि परं सुरुट्ठो, किं जीवनासाउ परं नु कुज्जा ।**
**आयरियपाया पुण अप्पसन्ना, अबोहिआसायण नत्थि मुक्खो ।।९.१.५।।**

**(ति.)** अथैतद् दृष्टान्तदार्ष्टान्तिकयोर्महदन्तरमाह—आसीविषश्चापि परं सुरुष्टः किं जीवनाशादपरं तु कुर्यात् । आचार्यपादाः पुनरप्रसन्नाः-आशातनया अप्रसन्नीकृताः। अबोधिम्-प्रेत्य धर्मानवाप्तिम् । आशातयति-इति ''ईषिग्रन्थ्यासिवन्दिविदिकारितान्तेभ्यो चुः[2] [ ] इति युप्रत्यये आशातनः-आशातनकारी । गुर्वाशातनायाश्च मिथ्याजनकत्वात् तत्कारिणः । नास्ति मोक्षः ।।९.१.५।।

**(स.)** अत्र दृष्टान्तस्य दार्ष्टान्तिकस्य च महदन्तरमित्येतदेवाह—आसीविसो'इति-आशीविषश्चापि सर्पोऽपि परं सुरुष्टः सन् क्रुद्धः सन्, किं जीवितनाशान्मृत्योः परं नु कुर्यात् ? न किञ्चिदपीत्यर्थः, आचार्यपादाः पुनरप्रसन्ना हीलनया-ऽनुग्रहायाप्रवृत्ताः, किं कुर्वन्ति ?-इत्याह-अबोधिं निमित्तहेतुत्वेन मिथ्यात्वसंहतिं कुर्वन्ति, कथं ? तदाशातनया मिथ्यात्वबन्धात्, यतश्चैवमतो गुरोराशातनया नास्ति मोक्षः, अबोधिसन्तानबन्धेनानन्तसंसारिकत्वादिति. ।।९.१.५।।

---

१. 'वा वि' इति मुद्रितो पाठभेदोन्यत्र ।
२. कातन्त्रव्याकरणे कृत् सूत्रतः पञ्चम पादे ८५तमं सूत्रम् ।

**(सु.)** अत्रैव दृष्टान्त-दार्ष्टान्तिकयोर्महदन्तरम्, इत्येतदाह—आसी...इति, आशीविषश्चापि-सर्पोऽपि परं सुरुष्टः सन्-सुक्रुद्धः सन्, किं जीवितनाशात्-मृत्योः परं नु कुर्यात् ? न किञ्चिदपीत्यर्थः, आचार्यपादाः पुनरप्रसन्ना हीलनया अनुग्रहेऽप्रवृत्ताः, किं कुर्वन्ति ?-इत्याह-अबोधि-निमित्तहेतुत्वेन मिथ्यात्वसंहतिं, तदाशातनया मिथ्यात्वबन्धात्, यतश्चैवम् ?-अतश्चाशातनया गुरोर्नास्ति मोक्षः, अबोधिसन्तान-सम्बन्धेनानन्तसंसारिकत्वादिति ।।९.१.५।।

**जो पावगं जलियमवक्कमिज्जा, आसीविसो वा वि हु कोवइज्जा ।**
**जो वा विसं खायइ जीवियट्ठी, एसोवमासायणया गुरूणं ।।९.१.६।।**

**(ति.)** किञ्च—यः पावकं ज्वलितमवक्रामेत्-आक्रम्य तिष्ठेत् । आशीविषं वापि हि कोपयेत् । यो वा विषं खादति जीवितार्थी । एषोपमा-यथैषां मृत्युरूपापायप्राप्तिर्भवति। तथा गुरूणां आशातनया-कृतया तत्कारिणो नरकाद्याप्तिरूपोऽपायः स्यात् ।।९.१.६।।

**(स.)** पुनराह—जो...इति-यः कोऽपि पावकमग्निं ज्वलितं सन्तमपक्रामेदवष्टभ्य तिष्ठति, आशीविषं वापि भुजङ्गमं वापि कोपयेद् रोषं ग्राहयेत्, यो वा विषं खादति जीवितार्थी जीवितुकामः, एषा उपमाऽपायस्य कष्टस्य प्राप्तिं प्रति, एतदुपमानमा-शातनया गुरूणां सम्बन्धिन्या कृतया, तद्वत् कष्टं भवतीति. ।।९.१.६।।

**(सु.)** किञ्च—जो पावग...इति, यः पावकं-अग्निं ज्वलितं सन्तं अपक्रामेत्-अवष्टभ्य तिष्ठति, आशीविषं वापि हि-भुजङ्गमं वापि हि, कोपयेत्-रोषं ग्राहयेत्, यो वा विषं खादति जीवितार्थी-जीवितुकामः, एषोपमा-अपायप्राप्तिं प्रति एतदुपमानं, आशातनया कृतया गुरूणां सम्बन्धिन्या, तद्वदपायो भवतीति ।।९.१.६।।

**सिया हु से पावओ(य) नो डहिज्जा, आसीविसो वा कुविओ न भक्खे ।**
**सिया विसं हालहलं न मारे, न यावि मुक्खो गुरुहीलणाए ।।९.१.७।।**

**(ति.)** अत्र विशेषमाह—स्यात् कदाचित् पावको न दहेत् । आसीविषो वापि कुपितो न भक्षयेत् । स्याद् विषं हालाहलं न मारयेत् । एवमपि मन्त्रादिप्रतिबन्धात् कदाचिद् भवति । न चापि मोक्षो गुरुहीलनात् ।।९.१.७।।

**(स.)** तत्र विशेषमाह—सिया'इति, स्यात् कदाचिन्मन्त्रादिप्रतिबन्धादसौ पावकोऽग्निर्न दहति न भस्मसात्कुर्यात्, आशीविषो वा भुजङ्गो वा कुपितो न भक्षयेन्न खादयेत्, तथा कदाचिन्मन्त्रादिप्रतिबन्धादेव विषं हालाहलमतिरौद्रं न मारयेन्न प्राणान् त्याजयेत्, एवमेतत् कदाचिद् भवति, परं नापि मोक्षो गुरुहीलनया गुरोराशातनया भवतीति. ।।९.१.७।।

**(सु.)** अत्र विशेषमाह—सिया हु...इति, स्यात्-कदाचिन्मन्त्रादिप्रतिबन्धाद्, असौ पावकः-अग्निः, न दहेत्-न भस्मसात्कुर्यात्, आशीविषो वा, भुजङ्गो-वा कुपितो वा न भक्षयेत्-न खादयेत्, तथा स्यात्-कदाचिन्मन्त्रादिप्रतिबन्धादेव विषं हालाहलं-अतिरौद्रं न मारयेत्-न प्राणांस्त्याजयेत्, एवमेतत् कदाचिद् भवति, न चापि मोक्षो गुरुहीलनया-गुरोराशातनया कृतया भवतीति ।।९.१.७।।

**जो पव्वयं सिरसा भित्तुमिच्छे, सुत्तं व सीहं पडिबोहइज्जा ।**
**जो वा दए सत्तिअग्गे पहारं, एसोवमासायणया गुरूणं ।।९.१.८।।**

**(ति.)** किञ्च—यो वा ददाति शक्तिनामकप्रहरणाग्रे, शीर्षेण प्रहारम् । अस्य भावार्थः प्राग्वत् ।।९.१.८।।

**(स.)** जो' इति-पुनः किञ्च यः पर्वतं शिरसा मस्तकेन भेत्तुमिच्छेत्, सुप्तं वा सिंहं गिरिगुहायां प्रतिबोधयेत्, यो वा ददाति शक्तेरग्रे प्रहरणविशेषाग्रे प्रहारं हस्तेन, एषा उपमा आशातनया गुरूणाम् ।।९.१.८।।

**(सु.)** जो पव्वयं'इति, यः पर्वतं शिरसा-उत्तमाङ्गेन भेत्तुमिच्छेत्, सुप्तं वा सिंहं गिरिगुहायां वा प्रतिबोधयेत्, यो वा ददाति शक्त्यग्रे प्रहरणविशेषाग्रे प्रहारं हस्तेन, एषोपमाऽऽशातनया गुरूणामिति पूर्ववदिति ।।९.१.८।।

**सिया हु सीसेण गिरिं पि भिंदे, सिया हु सीहो कुविओ न भक्खे ।**
**सिया न भिंदिज्ज न सत्तिअग्गं, न यावि मुक्खो गुरुहीलनाए ।।९.१.९।।**

**(ति.)** अत्रापि विशेषमाह—अस्यापि भावार्थः प्राग्वत् ।।९.१.९।।

**(स.)** अत्र विशेषमाह—सिया'इति, स्यात् कदाचित् कश्चिद् वा-

सुदेवादिप्रभावातिशयाच्छिरसा मस्तकेन गिरिमपि पर्वतमपि भिन्द्यात्, स्यात् कदाचिन्मन्त्रादिसामर्थ्यात् सिंहः कुपितो न भक्षयेत्, स्यात् कदाचिद् देवतानुग्रहादिना शक्त्यग्रं प्रहारे दत्तेऽपि न भिन्द्यात्, एवमेतत् कदाचिद् भवति, परं न चापि मोक्षो गुरुहीलनया गुरोराशातनया भवतीति. ।।९.१.९।।

**(सु.)** अत्र विशेषमाह—सिया हु...इति, स्यात्-कदाचित् कश्चिद् वासुदेवादि-प्रभावातिशयात्-शिरसा उत्तमाङ्गेन गिरिमपि-पर्वतमपि भिन्द्यात्, स्यान्मन्त्रादिसामर्थ्यात् सिंहः कुपितो न भक्षयेत्, स्याद् देवतानुग्रहादेर्न भिन्द्याद् वा शक्त्यग्रे प्रहारे दत्तेऽपि, एवमेतत् कदाचिद् भवति, न चापि मोक्षो गुरुहीलनया-गुरोराशातनया भवतीति ।।९.१.९।।

**आयरियपाया पुण अप्पसन्ना, अबोहिआसायण नत्थि मुक्खो ।**
**तम्हा अणाबाहसुहाभिकंखी, गुरुप्पसायाभिमुहो रमिज्जा ।।९.१.१०।।**

**(ति.)** विशेषतरमाह—[आयरिय...इति] पूर्वार्द्धं पूर्ववत् । उत्तरार्द्धं सुगमम् ।।९.१.१०।।

**(स.)** एवं पावकाशातना अल्पा, गुर्वाशातना महतीत्यतिशयप्रदर्शनार्थमाह—आयरिय....इति-आचार्यपादाः पुनरप्रसन्ना इत्यादिपदद्वयव्याख्या पूर्ववत्, यस्मादेवं तस्मादनाबाध-सुखाभिकाङ्क्षी मोक्षसुखाभिलाषी, साधुर्गुरुप्रसादाभिमुख आचार्यादीनां प्रसाद उद्युक्तः सन् रमेत. ।।९.१.१०।।

**(सु.)** एवं पावकाशातना अल्पा, गुर्वाशातना महतीत्यतिशयप्रदर्शनार्थमाह—आयरिय....इति-आचार्यपादाः पुनरप्रसन्ना इत्यादि पूर्वार्द्धं पूर्ववत् । यस्मादेवं तस्मादनाबाधसुखाभिकाङ्क्षी मोक्षसुखाभिलाषी साधुर्गुरुप्रसादाभिमुखः-आचार्यादिप्रसादे उद्युक्तः सन् रमेत-वर्त्तेतेति ।।९.१.१०।।

**जहाऽऽहिअग्गी जलणं नमंसे, नाणाहुई-मंतपयाभिसित्तं ।**
**एवायरियं उवचिट्ठइज्जा, अणंतनाणोवगओ वि संतो ।।९.१.११।।**

**(ति.)** केन प्रकारेणेत्याह—यथा आहिताग्निः-ब्राह्मणः । ज्वलनं नमस्यति । नानाहुति-मन्त्रपदाभिषिक्तम्-आहुतयो घृतप्रक्षेपाद्याः, मन्त्रपदानि चाग्नये स्वाहा...

इत्यादीनि, तैरभिषिक्तं संस्कृतम् । एवम्-अग्निमिवाचार्यम् । उपतिष्ठेद्-विनयेन सेवेत । अनन्तज्ञानोपगतोऽपि सन्-अनन्तं स्वपर्यायापेक्षया वस्तु ज्ञायते येन तदनन्तज्ञानं, तेनोपगतोऽपि सन् । किमङ्ग ? पुनरन्यः ।।९.१.११।।

**(स.)** केन प्रकारेण रमेत ?—इत्याह-जहा'इति,-आहिताग्निः कृतावसथादिर्ब्राह्मणो येन प्रकारेण ज्वलनमग्निं नमस्यति, किम्भूतं ज्वलनं ? नानाहुतिमन्त्रपदाभिषिक्तं, तत्राहुतयो घृतप्रक्षेपादिरूपाः, मन्त्रपदानि 'अग्नये स्वाहा' इत्येवमादीनि, तैराहुति-मन्त्रपदैरभिषिक्तं दीक्षालङ्कृतमित्यर्थः, एवमग्निमिवाचार्यं विनीतः साधुरुपतिष्ठेद्[1] विनयेन सेवेत, किम्भूतः साधुः ? अनन्तज्ञानोपगतोऽपि, अनन्तं स्वपरपर्यायापेक्षया वस्तु ज्ञायते येन तदनन्तं, तेनोपगतः, सहितोऽपि सन्, किमङ्ग पुनरन्य इति. ।।९.१.११।।

**(सु.)** केन प्रकारेण ? - इत्याह—जहाऽऽहिअग्गि...इति-यथाऽऽहिताग्निः-कृतावसथादिर्ब्राह्मणो ज्वलनं-अग्निं नमस्यति, किंविशिष्टमित्याह-नानाहुतिमन्त्र-पदाभिषिक्तम्-आहुतयो-घृतप्रक्षेपादिलक्षणा मन्त्रपदानि—अग्नये स्वाहा इत्येवमादीनि, तैरभिषिक्तं—दीक्षासंस्कृतमित्यर्थः, एवं-अग्निमिवाचार्यमुपतिष्ठेत्-विनयेन सेवेत, किंविशिष्ट, इत्याह-अनन्तज्ञानोपगतोऽपीति-अनन्तं स्वपरपर्यायापेक्षया वस्तु ज्ञायते येन तदनन्तज्ञानं, तदुपगतोऽपि सन्, किमङ्ग पुनरन्य इति ।।९.१.११।।

**जस्संतिए धम्मपयाइं सिक्खे, तस्संतिए वेणइयं पि(प)उंजे ।**
**सक्कारए सिरसा पंजलीओ, कायग्गिरा भो ! मणसा वि[2] निच्चं ।।९.१.१२।।**

**(ति.)** एतदेव स्पष्टयन्नाह—यस्यान्तिके धर्मपदानि शिक्षेत । तस्यान्तिके विनय एव वैनयिकं प्रयुञ्जीत। तथा तं कायेन शिरसा प्राञ्जलिः-शिरसि प्रकर्षेण न्यस्ताञ्जलिः। गिरा-वाचा प्रियङ्करया । मनसा-भावप्रतिबन्धेन । भो-इत्यामन्त्रणे । अहो ! साधो! भवान् सत्कारयेत्-अभ्युत्थानादिभिः सन्मानयेत् ।।९.१.१२।।

**(स.)** एतदेव पुनः स्पष्टयति—जस्सं...इति-साधुर्यस्याचार्यादेः समीपे धर्मपदानि धर्मफलानि सिद्धान्तपदानि शिक्षेताऽऽदद्यात्, तस्याचार्यादेरन्तिके समीपे विनयं प्रयुञ्जीत, विनय एव वैनयिकं, तत् कुर्यादिति भावः, कथं विनयं कुर्यात् ?-इत्याह-गुरुं सत्कारयेत्, केन ? अभ्युत्थानादिना पूर्वोक्तेन युक्तः, पुनः शिरसा मस्तकेन प्राञ्जलिः सन्, तथा

---

१. उपाद् देवपूजा'इतिशास्त्रविहितात्मनेपदं त्वत्र मूलस्थपदानुकरणत्वान्नेति ध्येयम् । २. अ'इत्यन्यत्र मुद्रितः ।

कायेन शरीरेण, तथा गिरा वाचा, 'मस्तकेन वन्दे' इत्यादिरूपया, भो ! इति शिष्यस्यामन्त्रणे, मनसा भावप्रतिबन्धरूपेण, नित्यं सदैव सत्कारयेत्, न तु सूत्रग्रहणकाल एव, कुशलानुबन्धच्छेदन-प्रसङ्गात्, ।।९.१.१२।।

**(सु.)** एतदेव स्पष्टयति—जस्स...इति, यस्यान्तिके-यस्य समीपे धर्मपदानि-धर्मफलानि सिद्धान्तपदानि शिक्षेत-आदद्यात् तस्यान्तिके-तत्समीपे, किम् ?-इत्याह-वैनयिकं प्रयुञ्जीत-विनय एव वैनयिकं, तत् कुर्यादितिभावः, कथम् ?-इत्याह-सत्कारयेदभ्युत्थानादिना, पूर्वोक्तेन युक्तः शिरसा-उत्तमाङ्गेन प्राञ्जलिः-प्रोद्गताञ्जलिः सन्, कायेन-देहेन, गिरा-वाचा, मस्तकेन वन्दे इत्यादिरूपया भो ! इति शिष्यामन्त्रणं, मनसा च-भावप्रतिबन्धरूपेण, नित्यं-सदैव सत्कारयेत्, न तु सूत्रग्रहणकाल एव, कुशलानुबन्धव्यवच्छेदप्रसङ्गादिति ।।९.१.१२।।

**लज्जा दया संजम बंभचेरं, कल्लाणभागिस्स विसोहिठाणं ।**
**जे मे गुरू सययमणुसासयंति, ते हं गुरू सययं पूययामि ।।९.१.१३।।**

**(ति.)** एवं च मनसि कुर्यात्—लज्जा...इति, लज्जा-अपवादभयरूपा । दया संयमो ब्रह्मचर्यं च । एतानि कल्याणभागिनः-मोक्षार्थिनो जीवस्य । विशोधिस्थानम्-कर्ममलापनयनास्पदम् । इति मां गुरवः सततमनुशासयन्ति । तान् अहं गुरून् सततं पूजयामि ।।९.१.१३।।

**(स.)** एवं च मनसि कुर्यात्—लज्जा...इति,-लज्जा दया संयमो ब्रह्मचर्यं च, एतच्चतुष्टयं कल्याणभागिनो मोक्षाभिलाषिणो जीवस्य विपक्षव्यावृत्त्या कुशलपक्ष-प्रवर्तकत्वेन च विशोधिस्थानं कर्ममलापनयनस्थानं वर्तते, तत्र लज्जा अपवादभयरूपा, दया अनुकम्पा, संयमः पृथिव्यादिविषयः, ब्रह्मचर्यं विशुद्धतपोऽनुष्ठानम्, एतत्कथने-नैतज्जातं, ये गुरवो मां सततं निरन्तरमनुशासयन्ति कल्याणयोग्यतां नयन्ति, तानहमेतादृशान् गुरून् सततं पूजयामि, न तेभ्योऽन्यः पूजायोग्य इति. ।।९.१.१३।।

**(सु.)** एवं च मनसि कुर्यादित्याह—लज्जा दया...इति, लज्जा-अपवादभयरूपा, दया-अनुकम्पा, संयमः-पृथिव्यादि-जीवविषयः, ब्रह्मचर्यं-विशुद्धतपोऽनुष्ठानं, एतल्लज्जादि विपक्षव्यावृत्त्या कुशलपक्ष-प्रवर्तकत्वेन कल्याणभागिनो-मोक्षभागिनो जीवस्य विशोधिस्थानं-कर्ममलापनयनस्थानं वर्त्तते, अनेन 'ये मां गुरव-आचार्याः सततं-अनवरतं अनुशासयन्ति-कल्याणयोग्यतां नयन्ति, तानहमेवंभूतान् गुरून् सततं

पूजयामि, न तेभ्योऽन्यः पूजार्ह' इति ।।९.१.१३।।

**जहा निसंते तवनच्चिमाली, पभासई भारह केवलं तु ।**
**एवायरिओ सुयसीलबुद्धीए, विरायई सुरमज्झे व इन्द्रो ।।९.१.१४।।**

**(ति.)** इतश्चैते पूज्या इत्याह—यथा निशान्ते-दिने जाते । तपन् अर्चिमाली-सूर्यः । प्रभासते । भरतं केवलम्-परिपूर्णम् । तुशब्दाद्-अन्यच्च क्रमेण । एवमाचार्यः श्रुतेन । शीलेन-सदाचारेण। बुद्ध्या-स्वाभाविक्या युक्त्या । प्रकाशयति जीवादि-तत्त्वानीत्यर्थः । एवं वर्तमानः सुसाधुभिः परिवृत्तो विराजते । सुराणाम्-वैमानिकानाम्। मध्ये इन्द्र इवेति ।।९.१.१४।।

**(स.)** अतः कारणात्, एते पूज्या इत्याह—जहा'इति-अर्चिर्माली सूर्यो निशान्ते रात्रेरन्ते दिवस इत्यर्थः, केवलं संपूर्णं भारतं भरतक्षेत्रं, तुशब्दादन्यच्च, क्रमेण प्रभासयति उद्द्योतयति, किं कुर्वन् अर्चिर्माली? तपन्, एवमाचार्यो जीवादिभावान् प्रकाशयति, किम्भूत आचार्यः ? श्रुतशीलबुद्धिकः श्रुतेनागमेन शीलेन परद्रोहविरमणेन, बुद्ध्या च स्वाभाविक्या युक्तः सन्, एवं च वर्तमान आचार्यः साधुभिः परिवृतो विराजते, क इव ? सुरमध्ये सामानिकादिदेवमध्ये गत इन्द्र इव. ।।९.१.१४।।

**(सु.)** इतश्चैते पूज्या इत्याह—जहा...इति, यथा निशान्ते-रात्र्यवसाने दिवस इत्यर्थः, तपन्नर्चिर्माली-सूर्यः प्रभासयति-उद्योतयति, केवलं-सम्पूर्णं, भारतं-भरतक्षेत्रं, तुशब्दादन्यच्च क्रमेण, एवमर्चिर्मालीवाचार्यः श्रुतेन-आगमेन, शीलेन-परद्रोहविरतिरूपेण, बुद्ध्या च-स्वाभाविक्या युक्तः सन् प्रकाशयति जीवादिभावानिति । एवं च वर्तमानः सुसाधुभिः परिवृत्तो विराजते सुरमध्य इव-सामानिकादिमध्यगत इव इन्द्र इति ।।९.१.१४।।

**जहा ससी कोमुइजोगजुत्ते, नक्खत्त-तारागण-परिवुडप्पा ।**
**खे सोहए विमले अब्भमुक्के, एवं गणी सोहइ भिक्खुमज्झे ।।९.१.१५।।**

**(ति.)** किञ्च—यथा शशी कौमुदीयोगयुक्तः-कार्तिकपूर्णिमास्यामुदितः । नक्षत्रतारागण-परिवृतात्मा, खे शोभते, विमले अभ्रमुक्ते । एवम्-चन्द इव । गणी-आचार्यः । शोभते भिक्षुमध्ये-अतोऽयं महत्त्वात् पूज्यः ।।९.१.१५।।

**(स.)** पुनराह—जहा'इति,-यथा चन्द्रः खे आकाशे शोभते, किम्भूतः ?

कौमुदीयोगयुक्तः, कार्त्तिकपौर्णमास्यामुदितः, पुनः किम्भूतश्चन्द्रः ? नक्षत्र-तारा-गणपरिवृतात्मा, नक्षत्रैस्ताराणां गणैर्वृन्दैर्युक्त इति भावः, किम्भूते खे ? अभ्रमुक्ते, पुनः किम्भूते खे ? विमले, निर्मले अभ्रमुक्तमाकाशमत्यन्तं निर्मलं भवतीति ख्यापनार्थम्, तदेवं चन्द्र इव गणी आचार्यः शोभते भिक्षुमध्ये. अतोऽयं गुरुर्महत्त्वात् पूज्य इति. ।।९.१.१५।।

**(सु.)** जहा'इति, यथा शशी-चन्द्रः, कौमुदीयोगयुक्तः-कार्त्तिकपौर्णिमास्यामुदित इत्यर्थः, स एव विशेष्यते-नक्षत्र-तारा-गणपरिवृतात्मा-नक्षत्रादिभिर्युक्त इति भावः, खे-आकाशे शोभते, किंविशिष्टे खे ?, विमले अभ्रमुक्ते-अभ्रमुक्तमेवात्यन्तं विमलं भवतीति ख्यापनार्थमेतत्, एवं चन्द्र इव गणी-आचार्यः, शोभते भिक्षुमध्ये-साधुमध्ये, अतोऽयं महत्त्वात् पूज्य इति ।।९.१.१५।।

**महागरा आयरिया महेसी, समाहिजोए सुयसीलबुद्धीए ।**
**संपाविउकामो अणुत्तराइं, आराहए तोसइ धम्मकामी ।।९.१.१६।।**

**(ति.)** अपि च—महाकराः-ज्ञानादिभावरत्नाकराः । आचार्याः । महैषिणः-मोक्षैषिणः। समाधियोग-श्रुत-शील-बुद्धिभिः-समाधियोगैर्ध्यानविशेषैः, श्रुतेन-द्वादशाङ्गाभ्यासेन, शीलेन-सदाचारेण, बुद्ध्या-औत्पत्तिक्यादिरूपया । अणुत्तराणि-ज्ञानादीनि । सम्प्राप्तुकामः। धर्मकामी च-साधुः, तानाचार्यान् । आराधयेत् । असकृद् विनयकरणेन तोषयेत् ।।९.१.१६।।

**(स.)** महागरा...इति पुनः किञ्च धर्मकामो निर्जरार्थं, न तु ज्ञानफलापेक्षयापि, साधुस्तानाचार्यान् सम्प्राप्तुकामोऽनुत्तराणि ज्ञानादीन्याराधयेद् विनयकरणेन, नैकवारमेव, किन्तु तोषयेद् वारंवारं विनयकरणेन सन्तोषं ग्राहयेत्, तान् कानाचार्यान् ? ये महाकराः, ज्ञानादिभावरत्नानामाकराः, पुनः किम्भूता आचार्याः ? महेषिणो मोक्षैषिणः, कथं महैषिणः इत्याह-समाधियोग-श्रुत-शील-बुद्धिभिः, समाधियोगै-र्ध्यानविशेषैः श्रुतेन द्वादशाङ्गाभिधानेन, शीलेन परद्रोहविरतिरूपेण, बुद्ध्या च औत्पत्तिक्यादिरूपया, **अन्य आचार्या इत्थं व्याख्यानयन्ति—समाधि-योग-श्रुत-शील-बुद्धीनामाकरा इति.** ।।९.१.१६।।

**(सु.)** किञ्च—महागरा आयरिआ'इति, महाकरा ज्ञानादिभावरत्नापेक्षया, आचार्या

महैषिणो-मोक्षैषिणः, कथं महैषिण, इत्याह-समाधियोग-श्रुत-शील-बुद्धिभिः समाधियोगैः-ध्यानविशेषैः श्रुतेन-द्वादशाङ्गाभ्यासेन, शीलेन-परद्रोहविरतिरूपेण, बुद्ध्या च औत्पत्तिक्यादिरूपया, अन्ये तु व्याचक्षते-समाधियोग-श्रुत-शील-बुद्धीनां महाकरा इति । तानेवंभूतानाचार्यान् संप्राप्तुकामोऽनुत्तराणि ज्ञानादीन्याराधयेद् विनयकरणेन, न सकृदेव, अपि तु तोषयेत्-असकृत्करणेन तोषं ग्राहयेत्, धर्मकामो-निर्जरार्थी, न तु ज्ञानादिफलापेक्षयेति ।।९.१.१६।।

**सुच्चाण मेहावि सुहासियाइं, सुस्सुसए आयरियंपमत्तो[1] ।**
**आराहइत्ताण गुणे अणेगे, सो पावई सिद्धिमणुत्तरं[2] ।।९.१.१७।। त्ति बेमि**

**(ति.)** निगमयन्नाह—श्रुत्वा मेधावी । सुभाषितानि-गुर्वाराधनफलाभिधायीनि । शुश्रूषते । आचार्यम् अप्रमत्तः-तदाज्ञां कुरुते । एवं गुरुशुश्रूषापरः । सः-साधुः । आराध्यगुणान् अनेकान् ज्ञानादीन् । प्राप्नोति सिद्धिमनुत्तराम्-अनन्तरामेव । सुकुलादि-जन्मपरम्परया वा । इति ब्रवीमि-इति पूर्ववत् ।।९.१.१७।। **इति तिलकाचार्यवृत्तौ विनयसमाधौ प्रथमोद्देशकः ।।**

**(स.)** पुनराह सुच्चा'इति-मेधावी पण्डितः साधुः सदाचार्यान् शुश्रूषयेत्. किं कृत्वा ? सुभाषितानि गुर्वाराधनफलाभिधायकानि श्रुत्वा, किंविशिष्टो मेधावी ? अप्रमत्तो निद्रादिप्रमादरहितः, य एवं गुरुशुश्रूषापरः, स गुणाननेकान् ज्ञानादिरूपानाराध्य सिद्धिमनुत्तरां मुक्तिमनन्तरं सुकुलादिपरम्परया वा प्राप्नोति. ब्रवीमीति पूर्ववत्. ।।९.१.१७।।

**।। इति श्रीदशवैकालिके शब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां नवमाध्ययने प्रथमोद्देशकः समाप्तः. १. श्रीरस्तु. ।।**

**(सु.)** सोच्चाणं इति, श्रुत्वा मेधावी सुभाषितानि-गुर्वाराधनफलाभिधायीनि, किम्?-इत्याह-सुश्रूषयेत् सदा-ऽऽचार्यान्, अप्रमत्तो-निद्रादिविरहितस्तदाज्ञां कुर्वीतेत्यर्थः, य एवं गुरुसुश्रूषापरः स आराध्य गुणाननेकान् ज्ञानादीन् प्राप्नोति सिद्धिमनुत्तरां, मुक्तिमित्यर्थः, अनन्तरं सुकुलादिपरम्परया वा ।।४१५।। ब्रवीमीति पूर्ववत् ।।

**इति सुमति० वृत्तौ विनयसमाधावुक्तः प्रथम उद्देशकः ९-१ ।।**

---

१. आयरिऽप्पमत्तो'इति पाठोन्यत्र मुद्रितः । २. विणयसमाहीए पढमो उद्देसो समत्तो ।

## ।। विनयसमाध्यध्ययने द्वितीयोद्देशकः ।।

**मूलाउ खंधप्पभवो दुमस्स, खंधाउ पच्छा समुविंति साला[1] ।**
**साहप्पसाहा विरुहंति पत्ता, तओ से पुप्फं च फलं रसो य ।।९.२.१।।**

**(ति.)** तस्येदमादिसूत्रम्[2]—मूलात् स्कन्धप्रभवः थुण्डोत्पत्तिः[3] । द्रुमस्य स्कन्धात् पश्चात् समुपयन्ति-समुत्पद्यन्ते । शालाः-शाखाः । शाखाभ्योऽपि प्रशाखाः-शाखोत्थाः, तेभ्योऽपि पत्राणि विरोहन्ति । ततः से-तस्य द्रुमस्य । पुष्पं च फलं च । रसश्च-फलगतः । एवमेतेन क्रमेण भवन्ति ।।९.२.१।।

**(स.)** मूलाओ इति-अथ नवमाध्ययने विनयाधिकार एव द्वितीयोद्देशकः प्रारभ्यते, पूर्वं प्रथमोद्देशके विनयसमाधिरुक्तः, द्वितीयोऽपि विनयाधिकारवानुच्यते, तत्र सूत्रं-[मूलाओ]-द्रुमस्य वृक्षस्य मूलादादिप्रबन्धात् स्कन्धप्रभवः, स्थुडोत्पादः ततः स्कन्धात् पश्चाच्छाखाः, तस्य भुजाकल्पाः समुपयान्त्यात्मानं प्राप्नुवन्ति, उत्पद्यन्त इत्यर्थः, तथा शाखाभ्य उक्तस्वरूपाभ्यः प्रशाखाः, तासामंशभूता विरोहन्ति जायन्ते, तथा ताभ्योऽपि प्रशाखाभ्यः पत्राणि पर्णानि विरोहन्ति, ततस्तदन्तरं **से** तस्य द्रुमस्य पुष्पं च फलं च रसश्च. ।।९.२.१।।

**(सु.)** विनयाधिकारवानेव द्वितीय[उद्देशक] उच्यते, तत्रेदमादिसूत्रम् मूलाउ इति, मूलादादिप्रबन्धात् स्कन्धप्रभवः-स्थुडोत्पादः, कस्य ? इत्याह-द्रुमस्य-वृक्षस्य, ततः-स्कन्धात् सकाशात्, पश्चात्-तदनु, समुपयान्ति-आत्मानं प्राप्नुवन्त्युत्पद्यन्त इत्यर्थः, कास्ता ?-इत्याह-शाखास्तद्भुजाकल्पाः, तथा शाखाभ्यः-उक्तलक्षणाभ्यः प्रशाखास्तदंशभूता विरोहन्ति-जायन्ते, तथा ताभ्योऽपि पत्राणि-पर्णानि विरोहन्ति । ततस्तदनन्तरं, से-तस्य द्रुमस्य पुष्पं फलं च रसश्च फलगत एवैते क्रमेण भवन्तीति ।।९.२.१।।

**एवं धम्मस्स विणओ, मूलं परमो से मुक्खो ।**
**जेण किर्तिं सुयं सिग्घं, निस्सेसं चाभिगच्छई ।।९.२.२।।**

---

१. साहा 'इत्यन्त्र मुद्रितः पाठः । २. विनयसमाध्ययनस्य द्वितीयोद्देशकस्य - इत्यर्थः । ३. थड इति भाषायाम् ।

**(ति.)** एवं दृष्टान्तमुक्त्वा दार्ष्टान्तिकयोजनामाह—द्रुममूलवद् धर्मकल्पद्रुमस्य विनयो मूलम् । से-तस्य विनयमूलस्य । फलरसकल्पः परमो मोक्षः । स्कन्धादिकल्पानि देवलोकगमन-सुकुलागमनानि ज्ञेयानि। येनेति तृतीया पञ्चम्यर्थे । यतो विनयात् पत्रकल्पां कीर्तिम्-सर्वत्र साधुवादरूपाम् । पुष्पकल्पं श्रुतं श्लाघ्यंम्-अङ्गप्रविष्टादि । निःशेषम्-सम्पूर्णगुरुदत्तमिहापि फलरसकल्पं तु मोक्षं, कोऽप्यत्र भवे, कोऽप्यमुत्र वा। अधिगच्छति-प्राप्नोति ।।९.२.२।।

**(स.)** एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह-एवं-इति-एवं धर्मस्य परमकल्पवृक्षस्य विनयो मूलमादिप्रबन्धरूपं, परम इत्यग्रो रसः, से तस्य फलरसवन्मोक्षः, स्कन्धादिकल्पानि तु देवलोकगमन-सुकुलागमादीनि, अतो विनयः कर्तव्यः, येन विनयेन कृत्वा साधुः कीर्तिं सर्वत्र शुभप्रवादरूपामधिगच्छति प्राप्नोति, पुनः श्रुतमङ्गप्रविष्टादि, श्लाघ्यं प्रशंसास्पदीभूतं निश्शेषं सम्पूर्णं च प्राप्नोति. ।।९.२.२।।

**(सु.)** एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह—एवं...इति, एवं-द्रुममूलवत्, धर्मस्य-परमकल्पवृक्षस्य, विनयो मूलं-आदिप्रबन्धरूपं, परम इत्युग्रो रसः, से-तस्य, फलरसवन्मोक्षः, स्कन्धादिकल्पानि तु देवलोकगमन-सुकुलागमनादीनि, अतो विनयः कर्त्तव्यः, किं विशिष्ट ?-इत्याह-येन-विनयेन कीर्तिं-सर्वत्र शुभप्रवादरूपां, तथा श्रुतं-अङ्गप्रविष्टादि श्लाघ्यं-प्रशंसास्पदीभूतं निःशेषं-संपूर्णं चाधिगच्छति-प्राप्नोतीति ।।९.२.२।।

**जे य चंडे मिए थद्धे, दुव्वाई नियडी सढे ।**
**वुज्झई से अविणिअप्पा, कट्ठं सोयगयं जहा ।।९.२.३।।**

**(ति.)** अविनयवतो दोषमाह—यश्च चण्डः-रोषणः । मृगः-अज्ञः । स्तब्धः-जात्यादिमदोन्मत्तः । दुर्वादी-विरूपभाषी । निकृतिमान्-मायावी । शठः-कूटकृत् । एभ्यो दोषेभ्यो विनयं न करोति यः । उह्यते संसारश्रोतसा सोऽविनीतात्मा । काष्ठं श्रोतोगतं नद्यादि प्रवाहयति तं यथा ।।९.२.३।।

**(स.)** अथाविनयदोषमाह-जे इति-साधुरेतेभ्यो विनयं न करोति, स संसारस्रोतसा उह्यते, किंवत् ? काष्ठमिव, किम्भूतं काष्ठं ? स्रोतोगतं, नद्यादिवहनीपतितं, किम्भूतः साधुः ? चण्डो रोषणः, पुनः किम्भूतः साधुः ? मृगोऽज्ञो हितमप्युक्तो रुष्यति, पुनः

स्तब्धः जात्यादिमदोन्मत्तः, पुनर्दुर्वादी अप्रियवक्ता, पुनर्निकृतिमान् मायासहितः, पुनः शठः संयमयोगेष्वादररहितः, पुनरविनीतात्मा सकलकल्याणकारणेन विनयेन रहितः. ।।९.२.३।।

**(सु.)** अविनयवतो दोषमाह—जे य इति, यश्च चण्डो-रोषणः, मृगः-अज्ञो हितमप्युक्तो रुष्यति, तथा स्तब्धो-जात्यादिमदोन्मत्तो, दुर्वादी-अप्रियवक्ता निकृतिमान्-मायोपेतः, शठः-संयमयोगेष्वानादृतः, एतेभ्यो दोषेभ्यो विनयं न करोति य, उह्यते असौ पापः संसारस्रोतसा अविनीतात्मा-सकलकल्याणैकनिबन्धनविनयरहितः, किम् ?-इवेत्याह-काष्ठं स्रोतोगतं-नद्यादिवहनीपतितं, यथा तद्वदिति ।।९.२.३।।

**विणयं पि जो उवाएण, चोइओ कुप्पई नरो ।**
**दिव्वं सो सिरिमिज्जंतिं, दंडेण पडिसेहए ।।९.२.४।।**

**(ति.)** किं च—विनयम्-प्रागुक्तं कर्तुमिति शेषः । उपायेन-विनय एव मोक्षहेतुरित्यादि मृदुवचनकलापेन । चोइओ-इति[1]-गुरुणा प्रेरितः । यो नरः कुप्यति । सः-विनयप्रभवां दिव्यां श्रियमायान्तीं आत्मसाद् भवन्तीम् । दण्डेन । प्रतिषेधयति-निवारयति । उदाहरणं चात्र-कुरूपागतश्रीप्रार्थनाप्रणयभङ्गकारिणो दशारादयस्तद्विरहिता बभूवुः। तदभङ्गकारी तु कृष्णस्तद्युक्तोऽभूत्[2] । ततश्च स कृष्णः सर्वत्र जगति श्रीपतिरिति ख्यातिं प्राप्तवान् ।।९.२.४।।

**(स.)** विणयंमि'(पि)इति-पुनः किञ्च यो नरो विनयमुक्तलक्षणं प्रत्युपायेनैकान्त-मृदुभणनादि-लक्षणेनापि सम्बन्धेन चोदित उक्तः सन् कुप्यति रुष्यति, स किं करोति?-इत्याह-स दिव्याममानुषीं श्रियं लक्ष्मीम्, आगच्छन्तीमात्मनो भवन्तीं, दण्डेन काष्ठमयेन, प्रतिषेधयति निवारयति, अयं परमार्थः-विनयः सम्पदां निमित्तं, तत्र स्खलितं यदि कश्चिन्नोदयति सगुणः, तत्रापि रोषकरणे वस्तुतः सम्पदां निषेधः ।।९.२.४।।

**(सु.)** किञ्च—विणयं पि...इति, विनयमुक्तलक्षणं, य उपायेनापि-एकान्तमृदु-भणनादिलक्षणेनापि अपिशब्दस्य व्यवहितः सम्बन्धः, चोदित उक्तः, कुप्यति-रुष्यति नरः । अत्र निदर्शनमाह-दिव्यां-अमानुषीं, असौ-नरः, श्रियं-लक्ष्मीं आगच्छन्तीं-आत्मनो भवन्तीं, दण्डेन-काष्ठमयेन प्रतिषेधयति-निवारयति । एतदुक्तं भवति-विनयः संपदो निमित्तं, तत्र स्खलितं यदि कश्चिच्चोदयति सगुणः, तत्रापि रोषकरणेन वस्तुतः

१. त्ति-प्रे. १.२.६-१२ ।। २. ०भूत् पुन. १.२.६-१२ ।।

संपदो निषेधः । उदाहरणं चात्र दशारादयः कुरूपागतश्रीप्रार्थनाप्रणयभङ्गकारिण-स्तद्रहिताः, तदभङ्गकारी च तद्युक्तः कृष्ण इति ।।९.२.४।।

**तहेव अविणीयप्पा, उववज्झा हया गया ।**
**दीसंति दुहमेहंता, आभिओगमुवट्ठिया ।।९.२.५।।**

**(ति.)** पुनरविनयदोषोपदर्शनार्थमेवाह—तथैवाविनीतात्मानः-आरोह(हं)चित्तेना-ऽवहन्तः दुर्दान्ताः । औपवाह्या अपि-राजवाहनयोग्या अपि । हया गजा दृश्यन्ते । दुःखम्-यवसादिवहनक्लेशं, विशिष्टखादनाद्यप्राप्तिरूपं च । एधमानाः-अनेकार्थत्वादनुभवन्तः । आभियोग्यम्-पारवश्यम् । उपस्थिताः-प्राप्ताः ।।९.२.५।।

**(स.)** अविनयदोषस्योपदर्शनार्थमेवाह—तहेव'इति-तथैव तेऽविनीतात्मानो विनय-रहिता अनात्मज्ञा उपवाह्यानां राजादिवल्लभानामेते कर्मकरा इत्यौपवाह्या हया अश्वा गजा हस्तिन उपलक्षणत्वान्महिषादयश्च, एते किं ?-इत्याह-दृश्यन्त उपलभ्यन्त एव मन्दुरादावविनयदोषेणोभय-लोकवर्तिना यवसादिवोढारः, दुःखं सङ्क्लेशलक्षण-मेधमाना अनेकार्थत्वादनुभवन्त आभियोग्यं कर्मकरभावमुपस्थिताः. ।।९.२.५।।

**(सु.)** अविनयदोषोपदर्शनार्थमेवाह—तहेव...इति, तथैवेति-तथैवैते अविनीतात्मानो-विनयरहिता अनात्मज्ञाः, उपवाह्यानां-राजादिवल्लभानामेते कर्मकरा इत्यौपवाह्याः, हयाः-अश्वाः, गजाः-हस्तिनः, उपलक्षणमेतन्महिषकादीनामिति । एते किम् ?-इत्याह-दृश्यन्ते-उपलभ्यन्ते, एव मन्दुरादौ अविनयदोषेणोभयलोकवर्त्तिना यवसादिवोढारः, दुःखं-संक्लेशलक्षणं एधमाना-अनेकार्थत्वादनुभवन्त आभियोग्यं-कर्म्मकरभावं उपस्थिताः-प्राप्ता इति ।।९.२.५।।

**तहेव सुविणीयप्पा, उववज्झा हया गया ।**
**दीसंति सुहमेहंता, इड्ढिं पत्ता महायसा ।।९.२.६।।**

**(ति.)** एष्वेव विनयफलमाह—तथैव सुविनीतात्मानः-आरोहचित्तानुवर्त्तिनः । औपवाह्याः-राजादिवाह्याः। हया गजा दृश्यन्ते । सुखमेधमानाः-सुखं यथा भवति एवं वर्धमानाः । ऋद्धिं प्राप्ताः-विशिष्टभूषणा-ऽऽलय-भोजनादिभाववतः प्राप्तर्द्धयः । महायशसः-विख्याताः । राज-राजन्यादि-वाह्यत्वेन ।।९.२.६।।

**(स.)** एतेष्वेव विनयगुणमाह—तहेव'इति-तथैवैते सुविनीतात्मानो विनयवन्त, आत्मज्ञा, औपवाह्या राजादीनां हया गजा इति पूर्ववत्, एते किम् ?-इत्याह-दृश्यन्त

उपलभ्यन्ते सुखमाह्लादलक्षणमेधमाना अनुभवन्त ऋद्धिं प्राप्ता इति विशिष्टभूषणालय-भोजनादिभावतः प्राप्तर्द्धयो महायशसो विख्यातसद्गुणाः ।।९.२.६।।

**(सु.)** एतेष्वेव विनयगुणमाह—तहेव'इति, तथैव एते सुविनीतात्मानो-विनयवन्त आत्मज्ञा औपवाह्या-राजादीनां हया गजा इति पूर्ववत् । एते किम् ?-इत्याह-दृश्यन्ते-उपलभ्यन्ते, एव सुखं-आह्लादलक्षणं, एधमाना-अनुभवन्तः शुद्धिं प्राप्ता इति विशिष्टभूषणालयभोजनादिभावतः प्राप्तर्द्धयो महायशसो-विख्यातसद्गुणा इति ।।९.२.६।।

**तहेव अविणीयप्पा, लोगंसि[1] नरनारिओ ।**
**दीसंति दुहमेहंता, छाया ते विगलिंदिया ।।९.२.७।।**

**(ति.)** एतदेवाऽविनयफलं मनुष्यान् प्रत्याह—पदत्रयं स्पष्टम् । छागा इव च्छागाः-अवज्ञास्पदं, छाता वा दुर्विनयेन छिन्नाङ्गाः । ते विकलेन्द्रियाः-दृक्-कर्ण-नाशाच्छेदतः ।।९.२.७।।

**(स.)** एतदेव विनयाविनयफलं मनुष्यानधिकृत्याह—तहेव'इति-तथैव तिर्यञ्च इवाविनीतात्मानः पूर्ववत्, लोकेऽस्मिन् मनुष्यलोके, नरनार्य इति प्रकटार्थं, दृश्यन्ते दुःखमेधमानाः पूर्ववत्, छाताः कशाघातव्रणाङ्कितशरीरा विकलेन्द्रिया अपनीतनासिकादीन्द्रियाः, पारदारिकादय इति सूत्रार्थः. ।।९.२.७।।

**(सु.)** एतदेव विनयाविनयफलं मनुष्यानधिकृत्याह—तहेव'इति, तथैव तिर्यञ्च इव अविनीतात्मान इति पूर्ववत् । लोकेऽस्मिन्-मनुष्यलोके, नरनार्य इति प्रकटार्थं, दृश्यन्ते दुःखमेधमाना इति पूर्ववत्, छारा(ताः)-कसघातव्रणाङ्कितशरीराः, विगलितेन्द्रियाः[2]-अपनीतनासिकादीन्द्रियाः, पारदारिकादय इति ।।४२२।।

**दंडसत्था[3]परिज्जुन्ना, असब्भवयणेहिं य ।**
**कलुणा विवन्नछाया[4], खुप्पिवासाइपरिगया ।।९.२.८।।**

१. लोसंसि नरनारिओ । इत्यन्यत्र मुद्रितः पाठभेदः । २. मूलपाठत्वेनात्र 'विगलितेंदिया' इति । ३. अन्यत्र ०सत्थपरि...। खुप्पिवासपरि...। ४. विवन्न छंदा'इत्यपि मुद्रितः पाठः । वृत्तिश्चात्र 'व्यापन्न 'छन्दसः' इत्यनुरूपा, । चूर्णौ 'विवण्णछंदा'

**(ति.)** तथा—दण्ड-शस्त्राभ्यां तदाघातैः । असभ्यवचनैश्च-खरकर्कशादिभिः । परिजूर्णा इव परिजूर्णा दुर्बलीकृताः । करुणाहेतुत्वात् करुणाः-दीनाः । विवर्णछायाः-निःशोभाः। क्षुत्-पिपासाभ्यां परिगताः-कदन्नाल्पप्रायभोजनाः ।।९.२.८।।

**(स.)** दंड...इति-एवंविधाः साधव, इह लोके पूर्वमविनयेन गृहीतानां कर्मणामनुभावे-नैवंभूताः, परलोके तु कुशलस्याप्रवृत्तेर्दुःखिततरा विजायन्ते, कीदृशाः? दण्डा वेत्रदण्डादयः, शस्त्राणि खड्गादीनि, तैः परिजीर्णाः, परि समन्ततो दुर्बलभावमापादिताः, तथा पुनः कीदृशाः ? असभ्यवचनैश्च खर-कर्कशादिभिः परिजीर्णाः, पुनः कीदृशाः ? करुणाः करुणाहेतुत्वात्, पुनः कीदृशाः ? **व्यापन्नछन्दसः परायत्ततया** गतस्वाभिप्रायाः, पुनः किम्भूताः ? क्षुधा बुभुक्षा, पिपासा तृषा, ताभ्यां परिगता व्याप्ताः, अन्नादिनिरोध-स्तोकदानाभ्याम्. ।।९.२.८।।

**(सु.)** तथा—दंड-इति, दण्डा-वेत्रदण्डादयः, शस्त्राणि-खड्गादीनि, ताभ्यां परिजीर्णाः-समन्ततो दुर्बलभावमापादिताः, तथा असभ्यवचनैश्च-खरकर्कशादिभिः परिजीर्णाः, त एवंभूताः सन्तः सतां करुणाहेतुत्वात् करुणा-दीना, **व्यापन्नच्छन्दसः-परायत्ततया** अपेतस्वाभिप्रायाः, क्षुधा-बुभुक्षया पिपासया-तृषा परिगता-व्याप्ता अन्नादिनिरोध—स्तोक दानाभ्यामिति । एवं इह लोके प्रागविनयोपात्तकर्मानुभावत एवंभूताः, परलोके तु कुशलाप्रवृत्तेः दुःखिततरा विज्ञायन्त इति ।।९.२.८।।

**तहेव सुविणीयप्पा, लोगंसि नर-नारिओ ।**
**दीसंति सुहमेहंता, इड्ढिं पत्ता महायसा ।।९.२.९।।**

**(ति.)** विनयफलमाह—[तहेव...इति] स्पष्टः ।।९.२.९।।

**(स.)** अथ विनयफलमाह—तहेव'इति-अस्मिन् लोके नरनार्यस्तथैव विनीततिर्यञ्च इव सुविनीतात्मानो दृश्यन्ते, कीदृश्यो नर-नार्यः ? सुखमेधमानाः ऋद्धिं प्राप्ताः, पुनः कीदृश्यः ? महायशस इति पूर्ववत्, नवरं स्वाराधितगुरुजना उभयलोकसाफल्यकारिण एत इति. ।।९.२.९।।

**(सु.)** विनयफलमाह—तहेव'इति, तथैव विनीततिर्यंच इव सुविनीतात्मानो लोकेऽस्मिन् नरनार्य इति पूर्ववत् । दृश्यन्ते सुखमेधमानाः शुद्धिं प्राप्ता महायशस

इति पूर्ववत्, नवरं स्वाराधितनृप-गुरुजना उभयलोकसाफल्यकारिण एत इति ।।९.२.९।।
एतदेव विनयाविनयफलं देवानधिकृत्याह-

**तहेव अविणीयप्पा, देवा जक्खा य गुज्झगा ।**
**दीसंति दुहमेहंता, आभिओगमुवट्ठिया ।।९.२.१०।।**

**(ति.)** देवानधिकृत्यैतदेवाह—देवाः-वैमानिकाः, ज्योतिष्काः । यक्षाः-व्यन्तराः । गुह्यकाः-भुवनपतयः । आगमचक्षुषा दृश्यन्ते । दुःखमेधमानाः-अनुभवन्तः । अभियोगः आज्ञापूर्वकं कर्मसु नियोजनं सोऽस्यास्तीत्यभियोगी, अभियोगिनो भावः आभियोग्यम् उपस्थिता-दासत्वं प्राप्ताः ।।९.२.१०।।

**(स.)** एतदेवं[1] विनयाऽविनयफलमाह-देवानधिकृत्य—तहेव'इति-तथैव, यथा नरनार्योऽविनीतात्मानः, तथैव जन्मान्तरे अकृतविनया देवा वैमानिका ज्योतिष्का यक्षाश्च व्यन्तराश्च गुह्यका भवनवासिनः, त एते दृश्यन्ते, केन ? आगमभावचक्षुषा, किं कुर्वाणाः ? दुःखमेधमानाः, परेषामाज्ञया परेषाम् ऋद्ध्यादिदर्शनेन च, कीदृशाः सन्तः ? आभियोग्यमुपस्थिताः, अभियोग आज्ञादानलक्षणः, सोऽस्यास्तीत्यभियोगी, तस्य भाव आभियोग्यं कर्मकरभावमुपस्थिताः प्राप्ताः. ।।९.२.१०।।

**(सु.)** एतदेवं[1] विनयाऽविनयफलमाह-देवानधिकृत्य—तहेव'इति, तथैव यथा नरनार्यः अविनीतात्मानो भवान्तरेऽकृतविनया देवा-वैमानिका ज्योतिष्का यक्षाश्च-व्यन्तराश्च गुह्यका-भवनवासिनः, त एते दृश्यन्ते आगमभावचक्षुषा दुःखमेधमानाः-पराज्ञाकरण-परर्द्धिदर्शनादिना, आभियोग्यमुपस्थिताः-अभियोग-आज्ञाप्रदानलक्षणोऽस्यास्तीति अभियोगी, तद्भाव आभियोग्यं, कर्मकर-भावमित्यर्थः, उपस्थिताः-प्राप्ता इति ।।९.२.१०।।

**तहेव सुविणीयप्पा, देवा जक्खा य गुज्झगा ।**
**दीसंति सुहमेहंता, इड्ढिं पत्ता महायसा ।।९.२.११।।**

**(ति.)** विनयफलमाह—स्पष्टः ।।९.२.११।।

**(स.)** अथ विनयफलमाह—तहेव'इति-तथैवैते देवादयः सुविनीतात्मानो जन्मान्तर-

१. एतदेवाऽविनय... इति चेत् ?, साधु । अग्रेतन्याः 'विनयफलमाह' इत्यवतरणिकोक्तेः ।

कृतविनयाः, निरतिचारधर्माराधका इत्यर्थः, दृश्यन्ते सुखमेधमाना महाकल्याणादिषु ऋद्धिं प्राप्ता इति देवाधिपाऽऽदिप्राप्तसमृद्धयो महायशसो विख्यातसद्गुणा इति, एवं नारकान् विना व्यवहारतो येषु स्थानेषु सुखदुःखसम्भवस्तेषु विनयस्याविनयस्य च फलं कथितम्. ।।९.२.११।।

**(सु.)** विनयफलमाह—तहेव'इति, तथैवेति पूर्ववत्, सुविनीतात्मानो जन्मान्तरकृत-विनया निरतिचार-धर्माराधका इत्यर्थः, देवा यक्षाश्च गुह्यका इति पूर्ववदेव, दृश्यन्ते सुखमेधमाना अर्हत्कल्याणकादिषु ऋद्धिं प्राप्ता इति देवाधिपादिप्राप्तर्द्धयो महायशसो-विख्यातसद्गुणा इति । एवं नारकापोहेन व्यवहारतो येषु सुखदुःखसंभवस्तेषु विनयाविनयफलमुक्तम्, ।।९.२.११।।

**जे आयरिय-उवज्झायाणं, सुस्सूसा-वयणंकरा ।**
**तेसिं सिक्खा पवड्ढति, जलसित्ता इव पायवा ।।९.२.१२।।**

**(ति.)** अधुना विशेषतो लोकोत्तरविनयफलमाह—ये आचार्योपाध्याययोः । शुश्रूषा-वचनकराः-शुश्रूषा-वैयावृत्यं, वचनम्-आदेशः, तत्कारिणः, । तेषाम्-पुण्यवताम् । शिक्षा-ग्रहणासेवनारूपाः । प्रवर्धन्ते, जलसिक्ता इव पादपा इति विज्ञाय विनयः कार्यः ।।९.२.१२।।

**(स.)** अथ विशेषतो लोकोत्तरं विनयफलमाह—जे'इति-ये सुशिष्या आचार्याणा-मुपाध्यायानां च शुश्रूषा-वचनकराः पूजाप्रधानं यद्वचनं तस्य करणे तत्परा भवन्ति, तेषां पुण्यवतां शिक्षा ग्रहणा-सेवनारूपा भावार्थरूपाः प्रवर्धन्ते वृद्धिं यान्ति, दृष्टान्तमाह-जलसिक्ता यथा पादपा वृक्षाः. ।।९.२.१२।।

**(सु.)** अधुना विशेषतो लोकोत्तरविनयफलमाह—जे आयरिय...इति, ये आचार्योपाध्याययोः-प्रतीतयोः, शुश्रूषा-वचनकराः-पूजाप्रधानवचनकरणशीलाः, तेषां पुण्यभाजां शिक्षा-ग्रहणासेवनालक्षणा भावार्थरूपाः प्रवर्द्धन्ते-वृद्धिमुपयान्ति, दृष्टान्तमाह-जलसिक्ता इव पादपा-वृक्षा इति ।।९.२.१२।।

**अप्पणट्ठा परट्ठा वा, सिप्पा नेउणियाणि य ।**
**गिहिणो उवभोगट्ठा, इहलोगस्स कारणा ।।९.२.१३।।**

**(ति.)** इहलोकार्थिनोऽपि लोका गुरुविनयं कुर्वतो दृश्यन्ते इत्याह—आत्मार्थम्-आत्मनो जीविकार्थम् । परार्थम्-इदं शिक्षितं सन् पुत्रादिकं शिक्षयिष्ये । शिल्पानि-कुम्भादिकरणानि । नैपुण्यानि-लेख्यादिकलाकरणानि । गृहिण उपभोगार्थम्-अन्नपानोपभोगाय । इहलोकस्य कारणेन शिक्षन्ते ।।९.२.१३।।

**(स.)** एवं मनस्यानीय साधुभिर्विनयः कार्य, इत्याह—अप्पणट्ठा'इति-ये गृहिणोऽसंयता इहलोकस्य कारणमिहलोकनिमित्तमिति, उपभोगार्थमन्नपानादिभोगाय, शिक्षन्त इति शेषः. किमर्थम् ? आत्मार्थमात्मनिमित्तम्, अनेन ममाजीविका भविष्यति'इत्येवं, परार्थं वा परनिमित्तं वा पुत्रं'अहमेतद् ग्राहयिष्यामि'इत्येवं शिल्पानि कुम्भकारक्रियादीनि, नैपुण्यानि च लेखादिकलालक्षणानि. ।।९.२.१३।।

**(सु.)** एतच्च मनस्याधाय विनयः कार्यः, इत्याह—अप्पणट्ठा'इति, आत्मार्थं-आत्मनिमित्तं, 'अनेन मे जीविका भविष्यति'इत्येवं, परार्थं वा-परनिमित्तं वा 'पुत्रमहमेतद् ग्राहयिष्यामि'इत्येवं, शिल्पानि-कुम्भकारक्रियादीनि नैपुण्यानि च-आलेख्यादिकला-लक्षणानि, गृहिणः-असंयताः, उपभोगार्थं-अन्नपानादिभोगाय, शिक्षन्त इति वाक्यशेषः, इहलोकस्य कारणं-इहलोकनिमित्तमिति ।।९.२.१३।।

**जेण बंधं वहं घोरं, परियावं च दारुणं ।**
**सिक्खमाणा नियच्छंति, जुत्ता ते ललिइंदिया ।।९.२.१४।।**

**(ति.)** येन-इति द्वितीयार्थे तृतीया, यत् शिल्पादिकं शिक्षमाणाः । बन्धम्-दवरकादिना । व्य(व)धम्-कम्ब्यादिना । घोरम्-तीव्रम् । परितापं च दारुणम्-निर्भर्त्सनादिवचनजनितं गुरोः सकाशात् । नियच्छन्ति-अनेकार्थत्वात् प्राप्नुवन्ति युक्ताः-शिल्पादिग्रहणे नियुक्ताः । ते ललितेन्द्रियाः-गर्भेश्वराः, राजपुत्रादयः ।।९.२.१४।।

**(स.)** जेण'इति-येन शिल्पादिना शिक्ष्यमाणेन, बन्धं निगडादिभिः, वधं कशादिभिः, घोरं रौद्रं, परितापं च दारुणमेतज्जनितं निर्भर्त्सनादिवचनं शिक्षमाणा गुरोः सकाशान्नियच्छन्ति प्राप्नुवन्ति, युक्ता इति नियुक्ताः शिल्पादिग्रहणे ते ललितेन्द्रिया लीलागर्भेश्वरा राजपुत्रादयः. ।।९.२.१४।।

**(सु.)** जेण'...इति, येन-शिल्पादिना शिक्ष्यमाणेन, बन्धं-निगडादिभिः, वधं कषादिभिर्घोरं-रौद्रं परितापं च, दारुणं-एतज्जनितमनिष्टं निर्भर्त्सनादिवचनजनितं च, शिक्षमाणा गुरोः सकाशात् नियच्छन्ति-प्राप्नुवन्ति, युक्ता, इति-नियुक्ताः शिल्पादिग्रहणे

ते ललितेन्द्रिया-गर्भेश्वरा राजपुत्रादय इति ।।९.२.१४।।

**ते वि तं गुरुं पूइंति, तस्स सिप्पस्स कारणा ।**
**सक्कारंति नमंसंति, तुट्ठा निद्देसवित्तिणो ।।९.२.१५।।**

**(ति.)** तेऽपि तं गुरुम्-बन्धादिकारकमपि । पूजयन्ति-पूजावचनैः । तस्य शिल्पस्य कारणात् । सत्कारयन्ति-वस्त्रादिभिः । नमस्यन्ति-पादयोर्लगित्वा । तुष्टाः-हृष्टाः । निर्देशवर्त्तिनः-तदाज्ञाकारिणः ।।९.२.१५।।

**(स.)** तेवि'इति-तेऽपि पुरुषाः शिक्षमाणाः, तमित्वरमपि गुरुं बन्धादिकारकमपि पूजयन्ति सामान्यतो मधुरवचनाभिनन्दनेन, किमर्थं तस्य शिल्पस्य कारणात्, तन्निमित्तमिति भावः । पुनस्तं गुरुं ते सत्कारयन्ति वस्त्रादिना, पुनस्तं गुरुं नमस्यन्ति अञ्जलि-प्रग्रहणादिना, किम्भूतास्ते ? तुष्टा इति, अमुत इदमवाप्यत इति तुष्टाः, पुनः किम्भूतास्ते ? निर्देशवर्तिन आज्ञाकारिणः इति. ।।९.२.१५।।

**(सु.)** तेऽवि तं'इति, तेऽपि इत्वरं शिल्पादि शिक्षमाणाः, तं गुरुं बन्धादिकारकमपि पूजयन्ति-सामान्यतो मधुरवचनाभिनन्दनेन तस्य शिल्पस्येत्वरस्य कारणात्, तन्निमित्तत्वादिति भावः, तथा सत्कारयन्ति वस्त्रादिना, नमस्यन्ति अञ्जलिग्रहणादिना। तुष्टा इत्यमुत इदमवाप्यत इति हृष्टा, निर्देशवर्तिनः-आज्ञाकारिण इति ।।९.२.१५।।

**किं पुण(णो) जे सुयग्गाही, अणंतहियकामए ।**
**आयरिया जं वए भिक्खू, तम्हा तं नाइवत्तए ।।९.२.१६।।**

**(ति.)** यदि तावदेतेऽपि तं गुरुं पूजयन्ति, ततः–किं पुनर्यः श्रुतग्राही । अनन्तहितकामकः-अनन्तकालं हितो मोक्षोऽनन्तहितः, तं कामयते यः सः, तथा तेन सुतरां पूज्या गुरवः । तस्माद् आचार्याः यद् वदन्ति । तद् भिक्षुः-साधुः । नातिवर्तयेत्-नोल्लङ्घयेत् ।।९.२.१६।।

**(स.)** किं'इति यदि तावदेतेऽपि, तं गुरुं पूजयन्ति, तदा यः साधुर्मोक्षवाच्छकः, तेन तु गुरवो विशेषतः पूजनीया इत्याह, किं पुनः ? यः साधुः श्रुतग्राही परमपुरुषप्रणीतस्यागमस्य ग्रहणेऽभिलाषी. पुनर्योऽनन्तहितकामुकः[1], मोक्षं यः कामयत

१. अनन्तकालं हितः - अनन्तहितः, मोक्ष इत्यर्थः ।

इत्यभिप्रायः, तेन तु गुरवः सुतरां पूजनीया इति. यतश्चैवं ?-अत आचार्या यत् किमपि वदन्ति तथा तथानेकप्रकारम्, भिक्षुः साधुस्तस्मात् तदाचार्यवचनं नातिवर्तयेद् युक्तत्वात् सर्वमेव सम्पादयेदिति. ।।९.२.१६।।

**(सु.)** यदि तावदेतेऽपि तं गुरुं पूजयन्ति, अतः किं पुणं'ति, किं पुनः यः-साधुः, श्रुतग्राही-परमपुरुषप्रणीतागमग्रहणाभिलाषी, अनन्तहितकामुको-मोक्षं यः कामयत इत्यभिप्रायः, तेन तु सुतरां गुरवः पूजनीया इति, यतश्चैवम् ? आचार्या यद् वदन्ति किमपि तथाऽनेकप्रकारं, भिक्षुः-साधुः, तस्मात् तदाचार्यवचनं नातिवर्त्तयेत् युक्तत्वात्सर्वमेव सम्पादयेदिति ।।९.२.१६।।

**नीयं सिज्जं गइं ठाणं, नीयं च आसणाणि य ।**
**नीयं च पाए वंदिज्जा, नीयं कुज्जा य अंजलिं ।।९.२.१७।।**

**(ति.)** गुरुं प्रति विनयविधिमाह—नीचां शय्यां च-आचार्यशय्यातः । नीचां गतिम्-आचार्यगतेः, तत्पृष्ठतो नातिदूरेण नातिद्रुतं यायात् । एवं नीचं स्थानम् । नीचान्यासनानि च । नीचैश्च-अवनतोत्तमाङ्गः । पादौ गुरोः वन्देत । कदाचिद् गुरुणोक्तः 'एवं करोमीति भणन् नीचं शिरसि अञ्जलिं कुर्यात् ।।९.२.१७।।

**(स.)** अथ विनयस्योपायमाह—नीअं'इति-साधुर्गुरोः सकाशाच्छय्यां संस्तारकलक्षणां नीचां कुर्यात्, इत्युक्तिः, एवं साधुराचार्यगतेः सकाशात् स्वकीयां गतिं नीचां कुर्यात्, तस्य गुरोः पृष्ठतो नातिदूरेण नातिशीघ्रं यायादित्यर्थः, एवं स्थानं-यत्र स्थान आचार्य आस्ते, तस्मात् स्थानान्नीचं नीचतरे स्थाने स्थातव्यमिति भावः । पुनर्नीचानि लघुतराणि कदाचित् कारणजात आसनानि पीठकादीनि, तस्मिन्नुपविष्टे तदनुज्ञातः सन् सेवेत, नान्यथा. तथा नीचं च सम्यगवनतमस्तकः सन्नाचार्यस्य पादौ वन्दते नावज्ञया, तथा क्वचित् प्रश्नादौ नीचं नम्रकायं कुर्याच्च सम्पादयेच्चाञ्जलिं, न स्थाणुवत् स्तब्ध एवेति. ।।९.२.१७।।

**(सु.)** विनयोपायमाह—नीयं...इति, नीचां शय्यां-संस्तारकलक्षणामाचार्यशय्यायाः सकाशात् कुर्यादितियोगः, एवं नीचां गतिमाचार्यगतेस्तत्पृष्ठतो नातिदूरेण नातिद्रुतं यायादित्यर्थः, एवं नीचं स्थानमाचार्यस्थानाद्, यत्राचार्य आस्ते, तस्मान्नीचतरे स्थाने स्थातव्यमितिभावः। तथा नीचानि-लघुतराणि कदाचित् कारणजाते आसनानि-पीठकानि

तस्मिन्नुपविष्टे तदनुज्ञातः सेवेत, नान्यथा, तथा नीचं च-सम्यगवनतोत्तमाङ्गः सन्, पादावाचार्यसत्कौ वन्देत, नावज्ञया तथा क्वचित् प्रश्नादौ नीचं-नम्रकायं कुर्याच्च सम्पादयेच्चाञ्जलिं, न तु स्थाणुवत् स्तब्ध एवेति ।।९.२.१७।।

**संघट्टइत्ता काएणं, तहा उवहिणामवि ।**
**खमेह अवराहं मे, वइज्ज न पुण(णो) त्ति य ।।९.२.१८।।**

**(ति.)** एवं कायविनयमुक्त्वा कायवाग्विनयमाह—कायेन-हस्तपादादिना । तथा। उपधिना-कल्पादिना । आचार्यम् उपविष्टं सङ्घट्य-स्पृष्ट्वा । 'मिथ्यादुःकृत' दानपुरःसरमभिवन्द्य, क्षमस्व मम मन्दभाग्यस्य । अपराद्धं, न पुनः एतत् कारिष्यामीति वदेत् ।।९.२.१८।।

**(स.)** अथ कायविनयं कथयित्वा, वचनविनयमाहं—संघट्ट...इति-साधुर्गुरुं प्रति मिथ्यादुष्कृतपुरःसरमभिवन्द्यैवं वदेत्, न पुनरिति, न चाहमेवं भूयः करिष्यामीति. एवं किमित्याह-हे गुरो ! मम मन्दभाग्यस्यापराधं दोषं क्षमस्व सहस्व ? किं कृत्वा ? कायेन देहेन कथञ्चित् तथाविधे प्रदेश उपविष्टं गुरुं सङ्घट्ट्य स्पृष्ट्वा, पुनरुपाधिनापि कल्पादिनापि कथञ्चित् सङ्घट्ट्य. ।।९.२.१८।।

**(सु.)** एवं कायविनयमभिधाय वाग्विनयमाह—संघट्टइ..इति, संघट्ट्य-स्पृष्ट्वा, कायेन-देहेन कथञ्चित् तथाविधप्रदेशोपविष्टमाचार्यं, तथोपधिनापि-कल्पादिना कथञ्चित् संघट्ट्य मिथ्यादुष्कृतपुरस्सरमभिवन्द्य क्षमस्व-सहस्वापराधं-दोषं, मे मन्दभाग्यस्यैवं वदेत्-ब्रूयात्, न पुनरिति न चाहमेनं भूयः करिष्यामीति ।।९.२.१८।।

**दुग्गओ वा पओएणं, चोइओ वहई रहं ।**
**एवं दुबुद्धि किच्चाणं, वुत्तो वुत्तो पकुव्वई ।।९.२.१९।।**

**(ति.)** एतच्च विज्ञः स्वयमेव करोति । अज्ञस्तु कथमित्याह—दुर्गौरिव-गलिबलीवर्दवत । प्रतोदेन-तोत्रेण । नोदितः विद्धः सन् । वहति । रथम्-शकटम् । एवं दुर्बुद्धिः-शिष्यः । कृत्यानाम्-आचार्याणां कार्याणि । उक्त उक्तः करोति ।।९.२.१९।।

**(स.)** एवं सर्वं बुद्धिमान् स्वयमेव करोति, तदन्य स्तु कथम् ?-इत्याह—दुग्ग...इति-

दुर्गौरिव गलिबलीवर्दवत् प्रतोदेनारादण्डलक्षणेन चोदितः प्रेरितो विद्धः सन्, वहति क्वापि नयति रथम्, एवं दुर्गौरिव दुर्बुद्धिः शिष्यः कृत्यानामाचार्यादीनां कृत्यानि वा तदभिरुचितकार्याणि उक्त उक्तः पुनः पुनरभिहित इत्यर्थः, प्रकरोति निष्पादयति प्रयुङ्क्ते चेति. ।।९.२.१९।।

**(सु.)** एतच्च सर्वं बुद्धिमान् स्वयमेव करोति, तद् अन्यस्तु कथम् ?-इत्याह-दुग्गओ वा...इति, दुर्गौरिव-गलिबलीवर्द्दवत्, प्रतोदेन-आरादण्डलक्षणेन चोदितो-विद्धः सन् वहति-नयति क्वापि, रथं प्रतीतं, एव दुग्गौरिव दुर्बुद्धिः-अहितावहबुद्धिः शिष्यः, कृत्यानां आचार्यादीनां, कृत्यानि वा तदभिरुचितकार्याणि, उक्त उक्तः-पुनः पुनरभिहित इत्यर्थः, प्रकरोति-निष्पादयति प्रयुङ्क्ते चेति ।।९.२.१९।।

**कालं छंदोवयारं च, पडिलेहित्ता ण हेउहिं ।**
**तेहिं तेहिं उवाएहिं, तं तं संपडिवायए ।।९.२.२०।।**

**(ति.)** एवं कृतान्यपि न शोभनानि, अतः—कालम्-शरदादिकम् । छन्दम्-इच्छारूपम । उपचारम्-आराधनाप्रकारम्। चकारात्-अनूपदेशादिकम् । प्रत्युपेक्ष्य-ज्ञात्वा । हेतुभिः-कारणैः, श्लेष्मादिभिः । तैस्तैरुपायैः-गृहस्थावर्जनया । तत्तत्-श्लेष्मादिहरमशनादि । सम्प्रतिपादयेत् ।।९.२.२०।।

**(स.)** [1] एवं च कृतान्यप्यमूनि न शोभनानीत्यत आह-कालं...इति-साधुस्तत्तत्पित्त-हरादिरूपमशनादि गुरोः सम्प्रतिपादयेदुपानयेत्, केन केन? तेन तेनोपायेन गृहस्थानामा वर्जनादिना, किं कृत्वा ? कालं शरदादिलक्षणं, छन्दस्तस्येच्छारूपमुपचार-माराधनाप्रकारम्, चशब्दाद् देशादिकम्, एतत्प्रत्युपेक्ष्य ज्ञात्वा, कैः ? हेतुभिर्यथानुरूपैः कारणैः, तथा काले शरदादौ पित्तहरादि भोजनं, शय्या प्रवातनिवातादिरूपा, इच्छानुलोमं वा यद् यस्य हितं रोचते चाराधनाप्रकारोऽनुलोमभाषण-ग्रन्थाभ्यास-वैयावृत्त्यकरणादिः, देशेऽनूपदेशादीनामुचितं निष्ठीवनादिभिर्हेतुभिः श्लेष्माद्याधिक्यं विज्ञाय तदुचितं सम्पादयेदिति. ।।९.२.२०।।

---

१. इयं क्षेपकगाथा दीपिकासंवलितमूलपुस्तक उपलब्धा [दृश्यतां उत्तराध्ययन-१.२१]

**आलवंते लवंते वा, निसिज्जाइ पडिस्सुणे । मुत्तूण आसणं धीरो, सुस्सूसाहए पडिस्सुणे ।। ।।**

(स) आलवन्त इति-पुनराचार्यः शिष्यं प्रत्येकवारं वक्ति, अथवा पुनः पुनर्वक्ति, तदा स शिष्य आत्मन आसने स्थित एव वचनं श्रुत्वा नोत्तरं ददाति, किं करोति ? आत्मन आसनं मुक्त्वा स शिष्यो विनयेन द्वौ हस्तौ सम्मील्योत्तरं ददाति, कथम्भूतः सः ? धीरो बुद्धिमान्.

(सु.) एवं च कृतान्यप्यमूनि न शोभनानि, अत आह—कालं...इति, कालं-शरदादिलक्षणं, छन्दस्तदिच्छारूपं, उपचारं-आराधनाप्रकारं, चशब्दाद् देशादिपरिग्रहः, एतत् प्रत्युपेक्ष्य-ज्ञात्वा हेतुभिः-यथानुरूपैः कारणैः, किम् ?-इत्याह-तेन तेनोपायेन-गृहस्थाऽऽवर्ज्जनादिना, तत् तत् पित्तहरादिरूपमशनादि सम्प्रतिपादयेत्, यथा कालेऽपि शरदादौ पित्तहरादिभोजनं, प्रवात-निवातादिरूपा शय्या, इच्छानुलोमं वा यद् यस्य हितं रोचते च आराधनाप्रकारोऽनुलोमं भाषणं ग्रन्थाभ्यास-वैयावृत्त्यकरणादि, देशे(? देशः) अनूपदेशाद्युचितं, निष्ठीवनादिभिर्हेतुभिः श्लेष्माद्याधिक्यं विज्ञाय तदुचितं सम्पादयेदिति ।।९.२.२०।।

**विवत्ती अविणीयस्य, संपत्ती विणीयस्स य ।**
**जस्सेयं दुहओ नायं, सिक्खं से अभिगच्छई ।।९.२.२१।।**

(ति.) किञ्च—विपत्तिरविनीतस्य-ज्ञानादिगुणानाम् । सम्पत्तिर्विनीतस्य-ज्ञानादिगुणानामेव। यस्यैतदुभयतः-अविनय-विनयाभ्यां सकाशात् ज्ञानाद्यप्राप्ति-प्राप्ती स्यातामिति । ज्ञातम्-भवति । स शिक्षाम्-ग्रहणासेवनारूपाम् । अभिगच्छति-प्राप्नोति ।।९.२.२१।।

(स.) विवत्ती'इति-पुनः प्राह-अविनीतस्य शिष्यस्य ज्ञानादिगुणानां विपत्तिर्भवति, विनीतस्य च शिष्यस्य ज्ञानादिगुणानां सम्प्राप्तिर्भवति, यस्यैतद् ज्ञानादि-प्राप्त्यप्राप्तिरूपं ज्ञानाद्यधिगच्छति प्राप्नोति, भावत उपादेयं ज्ञानादि-इति ।।९.२.२१।।

(सु.) किञ्च—विवत्ती...इति, विपत्तिरविनीतस्य ज्ञानादिगुणानां, संप्राप्तिर्विनीतस्य च ज्ञानादि-गुणानामेव, यस्यैतत्-ज्ञानादिप्राप्त्यप्राप्तिद्वयं, उभयत-उभयाभ्यां विनया-ऽविनयाभ्यां सकाशाद् भवतीत्येवं ज्ञातं-उपादेयं चैतदिति भवति, शिक्षां-ग्रहणासेवनारूपामसावित्थंभूतो-ऽभिगच्छति-प्राप्नोति, भावत उपादेयपरिज्ञानादिति ।।९.२.२१।।

**जे यावि चंडे मइ-इड्ढिगारवे, पिसुणे नरे साहसहीणपेसणे ।**
**अदिट्ठधम्मे विणए अकोविए, असंविभागी न हु तस्स मुक्खो ।।९.२.२२।।**

(ति.) एतदेव दृढयन्नविनीतफलमाह—यश्चापि-प्रव्रजितोऽपि । रोषणः ।

ऋद्धिगारवमतिः । पिशुनः-पृष्ठमांस-खादकः। नरः-नरव्यञ्जनं क्लीबप्रायः । साहसिकः-अकृत्यकरणपरः । हीनप्रेषणः-प्रेषणे हीनः, अकिञ्चित्करः । अदृष्टधर्मा-सम्यगज्ञातधर्मा। विनये अकोविदः । असंविभागी-यत्र क्वचनलाभे सति न संविभागवान् । च इत्थंभूतोऽधर्मः, तस्य न मोक्षः ।।९.२.२२।।

**(स.)** अथैतदेव दृढयन्नविनीतस्य फलमाह—जे'इति-एवंविधस्य साधोर्मोक्षो नास्ति, कथं ? सम्यग्दृष्टेश्चारित्रवत इत्थंविध-सङ्क्लेशस्याभावात्, एवंविधस्य कस्य ? यश्चापि चण्डः प्रव्रजितोऽपि रोषणः, पुनर्यो मतिऋद्धिगारव इति, ऋद्धिगौरवमतिः, ऋद्धिगौरवेऽभिनिविष्टः, पुनर्यः पिशुनः पृष्ठिमांस-खादकः, नरो नरव्यञ्जनको न भावनरः, पुनर्यः साहसिकोऽकृत्यकरणपरः, पुनर्यो हीनगुर्वाज्ञाकरः, पुनर्योऽदृष्टधर्मा, सम्यगनुपलब्धश्रुतादिधर्मा, पुनर्विनयेऽकोविदो विनयविषयेऽपण्डितः, पुनर्योऽसंविभागी, यत्र कुत्रापि लाभे न संविभागवान्. य इत्थंभूतस्तस्य न मोक्षः. ।।९.२.२२।।

**(सु.)** एतदेवदृढयन्नविनीतफलमाह—जे यावि...इति, यश्चापि चण्डः प्रव्रजितोऽपि यो रोषणः, मति-ऋद्धिगौरव इति ऋद्धिगौरव-मतिगौरवे अभिनिविष्टः, पिशुनः-पृष्ठिमांसखादको, नरो-नरव्यञ्जनो न भावनरः, साहसिकः-अकृत्यकरणपरः, हीनप्रेषणो-हीनगुर्वाज्ञापरः, अदृष्टधर्म्मा-सम्यगनुपलब्धश्रुतादिधर्मा विनयेऽकोविदो-विनयविषयेऽपण्डितः, असंविभागी-यत्र क्वचन लाभे न संविभागवान्, य इत्थंभूतोऽधमो, नैव तस्य मोक्षः, सम्यग्दृष्टेश्चारित्रवत इत्थंविधसंक्लेशाभावादिति ।।९.२.२२।।

**निद्दंसवित्ती[1] पुण जे गुरूणं, सुयत्थधम्मा विणयम्मि कोविया ।**
**तरित्तु ते ओघमिणं दुरुत्तरं, खवित्तु कम्मं गइमुत्तमं गय, त्ति बेमि ।।९.२.२३।।**

**(ति.)** विनयफलाभिधानेनोपसंहरन्नाह—निर्देशवर्त्तिनः पुनर्ये गुरूणां, श्रुतधर्मार्थाः, विनये च कर्तव्ये कोविदाः तीर्त्वा ते । एनं ओघम्-भवाब्धिप्रवाहम् । दुरुत्तरम् । केवलित्वं प्राप्य । क्षपयित्वा भवोपग्राहि कर्म । गतिमुत्तमाम्-सिद्ध्याख्याम् । गता । इति ब्रवीमि इति पूर्ववत् ।।९.२.२३।।

**।। श्रीतिलकाचार्यटीकायां विनयसमाधौ द्वितीयोद्देशकः समाप्तः ।।**

---

१.'(ति) टीकायामत्र 'निर्देशवर्त्तिनः इत्यर्थो विहितः, (सु) टीकायां तु - मूलपाठः 'निद्देसवित्ती' अस्त्यपि, किंतु सङ्केत स्तत्र 'निद्देसवत्ती' अस्ति, विवृत्तमपि (ति) टीकावत् 'निर्देशवत्तिनः' इति । चूर्णिपाठः 'निद्देवत्ती' इति.

**(स.)** अथ विनयफलस्य नाम्ना उपसंहरन्नाह—निद्देस...इति-एवंविधास्ते साधव उत्तमां गतिं सिद्धिं गताः, किं कृत्वा ? कर्म निरवशेषं समस्तं भवोपग्राहिनामकं क्षपयित्वा, पुनः किं कृत्वा ? एनमुदधिं प्रत्यक्षोपलभ्यमानं संसारसमुद्रं, दुरुत्तारं तीर्त्वा, चरमभवं केवलित्वं च प्राप्येति भावः. ब्रवीमीति पूर्ववत्. ।।९.२.२३।।

**इति श्रीदशवैकालिके शब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां विनयसमाध्या-ख्यनवमाध्ययने द्वितीयोद्देशः समाप्तः. ।।२।।**

**(सु.)** विनयफलाभिधानोपसंहरन्नाह—णिद्देसवत्ती'इति, निर्द्देशवर्त्तिनः-आज्ञावर्त्तिनः, पुनर्ये गुरूणां-आचार्यादीनां श्रुतार्थधर्म्मा इति प्राकृतशैल्या, श्रुतधर्मार्था गीतार्था इत्यर्थः, विनये कर्त्तव्ये कोविदा-विपश्चितः, य इत्थंभूतास्तीर्त्वा, ते महासत्त्वा ओघमेनं-प्रत्यक्षोपलभ्यमानं संसारसमुद्रं दुरुत्तारं तीर्त्त्वेव तीर्त्वा, चरमभवं केवलित्वं च प्राप्येतिभावः, ततः क्षपयित्वा कर्म निरवशेषं भवोपग्राहिसंज्ञितं, गतिमुत्तमां सिद्ध्याख्यां गताः-प्राप्ताः ।।४३८।। इति ब्रवीमीति पूर्ववत् ।

**सुमति० वृत्तौ विनयसमाधौ व्याख्यातो द्वितीय उद्देशकः ९-२।।**

## ।। विनयसमाध्यध्ययने तृतीयोद्देशकः ।।

**आयरियमग्गिमिवाहियग्गी, सुस्सूसमाणो पडिजागरिज्जा ।**
**आलोइय इंगियमेव नच्चा, जो छंदमाराहयई स पुज्जो ।।९.३.१।।**

**(ति.)** इह च विनीतः पूज्य इति दर्शयन्नाह—यथा अग्निम् । आहिताग्निः-ब्राह्मणः । शुश्रूषमाणः-इन्धनादिक्षेपेण । प्रतिजागर्ति-विध्यायन्तं रक्षति । एवं साधुः। आचार्यं शुश्रूषमाणः-सम्यक् सेवमानः । प्रतिजागृयात्-तत्कृत्यसम्पादनेनोपचरेत् ।

आह परः-प्रागप्येतदुक्तं, किं पुनरिदम् ? —

सत्यम्, प्रागाचार्यमेवाश्रित्योक्तम् । इह तु रत्नाधिकमप्यधिकृत्योच्यते । वक्ष्यति च । "रायणीएसु विणयं पउंजे" [दशवै. ९.३.३]

प्रतिजागरणं चैवम्-आलोकितम्-निरीक्षितम् । इङ्गितम्-चेष्टितम् । आचार्यीयं ज्ञात्वा । यश्छन्दम्-अभिप्रायम् । आराधयति-शीते पतति प्रावरणालोकने तदानयति। इङ्गिते निष्ठीवनादौ शुण्ठ्याद्यानयति । स पूज्यः ।।९.३.१।।

**(स.)** आयरि'इति-अथ तृतीय आरभ्यते, इह च विनीतः पूज्यो भवेदिति दर्शयन्नाह-यः साधुराचार्यं सूत्रार्थप्रदं, तत्स्थानीयं चान्यं ज्येष्ठार्यं रत्नाधिकं वा प्रतिजागृयात्, तत्तत्कार्यसंपादनेनोपचरेत्, कः कामिव[1] ? आहिताग्निर्ब्राह्मणोऽग्निमिव, किं कुर्वाणः साधुः आहिताग्निर्ब्राह्मणश्च ? शुश्रूषमाणः, सम्यक्सेवमानः प्रतिजागरमाणश्च, उपाय—माह-पुनर्यः साधुराचार्यादीनामवलोकितं वीक्षितमिङ्गितमेव चान्यथावृत्ति-लक्षणं ज्ञात्वा छन्दोऽभिप्रायमाचार्यादीनां विज्ञायाराधयति, कथमाराधयेत् ?-इत्याह-शीते पतति सति प्रावरणावलोकने तस्यानयनेन, तथेङ्गिते च निष्ठीवनादिलक्षणे जाते सति शुण्ठ्यादीनामानयनेनैवं कुर्यात्, स इत्थम्भूतः साधुः पूज्यः पूजार्हः कल्याणभागिति. ।।९.३.१।।

**(सु.)** साम्प्रतं तृतीय [उद्देशकः] आरभ्यते, इह च विनीतः पूज्य इत्युपदर्शयन्नाह—आयरियं...इति, आचार्यं-सूत्रार्थप्रदं, तत्स्थानीयं वाऽन्यं ज्येष्ठार्यं, किम् ?-इत्याह-अग्निमिव-तेजस्कायमिव, आहिताग्निः-ब्राह्मणः, सुश्रूषयन्-सम्यक् सेवमानः,

---

१. 'कं इव - इति साधुः पाठः ।

प्रतिजागृयात्, तत्-तत् कृत्यसम्पादनेनोपचरेत् । आह—यथाऽऽहिताग्निः'इत्यादिना प्रागिदमुक्तमेव, सत्यं, किं तु तदाचार्यमेवाङ्गीकृत्य, इदं तु रत्नाधिकमप्यधिकृत्योच्यते, वक्ष्यति च-"रायणिएसु विणयं'[९.३.३]इत्यादि" त्यादि, प्रतिजागरणोपायमाह—अवलोकितं-निरीक्षितं, इङ्गितमेव च-अन्यथावृत्तिलक्षणं, ज्ञात्वा-विज्ञायाचार्यीयं, यः-साधुः छन्दः-अभिप्रायमाराधयति । यथा शीते पतति प्रावरणावलोकने तदानयने, इङ्गिते वा निष्ठीवनादिलक्षणे शुण्ठ्याद्यानयनेन, स पूज्यः स इत्थंभूतः साधुः पूजार्हः-कल्याणभागिति ।।९.३.१।।

**आयारमट्ठा विणयं पउंजे, सुस्सूसमाणो परिगिज्झ वक्कं ।**
**जहोवइट्ठं अभिकंखमाणो, गुरुं तु नासाययई स पुज्जो ।।९.३.२।।**

**(ति.)** प्रक्रान्तमेवाह—आचारार्थम्-ज्ञानाचारनिमित्तम् । विनयं प्रयुङ्क्ते । शुश्रूषमाणः-'किमयं वक्ष्यति'इति श्रोतुमिच्छन् । तदुक्तं वाक्यं परिगृह्य । यथोपदिष्टम् अभिकाङ्क्षन्-अनेकार्थत्वात् कर्तुमिच्छन् । यो गुरुं नाशातयति-न हीलयति । स पूज्यः ।।९.३.२।।

**(स.)** पुनः प्रक्रान्ताधिकार एवाह—आयार...इति-यः साधुराचारार्थं ज्ञानादीनामाचाराणां निमित्तं विनयं पूर्वोक्तं प्रयुङ्क्ते करोति, किं कुर्वाणः ? शुश्रूषमाणः श्रोतुमिच्छन्, किमयं गुरुर्वक्ष्यति'एवं, ततस्तेन गुरुणोक्ते सति वाक्यमाचार्यादिकथितं परिगृह्य, ततो यथोपदिष्टं, यथा गुरुणोक्तं तथाभिकाङ्क्षन् मायारहितः श्रद्धया कर्तुमिच्छन् सन् विनयं करोति, परं ततोऽन्यथाकरणेन गुरुं नाशातयति न हीलयति, स पूज्यः ।।९.३.२।।

**(सु.)** प्रक्रन्ताधिकार एवाह—आयार...इति, आचारार्थं-ज्ञानाद्याचारनिमित्तं, विनयं-उक्तलक्षणं प्रयुङ्क्ते-करोति यः सुश्रूषन्-श्रोतुमिच्छन्, किमयं वक्ष्यतीत्येवं, तदनु तेनोक्ते सति परिगृह्य वाक्यमाचार्यीयं, ततश्च यथोपदिष्टं-यथोक्तमेवाभिकाङ्क्षन्, मायारहितः श्रद्ध्या कर्त्तुमिच्छन् सन्, विनयं प्रयुङ्क्ते, अतोऽन्यथाकरणेन गुरुं तु'इति, आचार्यमेव नाशातयति-न हीलयति यः, स पूज्य इति ।।९.३.२।।

**रायणिएसु विणयं पउंजे, डहरा वि य जे परियायजिट्ठा ।**
**नीयत्तणे वट्टइ सच्चवाई, उवायवं वक्ककरे स पुज्जो ।।९.३.३।।**

(ति.) किंच—रात्निकेषु-ज्ञानादिरत्नैरभ्यर्चितेषु । विनयं प्रयुङ्क्ते । डहरा अपि ये पर्यायज्येष्ठाः-चिरप्रव्रजिताः, तेषु वा । तथा एतान् गुणाधिकान् प्रति नीचत्वे यो वर्त्तते । सत्यवादी-अविरुद्धवक्ता । अवपातवान्-नमनशीलः । वाक्यकरः-गुर्वादेशकरः। यः स पूज्यः ।।९.३.३।।

(स.) रायणि...इति-पुनः किञ्च यः साधू रत्नाधिकेषु भावरत्नैर्ज्ञानादिभिरधिकेषु विनयं पूर्वोक्तं प्रयुङ्क्ते करोति, तथा डहरा अपि च ये वयसा श्रुतेन च ज्येष्ठाः, पुनर्ये पर्यायज्येष्ठाश्चिरप्रव्रजिताः, तेषु च यो विनयं प्रयुङ्क्ते, एवं यो नीचत्वे गुणाधिकान् प्रति नीचभावे वर्तते, पुनर्योऽपि सत्यवाद्यविरुद्धवक्ता, तथावपातवान् वन्दनाशीलो निकटवर्ती वा, पुनर्यो वाक्यकरो गुरोर्निर्देशकरणशीलः, स पूज्यः. ।।९.३.३।।

(सु.) किञ्च—राइणिए...इति, रत्नाधिकेषु-ज्ञानादिभावरत्नाभ्यधिकेषु, विनयं-यथोचितं प्रयुङ्क्ते करोति, तथा डहरा अपि च ये वयः—श्रुताभ्यां, पर्याय-ज्येष्ठाश्चिरप्रव्रजिताः तेषु विनयं प्रयुङ्क्ते, एवं नीचत्वे गुणाधिकान् प्रति नीचभावे वर्त्तते, सत्यवादी-अविरुद्धवक्ता तथा अवपातवान्-वन्दनशीलो, निकटवर्त्ती वा एवं च यो वाक्यकरो-गुरुनिर्देशकरणशीलः, स पूज्य इति ।।९.३.३।।

**अन्नायउंछं चरई विसुद्धं, जवणट्ठया समुयाणं त[1] निच्चं ।**
**अलद्धुयं नो परिदेवइज्जा, लद्धुं न विकत्थई स पुज्जो ।।९.३.४।।**

(ति.) किंच—यथा क्षेत्रेषु लूनेषु पतितकणचुण्टनम् उञ्छम् उच्यते । तथाऽज्ञातेषु प्रान्तकुलेषु अल्पाल्पतद्दत्तभिक्षाग्रहणम् अज्ञातोञ्छम् । तत् चरति-भुङ्क्ते यः । तदपि विशुद्धम्-उद्गमादिदोषरहितम् । यापनार्थम्-वपुःपालनार्थम् । समुदानम्-भैक्षम् । नित्यम् । तदपि अलब्ध्वा-अनासाद्य । न परिदेवयेत्-न खेदं यायात्, यथा मन्दभाग्योऽहं, अशोभनो वायं देश इति । लब्ध्वा च । न विकथ्यते-न श्लाघते, सुपुण्योऽहं, शोभनो वायं देश इति, स पूज्यः ।।९.३.४।।

(स.) अन्नाय...इति-पुनः किञ्च, साधुरज्ञातोञ्छं परिचयस्याकरणेनाज्ञातः सन् भावोञ्छं गृहस्थोद्धरितादि चरति, अटित्वानीतं भुङ्क्ते, न तु ज्ञातस्तद्बहुमतमिति, एतदपि विशुद्धम्-उद्गमादिदोषरहितं, न तद्विपरीतम्, एतदपि यापनार्थं संयमभारोद्वाहि-

१. 'अन्यत्र मुद्रितः पाठभेदः' 'च' इति, विवृतश्चापि तथैव, न च विवृतः (ति) टीकायां, स्वीकृत श्च 'तु' इति पाठो मूलपाठत्वेन ।

देहपालनाय, अन्यथा समुदानं चोचितभिक्षालब्धं च नित्यं सर्वकालं न तूञ्छमप्येकत्रैव बहु लब्धं कादाचित्कं वा, एवम्भूतमपि विभागतोऽलब्ध्वाऽनासाद्य न परिदेवयेन्न खेदं यायात्, 'यथाहं मन्दभाग्यः अथवा नायं देशः शोभन' इति, विभागतश्च लब्ध्वा प्राप्योचितं न विकत्थते न श्लाघां करोति, 'यथाहं महापुण्यवान्, अथवायं देशः शोभनः', यो यतिरेवं पूर्वोक्तं कुर्यात् स पूज्यः. ।।९.३.४।।

**(सु.)** किञ्च—अण्णाय...इति, अज्ञातोञ्छं-परिचयाकरणेनाज्ञातः सन्, भावोञ्छं गृहस्थोद्धरितादि चरति, अटित्वाऽऽनीतं भुङ्क्ते, न तु ज्ञातस्तद्बहुमतमिति, एतदपि विशुद्धं-उद्गमादि-दोषरहितं, न तद्विपरीतं, एतदपि यापनार्थं-संयमभरोद्वाहि-देहपालनाय, नान्यथा, समुदानं **च**-उचितभिक्षालब्धं **च**-नित्यं-सर्वकालं न तूञ्छमप्येकत्रैव बहुलब्धं कादाचित्कं वा, एवंभूतमपि विभागतः, अलब्ध्वा-अनासाद्य न परिदेवयेत्-न खेदं यायात्, यथा 'मन्दभाग्योऽहं अशोभनो वा अयं देश' इत्येवं, विभागतश्च लब्ध्वा प्राप्योचितं न विकत्थते-न श्लाघां करोति 'सपुण्योऽहं शोभनो वा अयं देश' इत्येवं स पूज्य इति ।।९.३.४।।

**संथार-सिज्जा[1]-ऽऽसण-भत्त-पाणे, अप्पिच्छया अइलाभे वि संते ।**
**जो एवमप्पाणभितोसइज्जा, संतोसपाहन्नरए स पुज्जो ।।९.३.५।।**

**(ति.)** किञ्च—संस्तारक-शय्या-ऽऽसन-भक्त-पानेषु लाभे सति । अल्पेच्छता-अमूर्च्छया अधिकाग्रहणम् । य एवमात्मानमभितोषयति । सन्तोषप्राधान्येन रतः, स पूज्यः ।।९.३.५।।

**(स.)** संथार...इति-किञ्च यस्य साधोः संस्तारके शय्यायामासने, भक्ते पाने चाल्पेच्छता अमूर्च्छया कृत्वा परिभोगादधिकस्य परिहारो वा भवेत्, क्व सति ? सति संस्तारकादीनां गृहस्थेभ्यः सकाशादतिलाभे सत्यपि, यः साधुरेवमात्मानमभितोषयति, येन वा तेन वात्मानं यापयति, किम्भूतो यतिः ? सन्तोषप्राधान्यरतः, सन्तोष एव प्रधानभावे रत आसक्तः, स साधुः पूज्यः ।।९.३.५।।

**(सु.)** किञ्च—संथार...इति, संस्तारक-शय्या-ऽऽसन-भक्त-पानानि प्रतीतानि, एतेष्वल्पेच्छता-अमूर्च्छया परिभोगः, अतिरिक्तपरिहरणं च, अतिलाभेऽपि सति संस्तारकादीनां गृहस्थेभ्यः सकाशात्, य एवमात्मानमभितोषयति येन वा तेन वा

1. 'सेज्जा' इति मुद्रितः पाठभेदः ।

यापयति सन्तोषप्राधान्यरतः-सन्तोष एव प्राधान्यभावे रतः-सक्तः, स पूज्य इति ।।९.३.५।।

**सक्का सहिउं[1] आसाइं कंटया, अओमया उच्छहया नरेणं ।**
**अणासए जो उ सहिज्ज कंटए, वईमए कन्नसरे स पुज्जो ।।९.३.६।।**

(ति.) इन्द्रियसमाधिद्वारेण पूज्यतामाह—शक्याः सोढुम् । अयोमयाः कण्टकाः । उत्साहता नरेण । आशया-द्रव्यलिप्सया । यस्त्वनाशया-फलाप्रत्याशया । सहेत कण्टकान्। वाङ्मयान्-कर्कशवागात्मकान् । कर्णशरान्-कर्णगामिनः । स पूज्यः ।।९.३.६।।

(स.) अथेन्द्रियसमाधिद्वारेणसाधोः पूज्यतामाह—सक्का...इति-नरेण कण्टका इदं मे भविष्यतीत्याशया सोढुं शक्याः, किम्भूता कण्टकाः ? अयोमया लोहमयाः, किम्भूतेन नरेण ? उत्साहवता, अर्थोद्यमवता, तथा च कुर्वन्ति केचिल्लोहमयकण्टका-स्तरणशयनमप्यर्थवाञ्छया, परं न तु वचनकण्टकाः सोढुं शक्याः, ततो निरीहः सन् कर्णसरान् वाक्कण्टकान् सहेत, स पूज्यः. ।।९.३.६।।

(सु.) इन्द्रियसमाधिद्वारेण पूज्यतामाह—सक्का...इति, शक्याः सोढुमाशयेतीदं मे भविष्यतीति प्रत्याशया, के ? इत्याह-कण्टका अयोमया-लोहात्मका, उत्सहता नरेण-अर्थोद्यमिनेत्यर्थः?, तथा च कुर्वन्ति केचिदयोमयकण्टका-ऽऽस्तरणशयन-मप्यर्थलिप्सवः, न तु वाक्कण्टकाः शक्या इति, एवं व्यवस्थिते अनाशया-फलाप्रत्याशया निरीहः सन्, यस्तु सहेत कण्टकान् वाङ्मयान्-खरादिवागात्मकान् कर्णसरान्-कर्णगामिनः, स पूज्य इति ।।९.३.६।।

**मुहुत्तदुक्खा हु भवंति कंटया, अओमया ते वि तओ सुदुद्धरा ।**
**वायादुरुत्ताणि दुरुद्धराणि, वेराणुबंधीणि महाभयाणि ।।९.३.७।।**

(ति.) एतदेव स्पष्टयति—मुहूर्तदुःखाः-अल्पकालदुःखाः । भवन्ति । कण्टकाः अयोमयास्तेऽपि । ततः-कायात् । सूद्धराः-सुखेनोद्ध्रियन्ते व्रणकर्म च क्रियते । वाग्दुरुक्तानि पुनः दुरुद्धराणि-दुःखेनोद्ध्रियन्ते मनोलक्षवेधनात् । श्रवणतः प्रद्वेषादिना, इह परत्र च वैरानुबन्धीनि । अत एव महाभयानि-कुगतिपातादिभयहेतुत्वात् ।।९.३.७।।

---

१. 'सहेउं'

**(स.)** पुनरेतदेव स्पष्टयति—मुहुत्त...इति-लोहमयाः कण्टका मुहूर्तदुःखा मुहूर्तमल्पकालं यावद् दुःखदा भवन्ति, वेधकाल एव प्रायो दुःखदानात्, तेऽपि कण्टकाः कायात् सूद्धराः, सुखेनैवोद्ध्रियन्ते, व्रणपरिकर्म च क्रियते. परं वचनेन यानि दुरुक्तानि तानि दुरुद्धराणि भवन्ति, दुःखेनैवोद्ध्रियन्ते, मनोरूपलक्षवेधनात्, किम्भूतानि वचनदुरुक्तानि ? वैरानुबन्धीनि, तथा श्रवणप्रद्वेषादिना इह लोके परलोके च वैरभावजनकानि, पुनः किम्भूतानि ? अत एव महाभयानि कुगतिपातभयहेतुभूतानि. ।।९.३.७।।

**(सु.)** एतदेव स्पष्टयति—मुहुत्त...इति, मुहूर्त्तदुःखा-अल्पकालदुःखा भवन्ति कण्टका अयोमयाः, वेधकाल एव प्रायो दुःखभावात्, तेऽपि ततः कायात् सूद्धुराः-सुखेनैवोद्ध्रियन्ते व्रणपरिकर्म च क्रियते, वाग्दुरुक्तानि पुनर्दुरुद्धुराणि-दुःखेनैवोद्ध्रियन्ते मनोलक्ष्यवेधनात्, वैरानुबन्धीनि-तथाश्रवण-प्रद्वेषादिनेह परत्र च वैरमनुबध्नन्ति, अत एव महाभयानि, कुगतिपातादिभयहेतुत्वादिति ।।९.३.७।।

**समावयंता वयणाभिघाया, कन्नंगया दुम्मणियं जणंति ।**
**धम्मु(मो)त्ति किच्चा परमग्ग सूरे, जियंदिए जो सहई स पुज्जो ।।९.३.८।।**

**(ति.)** अपि च—समापतन्तः-समं-समकालम्, आ-सामास्त्येन अभिमुखं, पतन्तः। वचनाभिघाताः-खरादिवचनप्रहाराः । कर्णगताः सन्तो दौर्मनस्यं जनयन्ति । धर्म इति कृत्वा । परमाग्रः शूरः-दानशूर-समरशूरापेक्षया प्रधानशूरः । जितेन्द्रियः सन्। यः सहते-न तु तैर्विकारमादर्शयति । स पूज्यः ।।९.३.८।।

**(स.)** समावयंता'इति-पुनः किञ्च वचनाभिघाताः खरादिवचनप्रहाराः कर्णगताः सन्तः प्रायो दौर्मनस्यं दुष्टमनोभावं प्राणिनां जनयन्ति, अनादिभवाभ्यासात्, किं कुर्वन्तो वचनाभिघाताः ? समापतन्त एकीभावेनाभिमुखं पतन्तः, अथ च यो यतिस्तान् सहते, न तु तैर्विकारमुपदर्शयेत्, किं कृत्वा सहते ? धर्म इति कृत्वा सामायिकपरिणामं समापन्नः सन्, न त्वशक्त्यादिना, किम्भूतो यतिः ? परमाग्रशूरः प्रधानशूरः, पुनर्जितेन्द्रियः, स पूज्य इति. ।।९.३.८।।

**(सु.)** किञ्च—समावयंता'इति समापतन्त-एकीभावेनाभिमुखं पतन्तः, क ? इत्याह-वचनाभिघाताः-खरादिवचनप्रहाराः, कर्णगताः सन्तः प्रायोऽनादिभवाभ्यासाद् दौर्मनस्यं-

दुष्टमनोभावं जनयन्ति प्राणिनां, एवंभूतान् वचनाभिघातान् 'धर्म' इतिकृत्वा सामायिकपरिणामापन्नो, न त्वशक्त्यादिना, परमाग्रशूरः—दानसंग्रामशूरापेक्षया प्रधानः शूरः जितेन्द्रियः सन् यः सहते, न तु तैर्विकारं उपदर्शयति, स पूज्य इति ।।९.३.८।।

**अवन्नवायं च परम्मुहस्स, पच्चक्खओ पडिणीयं च भासं ।**
**ओहारिणिं अप्पियकारणिं च, भासं न भासिज्ज सया स पुज्जो ।।९.३.९।।**

**(ति.)** तथा-अवर्णवादं च । पराङ्मुखस्य-पृष्ठतः परोक्ष इत्यर्थः । प्रत्यक्षतः । प्रत्यनीकाम्-अपकारिणीं, चौरस्त्वमित्यादिकां भाषाम् । अवधारिणीम् अप्रियकारिणीं च भाषां न भाषेत, स पूज्यः ।।९.३.९।।

**(स.)** पुनराह—अवन्न...इति-योऽवर्णवादमश्लाघावादं पराङ्मुखस्य पृष्ठतः प्रत्यक्षतश्च नो भाषेत, सदा कदाचिदपि नैवं ब्रूयात्, तथा प्रत्यनीकामपकारिणीं 'त्वं चौर' इत्यादिरूपां, तथावधारिणीम्, अशोभन एवायम्'इत्यादिरूपां, पुनरप्रीतिकारिणीं च श्रोतुर्मृतनिवेदनादिरूपां च भाषां वाचं न भाषेत, स यतिः पूज्यः. ।।९.३.९।।

**(सु.)** तथा—अवण्ण...इति, अवर्णवादं-अश्लाघावादं च पराङ्मुखस्य पृष्ठत इत्यर्थः, प्रत्यक्षतश्च-प्रत्यक्षस्य च प्रत्यनीकां अपकारिणीं चौरस्त्वम्'इत्यादिरूपां भाषां तथा अवधारिणीं-'अशोभन एवायम्'इत्यादिरूपां, अप्रीतिकारिणीं च-श्रोतुर्मृतनिवेदनादिरूपां भाषां-वाचं न भाषेत सदा यः कदाचिदपि नैव ब्रूयात्, स पूज्य इति ।।९.३.९।।

**अलोलुए अकुक्कुहए अमाई, अपिसुणे आवि अदीणवित्ती ।**
**नो भावए नो वि अ भाविअप्पा, अकोउहल्ले य सया स पुज्जो ।।९.३.१०।।**

**(ति.)** अलोलुपः-आहाराद्यलुब्धः । अकुहकः-अव्यंसकः, इन्द्रजालादिमायारहितः। अमायी-कौटिल्यशून्यः । अपिशुनः-अदुर्जनः । अदीनवृत्तिः-आहाराद्यलाभेऽपि न कुमुखः। 'अमुकपुरःतोऽहं भवता वर्णनीय' इति परं न भावयेत् । नापि च भावितात्मा-स्वयमन्यपुरतः स्वगुणवर्णनेन भावित आत्मा येन स तथा । अकौतुकश्च-नटनर्तकादिषु । सदा यः, स पूज्यः ।।९.३.१०।।

**(स.)** अलोलुए इति-तथा यः साधुरलोलुप आहारादिष्वलुब्धः, पुनः-अकुहक इन्द्रजालादिकुहकरहितः, पुनः-अमायी कौटिल्यशून्यः, पुनः-अपिशुनो न छेदनभेदनकर्ता,

पुनः-अदीनवृत्तिराहारादीनामभावेऽपि शुद्धवृत्तिः, पुनर्यो नो भावयेदकुशलभावनया परं, 'यथामुकपुरतो भवताहं वर्णनीयः', पुनर्यो न भावितात्मा स्वयमन्यपुरतः स्वगुणवर्णनापरः, पुनः-अकौतुकश्च सदा नटनर्त्तक्यादिषु, स पूज्यः, ।।९.३.१०।।

**(सु.)** तथा—अलोलुए'इति, अलोलुपः-आहारादिषु अलुब्धः, अकुहक-इन्द्रजालादिकुहकरहितः, अमायी-कौटिल्यशून्यः, अपिशुनश्चापि-न छेदभेदकर्त्ता, अदीनवृत्तिः-आहाराद्यलाभेऽपि शुद्धवृत्तिः, नो भावयेदकुशल-भावनया परं, यथा-'अमुकपुरतो भवताऽहं वर्णनीयः', नापि च भावितात्मा स्वयमन्यपुरतः स्वगुणवर्णनापरः अकौतुकश्च सदा नटनर्त्तकादिषु यः, स पूज्य इति ।।९.३.१०।।

**गुणेहिं साहू अगुणेहिंऽसाहू, गिन्हाहि साहू गुण, मुंचऽसाहू ।**
**वियाणंई[1] अप्पगमप्पएणं, जो रागदोसेहिं समो स पुज्जो ।।९.३.११।।**

**(ति.)** किंच—गुणैः-अनन्तरोक्तैर्विनयाद्यैः साधुः । तद्विपरीतैः अगुणैः असाधुः । ततो गृहाण साधुगुणान्, मुञ्च असाधुगुणान् । वियाणइ'इति प्राकृतत्वादिनन्तस्याप्येवं प्रयोगः, ततश्चैतं पूर्वार्द्धोक्तमुपदेशं **विशेषेण जानाति**-ज्ञापयति । आत्मनमात्मना यः। रागद्वेषयोः समः-न रागवान् न द्वेषवान् । स पूज्यः ।।९.३.११।।

**(स.)** गुणेहिं'इति-किञ्च साधुर्गुणैः पूर्वोक्तैर्गुणैर्विनयादिभिर्युक्तो भवति, तथा असाधुरगुणैः पूर्वोक्तगुणविपरीतैर्भवति, एवं सति च गुणान् साधुगुणान् गृहाण त्वम्, असाधुगुणान् मुञ्चेति शोभन उपदेशः, एवमधिकृत्य **विज्ञापयति विविधं ज्ञापयत्या**त्मान-मात्मना, पुनर्यो रागद्वेषयोः समो न रागवान्, न द्वेषवान्, एवंविधो यः साधुः स पूज्यः. ।।९.३.११।।

**(सु.)** किञ्च—गुणेहिं...इति, गुणैरनन्तरोदितैर्विनयादिभिर्युक्तः साधुर्भवति, तथा अगुणैरुक्तगुण-विपरीतैरसाधुः, एवं सति "गृहाण साधुगुणान् मुञ्चासाधुगुणांश्च'इति शोभन उपदेशः, एवमधिकृत्य प्राकृतशैल्या **विज्ञापयति-विविधं ज्ञापय**त्यात्मानमात्मना यस्तथा रागद्वेषयोः समो-न रागवान् न द्वेषवान्निति, स पूज्य इति ।।९.३.११।।

**तहेव डहरं च महल्लगं वा, इत्थी पुमं पव्वइयं गिहिं वा ।**
**नो हीलए नो वि अ खिंसएज्जा, थंभं च कोहं च चए स पुज्जो ।।९.३.१२।।**

१. विआणिआ'इति, दीपिकायां मूलत्वेन गृहीतः पाठः । चूर्णिपाठः 'वियाणिया', चूर्णिरपि 'जाणिऊणं इति सं.भू. कृदतन्त्वेन विवृता.

**(ति.)** तथैव डहरं वा महल्लकं वा मध्यमं वा । स्त्रियं वा पुमांसं वा नपुंसकं वा प्रव्रजितं वा गृहिणं वा अन्यतीर्थिकं वा । उपलक्षणत्वात् सर्वत्रोभयग्रहणात् तृतीयग्रहणम्। न हीलयति-नावजानाति । न खिंसयति-न निन्दयति, हीलन-खिंसनयोश्च कारणं स्तम्भं क्रोधं च त्यजति यः, स पूज्यः ।।९.३.१२।।

**(स.)** तहेव...इति-किञ्च साधुरेतान् न हीलयति, कान् ? इत्याह-तथैव पूर्ववत्, डहरं वा महल्लकं वा, वाशब्दान्मध्यमं वा, स्त्रियं, पुमांसम्, उपलक्षणत्वान्नपुंसकं वा, प्रव्रजितं वा गृहिणं वा, वाशब्दात् तदन्यतीर्थिकं वा न हीलयति, नापि खिंसयति, तत्र सूयया असूयया वा एकवारं दुष्टाभिधानं हीलनं, तदेव वारंवारं खिंसनं, हीलना-खिंसनयोश्च निमित्तभूतं स्तम्भं च मानं च क्रोधं रोषं त्यजति, स पूज्यः. ।।९.३.१२।।

**(सु.)** किञ्च—तहेव'इति, तथैवेति पूर्ववत्, डहरं वा महल्लकं वा, वाशब्दान्मध्यमं वा, स्त्रियं पुमांसमुपलक्षणत्वान्नपुंसकं वा, प्रव्रजितं गृहिणं वा, वाशब्दात् तदन्यतीर्थिकं वा, न हीलयति, नापि खिंसयति, तत्र सूयया असूयया वा, सकृद् दुष्टाभिधानं हीलनं, तदेवासकृत् खिंसनमिति, हीलन-खिंसनयोश्च निमित्तभूतं स्तम्भं च मानं च क्रोधं च, रोषं च त्यजति यः स पूज्यः, निदानत्यागेन तत्त्वतः कार्यत्यागादिति ।।९.३.१२।।

**जे माणिया सययं माणयंति, जत्तेण कन्नं व निवेसयंति ।**
**ते माणए माणरिहे तवस्सी, जिइंदिए सच्चरए स पुज्जो ।।९.३.१३।।**

**(ति.)** किञ्च—ये मानिताः अभ्युत्थानादिभिः । सततं शिष्यान् । मानयन्ति—मा ज्ञानादिभूतीः, नयन्ति-प्रापयन्ति । श्रुतोपदेशस्मरणवारणादिभिः यत्नेन कन्यामिव निवेशयन्ति । यथा मातापितरौ गुणैर्वयसा च संवर्ध्य कन्यां योग्यभर्तरि स्थापयन्ति । एवम् आचार्यः शिष्यं सूत्रार्थविज्ञं कृत्वा महत्याचार्यपदे स्थापयन्ति । तान्-ईदृशान् गुरून् । यो मानयति । अभ्युत्थानादिना मानार्हान् तपस्वी जितेन्द्रियः सत्यरतः, स पूज्यः ।।९.३.१३।।

**(स.)** जे इति-किञ्च ये मानिता अभ्युत्थानादिसत्कारैः । सततं निरन्तरं शिष्यान् मानयन्ति श्रुतस्योपदेशं प्रति चोदनादिभिः, तथा यत्नेन कन्यामिव निवेशयन्ति, यथा मातापितरौ कन्यां गुणैर्वयसा च सर्वासु ऋद्धिषु योग्ये भर्तरि स्थापयतः, एवमाचार्या

अपि शिष्यं सूत्रार्थयोर्वेदिनं दृष्ट्वा महति आचार्यपदे स्थापयन्ति, ततस्तानेवंभूतान् गुरून् यो मानयत्यभ्युत्थानादिना, किम्भूतान् गुरून् ? मानयोग्यान् मानार्हान्, स पूज्यः, किम्भूतः शिष्यः ? तपस्वी, पुनः किम्भूतः जितेन्द्रियः, पुनः किम्भूतः ? सत्यरतः, इदं शिष्यस्य प्राधान्यख्यापनार्थं विशेषणद्वयम्. ।।९.३.१३।।

**(सु.)** जे माणिया....इति, ये मानिता अभ्युत्थानादिसत्कारैः, सततं-अनवरतं, शिष्यान् मानयन्ति श्रुतोपदेशं प्रति चोदनादिभिः, तथा यत्नेन कन्यामिव निवेशयन्ति, यथा "माता-पितरौ कन्यां गुणैर्वयसा च संवर्ध्य योग्यभर्त्तरि स्थापयन्ति", एवमाचार्याः शिष्यं सूत्रार्थवेदिनं दृष्ट्वा महत्याचार्यपदेऽपि स्थापयन्ति, तानेवंभूतान् गुरून् मानयति, योऽभ्युत्थानादिना मानार्हान्-मानयोग्यान्, तपस्वी सन्, जितेन्द्रियः सत्यरत इति प्राधान्यख्यापनार्थं विशेषणद्वयं, स पूज्य इति ।।९.३.१३।।

**तेसिं गुरूणं गुणसाय(ग)राणं, सुच्चा ण मेहावि सुहासियाइं ।**
**चरे मुणी पंचरए तिगुत्तो, चउक्कसायावगए स पुज्जो ।।९.३.१४।।**

**(ति.)** तथा—तेषां गुरूणां गुणसागराणां श्रुत्वा । सुभाषितानि-अत्रामुत्रोपकारकाणि। मेधावी मुनिश्चरति । पञ्चरतः-पञ्चसु महाव्रतेषु समितिषु च रतः । त्रिगुप्तः, चतुः-कषायापगतः । स पूज्यः ।।९.३.१४।।

**(स.)** पुनराह—तेसिं-इति-यो मेधावी पण्डित एवंविधः सन् चरति, किं कृत्वा ? गुरूणां तेषां पूर्वोक्तगुणवतां सुभाषितानि श्रुत्वा, किम्भूतानां गुरूणां ? गुणसागराणां गुणानां समुद्राणां, किम्भूतो मुनिः ? पञ्चरतः पञ्चमहाव्रतपालने तत्परः, पुनः किम्भूतो मुनिः ? त्रिगुप्तः, मनोगुप्ति-वचनगुप्ति-कायगुप्तिसहितः, पुनः किम्भूतो मुनिः ? चतुष्कषायापगतः, क्रोध-मान-माया-लोभाख्यकषायचतुष्टयवर्जितः, स पूज्यः. ।।९.३.१४।।

**(सु.)** तथा—तेसिं गुरूणं'इति, तेषां गुरूणामनन्तरोदितानां, गुणसागराणां-गुणसमुद्राणां सम्बन्धीनि, श्रुत्वा मेधावी सुभाषितानि-परलोकोपकारकाणि, चरति-आचरति, मुनिः-साधुः, पञ्चरतः-पञ्चमहाव्रतसक्तः त्रिगुप्तो-मनोगुप्त्यादिमान्, चतुष्कषायापगत इत्यपगतक्रोधादिकषायो यः, स पूज्य इति ।।९.३.१४।।

**गुरुमिह सययं पडियरिय मुणी, जिणमयनिउणे अभिगमकुसले ।**
**धुणिय रयमलं पुरेकडं भासुरमउलं गइं गइ ।।९.३.१५।। त्ति बेमि**

(ति.) प्रस्तुतफलाभिधानेनोपसंहरन्नाह—गुरुमिह-मर्त्यलोके । सततं प्रतिचर्य विधिनाराध्य मुनिः जिनमतनिपुणः। अभिगमकुशलः-अभिमुखो गमो यस्य सोऽभिगमः प्राघूर्णकः, तत्प्रतिपत्तौ कुशलः । प्राघूर्णकादिप्रतिपत्तिदक्षः । धूत्वा रजोमलं पुराकृतम्। भास्वराम्-तेजोमयीम् । अतुलाम्-अनन्यसमाम् । गतिम्-सिद्धिरूपाम् । गतः । इति ब्रवीमीति प्राग्वत् ।।९.३.१५।।

**श्रीतिलकाचार्यटीकायां विनयसमाधौ तृतीय उद्देशकः समाप्तः ।।**

(स.) अथ प्रस्तुत फलस्यनाम्ना उपसंहरन्नाह—गुरुं'इति-एवंविधो मुनिर्गतिं सिद्धिरूपां व्रजति गच्छति, किं कृत्वा गुरुमाचार्यादिरूपमिह मनुष्यलोके सततं निरन्तरं विधिनाराध्य, किम्भूतो मुनिः ? जिनमतनिपुण आगमे प्रवीणः, पुनः किम्भूतो मुनिः ? अभिगमकुशलः, लोकप्राघूर्णकादिप्रतिपत्तिदक्षः, किं कृत्वा सिद्धिं याति ? रजोमलं पुराकृतं विधूय, अष्टप्रकारं. कर्म क्षपयित्वेत्यर्थः, किम्भूतां गतिं ? भासुरां ज्ञानतेजोमयीं, पुनः किम्भूतां गतिम्, अतुलाम्, अस्याः सदृश्यन्या गतिर्नास्ति, ब्रवीमीति पूर्ववत्. ।।९.३.१५।।

**इति श्रीदशवैकालिके समयसुन्दरविरचितायां शब्दार्थवृत्तौ नवमाध्ययने तृतीय उद्देशकः समाप्तः.**

(सु.) प्रस्तुतफलाभिधानेनोपसंहरन्नाह—गुरुं...इति, गुरुमाचार्यादिरूपमिह-मनुष्यलोके, सततं-अनवरतं, परिचर्य-विधिनाऽऽराध्य मुनिः-साधुः, किंविशिष्टो मुनिः?-इत्याह-जिनवचन(मत)निपुणः-आगमे प्रवीणः, अभिगमकुशलो लोकप्राघूर्णकादि-प्रतिपत्तिदक्षः, स एवंभूतो विधूय रजोमलं पुराकृतं क्षपयित्वाऽष्टप्रकारं कर्मेति भावः, किम् ? इत्याह-भास्वरां ज्ञानतेजोमयत्वादतुलां-अनन्यसदृशीं गतिं-सिद्धिरूपां व्रजतीति-गच्छति, तदा जन्मान्तरेण वा सुकुलप्रत्यागमन-प्रत्ययोत्पादादिना प्रकारेण ।।४५३।। ब्रवीमीति पूर्ववत् ।।

**इति सुमति० वृत्तौ विनयसमाधावुक्तस्तृतीय उद्देशकः ९-३ ।।**

## ।। विनयसमाध्ध्ययने चतुर्थोद्देशकः ।।

**सुयं मे आउसं तेणं भगवया एवमक्खायं ।**

(ति) विनयविशेषोपदेशार्थमाह — श्रुतं मया आयुष्मन् ! तेन भगवता एवमाख्यातम् । इह-प्रवचने । खलु स्थिवरैः गणधरैः, भगवद्भिश्चत्वारि विनयसमाधिस्थानानि प्रज्ञप्तानि ।

**इह खलु थेरेहिं भगवंतेहिं चत्तारि विणयसमाहिठाणा पन्नत्ता ।**

**कयरे खलु ते थेरेहिं भगवंतेहिं चत्तारि विणयसमाहिठाणा पन्नत्ता ?**

**इमे खलु ते थेरेहिं भगवंतेहिं चत्तारि विणयसमाहिठाणा पन्नत्ता ।**

(ति) इति प्रश्नः ।

(इमे) इति प्रतिवचनम् ।

**तंजहा - विनयसमाही, सुयसमाही, तवसमाही, आयारसमाही । सू.९.४.१**

(ति) तद्यथा विनयसमाधिः, श्रुतसमाधिः, तपःसमाधिः, आचारसमाधिः । तत्र समाधानं समाधिः। मनःस्वास्थ्यं विनयेन विनयाद् वा समाधिः विनयसमाधिः । एवं सर्वेष्वपि शब्दार्थो वाच्यः ।

(स.) अथ चतुर्थः उद्देशः प्रारभ्यते सुअं.. इति-चतुर्थो व्याख्यायते, तत्र सामान्येन य उक्तो विनयः, तस्य विशेषेणोपदर्शनार्थमिदं प्राह-श्रुतं मया हे आयुष्मन्! तेन भगवता एवमाख्यातमिति, एतद्यथा षड्जीवनिकायां प्रोक्तं तथैव द्रष्टव्यम्, इह क्षेत्रे प्रवचने वा, खलुशब्दो वा विशेषणार्थः, न केवलमिह, अन्यत्राप्यन्यतीर्थकरप्रवचने स्थविरैर्गणधरैर्भगवद्भिः परमैश्वर्यादियुक्तैश्चत्वारि विनयसमाधिस्थानानि प्रज्ञप्तानि विनयसमाधिभेदरूपाणि प्ररूपितानि, भगवतः समीपे श्रुत्वा ग्रन्थतो रचितानि इत्यर्थः, कतराणि खलु तानि ? इत्यादिप्रश्नः, अमूनि खलु तानि इत्युत्तरदानं, तद्यथा इत्युदाहरणे, विनयसमाधिः, श्रुतसमाधिः, तपस्समाधिः, आचारसमाधिश्च, तत्र समाधानं समाधिः, विनये समाधिर्विनयसमाधिः, एवं शेषेष्वपि द्रष्टव्यम् ।

**(सु.)** अथ चतुर्थ [उद्देशकः] उच्यते, तत्र सामान्येनोक्तविनयविशेषोपदर्शनार्थमाह-- सुयं मे इति, श्रुतं मया आयुष्मन् ! तेन भगवता एवमाख्यातमित्येतद् यथा षड्जीवनिकायां तथैव द्रष्टव्यं, इह खल्विति, इह-क्षेत्रे प्रवचने वा, खलुशब्दो विशेषणार्थः, न केवलमिह, किं त्वन्यत्राप्यन्यतीर्थकृत्प्रवचनेष्वपि, स्थविरैः-गणधरैर्भगवद्भिः-परमैश्वर्यादियुक्तैश्चत्वारि विनयसमाधिस्थानानि-विनयसमाधि-भेदरूपाणि प्रज्ञप्तानि-प्ररूपितानि, भगवतः सकाशे श्रुत्वा ग्रन्थत उपरचितानीत्यर्थः, कतराणि खलु तानीत्यादिना प्रश्नः, अमूनि खलु तानीत्यादिना निर्वचनं, तद्यथेत्युदाहरणोपन्यासार्थः-विनयसमाधिः (१) श्रुतसमाधिः (२) तपःसमाधिः (३) आचारसमाधिः (४) तत्र समाधानं समाधिः-परमार्थत आत्मनो हितं सुखं स्वास्थ्यं, विनये विनयाद् वा समाधिः विनयसमाधिः, एवं शेषेष्वपि शब्दार्थो भावनीयः ।

**विणए सुए तवे या, आयारे निच्चं पंडिया ।**
**अभिरामयंति अप्पाणं, जे भवंति जिइंदिया ।।९.४.१।।**

**(ति.)** एतदेव श्लोकेन सङ्गृह्णाति--विनये श्रुते तपसि आचारे नित्यम् । पण्डिताः-सत्त्वज्ञाः । अभिरमयन्ति-विनयादिषु रतिं कारयन्ति । आत्मानं ये भवन्ति जितेन्द्रियाः ।।९.४.१।।

**(स.)** उक्तमेव श्लोकेन सङ्गृह्णाति-विणए इति—'विणए इत्यादि सूत्रम्' अस्य व्याख्या-विनये यथोक्तलक्षणे, श्रुतेऽङ्गादौ, तपसि बाह्याभ्यन्तररूपे, आचारे च मूलोत्तरगुणरूपे नित्यं सर्वकालं पण्डिताः सम्यक् परमार्थवेदिनः, किंकुर्वन्ति? इत्याह-अभिरामयन्त्याभिमुख्येन विनयादिषु युञ्जत आत्मानं जीवं, किमिति, अस्योपादेयत्वात्, क एवं कुर्वन्ति? इत्याह-ये भवन्ति जितेन्द्रिया जितचक्षुरादिभावशत्रव एवं परमार्थः.१.

**(सु.)** एतदेव श्लोकेन संगृह्णाति-'विणए' इत्यादि, विनये-यथोक्तलक्षणे, श्रुते-अङ्गादौ, तपसि-बाह्यादौ, आचारे च-मूलगुणादौ, चशब्दस्य व्यवहित उपन्यासः, नित्यं-सर्वकालं, पण्डिताः-सम्यक् परमार्थवेदिनः, किं कुर्वन्ति ? इत्याह-अभिरम-यन्ति[धातूनां]नेकार्थत्वादाभिमुख्येन विनयादिषु युञ्जते आत्मानं-जीवं, किमिति ?, अस्योपादेयत्वात्, क एवं कुर्व्वन्ति ? इत्याह-ये भवन्ति जितेन्द्रियाः-जितचक्षुरादि-भावशत्रवः, त एव परमार्थतः पण्डिता इति प्रदर्शनार्थमेतदिति ।।९.४.१।।

**चउविहा खलु विणयसमाही हवइ । तं जहा अणुसासिज्जंतो सुस्सूसइ, (१) सम्मं संपडिवज्जइ (२) वेयमाराहइ (३) न य भवइ अत्तसंपग्गहिए (४) चउत्थं पयं भवइ । सूत्रम्-९.४.२।।**

**(ति)** विनयसमाधि अभिधित्सुराह चतुर्विधः खलु विनयसमाधिर्भवति । तद्यथा । अनुशास्यमानः शुश्रूषते-अर्थितया श्रोतुमिच्छति । इच्छातः सम्यग् प्रतिपद्यते-सम्यग्-अविपरीतमनुशासनम्, यथार्थमनुबुध्यते, तच्च सम्यगवबुध्य । वेदमाराधयति-वेद्यते अनेनेति वेदः-श्रुतज्ञानं तद्यथोक्तानुष्ठानेन सफलीकरोति । न च भवत्यात्मसम्प्रगृहीतः-आत्मा सम्यक् प्रकर्षेण विनीतोऽहं, सुसाधुरहमित्येवं गृहीतो येन स तथा आत्मोत्कर्षी, न चैवंभूतः, स भवति यथोक्तानुष्ठायी। किं तर्हि अनात्मोत्कर्ष्येव श्रुतोक्तानुष्ठाता भवतीत्यभिप्रायः । एतदेव सूत्रक्रमप्रामाण्यात् चतुर्थं पदं भवति ।।९.४.१ सूत्रम्।।

**भवइ य इत्थ सिलोगो –**

**पेहेइ हियाणुसासणं, सुस्सूसई तं च पुणो अहिट्ठिए ।**
**न य माणमएण मज्जई, विणयसमाही आययट्ठिए ।।९.४.२।।**

**(ति.)** भवति चात्र श्लोकः-प्रार्थयते हितानुशासनम्-आचार्यादिभ्यः सदुपदेशम्। शुश्रूषते-अनेकार्थत्वात् तदवबुध्यते । तच्चावबुद्धं सत् पुनरधितिष्ठति-विनाकरोति । तच्च कुर्वन् न । मानमदेन-मानगर्वेण । माद्यति । विनयसमाधौ-विनयसमाधिविषये। आयतार्थी-मोक्षार्थी ।। उक्तो विनयसमाधिः ।।९.४.२।।

**(स.)** अथ विनयसमाधिं कथयितुं वाञ्छन्नाह-चउव्विहा...इति-चतुर्विधः खलु विनयसमाधिर्भवति, तद्यथेत्युदाहरणोपन्यासार्थः, अनुशास्यमानस्तत्र तत्र चोद्यमानः शुश्रूषते, तदनुशासनमर्थितया श्रोतुमिच्छति, इच्छाप्रवृत्तितः सम्यक्सम्प्रतिपद्यते, सम्यगविपरीतमनुशासनं यथाविषयमवबुद्ध्यते, स चैवं विशिष्टप्रवृत्तेरेव वेदमाराधयति, वेद्यतेऽनेनेति वेदः श्रुतज्ञानं, तद् यथोक्तानुष्ठान-तत्परतया सफलीकरोति, अत एव विशुद्धप्रवृत्तेर्न च भवत्यात्मसम्प्रगृहीतः, आत्मैव सम्प्रगृहीतः सम्यक्प्रकर्षेण गृहीतो येनाहं विनीतः सुसाधुरित्येवमादिना, तथानात्मोत्कर्ष-प्रधानत्वाद् विनयादेर्न चैवम्भूतो भवतीत्यभिप्रायः, चतुर्थं पदं भवति, तदेव सूत्रक्रमप्रामाण्या-दुत्तरोत्तरगुणापेक्षया चतुर्थमिति,

भवति चात्र श्लोकः, अत्रेति विनयसमाधौ, श्लोकश्छन्दोविशेषः स चायं- **'पेहेइ'**

इत्यादि साधुर्हितानुशासनं प्रार्थयत इच्छति, पुनराचार्यादिभ्य इहलोक-परलोकयोरुपकारिणमुपदेशं शुश्रूषति, धातूनामनेकार्थत्वात्-यथा-विषयमव-बुद्ध्यते, तच्चावबुद्धः सन् पुनरधितिष्ठति यथावत् करोति, न च कुर्वन्नपि मानमदेन गर्वमदेन माद्यति मदं याति, विनयसमाधौ विनयसमाधिविषये, किंभूतः साधुः ? आयतार्थिको मोक्षार्थी इति. उक्तो विनयसमाधिः ।।९.४.२।।

**(सु.)** विनयसमाधिमभिधित्सुराह-चउव्विहा... इत्यादि, चतुर्विधः खलु विनयसमाधिर्भवति, तद्यथेत्युदाहरणोपन्यासार्थः, अणुसासिज्जंतो इत्यादि, अनुशास्यमानस्तत्र तत्र चोद्यमानः शुश्रूषति-तदनुशासनमर्थितया श्रोतुमिच्छति १ । इच्छाप्रवृत्तितः तत् सम्यक् सम्प्रतिपद्यते, सम्यग्-अविपरीतमनुशासनतत्त्वं यथाविषयमवबुध्यते २ । स चैवं विशिष्टप्रतिपत्तेरेव वेदमाराधयति, वेद्यते अनेनेति वेदः-श्रुतज्ञानं तद्यथोक्तानुष्ठानपरतया सफलीकरोति ३ । अत एव विशुद्धप्रवृत्तेर्न च भवत्यात्मसंप्रगृहीतः—आत्मा एव सम्यक् प्रकर्षेण गृहीतो येनाहं विनीतः सुसाधुरित्येवमादिना स तथा, अनात्मोत्कर्षप्रधानत्वाद् विनयादेः, न चैवंभूतो भवतीति अभिप्रायः । चतुर्थं पदं भवतीत्येतदेव सूत्रक्रमप्रामाण्यादुत्तरोत्तरगुणापेक्षया चतुर्थमिति ४ ।।सूत्रम् ९.४.३।।

भवति चात्र श्लोकः, अत्रेति विनयसमाधौ श्लोकः-छन्दोविशेषः । स चायं-पेहे...इति प्रार्थयते हितानुशासनं-इच्छति इहलोक-परलोकोपकारिण-माचार्यादिभ्य उपदेशं, शुश्रूषतीत्यनेकार्थत्वात् यथाविषयमवबुध्यते, तच्चावबुद्धं सत् पुनरधितिष्ठति यथावत् करोति, न च कुर्व्वन्नपि मानमदेन-मानगर्वेण माद्यति-मदं याति, विनयससमाधौ-विनयसमाधिविषये आयतार्थिकः-मोक्षार्थीति । उक्तो विनय-समाधिः।।९.४.२।।

**चउव्विहा खलु सुयसमाही भवइ, तं जहा-सुयं मे भविस्सइ त्ति अज्झाइयव्वं भवइ, एगग्गचित्तो भविस्सामि त्ति अज्झाइयव्वं भवइ, अप्पाणं ठावइस्सामि त्ति अज्झाइयव्वं भवइ, ठिओ परं ठावइस्सामि त्ति अज्झाइयव्वं भवइ । चउत्थं पयं भवइ। भवइ य इत्थ सिलोगो ।।९.४.४।।**

**(ति)** श्रुतसमाधिमाह चतुर्विधः खलु श्रुतसमाधिर्भवति । तद् यथा- श्रुतं मे-आचारादिद्वादशाङ्गम् । भविष्यतीत्यध्येतव्यं भवति । तथा अध्ययनं कुर्वन्नेकाग्रचित्तो भविष्यामि-न विप्लुतचित्त इत्यध्येतव्यं भवति । एकाग्रचित्तश्चाध्ययनं कुर्वन् आत्मानं विशुद्धधर्मे स्थापयिष्यामीत्यध्येतव्यं भवति । तथाध्ययनफलात् स्थितः स्वयं विशुद्धधर्मे परं विनेयं स्थापयिष्यामीत्यध्येतव्यं भवति । इदं च क्रमप्राप्तं चतुर्थं पदं भवति ।

**भवइ य इत्थ सिलोगो –**

**नाणमेगग्गचित्तो य, ठिओ ठावयई परं ।**
**सुयाणि अहिज्झित्ता, रओ सुयसमाहिए ।।९.४.३।।**

**(ति.)** भवति चात्र श्लोकः, स चायम् – श्रुताध्ययनात् ज्ञानं भवति । ज्ञानाच्च एकाग्रचित्तता । एकाग्रचित्तस्य शुद्धधर्मस्थितिः स्यात् । शुद्धधर्मे स्थितः शिष्यादिकं तत्र स्थापयति । श्रुतानि चाधीत्य श्रुतसमाधौ रतो भवति ।।९.४.३।।

**(स.)** अथ द्वितीयं श्रुतसमाधिमाह–तत्र 'चउव्विहा इत्यादि सूत्रं' चतुर्विधः खलु श्रुतसमाधिर्भवति. तद्यथा-श्रुतं मे आचारादि द्वादशाङ्गं भविष्यतीत्यनया बुद्ध्याध्येतव्यं भवति, न गौरवाद्यालम्बनेन. तथाध्ययनं कुर्वन्नेकाग्रचित्तो भविष्यामि, न विप्लुतचित्त इत्यध्येतव्यं भवति, अनेन चालम्बनेन. तथाध्ययनं कुर्वन् ज्ञातधर्मतत्त्वोऽहमात्मानं शुद्धधर्मे स्थापयिष्यामि, तथाध्ययनफलात् स्थितः स्वयं धर्मे, परं विनेयं स्थापयिष्यामीत्यनेन चालम्बनेन, चतुर्थं पदं भवति, भवति चात्र श्लोक इति पूर्ववत्.

स चायं श्लोकः–**नाणमिति**-अध्ययनतत्परस्य ज्ञानं भवति, एकाग्रचित्तश्च तत्परतया एकाग्रालम्बनश्च भवति, स्थित इति विवेकाद् धर्मे स्थितो भवति, स्थापयति च परमिति स्वयं धर्मे स्थितत्वादन्यमपि स्थापयति, श्रुतानि च नानाप्रकाराण्यधीत्य रतः सक्तो भवति श्रुतसमाधाविति सूत्रार्थः. उक्तः श्रुतसमाधिः,।।९.४.३।।

**(सु.)** श्रुतसमाधिमाह–चउव्विहा इत्यादि, चतुर्विधः खलु श्रुतसमाधिर्भवति, तद्यथेत्युदाहरणोपन्यासार्थः । श्रुतं मे आचारादि द्वादशाङ्गं भविष्यतीत्यनया बुद्ध्या अध्येतव्यं भवति, न गौरवाद्यालम्बनेन (१) तथा अध्ययनं कुर्वन्नेकाग्रचित्तो भविष्यामि, न च विप्लुतचित्त इत्यध्येतव्यं भवति अनेन चालम्बनेन (२) तथाऽध्ययनं कुर्वन् विदितधर्म्मतत्त्व आत्मानं स्थापयिष्यामि शुद्धधर्म इत्यनेन चालम्बनेनाध्येतव्यं भवति (३) तथा अध्ययनफलात् स्थितः स्वयं धर्म्मे परं विनेयं स्थापयिष्यामि तत्रैवेत्यध्येतव्यं भवत्यनेन चालम्बनेनाध्येतव्यं (४) चतुर्थं पदं भवति ।।सूत्र-९.४.३।।

भवति चात्र श्लोक इति पूर्ववत् स–चायं नाणमिति, ज्ञानमित्यध्ययनपरस्य ज्ञानं भवत्येकाग्रचित्तश्च तत्परतया एकाग्रालम्बनश्च भवति, स्थित इति विवेकाद् धर्म्मस्थितो भवति, स्थापयति परमिति स्वयं धर्म्मस्थितत्वादन्यमपि स्थापयति, श्रुतानि च नानाप्रकाराण्यधीते, अधीत्य च रतः-सक्तो भवति, श्रुतसमाधाविति उक्तः श्रुतसमाधिः ।।९.४.३।।

**चउव्विहा खलु तवसमाही भवइ, तं जहा-नो इहलोगट्ठयाए तवमहिट्ठिज्जा, नो परलोगट्ठयाए तवमहिट्ठिज्जा, नो कित्ति-वन्न-सद्द-सिलोगट्ठयाए तवसमहिट्ठिज्जा, नन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा । चउत्थं पयं भवइ । सूत्र-९.४.३**

(ति.) अथ तपःसमाधिमाह चतुर्विधः खलु तपःसमाधिर्भवति । तद्-यथा-इहलोकार्थम्-लब्ध्यादिवाञ्छया । तपः-अनशनादिरूपम् । नाधितिष्ठेत्-न कुर्यात्, धम्मिलवत् । न परलोकार्थम्-जन्मान्तरभोगनिमित्तम् । तपोऽधितिष्ठेत्-ब्रह्मदत्तवत्। एवं न कीर्ति-वर्ण-शब्द-श्लाघार्थम्-सर्वदिग्व्यापी साधुवादः कीर्तिः, एकदिग्व्यापी वर्णः, अर्द्धदिग्व्यापी शब्दः, तत्स्थान एव साधुवादः श्लाघा । नैतदर्थं तपोऽधितिष्ठेत्। नान्यत्र निर्जरार्थम्-न कर्मनिर्जरामेकां विहाय । तपोऽधितिष्ठेत् । चतुर्थपदं भवति ।

**भवइ य इत्थ सिलोगो –**

**विविहगुणतवोरए निच्चं, भवइ निरासए निज्जरट्ठिए ।**
**तवसा धुणइ पुराणपावगं, जुत्तो सया तवसमाहिए ।।९.४.४।।**

(ति.) भवति चात्र श्लोकः विविधगुणतपोरतो नित्यम् । निराशः-निःप्रत्याशः, इहलोक-परलोकार्थयोः। निर्जरार्थिकः-कर्मनिर्जरार्थी । ईदृक् साधुः तपसा धुनाति पुराणपापकं नवं च न बध्नाति । युक्तः सदा तपःसमाधौ ।।९.४.४।।

(स.) अथ तपःसमाधिमाह-चउव्विहा...इति-चतुर्विधः खलु तपःसमाधिर्भवति, तद्यथेत्युदाहरणे, नेहलोकार्थमिहलोकनिमित्तं लब्ध्यादेर्वाञ्छया तपोऽनशनादिरूपं साधुरधितिष्ठेत् कुर्यात्, धर्मिलवत्, तथा न परलोकार्थं जन्मान्तरभोग-निमित्तं तपोऽधितिष्ठेद् ब्रह्मदत्तवत्, एवं न कीर्ति-वर्ण-शब्द-श्लाघार्थमिति. तत्र सर्वदिग्व्यापी साधुवादः कीर्त्तिः, एकदिग्व्यापी वर्णः, अर्द्धदिग्व्यापी शब्दः, स्वस्थान एव साधुवादः श्लोकः श्लाघा वा, नैतन्निमित्तं तपोऽधितिष्ठेत्, अकामः सन् यथा कर्मनिर्जरैव फलं भवति तथाधितिष्ठेदिति, चतुर्थं पदं भवति ।

भवति चात्र श्लोक इति पूर्ववत्, स चायं-विविह (विविध) इति-विविधगुणतपोरतो हि नित्यमनशनाद्यपेक्षयानेकगुणं यत्, तपः, तद्रत एव सदा भवति निराशो निष्प्रत्याश इहलोकादिषु, निर्जरार्थिकः कर्मनिर्जरार्थी, स एवम्भूतस्तपसा विशुद्धेन धुनोत्यपनयति साधुः पुराणपापं चिरन्तनं कर्म, नवं च न बध्नात्येवं युक्तः सदा तपःसमाधाविति.

उक्तस्तपःसमाधिः, ।।९.४.४।।

**(सु.)** तपःसमाधिमाह—चउव्विहा इत्यादि, चतुर्विधः खलु तपःसमाधिर्भवति, तद्यथेत्युदाहरणोपन्यासार्थः, नेहलोकार्थमिहलोकनिमित्तं लब्ध्यादिवाञ्छया, तपः-अनशनादिरूपमधितिष्ठेत्-कुर्यात् धर्मिलवत् (१) तथा न परलोकार्थं—जन्मान्तर-भोगनिमित्तं तपोऽधितिष्ठेद् ब्रह्मदत्तवत् (२) एवं न कीर्त्ति-वर्ण-शब्द-श्लाघार्थमिति, सर्व्वदिग्व्यापी साधुवादः कीर्त्तिः, एकदिग्व्यापी वर्णो, अर्द्धदिग्व्यापी शब्दः, तत्स्थान एव श्लाघा, नैतदर्थं तपोऽधितिष्ठेत् (३) अपि तु नान्यत्र निर्जरार्थमिति, न कर्म्मनिर्जरामेकां विहाय तपोऽधितिष्ठेत्, अकामः सन् यथा कर्मनिर्जरैव फलं भवति तथाधितिष्ठेदित्यर्थः (४) चतुर्थं पदं भवति ।।सूत्रम्-९.४.४।।

भवति चात्र श्लोक-इति पूर्ववत् स चायं-विविह...इत्यादि, विविधगुणतपोरतो हि नित्यमनशनाद्य-पेक्षयाऽनेकगुणं यत् तपः, तद्रत एव सदा भवति, निराशो निष्प्रत्याश इहलोकादिषु, निर्जरार्थिकः-कर्मनिर्जरार्थी, स एवंभूतः तपसा विशुद्धेन, धुनोति-अपनयति पुराणपापं-चिरन्तनं कर्म, नवं च न बध्नाति-एवं युक्तः सदा तपःसमाधाविति उक्तः तपःसमाधिः, ।।९.४.४।।

**चउव्विहा खलु आयारसमाही भवइ, तं जहा-नो इहलोगट्ठयाए आयारमहिट्ठिज्जा, नो परलोगट्ठयाए आयारमहिट्ठिज्जा, नो कित्ति-वन्न-सद्द-सिलोगट्ठयाए आयारमहिट्ठिज्जा, नन्नत्थ आरिहंतेहिं हेऊहिं आयारमहिट्ठिज्जा । सूत्र-९.४.५ चउत्थं पयं भवइ ।**

**(ति)** आचारसमाधिमाह—अर्थः प्राग्वत् । नवरम् । तपःशब्दस्थाने आचारशब्दो-ऽभिधेयः । आरिहंतेहिं हेऊहिं नान्यत्र-आर्हतैर्हेतुभिरनाश्रवत्वादिभिः । आचारम्-मूलगुणोत्तरगुणमयम् । अधितिष्ठेत्, निरीहः सन् यथा मोक्ष एव भवति । चतुर्थपदं भवति ।

**भवइ य इत्थ सिलोगो —**

**जिणवयणरए अतिंतिणे, पडिपुन्नाययमाययट्ठिए ।**
**आयारसमाहिसंवुडे, भवइ य दंते भावसंधए ।।९.४.५।।**

**(ति.)** भवति चात्र श्लोकः-जिनवचनरतः-आगमे कृतासक्तिः । अतिंतिनः-केनापि किमप्युक्तः सन् पुनः पुनः ओषणशीलः । परिपूर्णः-सूत्रादिना, आयतम्-अत्यन्तम् ।

आयतो दीर्घो, लक्षणया मोक्षस्तदर्थी-आयतार्थी । आचारसमाधिसंवृत्तः-आचारे यः समाधिस्तेन स्थगिताश्रवद्वारः । भवति च दान्तः-इन्द्रियनो-इन्द्रियदमकः । भां-प्रभां, जीवस्य स्वाभाविकीं ज्योतीरूपाम्, अवयति-प्रापयति यः, अनेकार्थत्वाद् धातूनां, स भावो मोक्षः, तं सन्धत्तेऽन्यतोऽपि चेति, 'डप्रत्यये' भावसन्धः, स एव भावसन्धकः-आत्मनो मोक्षासन्नत्वकारी ।।९.४.५।।

**(स.)** अथाचारसमाधिमाह—चउव्विहा...इति-चतुर्विधः खल्वाचारसमाधिर्भवति, तद्यथा-नेहलोकार्थमाचारमधितिष्ठेत्, न परलोकार्थमाचारमधितिष्ठेत्, न कीर्त्ति-वर्ण-शब्द-श्लोक-निमित्तमाचारमधितिष्ठेत्, नान्यत्रार्हतैरर्हत्सम्बन्धिभिर्हेतुभिराचारं मूलगुणोत्तरगुणमयमधितिष्ठेन्निरीहः सन् यथा मोक्ष एव भवति ।

भवति चतुर्थं पदं, भवति चात्र श्लोक इति पूर्ववत् स चायं-जिणवयण इत्यादि-जिनवचनरत आगमे सक्तः, अतिन्तिनो न-एकवारं किञ्चिदुक्तः सन्नसूयया भूयो भूयो वक्ता, प्रतिपूर्णः सूत्रादिना, आयतमायतार्थिकः, अत्यन्तं मोक्षार्थी, आचारसमाधिसंवृत इत्याचारे यः समाधिस्तेन स्थगिताश्रवद्वारः स भवति, पुनः किम्भूतः ? दान्त इन्द्रिय-नोइन्द्रियदमाभ्यां, भावसन्धकः, भावो मोक्षस्तत्सन्धक आत्मनो मोक्षासन्नकारीति. ।।९.४.५.।।

**(सु.)** चउव्विहा इत्यादि, चतुर्विधः खल्वाचार-समाधिर्भवति, तद्यथेत्युदाहरणोपन्यासार्थः, नेहलोकार्थमित्याद्याचाराभिधानभेदेन पूर्ववत्, यावन्नान्यत्रार्हतैरर्हत्सम्बन्धिभिर्हेतुभिरनाश्रवत्वादिभिः आचारं-मूलगुणोत्तरगुणमयमधितिष्ठेत्, निरीहः सन् यथा मोक्ष एव भवतीति चतुर्थं पदं भवति ।। सूत्रम्-९.४.५।।

भवति चात्र श्लोक इति पूर्ववत् स चायं 'जिणवयणरए' इत्यादि, जिनवचनरतः-आगमे सक्तः, अतिन्तिनः—न सकृत् किञ्चिदुक्तः सन्नसूयया भूयो भूयो वक्ता, प्रतिपूर्णः सूत्रादिना, आयात-मायातार्थिकः-अत्यन्तं मोक्षार्थी, आचारसमाधिसंवृत इत्याचारे यः समाधिस्तेन स्थगिताश्रवद्वारः सन् भवति च दान्त इन्द्रियनो-इन्द्रियदमाभ्यां भावसन्धको-भावो-मोक्षस्तत्सन्धक आत्मनो मोक्षासन्नकारीति ।।९.४.५।।

**अभिगम्म चउरो समाहिओ, सुविसुद्धो सुसमाहिअप्पओ ।**
**विउलहियसुहावहं पुणो, कुव्वइ सा[१] पयखेममप्पणो ।।९.४.६।।**

१. 'सुमति० वृत्तौ' 'असो' पाठः मूलत्वेन, विवृतश्च तथैव. - 'असो'.

**(ति.)** सर्व्वसमाधि-फलमाह—अभिगम्य-विज्ञायासेव्यः । चतुरः समाधीन्-अनन्तरोक्तान् । सुविशुद्धः-मनो-वाक्-कायैः । सुसमाहितात्मकः-संयमे । विपुलं-विस्तीर्णं, हितं-वर्तमानानागतकलयोः पथ्यं, सुखं, आवहति प्रापयति, यत्, तद् विपुलहितसुखावहम् । पुनः । पदम्-स्थानम्। क्षेमम्-शिवम् । करोति आत्मनः सः साधुः ।।९.४.६।।

**(स.)** सर्व्वसमाधि-फलमाह—अभिगमे(म्म) इति-असौ साधुरात्मन एव न त्वन्यस्य पदं स्थानं क्षेमं शिवं करोति, किं कृत्वा ? चतुरः समाधीनभिगम्य सम्यग् विज्ञाय, किम्भूतः साधुः ? सुविशुद्धो मनो-वाक्-कायेन, पुनः सुसमाहितात्मा सप्तदशविधे संयमे, स एवंभूतः, किम्भूतं पदं ? विपुलहितसुखावहं विपुलं विस्तीर्णं हितं तदात्व आयतौ च पथ्यं सुखमावहति प्रापयति यत् तत् तथा. ।।९.४.६।।

**(सु.)** सर्वसमाधि फलमाह—अभिगम(म्म) इति, अभिगम्य-विज्ञायासेव्य च चतुरः समाधीननन्तरोदितान्, सुविशुद्धो मनो-वाक्-कायैः, सुसमाहितात्मा सप्तदशविधे संयमे, स एवंभूतो धर्मराज्यमासाद्य विपुलहितसुखावहं, पुनरिति विपुलं-विस्तीर्णं हितं, तदात्वे आयत्यां च पथ्यं सुखमावहति-प्रापयति यत् तत् तथाविधं, करोत्यसौ साधुः पदं-स्थानं, क्षेमं-शिवं, आत्मन एव, न त्वन्यस्येति अनेनैकान्तक्षणभङ्ग-व्यवच्छेदमाहेति ।।९.४.६।।

**जाइमरणाओ मुच्चई, इत्थत्थं च चयाइ सव्वसो ।**
**सिद्धे वा भवइ सासए, देवे वा अप्परए महिड्ढिय ।।९.४.७।। त्ति बेमि**

**(ति.)** एतदेव स्पष्टयति—जातिमरणात्-जन्ममृत्युरूपात् संसारात् मुच्यते । इत्थं-नारकादिव्यपदेशबीजं, वर्णसंस्थानादिभिः प्रकारैः स्थितम्, इत्थंस्थम् । तच्च त्यजति । सर्वशः-सर्वप्रकारैः । अपुनर्ग्रहणतया सिद्धो वा भवति शाश्वतः । देवो वाऽल्परजाः-प्रतलकर्मा । महर्द्धिकः-अनुत्तरवैमानिकादिरेकावतारः । इति ब्रवीमीति प्राग्वत्.।।९.४.७।। **तिलकाचार्यवृत्तौ नवमध्ययनम् समाप्तम्**

**(स.)** एतदेव स्पष्टयति—जाइ...इति-असौ साधुर्जाति-मरणात् संसारान्मुच्यते, पुनः साधुः 'इत्थंस्थं त्यजति, कोऽर्थः ? इदंप्रकारमापन्नमित्थम् इत्थं स्थितमित्थंस्थं नारकादिव्यपदेशबीजं वर्णसंस्थानादि सर्वशः सर्वैः प्रकारैरपुनर्ग्रहणतया, एवं सिद्धो

वा कर्मक्षयात् सिद्धो भवति, कीदृशः सिद्धः ? शाश्वतोऽपुनरागामी सावशेषकर्मा देवो वा भवति, किम्भूतो देवः ? अल्परतः कण्डूपरिगतकण्डूयनकल्परतरहितः, महर्द्धिकोऽनुत्तरवैमानिकादिः, ब्रवीमीति, पूर्ववत्. ७. इति चतुर्थ उद्देशकः ४.

**''इति श्रीदशवैकालिकशब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां विनयसमाध्ययनं सम्पूर्णम् ९.'' श्रीरस्तु.**

**(सु.)** एतदेव स्पष्टयति जाइ इति, जाति[१]-(जरा)-मरणात् जन्म-(जरा)-मरणात् संसारान्मुच्यते, असौ सुसाधुरित्थंस्थं चेति इदंप्रकारमापन्नमित्थं इत्थं तिष्ठतीतीत्थंस्थं-नारकादिव्यपदेशबीजं, वर्णसंस्थानादि तच्च **चएइ**-त्यजति, सर्वशः-सर्वैः प्रकारैरपुनर्ग्रहणतया, एवं सिद्धो वा कर्म्मक्षयात् सिद्धो भवति, शाश्वतोऽपुनरागामी सावशेषकर्मा देवो वाऽल्परतः-पामापरिगतकण्डूयनकल्परतरहितो महर्द्धिकः-अनुत्तरवैमानिकादिः ।।४६०।। ब्रवीमीति पूर्ववत् ।। इति विनयसमाधौ चतुर्थ उद्देशकः ।।

**इति श्रीसुमतिसाधुविरचितावचूरौ नवमं विनयसमाधिनाममध्ययनं समाप्तम् ९ ।।**

१. 'सुमति० वृत्ति ग्रन्थे' 'जाइ(जरा)मरण' इति पाठः पूर्व संपादकेन गृहीतः, वृत्तावत्रास्माभिः 'जरा शब्दः कोष्ठमध्ये स्थापितः नान्यत्र वृत्तौ विवृतत्वात्।

## ।। दशमं अध्ययनं-सभिक्षु ।।

**निक्खम्म माणाइ(अ) बुद्धवयणे, निच्चं चित्तसमाहिओ भविज्जा[1] ।**
**इत्थीण वसं न यावि गच्छे, वंतं नो पडियायए[2] स भिक्खू ।।१०.१।।**

**(ति.)** अनन्तराध्ययने आचारप्रणिहितो यथोक्तविनयसम्पन्नो भवतीत्युक्तम् । अत्र चैतेषु नवस्वध्ययनेषु यो व्यवस्थितः, स सम्यग् भिक्षुरिति, अनेन सम्बन्धेनायातं सभिक्ष्वध्ययनं व्याख्यायते । तस्य चेदमादिसूत्रम् - निःक्रम्य-प्रव्रज्य । आज्ञया-सद्गुरूपदेशेन । बुद्धवचने-सर्वज्ञप्रवचने । नित्यं चित्तसमाहितः-चित्तेनातिप्रसन्नो भवेत् । चित्तसमाधानं च स्त्रीवशस्य वान्तमापिबतश्च न स्यात्-अतस्तान्(तिं) निषेधयति, स्त्रीणां च वशं न गच्छेत्, तदायत्तो न भवेत्, तद्वशो हि वान्तं विषयरसं प्रत्यापिबति, तं च यो न प्रत्यापिबति स भिक्षुः । तस्माद् भिक्षुणा स्त्रियो दूरतस्त्याज्याः ।।१०.१।।

**(स.)** निक्खम्म...इति-अथ सभिक्षुनामकमध्ययनमारभ्यते, अस्य चायमभिसम्बन्धः-इह पूर्वाध्ययन आचारप्रणिहितो यथोचितविनयसम्पन्नो भवतीत्येतदुक्तम्, इह त्वेतेष्वेव नवस्वध्ययनेषु व्यवस्थितः, स सम्यग् भिक्षुरित्युच्यते, इत्यनेन सम्बन्धेनायातमिदमध्ययनं व्याख्यायते[3], तच्चेदं-स भिक्षुर्भवेत्, स कः ? यो निष्क्रम्य द्रव्यभावगृहात् प्रव्रज्यां गृहीत्वेत्यर्थः, कया ? आज्ञया, तीर्थकरगणधराणामुपदेशेन, बुद्धवचने तीर्थकरगणधरवचने नित्यं सर्वकालं चित्तेन समाहितोऽतिप्रसन्नो भवेत्, प्रवचन एव अभियुक्त इति गर्भः, अथ व्यतिरेकतः समाधानोपायमाह-पुनः स्त्रीणां सर्वाऽसत्कार्यनिबन्धनभूतानां वशं तत्परतन्त्रतारूपं न चापि गच्छेत्, तद्वशगो हि नियमतो वान्तं प्रत्यापिबति, अतो बुद्धवचने चित्तसमाधानतः सर्वथा स्त्रीवशत्यागात्, अनेनैवोपायेनान्योपायासम्भवाद् वान्तं परित्यक्तं यद् विषयजम्बालं न प्रत्यापिबति न मनागप्याभोगतोऽनाभोगतश्च तत् सेवते. ।।१०.१.।।

**(सु.)** व्याख्यातं विनयसमाध्यध्ययनम् । अधुना सभिक्ष्वाख्यमारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने आचारप्रणिहितो यथोचितविनयसंपन्नो भवतीत्येतदुक्तं,

---

१. हवेज्जा, अथवा हविज्जा इत्यन्यत्र मुद्रितम् । २. २. समय. वृत्तौ सर्वत्र 'जे स' मूलतः, ०विवृत्तं च' यः स'इति, चूर्णौ- ९.११.१९ गाथासु एवं 'जे' मूलपाठः ३. क्वचिदिदं पदं नास्ति ।

इह त्वेतेष्वेव नवस्वध्ययनार्थेषु यो व्यवस्थितः स सम्यग् भिक्षुरित्येतदुच्यते, इत्यनेनाभिसम्बन्धेनायातमिदमध्ययनमिति । तच्चेदं-किंच- निक्खम्म...इति, निष्क्रम्य-द्रव्यभावगृहात्, प्रव्रज्यां गृहीत्वेत्यर्थः आज्ञया-तीर्थकर-गणधरोपदेशेन योग्यतायां सत्यां, निष्क्रम्य किम् ?-इत्याह-बुद्धवचने-अवगततत्त्व-तीर्थकरगणधरवचने, नित्यं-सर्वकालं, चित्तसमाहितश्चित्तेनातिप्रसन्नो भवेत्, प्रवचने एवाभियुक्त इति गर्भः । व्यतिरेकतः समाधानोपायमाह-स्त्रीणां सर्वासामसत्कार्य-निबन्धनभूतानां वशं तत्परतन्त्रता(तदायत्तता)रूपं न चापि गच्छेत्, तद्वशगो हि नियमतो वान्तं प्रत्यापिबति, अतो बुद्धवचनचित्तसमाधानतः सर्वथा स्त्रीवशत्यागात्, अनेनैवोपायेन, अन्योपाया-सम्भवात्, वान्तं-परित्यक्तं सद् विषयजम्बालं न प्रत्यापिबति-न मनागप्याभोगतो-ऽनाभोगतश्च तत्सेवते **यः**, स भिक्षुर्भावभिक्षुरिति ।।१०.१।।

**पुढविं न खणे न खणावए, सीओदगं न पिवे न पि(पी)वावए ।**
**अगणिसत्थं जहा सुनिसियं, तं न जले न जलावए स भिक्खू ।।१०.२।।**

**(ति.)** तथा (पुढविं'इति) पूर्वार्धं स्पष्टम् । उत्तरार्धस्यार्थः । अग्निः-षट्जीवनिकाय-घातकः । यथा शस्त्रम् । सुनिशितम्-सुतीक्ष्णं, खड्गादि । तं न स्वयं ज्वलयति । न परैः ज्वालयति। नान्यं ज्वालयन्तमनुजानाति स भिक्षुः ।

आह परः—षड्जीवनिकायिकादिषु बहुष्वध्ययनेष्वयमर्थोऽभिहितः किं पुनरुक्तः ? इत्युच्यते-तदुक्तार्थानुष्ठानपर एव भिक्षुरितिज्ञापनार्थमिति न दोषः ।।१०.२।।

**(स.)** तथा-पुढविं'इति-तथा साधुः पृथ्वीं सचेतनादिरूपां न खनति स्वयं, न च खानयति परैः, एकग्रहणे तज्जातीयानामपि ग्रहणात् खनन्तमन्यं न स[1]मनुजानातीत्येवं सर्वत्र वेदितव्यम्. तथा यः साधुः सचित्तं पानीयं स्वयं न पिबति, न च पाययति परान्, तथाग्निः षड्जीवनिकायघातकः, किंवत् ? यथा सुनिशितमुज्ज्वालितं शस्त्रं जीवघातकं भवेत्, ततस्तमग्निं यः स्वयं न ज्वालयति, परैर्न ज्वालयति, स इत्थम्भूतो भिक्षुर्भवेत्,

ननु षड्जीवनिकायादिष्वध्ययनेषु पूर्वोक्तेषु सर्वत्रायमेवार्थः कथितः, किमर्थं पुनरपि

१. नानुजानातीति पाठान्तरम् ।

सभिक्षुनामाध्ययनेऽपि स एवार्थः प्ररूप्यते ? पुनरुक्तिदोषप्रसङ्गो जायते. अत्रोत्तरमाह—षड्जीवनिकायपालनापर एव भिक्षुरुच्यते, नान्य इति ज्ञापनार्थं, ततो न दोषः ।।१०.२।।

**(सु.)** तथा-पुढविं'इति, पृथ्वीं-सचेतनादिरूपां न खनति स्वयं, न खानयति परैः, "एकग्रहणे तज्जातीयग्रहणम्" इति खनन्तमप्यन्यं नानुजानातीति, एवं सर्वत्र वेदितव्यं, शीतोदकं-सचित्तं पानीयं न पिबति स्वयं, न पाययति परान्, अग्निः षड्जीवघातकः, किंवद् ?-इत्याह-शस्त्रं-खड्गादि यथा सुनिशितमुज्ज्वालितं तद्-वत्, तं न ज्वालयति स्वयं, न ज्वालयति परैः, य इत्थंभूतः स भिक्षुरिति, आह-षड्जीवनिकायादिषु सर्वाध्ययनेष्वयमर्थोऽभिहितः किमर्थं पुनरुक्त इति ?, उच्यते, तदुक्तार्थानुष्ठानपर एव भिक्षुरिति ज्ञापनार्थं, ततश्च न दोष इति ।।४६२।।

**अनिलेण न [1]विए न वियावए, हरियाणि न छिंदे न छिंदावए ।**
**बीयाणि सया विवज्जयंतो, सचित्तं नाहारए स भिक्खू ।।१०.३।।**

**(ति.)** तथा-अनिलेन हेतुना-अनिलनिमित्तं, तालवृन्तादि । स्वयं न वीजयति । न परैः वीजयति । नान्यं वीजयन्तमनुजानाति । न हरितानि छिनत्ति स्वयम् । न परैः छेदयति । नाप्यन्यं छिन्दानमनुजानाति । बीजानि सदा विवर्जयेत्-सङ्घट्टनादिक्रियया । सच्चित्तं नाहारयति **यः** कदाप्यपुष्टालम्बनः, स भिक्षुः ।।१०.३।।

**(स.)** अनिलेण 'इति-तथा योऽनिलेन वायुना वायुहेतुना चेलकर्णादिनात्मादि न स्वयं वीजयति, नापि परैर्वीजयति, तथा हरितानि बालतृणादीनि यः स्वयं न छिनत्ति, न च परैश्छेदयति तथा यो बीजानि हरितफलरूपाणि व्रीह्यादीनि, सदा सर्वकालं विवर्जयेत् सङ्घट्टनादिक्रियया, तथा **यः** सचित्तं नाहारयति कदाचिदपि सबले कारणेऽपि, स भिक्षुः ।।१०.३।।

**(सु.)** अनिले...इति-अनिलेनानिलहेतुना चेलकर्णादिना न वीजयत्यात्मादि स्वयं, न वीजयति परैः, हरितानि-शष्पादीनि, न छिनत्ति स्वयं, न छेदयति परैः, बीजानि-हरितफलरूपाणि व्रीह्यादीनि सदा-सर्वकालं विवर्जयेत् संघट्टनादिक्रियया, सचित्तं नाहारयति **यः** कदाचित् अप्यपुष्टालम्बनः स भिक्षुरिति ।।१०.३।।

---

१. न वीए, न वीयावए' इत्यन्यत्र मुद्रितः पाठभेदः ।

**वहणं तस-थावराण होइ, पुढवि-दग-कट्ठनिसियाणं ।**
**तम्हा उद्देसियं न भुंजे, नो वि पए न पयावए, स भिक्खू ।।१०.४।।**

**(ति.)** औद्देशिकादिपरिहारेण त्रसस्थावरपरिहारमाह– वधनम्-हननम् । त्रस-स्थावराणाम्-द्वीन्द्रियादिपृथ्व्यादीनां भवति । तथा पृथिवी-दक-काष्ठनिसृतानाम्-आश्रितानाम् । द्वादशविधौद्देशिकारम्भे सति तस्मादौद्देशिकं न भुङ्क्ते । तथा न पचति । न पाचयति । पचन्तमपि नान्यमनुजानाति । अनेन न हन्ति, न घातयति, नान्यं घ्नन्तमनुजानाति । न क्रीणाति, न क्रापयति, न क्रीणन्तमनुजानाति । एता नवकोट्यः । एतद् विशुद्धं पिण्डादि गृह्णाति **यः**, स भिक्षुः ।।१०.४।।

**(स.)** अथौदेशिकादिपरिहारेण त्रसस्थावरपरिहारमाह—वहणं 'इति-यस्मात् कृतौद्देशिकादौ त्रस-स्थावराणां, त्रसानां द्वीन्द्रियादीनां, स्थावराणां च पृथिव्यादीनां जीवानां, वधनं हननं भवति, किंविशिष्टानां त्रस-स्थावराणां? पृथिवी-तृण-काष्ठनिःसृतानां, तथा समारम्भात्, यस्मादेवं तस्मात् कारणादौद्देशकं कृतादि, अन्यच्च सावद्यं यो न भुङ्क्ते, न केवलमेत् किन्तु यः स्वयं न पचति, नाप्यन्यैः पाचयति, नाप्यन्यं पाचयन्तं समनुजानाति, स भिक्षुः ।।१०.४।।

**(सु.)** औद्देशिकादिपरिहारेण त्रसस्थावरपरिहारमाह—वहणं 'इति, वधनं-हननं त्रस-स्थावराणां-द्वीन्द्रियादि-पृथिव्यादीनां भवति कृतौद्देशिके, किंविशिष्टानां ?-पृथिवी-तृण-काष्ठनिश्रितानां तथासमारम्भात्, यस्मादेवं तस्मादौद्देशिकं कृतादि, अन्यच्च सावद्यं न भुङ्क्ते, न केवलं एतत्, किन्तु नापि पचति स्वयं, न पाचयत्यन्यैः, न पचन्तमनुजानाति **यः**, स भिक्षुरिति ।।१०.४।।

**रोइय नायपुत्तवयणे [1]अप्पसमे मन्निज्ज छप्पि काए ।**
**पंच य फासे महव्वयाइं, पंचासवसंवरए य जे, स भिक्खू ।।१०.५।।**

**(ति.)** किञ्च—रोचयित्वा-रुचिं नीत्वा । ज्ञातपुत्रवचनम्-श्रीमहावीरवचः । आत्मसमान्। षडपि कायान्-जीवनिकायान्, पृथिव्यादीन् । मन्यते । पंच च स्पृशति महाव्रतानि । पंचाश्रवसंवृतश्च-कृतपञ्चेन्द्रियसंवरणः यः, स भिक्षुः ।।१०.५।।

**(स.)** रोइय इति-यः साधुः षडपि पृथिव्यादिजीवनिकायान्, आत्मसमान् मन्यते, किं कृत्वा ? ज्ञातपुत्रवचनं रोचयित्वा, ज्ञातपुत्रो महावीरदेवः, तस्य वचनं

1. अन्यत्र' अत्तसमे' इति मुद्रितम् ।

विधिग्रहणाऽऽसेवनाभ्यां प्रियं कृत्वा, पुनर्यः पञ्चापि महाव्रतानि स्पृशति सेवते, पुनर्यः पञ्चाश्रवसंवृतो भवेत्, स भिक्षुः. ।।१०.५।।

**(सु.)** रोइ...इति, रोचयित्वा-विधिग्रहण-भावनाभ्यां प्रियं कृत्वा, किं तत् ?, इत्याह-ज्ञातपुत्रवचनं भगवन्महावीरवचनं, आत्मसमान्-आत्मतुल्यान् मन्यते षडपि कायान्-पृथिव्यादीन्, पञ्च चेति चशब्दोऽपिशब्दार्थः, पञ्चापि स्पृशति-सेवते महाव्रतानि, पञ्चाश्रवसंवृतश्च द्रव्यतोऽपि पञ्चेन्द्रियसंवृतश्च, **यः** स भिक्षुरिति ।।१०.६।।

**चत्तारि वमे सया कसाए, धुवजोगी य हविज्ज बुद्धवयणे ।**
**अहणे निज्जायरूयरयए, गिहिजोगं परिवज्जए स भिक्खू ।।१०.६।।**

**(ति.)** किञ्च-चतुरः कषायान् वमति सदा । ध्रुवयोगी-सतताभ्यासी भवति । बुद्धवचने-जिनमते । अधनः-चतुःपदादिरहितः । निर्जातरूप-रजतः-निर्गतसुवर्णरौप्यः। गृहियोगम्-गृहस्थसम्पर्कम् । परिः-सर्वथा वर्जयति **यः**, स भिक्षुः ।।१०.६।।

तथा -

**(स.)** चत्तारि 'इति-किञ्च यः साधुश्चतुरः क्रोधादीन् कषायान्, सदा सर्वकालं, वमति त्यजति, पुनर्यो ध्रुवयोगी भवति, उचितनित्ययोगवान् स्यात्, केन ? बुद्धवचनेन तीर्थकरवचनेन करणभूतेन, तृतीयार्थे सप्तम्यत्र, किम्भूतः साधुः ? अधनः-चतुष्पदादि-रहितः, पुनः किम्भूतः साधुः ? निर्जातरूप-रजतः, निर्गतस्वर्ण-रूप्य इति भावः, पुनर्यो गृहियोगं मूर्छया गृहस्थसम्बन्धं परिवर्जयति, सर्वैः प्रकारैः परित्यजति **यः**, स भिक्षुः. ।।१०.६।।

**(सु.)** किञ्च—चत्तारि 'इति, चतुरः क्रोधादीन् वमति तत्प्रतिपक्षाभ्यासेन, सदा-सर्वकालं कषायान्, ध्रुवयोगी चोचितनित्ययोगवांश्च भवति, बुद्धवचन इति तृतीयार्थे सप्तमी, तीर्थकरवचनेन करणभूतेन, ध्रुवयोगी भवति, यथागममेवेति भावः, अधनश्चतुष्पदादिरहितो निर्जातरूपर[1]जतो-निर्गतसुवर्णरूप्य इति भावः, गृहियोगं-मूर्च्छया गृहस्थसम्बन्धं परिवर्ज्जयति सर्व्वैः प्रकारैः परित्यजति **यः** स भिक्षुरिति ।।४६६।। तथा-

**सम्मद्दिट्ठी सया अमूढे, अत्थि, हु नाणे [2]तवे य संयमे य ।**
**तवसा धुणइ पुराणपावगं, मण-वय-कायसु संवुडे य जे, स भिक्खू ।।१०.७।।**

१. 'अत्र सु-टीकासंवर्लिते प्रतौ । निज्जायरूवरयणे इति पाठः मूल रूपेण मुद्रितः । २. तवे संजमे य'इत्यत्र मुद्रितः पाठभेदः ।

**(ति.)** सम्यग्दृष्टिः सदा । अमूढः-अव्यामोहवान्, नास्तिकादिभिरविप्रतारितः । अस्ति ज्ञानम्-अतीन्द्रियविषयमपि । अस्ति तपः-सबाह्याभ्यन्तरम् । अस्ति संयमः-नवकर्मानुपादानरूपः । इत्थं दृढभावः तपसा धुनाति पुराणपापकम् । मनो-वाक्-कायसंवृतः-संवृता मनो-वाक्-कायवृत्तिः, यः स भिक्षुः ।।१०.७।।

**(स.)** पुनराह—सम्मद्दिट्ठी...इति-यः साधुः सम्यग्दृष्टिर्भावसम्यग्दर्शनी, पुनः सदा अमूढः सदाविप्लुतः सन्नेवं मन्यते, अस्त्येव ज्ञानं हेयोपादेयविषयमतीन्द्रियेष्वपि, तथा तपश्चास्त्येव बाह्याभ्यन्तरकर्ममलापनयने पानीयसदृशं. तथा संयमश्च नवकर्मानुपादानरूपः. इत्थं च दृढभावो यस्तपसा धुनोति पुराणं पापं भावसारया प्रवृत्त्या, पुनर्यो मनोवचनकायेषु संवृतः, कोऽर्थः ? तिसृभिर्गुप्तिभिर्गुप्तः, स भिक्षुः. ।।१०.७।।

**(सु.)** तथा सम्मद्दिट्ठी...इति, सम्यग्दृष्टिः-भावसम्यग्दर्शनी, यः सदाऽमूढः-अविप्लुतः सन्नेवं मन्यते, 'अस्त्येव ज्ञानं हेयोपादेयविषयमतीन्द्रियेष्वपि, तपश्च बाह्याभ्यन्तरकर्म्म-मलापनयनजलकल्पं, संयमश्च नवकर्म्मानुपादानरूपः, इत्थं च दृढभावस्तपसा धुनोति पुराणं पापं भावसारतया प्रवृत्त्या, मनो-वाक्-कायसुसंवृतः-तिसृभिर्गुप्तिभिर्गुप्तो **यः**, स भिक्षुरिति ।।१०.७।।

**तहेव असणं पाणगं वा, विविहं खाइम साइमं लभित्ता ।**
**होही अट्ठे सुए परे वा[1], तं निहे न निहवए[2] स भिक्खू ।।१०.८।।**

**(ति.)** किञ्च-तथैव-पूर्वमुनिवत् । अशनं पानकं वा विविधं खाद्यं स्वाद्यं वा लब्ध्वा। भविष्यति । अर्थः-प्रयोजनम् । स्वः परस्वो **वा** । तद्-अशनादि । न निधत्ते । न निधापयति । न निदधानमप्यन्यमनुजानाति । एवं सन्निधित्यागवान्, यः स भिक्षुः ।।

**(स.)** तहे...इति-किञ्च तथैव पूर्वसाधुवत्, अशनं पानक च पूर्वोक्तस्वरूपं, तथा विविधमनेकप्रकारं खाद्यं स्वाद्यं च पूर्वोक्तस्वरूपमेव, लब्ध्वा प्राप्य, किम् ? इत्याह-भविष्यत्यर्थः प्रयोजनमनेनति श्वः परश्वो वेति तदशनादि न निधत्ते, न स्थापयति स्वयं, तथा न निधापयति न स्थापयत्यन्यैः, तथा स्थापयन्तमन्यं नानुजानाति यः सर्वथा सन्निधिपरित्यागवान् स भिक्षुः. ।।१०.८।।

---

१. 'वा' इति मूलपाठः, विवृतश्च तथैवान्यत्र मुद्रिते. ग्रन्थे चूर्णौ च, ति-टीकायामपि 'वा' एव विवृत्तः २. 'निहावए जे स-इत्यपि मुद्रितमन्यत्र, निदाधपयति'इति विवृतमपि ।

**(सु.)** तहेव असणं इति, तथैवेति पूर्वर्षिविधानेनाशनं पानं च प्रागुक्तस्वरूपं तथा विविधमनेकप्रकारं खाद्यं स्वाद्यं च प्रागुक्तस्वरूपमेव लब्ध्वा-प्राप्य, किम् ? इत्याह भविष्यत्यर्थः-प्रयोजनमनेन श्वः परश्वो वेति तद्-अशनादि न निधत्ते-न स्थापयति स्वयं, तथा न निधापयति-न स्थापयत्यन्यैः, स्थापयन्तमन्यं नानुजानाति, यः सर्वथा संनिधिपरित्यागवान् स भिक्षुरिति ।।१०.८।।

**तहेव असणं पाणगं वा, विविहं खाइम साइमं लभित्ता ।**
**छंदिय साहम्मियाइं[१] भुंजे, भुच्चा सज्झायरए य जे, स भिक्खू ।।१०.९।।**

**(ति.)** तथैव पूर्वार्धं प्राग्वत् । छन्दयित्वा-निमन्त्र्य । **साधर्मिकान्**-साधून् भुङ्क्ते। भुक्त्वा स्वाध्यायरतश्च यः, स भिक्षुः ।।१०.९।।

**(स.)** तहेव...इति-किञ्च तथैव यः साधुरशनं पानं च विविधं खाद्यं स्वाद्यञ्च लब्ध्वेत्यादि व्याख्या पूर्ववत्. लब्ध्वा किम् ? इत्याह-छन्दित्वा निमन्त्र्य **समानधार्मिकान्**, भुङ्क्ते स्वात्मतुल्यत्वाद् वासल्यसिद्धेः, भुक्त्वा च स्वाध्यायरतश्च भवेत्, चशब्दाच्छेषानुष्ठानपरश्च स्यात्, स भिक्षुः. ।।१०.९।।

**(सु.)** किञ्च-तहेव...इति, तथैवाशनं पानं च विविधं खाद्यं स्वाद्यं च लब्ध्वेति पूर्ववत्, लब्ध्वा किम् ?-इत्याह छन्दित्वा-निमन्त्र्य, **समानधार्मिकान्**-साधून्, भुङ्क्ते, स्वात्मतुल्यत्वाद् वासल्यसिद्धेः, तथा भुक्त्वा स्वाध्यायरतश्च यः, चशब्दो विशेषानुष्ठानपरश्च यः, स भिक्षुरिति ।।१०.९।। भिक्षुलक्षणाधिकार एवाह-

**न य वुग्गहियं कहं कहिज्जा, न य कुप्पे निहुइंदिए पसंते ।**
**[२]संजमधुवजोगजुत्ते, उवसंते [३]अविहेडुए य जे, स भिक्खू ।।१०.१०।।**

**(ति.)** भिक्षुलक्षणाधिकारे एवमाह – न च वैग्रहिकीम्-कलहप्रतिबद्धाम् । कथां कथयति । न च कुप्यति परस्मै। अस्ति तु निवृत्तेन्द्रियः-अनुद्धतेन्द्रियः । प्रशान्तः-रागादिरहित एवास्ते । संयमे, ध्रुवयोगा ये प्रतिलेखनप्रमार्जनादयः तैः युक्तः । उपशान्तः-अनाकुलः । अविहेडकः-हेट्टहोट्ट[३]अनादरे, न विहेडकः, नानादरवान् साध्वाचारे

१. ...म्मिआणं'-चूर्णौ, अन्यत्र च मूलतः पाठः। २. (सु.) 'संजमे धुवं जोगेण जुत्ते' इति पाठो मूलतः । ३. उवहेडए'इति (स) टीकायां, अविहेडए'इति (सु) टीकायाश्च मूलपाठः, विवृतश्च (ति) टीकायां-'अविहेडकः'इति, अन्यत्र तु'अविहेठकः'। ३. हेड्ड-होड्ड अनादरे [पाणि.धा.पा. २८४-२८५], हेड्र-होड्र अनादरे [कातन्त्रधा.पा. (३७४)]

इति गम्यम् । स भिक्षुः ।।१०.१०।।

**(स.)** अथ भिक्षुलक्षणाधिकार एवाह– न य 'इति-यः साधुर्वैग्रहिकीं कलहप्रतिबद्धां कथां न कथयति, पुनर्यः सद्वादकथादिष्वपि न कुप्यति परस्य, अपि तु यो निभृतेन्द्रियः-अनुद्धतेन्द्रियो भवेत्, पुनर्यः प्रशान्तो रागादिरहित एवास्ते, तथा संयमे पूर्वोक्तस्वरूपे, ध्रुवं सर्वकालं योगेन काय-वाङ्-मनःकर्मलक्षणेन युक्तः प्रतिभेदमौचित्येन प्रवृत्तः, तथा य उपशान्तः, अनाकुलः कायचापलादिरहितः, पुनर्योऽविहेठको न क्वचिदुचितेऽनादरवान्, न क्रोधादीनां विश्लेषक इत्यन्ये, इत्थम्भूतः स भिक्षुः ।।१०.१०।।

**(सु.)** भिक्षुलक्षणाधिकार एवाह–न य...'इति, न च वैग्रहिकीं-कलहप्रतिबद्धां कथां कथयति, सद्वादकथादिष्वपि न च कुप्यति परस्यापि तु निभृतेन्द्रियोऽनुद्धतेन्द्रियः प्रशान्तो-रागादिरहित एवास्ते, तथा संयमे-पूर्वोक्ते, ध्रुवं-सर्वकालं, योगेन-काय-वाङ्-मनःकर्मलक्षणेन युक्तः-योगयुक्तः, प्रतिभेदमौचित्येन प्रवृत्तेः, तथोपशान्तोऽनाकुलः कायचापलादिरहितः, अविहेठकः न क्वचिदुचितेऽनादरवान्, क्रोधादीनां विश्लेषक इत्यन्ये, य इत्थंभूतः, स भिक्षुरिति ।।८.१०।।

**जो सहइ हु गामकंटए, अक्कोस-पहार-तज्जणाओ य ।**
**भय-भेरव-सद्दसप्पहासे, समसुह-दुक्खसहे य जे, स भिक्खू ।।१०.११।।**

**(ति.)** किञ्च–यः खलु सहते । ग्रामाः-इन्द्रियाणि, तेषां दुःखहेतवः कण्टकाः, तान् । आक्रोशान्, प्रहारान्, तर्जनाश्च [१]प्रदेशिन्याः परिभ्रमणम् । भैरवभयाः-अत्यन्तरौद्राः, शब्दाः सप्रहासाश्च यस्मिन्, तत्र भय-भैरव-शब्द-सप्रहासे स्थाने-वेतालादिकृतार्तना-दाट्टहासे । एषूपसर्गेषु सत्स्वपि समसुखदुःखः सहश्च यः-अचलितसामयिकभावः । स भिक्षुः ।।१०.११।।

**(स.)** जो इति-किञ्च यः साधुः सम्यग् ग्रामकण्टकान् सहते, ग्रामा इन्द्रियाणि, तेषां दुःखहेतवः कण्टकास्तान्, स्वरूपत एवाह-आक्रोशान् प्रहारांस्तर्जनांश्चेति, तत्र आक्रोशा जकारादिभिः, प्रहाराः कशादिभिः, तर्जना असूयादिभिः, तथा भैरवभया अत्यन्तरौद्रभयजनकाः शब्दाः सप्रहासा यस्मिन्, स्थान इति गम्यते, तथा तस्मिन्, वेतालादिकृता-ऽऽर्त्तनादा-ऽट्टहास इत्यर्थः, अत्रोपसर्गेषु सत्सु समसुख-दुःखसहश्च

१. तर्जन्याः ।

योऽचलितसमताभावः स भिक्षुः. ।।१०.११।।

**(सु.)** किञ्च जो सहइ...इति, यः खलु महात्मा सहते सम्यग् ग्रामकण्टकान्, ग्रामा-इन्द्रियाणि तद्दुःखहेतवः कण्टकास्तान्, स्वरूपत एवाह-आक्रोशान् प्रहारान् तर्जनांश्चेति, तत्राक्रोशा यकारादिभिः, प्रहाराः कशादिभिः, तर्जना असूयादिभिः, तथा भैरवभया-अत्यन्तरौद्रभयजनकाः शब्दाः, सप्रहासा यस्मिन् स्थान इति गम्यते, तत्तथा तस्मिन्, वैतालादिकृतार्त्तनादाट्टहास इत्यर्थः, अत्रोपसर्गेषु सत्सु समसुख-दुःखसहश्च-योऽचलित-सामायिकभावः स भिक्षुरिति ।।१०११।।

**पडिमं पडिवज्जिया मसाणे, नो भीयए भयभेरवाइं दिस्सं[१] ।**
**विविहगुणतवोरए[२] निच्चं, न सरीरचाभिकंखई स भिक्खू ।।१०.१२।।**

**(ति.)** एतदेव स्पष्टयति- प्रतिमाम्-कायोत्सर्गाभिग्रहरूपाम् । प्रतिपद्य । स्मशाने न बिभेति भैरवभयानि-रौद्रातङ्ककारीणि । वेतालादिरूपशब्दादीनि दृष्ट्वा । विविधगुणतपोरत**श्च** नित्यम्-गुणाः-मूलोत्तररूपाः, तपः-अनशनादि, तत्र रतः । न शरीरमभिकाङ्क्षति-उपसर्गादिषु सत्स्वपि न शरीरमपेक्षते यः, स भिक्षुः ।।१०.१२।।

**(स.)** एतदेव स्पष्टयति-पडिमं 'इति-यः साधुः श्मशाने प्रतिमां मासादिरूपां, प्रतिपद्य विधिनाङ्गीकृत्य, न बिभेति, न भयं प्राप्नोति, किं कृत्वा ? भैरवभयानि दृष्ट्वा, रौद्रभयहेतूनुपलभ्य वेतालादिशब्दादीनि, किम्भूतः साधुः? विविधगुण-तपोरत**श्च**, नित्यं मूलोत्तरगुणेष्वन-शनादितपसि च सक्तः सर्वकालं न शरीरमभिकाङ्क्षते, निस्पृहतया वार्त्तमानिकं भावि च, य इत्थम्भूतः स भिक्षुः ।।१०.१२।।

**(सु.)** एतदेव स्पष्टयति-पडिमं 'इति, प्रतिमां-मासादिरूपां, प्रतिपद्य-सविधिमङ्गीकृत्य, स्मशाने-पितृवने, न बिभेति-न भयं याति, भैरवभयानि दृष्ट्वा-रौद्रभयहेतूनुपलभ्य वैतालिकादि-रूपशब्दादि, विविधगुणतपोरत**श्च** नित्यं-मूलगुणाद्यनशनादिसक्तश्च सर्वकालं, न शरीरमभिकाङ्क्षते निःस्पृहतया वार्त्तमानिकं भावि च, य इत्थंभूतः स भिक्षुरिति ।।१०.१२।।

**असइं वोसट्ठचत्तदेहे, अकुट्ठे[३] व हए व लूसिए वा ।**
**पुढविसमे मुणी हविज्जा, अनियाणे अकोउहल्ले जे, स भिक्खू ।।१०.१३।।**

---

१. 'दिअस्स' इत्यन्यत्र मु. पाठः । २. ०रए य निच्चं अन्यत्र चूर्णौ च विवृतं टीकात्रिकेत्र तपोरतश्च' इति । ३. 'अक्कुट्ठे' इति पाठोन्यत्र चूर्णौ च, टीकात्रिके च' आक्रुष्ट'इति विवृतः ।

**(ति.)** किञ्च–असकृत्-सर्वदा । व्युत्सृष्टत्यक्तदेहः-व्युत्सृष्टः-प्रतिबन्धाभावेन, त्यक्तः तद्विभूषाद्यकरणेन देहो येन स तथा । **आक्रुष्टो** वा-दुर्वचनैः । हतो वा-यष्टयादिना। लूषितो वा-तस्कराद्यैरुपध्यपहरणेन, श्व-शृगाल-व्याघ्रैः शरीरापहारेण। पृथ्वीसमः-सर्वंसहो मुनिर्भवति । अनिदानः-भाविफलाशंसारहितः । अकुतूहलः-नटाद्यालोकनादिषु। यः स भिक्षुः ।।१०.१३।।

**(स.)** पुनराह–असइं 'इति-यो मुनिः पृथिवीसमो भवेत्, पृथिवीव्रत् सर्वंसह, स्यात्, न पुना रागादिना पीड्यते, किम्भूतो मुनिः ? असकृद्ध्युत्सृष्टत्यक्तदेहः, असकृत्सर्वदा व्युत्सृष्टो भावप्रतिबन्धाभावेन त्यक्तो वि भूषाया अकरणेन देहः शरीरं येन स तथाविधः, पुन**राक्रुष्टो** वा जकारादिना, हतो वा दण्डादिना, लूषितो वा खड्गादिना, भक्षितो वा शृगालादिना. किम्भूतो मुनिः ? अनिदानो भाविफलस्य वाञ्छारहितः. पुनरकुतूहलश्च नटादिषु य एवम्भूतः स भिक्षुः. ।।१०.१३।।

**(सु.)** असइं...'इति, न सकृदसकृत् सर्वदैवेत्यर्थः, किमित्याह-व्युत्सृष्टत्यक्तदेहः-व्युत्सृष्टो भावप्रतिबन्धाभावेन, त्यक्तो-विभूषाकरणेन, देहः-शरीरं येन स तथाविधः, **आक्रुष्टो** वा ज(य)कारादिना, हतो वा दण्डादिना, लूषितो वा खड्गादिना, भक्षितो वा शृगालादिना, पृथिवीसमः-सर्वंसहो मुनिर्भवति, न च रागादिना पीड्यते, तथाऽनिदानो-भाविफलाऽऽशंसारहितः, अकुतूहलश्च नटादिषु, य एवंभूतः, स भिक्षुरिति ।।१०.१३।।

**अभिभूय काएण परीसहाइं, समुद्धरे जाइपहाउ अप्पयं ।**
**विइत्तु जाईमरणं [1]महाभयं, तवे रए सामणिए जे, स भिक्खू ।।१०.१४।।**

**(ति.)** तथा-अभिभूय-पराजित्य, अधिसह्य । परीषहान्-क्षुधादीन् । कायेन-न मनो-वाग्भ्यामेव। समुद्धरति-उत्तारयति । आत्मानम् । जातिपथात्-संसारमार्गात् । विदित्वा । जातिमरणं महाभयम् । तपसि रतः । श्रामण्ये-श्रमणसम्बन्धिनि । यः स भिक्षुः ।।१०.१४।।

**(स.)** भिक्षुस्वरूपाभिधानाधिकार एवाह–अभिभूअ 'इति-यो मुनिः कायेन शरीरेण न मनो-वचनाभ्यांमेव, सिद्धान्तनीत्या परीषहानभिभूय पराजित्याऽऽत्मानं जातिपथात्

१. महब्भयं'इत्यन्त्र मुद्रितः पाठः ।

संसारमार्गात् समुद्धरत्युत्तारयति, किं कृत्वा? जाति-मरणं संसारमूलं विदित्वा, किम्भूतं जाति-मरणं? महाभयं महाभयकारणं, किम्भूतो मुनिः ? तपसि रतः, तपःकरणतत्परः, किम्भूते तपसि ? श्रामण्ये श्रमणानां सम्बन्धिनि शुद्धे, स भिक्षुः. ।।१०.१४।।

**(सु.)** भिक्षुस्वरूपाभिधानाधिकार एवाह-अभिभूय...इति अभिभूय-पराजित्य, कायेन-शरीरेणापि न, भिक्षुसिद्धान्तनीत्या मनोवाग्भ्यामेव, कायेनानभिभवे तत्त्वतस्तदनभिभवात्, परीषहान्-क्षुदादीन्, समुद्धारयत्युत्तारयति, जातिपथात्-संसारमार्गादात्मानं, कथम्?-इत्याह-विदित्वा-विज्ञाय, जातिमरणं-संसारमूलं, महाभयं-महाभयकारणं, ततः-तपसि रतः-सक्तः, किंभूतः ? इत्याह-श्रामण्ये-श्रमणानां सम्बन्धिनि, शुद्ध इति भावः, य एवंभूतः, स भिक्षुरिति ।।१०.१४।।

**हत्थसंजए पायसंजए, वायसंजए संजइंदिए ।**
**अज्झप्परए सुसमाहियप्पा, सुत्तत्थं च वियाणई जे, स भिक्खू ।।१०.१५।।**

**(ति.)** तथा—हस्तसंयतः, पादसंयतः, वाक्संयतः-कारणं विना कूर्मवल्लीनः । संयतेन्द्रियः-निर्विष(यी)कृतेन्द्रियव्यापारः । अध्यात्मरतः-प्रशस्तध्यानसक्तः । सुसमाहितात्मा। सूत्रार्थं च विजानाति यः, स भिक्षुः ।।१०.१५।।

**(स.)** पुनराह-हत्थ'इति-यः साधुर्हस्तसंयतः पादसंयतः इति कारणं विना कूर्मवल्लीन आस्ते, कारणे च सम्यग् गच्छति, तथा यो वाक्संयतोऽकुशलवचननिरोधात्, कुशलवचनस्य चोदीरणेन, किम्भूतः साधुः ? संयतेन्द्रियो निवृत्तविषयप्रसरः, पुनः किम्भूतः साधुः ? अध्यात्मरतः प्रशस्तध्यानासक्तः, पुनः किम्भूतः साधुः ? सुसमाहितात्मा, ध्यानाऽऽपादकगुणेषु सुतरां स्थापितात्मा, पुनर्यः सूत्रा-ऽर्थं यथावस्थितं विधिग्रहणशुद्धं विजानाति, एवम्भूतः स भिक्षुः. ।।१०.१५।।

**(सु.)** हत्थ...इति, हस्तसंयतः पादसंयत इति, कारणं विना कूर्मवल्लीन आस्ते, कारणे च सम्यग् गच्छति, तथा वाक्संयतः-अकुशलवाग् निरोधात् कुशलवागुदीरणेन संयतेन्द्रियो-निवृत्तविषयप्रसरः, अध्यात्मरतः-प्रशस्तध्यानासक्तः, सुसमाहितात्मा ध्यानाऽऽपादकगुणेषु, तथा सूत्रार्थं च यथावस्थितं विधिग्रहणशुद्धं विजानाति यः सम्यग् यथाविषयं स भिक्षुरिति ।।१०.१५।।

**उवहिम्मि अमुच्छिए अगिद्धे, अनायउंछं पुलनिप्पुला ए ।**
**कय-विक्कय-संनिहिओ विरए, सव्वसंगावगए य जे,स भिक्खू ।।१०.१६।।**

**(ति.)** तथा–उपधौ-वस्त्रादिरूपे । अमूर्च्छितः-तत्र मोहत्यागेन । अगृद्धः-अनाकाङ्क्षी। अज्ञातोञ्छं चरति, अज्ञातोञ्छमिव अज्ञातोञ्छम्-यथा अज्ञातोञ्छम् अल्पं भवति तथा उपधिमप्यगृद्धः, स्तोकं स्तोकं, भावशुद्धं धर्मार्थितया दत्तं गृह्णाति यः सोऽज्ञातोञ्छचारी। तथा पुल-समुच्छ्र्ये [ ], पुलतीति पुलः, अगृद्धत्वाच्चारित्रे, समुच्छ्रितः, प्राकृतत्वाद्विभक्तिलोपः। निःपुलाकः-संयमासारतापादकदोषरहितः । क्रय-विक्रय-सन्निधिभ्यो विरतः । सर्वसङ्गापगतश्च यः । स भिक्षुः ।।१०.१७।।

**(स.)** पुनराह–उवहिम्मि 'इति-यः साधुरज्ञातोञ्छं चरति, भावशुद्धं स्तोकं स्तोकमित्यर्थः, स भिक्षुः, किम्भूतः साधुः ? उपधौ वस्त्रादिलक्षणे, अमूर्च्छित-स्तद्विषयमोहत्यागेन, पुनः किम्भूतः साधुः ? अगृद्धः प्रतिबन्धाभावेन, पुलकः, पुल समुच्छ्र्ये [ ], पुलतीति पुलकः, चारित्रगृद्धत्वात् समुच्छ्रितः, पुनः किम्भूतः साधुः? निष्पुलाकः, संयमस्यासारतोत्पादका ये दोषास्तै रहितः, पुनः किम्भूतः साधुः ? क्रय-विक्रय-सन्निधिभ्यो विरतः, द्रव्य-भावभेदभिन्न-क्रय-विक्रयपर्युषितस्थापनेभ्यो निवृत्तः, पुनः किम्भूतः साधुः ? सर्वद्रव्य-भावसङ्गरहितः ।।१०.१६।।

**(सु.)** तथा– उवहिम्मि...इति, उपधौ-वस्त्रादिलक्षणे, अमूर्च्छितः-तद्विषयमोहत्यागेन, अगृद्धः-प्रतिबन्धाभावेन, अज्ञातोञ्छं चरति भावपरिशुद्धं, स्तोकं स्तोकमित्यर्थः, पुलाक-निष्पुलाकः-संयमा-ऽऽसारता-ऽऽपादकदोषरहितः, क्रय-विक्रय-संनिधिभ्यो विरतः–द्रव्य-भावभेदभिन्नक्रय-विक्रय-पर्युषितस्थापनेभ्यो निवृत्तः, सर्वसङ्गापगतश्च योऽपगत-द्रव्य-भावसङ्गश्च यः, स भिक्षुरिति ।।१०.१६।।

**अलोलभिक्खू न रसेसु गिद्धे, उंछं चरे जीविय नावकंखे[1] ।**
**इड्ढिं च सक्कारणपूयणं च, चए ठियप्पा अणिहे स भिक्खू ।।१०.१७।।**

**(ति.)** किञ्च–अलोलः-नाप्राप्तप्रार्थकः, भिक्षुः-साधुः, [2]अलोलश्चासौ भिक्षुश्च अलोलभिक्षुः। न रसेषु । गृद्धः-आसक्तः । उञ्छं चरति ।

१. णाभिकंखे [अन्यत्र पाठभेदः] २. अन्यत्र टीकायां मूले च अलोल इति भिक्खु-इति व्यस्तपादौ.

आह-प्रागप्येतदुक्तम् ?—सत्यम् । प्रागुपधिमधिकृत्योक्तम् । इह त्वाहारमिति न पौनरुक्त्यम् ।

जीवितम्-असंयमजीवितम् । **नावकाङ्क्षति** । ऋद्धिं च-आमर्षौषध्यादिकाम् । सत्कारणं च-वस्त्रादिभिः । पूजनं च-स्तवनादिना । त्यजति-न तदर्थमेव यतते । स्थितात्मा-ज्ञानादिषु । अनीहो यः स भिक्षुः ।।१०.१७।।

**(स.)** अलोल...इति-पुनः किञ्च यो भिक्षुरुञ्छं चरति, भावोञ्छं सेवत इति पूर्ववत्, नवरं तत्रोपधिमाश्रित्योक्तम्, इह त्वाहारमाश्रित्येति न पुनरुक्तिदोषः, तथा यो जीवितमसंयमजीवितं **नाभिकाङ्क्षते** न वाञ्छति, य ऋद्धिं चामर्षौषध्यादिरूपां, तथा सत्कारं वस्त्रादिभिः, तथा पूजनं च स्तवादिना, त्यजति, नैतदर्थमेव यतते, स्थितात्मा ज्ञानादिषु, पुनः किम्भूतो भिक्षुः ? अनिभो मायारहितः, पुनः किम्भूतो भिक्षुः ? अलोलोऽप्राप्तप्रार्थनातत्परो न, पुनर्यो रसेषु न गृद्धो न प्रतिबद्धः, स भिक्षुर्भवति ।

**(सु.)** किञ्च—अलोल...इति, अलोलो नाम नाप्राप्तप्रार्थनापरो, भिक्षुः-साधुर्न रसेषु गृद्धः, प्राप्तेष्वपि अप्रतिबद्ध इति भावः, उञ्छं चरति भावोञ्छमेवेति पूर्ववत् । नवरं तत्रोपधिमाश्रित्योक्तमिह त्वाहारमित्यपौनरुक्यम् । तथा जीवितं **नाभिकाङ्क्षते** असंयमजीवितं, तथा ऋद्धिं च-आमर्षौषध्यादिरूपां, सत्कारं-वस्त्रादिभिः, पूजनं च-स्तवादिना, त्यजति नैतदर्थं एव यतते, स्थितात्मा ज्ञानादिषु, अनिभ इत्यमायो यः स भिक्षुरिति ।।१०.१७।।

**न परं वइज्जासि अयं कुसीले, जं[1]णऽन्न कुप्पिज्ज न तं वइ(ए)ज्जा ।**
**जाणिय [2]पत्तेयं पुन्नपावं, अत्ताणं न समुक्कसे जे, स भिक्खू ।।१०.१८।।**

**(ति.)** तथा--न । परम्-स्वशिष्यादन्यम् वदति 'अयं कुशील इति-तदप्रीतिसम्भवात्, स्वशिष्यं तु शिक्षाबुद्ध्या वदत्यपि । येन न अन्यः कुप्यति । तम्-सन्तमपि तद्दोषम्। न वदति । किमित्यत आह ज्ञात्वा प्रत्येकं पुण्यपापम्-न ह्यन्यसम्बन्ध्यन्यस्य लगति। सत्स्वपि च गुणेषु नात्मानं समुत्कर्षति-न स्वगुणैर्गर्वमुद्वहति । यः स भिक्षुः ।।१०.१८।।

१. (स.) टी. प्रतौ 'च'इति मुद्रितम् २. पत्तेयं'इति च पाठः अन्यत्र विवृतं च तथैव ।

**(स.)** न...इति-तथा यः परं स्वपक्षशिष्येभ्यो व्यतिरिक्तम् 'अयं कुशील इति न वदति, तद्वदने चाप्रीतिदोष उत्पद्यते. स्वपक्षशिष्यं तु शिक्षाग्रहणबुद्ध्या वदत्यपि, पुनर्येनान्यः कश्चित् कुप्यति, न तद् यो ब्रवीति दोषसद्भावेऽपि, किमित्याह-ज्ञात्वा प्रत्येकं पुण्यपापं नान्यसम्बन्ध्यन्यस्य भवति, अग्निदाहवेदनावत्, एवं सत्स्वपि गुणेष्वात्मानं यो न समुत्कर्षति, न स्वगुणैर्गर्वमायाति, स भिक्षुः ।।१०.१८।।

**(सु.)** तथा—न परं....इति, न परं स्वपक्षविनेयव्यतिरिक्तं वदति-अयं कुशीलस्तद-प्रीत्यादि-दोषप्रसङ्गात्, स्वपक्षविनेयं तु शिक्षाग्रहणबुद्ध्या वदत्यपि, सर्वथा येनान्यः कश्चित् कुप्यति न तद् ब्रवीति दोषसद्भावेऽपि, किम् ?-इत्यत आह-ज्ञात्वा प्रत्येकं पुण्यपापं, नान्यसम्बन्धि अन्यस्य भवति अग्निदाहवेदनावत्, एवं सत्स्वपि गुणेषु नात्मानं समुत्कर्षति-न स्वगुणैर्गर्वमायाति, यः स भिक्षुरिति ।।१०.१८।।

**न जाइमत्ते [1]न रूवमत्ते, न लाभमत्ते न सुएण मत्ते ।**
**मयाणि सव्वाणि विवज्जयंतो, धम्मज्झाणरए य जे, स भिक्खू ।।१०.१९।।**

**(ति.)** मदप्रतिषेधमाह – (न जाइ...इति) स्पष्टम् ।।१०.१९।।

**(स.)** अथ मदप्रतिषेधार्थमाह न जाइ...इति-यः साधुर्जातिमत्तो न भवति, 'यथाहं ब्राह्मणः, पुनर्यो रूपमत्तो न भवति, 'यथाहं रूपवानादेयः, पुनर्यो लाभमत्तो न भवति, 'यथाहं लाभवान्, पुनर्यो न श्रुतमत्तो भवति 'यथाहं पण्डितः, अनेन कुलमदादिपरिग्रहः, तदेवाह-मदान् [2]सर्वान् कुलादिविषयान् **विवर्ज्य** परित्यज्य धर्मध्यानरतो भवेत् स भिक्षुः. ।।१०.१९।।

**(सु.)** मदप्रतिषेधार्थमाह—न जाइमत्ते...'इति, न जातिमत्तो यथाऽहं ब्राह्मणः क्षत्रियो वा, न चापि रूपमत्तो 'यथाऽहं रूपवान्, आदेयः, न लाभमत्तो 'यथाऽहं लाभवान्, न श्रुतमत्तो 'यथाऽहं पण्डितः, अनेन कुलमदादिपरिग्रहः, अत एवाह-मदान् सर्वानपि कुलादिविषयान् विवर्ज्य-परित्यज्य धर्म्मध्यानरतो-यो यथागमं तत्र सक्तः स भिक्षुरिति ।।१०.१९।।

**पवेयए अज्जवयं महामुणी, धम्मे ठिओ [3]ठावई परं पि ।**
**निक्खम्म वज्जिज्ज कुसीललिंगं, न यावि हासकुहए[4] य जे, स भिक्खू ।।१०.२०।।**

---

१ न च रूव...इति मुद्रितमन्यत्र, 'विवज्जइत्ता' च, न विवृत्तं च'(ति) टीकायां, किन्तु अन्यत्र तु'विवर्ण्य' इति विवृतम्, अतः मूले 'विवज्जइत्ता' पाठः शुद्धः प्रतिभाति २. सर्वानपीति पाठान्तरम् । ३. 'ठावयई'इति मुद्रितमन्यत्र । ४. 'कुहए जे, स - इति मुद्रितमन्यत्र ।

**(ति.)** प्रवेदयति-कथयति । आर्यपदम्-शुद्धधर्मपदम् । महामुनिः धर्मे स्थितः । स्थापयति । परमपि-श्रोतारम् । निःक्रम्य वर्जयति । कुशीललिङ्गम्-कुशीलचेष्टितम्, आरम्भादि । न चापि हास्य-कुहकः—हास्यकारी, कुहकम्-इन्द्रजालं यस्य स, तथा एवंविधो न, यः स भिक्षुः ।।१०.२०।।

**(स.)** पवेअये (ए) इति-यो महामुनिः, आर्यपदं शुद्धधर्मपदं परोपकाराय प्रवेदयति कथयति, पुनर्यो धर्मे स्थितः, परमपि श्रोतारं धर्मे स्थापयति, पुनर्यो निष्क्रम्य गृहान्निःसृत्य कुशीललिङ्गमारम्भादिना कुशीलचेष्टितं वर्जयति, पुनर्यो हास्यकुहको न भवति, हास्यकारिकुहकयुक्तो न स्यात्, स भिक्षुः. ।।१०.२०।।

**(सु.)** पवेयए इत्यादि, प्रवेदयति-कथयति, आयार्यपदं-शुद्धधर्म्मपदं परोपकाराय महामुनिः-शीलवान् ज्ञाता एवंभूत एव वस्तुतो नान्यः, किम् ?-इत्येतदेवमित्याह-धर्म्मे स्थितः स्थापयति परमपि-श्रोतारं, तत्रादेयभावप्रवृत्तेः, तथा निष्क्रम्य वर्जयति कुशीललिङ्गं-आरम्भादि कुशीलचेष्टितं, तथा न चापि हास्यकुहको—न हास्यकारिकुहकयुक्तो यः, स भिक्षुरिति ।।१०.२०।।

**तं देहवासं असुइं असासयं, सया चए निच्चहियट्ठियप्पा ।**
**छिंदित्तु जाईमरणस्स बंधणं, उवेइ भिक्खू अपुणागमं [१]गइं गय त्ति बेमि ।।१०.२१।।**

**(ति.)** भिक्षुभावफलमाह—तं देहवासम् । अशुचिम्-शुक्र-शोणितोद्भवत्वात् । अशाश्वतम्-प्रतिक्षणं नवनवपर्यायसम्भवात् । सदा त्यजति-ममत्वत्यागेन । नित्यहिते-मोक्षसाधने । सम्यग्दर्शनादौ स्थितात्मा सुस्थितः । छित्वा जातिमरणबन्धनम्-कर्मजालम् । उपैति भिक्षुः । अपुनरागमाम्-जन्मादिरहिताम् । गतिम्-सिद्धिगतिम् । गत इति ब्रवीमीति पूर्ववत् ।।१०.२१।। **श्रीतिलकाचार्यटीका समाप्ता ।।**

**(स.)** अथ भिक्षुभावस्य फलमाह—भिक्षुरेवंविधो गतिं सिद्धिगतिमुपैति, गच्छति किम्भूतां गतिम् ? अपुनरागमां पुनर्जन्मादिरहितां, किं कृत्वा ? जाति-जरा-मरणस्य बन्धनं छित्त्वा, पुनर्भिक्षुर्देहवासं सदा त्यजति ममतात्यागेनैतं प्रत्यक्षेणोपलभ्यमानं, किम्भूतं देहवासम ? अशुचि, शुक्रशोणितमयत्वात्, पुनः किम्भूतं देहवासम् ? अशाश्वतं प्रतिक्षणं क्षीयमाणत्वात्, किम्भूतो भिक्षुः ? नित्यहिते मोक्षसाधने सम्यग्दर्शनादौ

१. अन्यत्र 'गइं ति बेमि' मुद्रितं, विवृतं च तथैव - (स.) (सु.) टीकयोः ।

स्थितात्मा अत्यन्तं सुस्थितः, इति ब्रवीमीति पूर्ववत्. ।।१०.२१।।

**इति श्रीदशवैकालिकशब्दार्थवृत्तौ सभिक्षुनामकं दशममध्ययनं समाप्तम्**

**(सु.)** भिक्षुभावफमाह—तं देह...इति, तं देहवासमित्येवं प्रत्यक्षोपलभ्यमानं चारकरूपं शरीरावासम्, अशुचिं शुक्रशोणितोद्भवत्वादिना, अशाश्वतं प्रतिक्षणपरिणत्या सदा त्यजति ममत्वानुबन्धपरित्यागेन, क ? इत्याह-नित्यहिते-मोक्षसाधने सम्यग्दर्शनादौ स्थितात्मा-अत्यन्तसुस्थितः, स चैवंभूतश्छित्त्वा जातिमरणस्य संसारस्य, बन्धनं-कारणम्, उपैति-सामीप्येन गच्छति, भिक्षुः-यतिः, अपुनरागमां नित्यां जन्मादि-रहितामित्यर्थः, गतिमिति-सिद्धिगतिम् ।।१०.२१।। ब्रवीमीति पूर्ववत् ।। **इति सुमति० वृत्तौ व्याख्यातं सभिक्ष्वध्ययनम् १० ।।**

**।। सभिक्ष्वध्ययनटीका समाप्ता ।।**

## ।। अथ प्रथमा रतिवाक्या चूलिका ।।

**(सु.) इह खलु भो ! पव्वइएणं उप्पन्नदुक्खेणं संजमे अरइसमावन्नचित्तेणं ओहाणुप्पेहिणा अणोहाइएणं चेव हयरस्सि-गयंकुस-पोयपडागारभूयाइं इमाइं अट्ठारस ठाणाइं सम्मं सुपडिलेहियव्वाणि भवंति ।**

**(ति.)** [१]एतासां च चतसृणां चूलिकानां श्रीसीमन्धरस्वामिना श्रीमुखेन यक्षिण्या आर्यिकायाः स्वयमुपदिष्टानां मध्याद् ये द्वे चूलिके श्रीसङ्घेन दशवैकालिकस्यान्ते योजिते । अद्यापि तत्पर्यन्ते तथैव पठ्येते । तयोराद्या रतिवाक्याभिधा चूलिका । तस्या इदमादिसूत्रम् - **इह**-प्रवचने । **खलु**शब्दः-एवार्थे, स चाग्रे सम्यक् शब्दाद् योज्यः । **भो**-इत्यामन्त्रणे। **प्रव्रजितेन**-साधुना । **उत्पन्नदुःखेन**-सञ्जात-शीतादिशारीर-कामभोगाद्यनाप्तिरूपमानसदुःखेन । संयमे-वर्णितस्वरूपे । अरतिसमापन्नचित्तेन-उद्विग्नमनसा संयमनिर्विन्नभावेनेत्यर्थः । अवधावनोत्प्रेक्षिणा-अवधावनं संयमादपसरणं, तदुत्प्रेक्षितुं शीलमस्य स तथा तेन, उत्प्रव्रजितुकामेन । अनवधावितेनैव-अनुत्प्रव्रजितेनैव। अमूनि-वक्ष्यमाणानि । अष्टादशस्थानानि । सम्यग्-अत्रैव शब्दयोगः, सम्यगेव सम्प्रत्युपेक्षितव्यानि । सुष्ठु द्रष्टव्यानि भवन्ति । किं विशिष्टानि ? हयरश्मि-गजाङ्कुश-पोतपटाकाराणि-अश्वखलिन-गजाङ्कुश-वोहित्थसितपटतुल्यानि, यथा हयादीनामुन्मार्ग-प्रवृत्तिकामानां रश्म्यादयो निर्वृत्तिहेतवः, तथैवैतान्यपि, संयमादुन्मार्ग-प्रवृत्तिकामानां भव्यसत्त्वानाम् ।

**(स.)** इह, इति-व्याख्यातं सभिक्षुनामकं दशममध्ययनम्, अथ चूडाख्यमारभ्यते, अस्य चायमभिसम्बन्धः—पूर्वाध्ययने भिक्षुगुणा उक्ताः, स च भिक्षुरेवंभूतोऽपि कदाचित् कर्मवशात् कर्मबलाच्च सीदेत्, तत्-तस्य भिक्षोः स्थिरीकरणं कर्तव्यं, तदर्थं चूडाद्वयं कथ्यते—अथ प्रथमचूलिका प्रारभ्यते इह खलु भोः ! प्रव्रजितेन साधुना, इह खलु प्रवचने निश्चयेन, भो ! इति आमन्त्रणे, अमूनि वक्ष्यमाणान्यष्टादश स्थानानि सम्यक्प्रकारेण सम्प्रत्युपेक्षितव्यानि सुष्ठ्वालोचनीयानि भवन्ति-इत्युक्तिः, किम्भूतानि? अष्टादशस्थानानि? हयरश्मि-गजाङ्कुश-पोतपताकाभूतानि, अश्वखलिन-गजाङ्कुश-बोहित्थसितपटतुल्यानि, अयं परमार्थः—यथा हयादीनामुन्मार्गप्रवृत्तिं वाञ्छतां रश्म्यादयो नियमनहेतवः, तथैतान्यपि संयमादुन्मार्गप्रवृत्तिं वाञ्छतां भव्यजीवानामपि नियमनहेतवः,

---

१. इत्थममुना प्रबन्धेन एषा चूलिकोत्पत्तिः । प्रबन्धोऽयं अन्यत्र ज्ञातव्यः ।

यतश्चैवम् ?-अतः सम्यक् प्रत्युपेक्षितव्यानि भवन्ति, किम्भूतेन साधुना ? उत्पन्नदुःखेन, सञ्जात-शीतादिशारीर-स्त्रीनिषद्यादिमानसदुःखेन, पुनः किम्भूतेन ? संयमे पूर्ववर्णितस्वरूपेऽरतिसमापन्नचित्तेनो-द्वेगगताभिप्रायेण संयमान्निर्विण्णभावेनेत्यर्थः, पुनः किम्भूतेन? अवधानोत्प्रेक्षिणा, अवधानमपसरणं संयमात्, उतप्राबल्येन, प्रेक्षितुं शीलं यस्य स तेनावधानोत्प्रेक्षिणोत्प्रव्रजितुकामेनेत्यर्थः, पुनः किम्भूतेन ? अनवधावितेनैव, अनुत्प्रव्रजितेनैव ।

**(सु.)** अधुनौघतश्चूडे आरभ्येते, अनयोश्चायमभिसम्बन्ध इहानन्तराध्ययने भिक्षुगुणयुक्त एव भिक्षुरुक्तः, स चैवंभूतोऽपि कदाचित्कर्मपरतन्त्रत्वात् कर्मणश्च बलवत्त्वात् सीदेत्, अतस्तत्स्थिरीकरणं कर्तव्यमिति, तदर्थाधिकार एव चूडाद्वयमभिधीयते, तच्चेदं-इह खलु भो पव्व...इति, इह खलु भो प्रव्रजितेन इहेति जिनप्रवचने, खलुशब्दोऽवधारणे, स च भिन्नक्रम इति दर्शयिष्यामः, भो इत्यामन्त्रणे, प्रव्रजितेन-साधुना, किंविशिष्टेनेत्याह-उत्पन्नदुःखेन-सञ्जातशीतादिशारीर-स्त्रीनिषद्यादि-मानसदुःखेन, संयमे-व्यावर्णितस्वरूपे अरतिसमापन्नचित्तेनोद्वेगगताभिप्रायेण संयमनिर्विण्णभावेनेत्यर्थः, स एव विशेष्यते-अवधावनोत्प्रेक्षिणा-अवधावनं-अपसरणं संयमात्, उप्राबल्येन प्रेक्षितुं शीलं यस्य स तथाविधस्तेन, उत्प्रव्रजितुकामेनेति भावः, अनवधावितेनैव-अनुत्प्रव्रजितेनैव, अमूनि वक्ष्यमाणलक्षणान्यष्टादश स्थानानि सम्यग्-भावसारं सुप्रत्युपेक्षितव्यानि-सुष्ठ्वालोचनीयानि भवन्तीति योगः; अवधावितस्य तु प्रत्युपेक्षणं प्रायोऽनर्थकमिति, तान्येव विशेष्यन्ते—हयरश्मि-गजाङ्कुश-पोतपताकाभूतानि-अश्वखलिन-गजाङ्कुश-बोहित्थसितपटतुल्यानि, एतदुक्तं भवति—यथा हयादीनामुन्मार्ग-प्रवृत्तिकामानां रश्म्यादयो नियमनहेतवः, तथा एतान्यपि संयमादुन्मार्गप्रवृत्तिकामानां भव्यसत्त्वानामिति, यतश्चैवम् ? अतः सम्यक् प्रत्युपेक्षितव्यानि भवन्ति, खलुशब्दोऽवधारणे, योगात् सम्यगेव संप्रत्युपेक्षितव्यानि एवेत्यर्थः ।

**तं जहा-हंहो (१) दुस्समाए दुप्पजीवी । (२) लहुसगा इत्तरिया गिहीणं कामभोगा। (३) भुज्जो य सायबहुला मणुस्सा । (४) इमे य मे दुक्खे न चिरकालोवट्ठाइ भविस्सइ । (५) ओमजणपुरक्कारे । (६) वंतस्स पडियाइयणं। (७) अहरगइ-वासोवसंपया । (८) दुल्लभे य खलु भो गिहीणं धम्मे गिहवासमज्झे वसंताणं । (९)**

**आयंके से वहाय होइ । (१०) संकप्पे से वहाय होइ । (११) सोवक्केसे गिहिवासे निरक्केसे परियाए । (१२) बंधे गिहिवासे मुक्खे परियाए । (१३) सावज्जे गिहिवासे निरवज्जे परियाए । (१४) बहुसाहारणा गिहीणं कामभोगा। (१५) पत्तेयं पुन्नपावं । (१६) अणिच्चे खलु भो मणुयाण जीविए, कुसग्गजलबिंदुचंचले। (१७) बहुं च खलु भो पावं कम्मं पयडं । (१८) पावाणं च खलु भो ! कडाणं कम्माणं पुव्विं दुच्चिन्नाणं दुप्पडिकंताणं वेयइत्ता मुक्खो, नत्थि अवेइत्ता, तवसा वा झोसइत्ता। अट्ठारसमं पयं भवइ । (सूत्र चू. १.१)**

**(१) तं जहा (१) दुस्समाए दुप्पजीवी ।**

**(ति.)** तानि कानि ? -तद्यथा-**हंहो ! दुःषमायां दुःप्रजीविनः**-हंहो इति शिष्यामन्त्रणं, दुःषमायां कालदोषादेव दुःखेन, कष्टेन, प्रकर्षेण, उदारभोगाकाङ्क्षया जीवितुं शीलाः दुःप्रजीविनः, प्राणिनः इति गम्यते । राजादीनामप्युदारभोगाप्तौ विपक्षातङ्कादीन्यनेकान्यन्तरायाणि दृश्यन्ते । ततः किमुदारभोगरहितेन विडम्बनाप्रायेण कुगतिहेतुना गृहाश्रमेणेति सम्प्रत्युत्प्रेक्षितव्यं, इति प्रथमं स्थानम् ।।१।।

**(स.)** तमिति-तत्र प्रथमं स्थानकमाह—तद्यथेत्युदाहरणे, **हं ! भो ! दुःषमायां दुष्प्रजीविन इति,** हं ! भो शिष्यामन्त्रणे, दुःषमायामधमकालरूपायां, कालदोषादेव दुःखेन कृच्छ्रेण, प्रकर्षेणोदार-भोगापेक्षया, जीवितुं शीला दुष्प्रजीविनः, प्राणिन इति गम्यते, नरेन्द्रादीनामप्यनेक-दुःखप्रयोगदर्शनात्, उदारभोगरहितेन विट(ड)म्बनाप्रायेण कुगतिहेतुना किं गृहाश्रमेण ?-इति सम्प्रत्युपेक्षितव्यमिति प्रथमं स्थानम्. ।।१।।

**(सु.)** तद्यथेत्यादि-तद्यथेत्युदाहरणोपन्यासार्थः, **हंभो ! दुःषमायां दुष्प्रजीविन** इति, हंभो-शिष्यामन्त्रणे, दुष्षमायां-अधमकालाख्यायां, कालदोषादेव दुःखेन-कृच्छ्रेण प्रकर्षेणोदारभोगापेक्षया जीवितुं शीला दुष्प्रजीविनः, प्राणिन इति गम्यते, नरेन्द्रादीनां अपि अनेकदुःखप्रयोगदर्शनात्, उदारभोगरहितेन च विडम्बनाप्रायेण कुगतिहेतुना किं गृहाश्रमेण ?-इति संप्रत्युपेक्षितव्यमिति प्रथमं स्थानम् ।।१।।

**(२) लहुसगा इत्तरिया गिहीणं कामभोगा।**

**(ति.)** तथा **लाघव इत्वरा गृहिणां कामभोगाः**-दुःषमायामिति सर्वत्रानुवर्तते, सन्तोऽपि लघवः-तुच्छाः प्रकृत्यैव तुषमुष्टिवदसाराः । अल्पकालाः-दुषमायामायुषोऽल्पत्वात् । गृहस्थानां कामभोगाः-शब्दादयो विषयाः विपाककटवः प्रभूतान्तरायाश्च।

ततः किं गृहाश्रमेण' ?-इति द्वितीयम् ।।२।।

**(स.)** अथ द्वितीयस्थानमाह-तथा लघव इत्वरा गृहिणां कामभोगाः, दुःषमायामिति वर्तते, सन्तोऽपि लघवः, तुच्छाः प्रकृत्यैव तुषमुष्टिवदसारा, इत्वरा अल्पकाला, गृहिणां गृहस्थानां कामभोगा मदन-कामप्रधानाः शब्दादयो विषया विपाककटवश्च न देवानामिव विपरीताः, अतः किं गृहाश्रमेण ?-इति सम्प्रत्युपेक्षितव्यमिति द्वितीयं स्थानम् ।।२।।

**(सु.)** तथा लघव इत्वरा गृहिणां कामभोगाः, दुष्षमायामिति वर्त्तते, सन्तोऽपि लघवः-तुच्छाः प्रकृत्यैव तुषमुष्टिवदसाराः, इत्वरा-अल्पकालाः, गृहिणां-गृहस्थानां कामभोगाः-मदन-कामप्रधानाः शब्दादयो विषया विपाककटवश्च, न देवानामिव विपरीताः, अतः किं गृहाश्रमेण ?-इति संप्रत्युपेक्षितव्यमिति द्वितीयं स्थानम् ।।२।।

**(३) भुज्जो य सायबहुला मणुस्सा ।**

**(ति.)** तथा **भूयश्च** पुनः **स्वातिबहुला मनुष्याः**-सुखेनाऽत्यते-संसाराध्वनि गम्यतेऽनयेति। उणादित्वाद् 'इण' प्रत्यये । स्वातिर्मायाक्रोधादिभ्योऽप्यसावधिका । यया उपार्जिततीर्थ-कृत्कर्मापि मल्लिजीवः स्त्रीत्वं प्रातितः । ततश्च स्वातिबहुला-मायाप्रचुरा, मनुष्याः । न कदाचित् परस्परं विश्वासहेतवः, तद्रहितानां च कीदृशं सुखं, भोगार्थं मिथश्चाटुवचनैश्च दारुणतरो मायाबन्धः । तत् किं गृहाश्रमेण' ? इति तृतीयम् ।।३।।

**(स.)** अथ तृतीयस्थानमाह—तथा भूयश्च शातबहुला मनुष्याः, भुक्तेष्वपि कामभोगेषु पुनरपि सुखाभिलाषिण एव मनुष्याः, अतः किं कामभोगैः ? सम्प्रत्युपेक्षितव्यमिति तृतीयं स्थानम्. ।।३।।

**(सु.)** तथा भूयश्च स्वातिबहुला मनुष्याः दुष्षमायामिति वर्त्तते एव, पुनश्च स्वातिबहुला मायाप्रचुरा मनुष्या इति प्राणिनो, न कदाचित् विश्रम्भहेतवोऽमी, तद्रहितानां च कीदृक् सुखं ?, तथा तद्‌बन्धहेतुत्वेन दारुणतरो बन्ध इति किं गृहाश्रमेण ?-इति, संप्रत्युपेक्षितव्यमिति तृतीयं स्थानम् ३ । पाठान्तरं वा तथा-भूयश्च सातबहुला मनुष्याः, भुक्तेष्वपि कामभोगेषु पुनरपि सुखाभिलाषिण एव मनुष्याः, अतः किं कामभोगैः? इति संप्रत्युपेक्षितव्यमिति तृतीयं स्थानम् ।।३।।

**(४) इमे य मे दुक्खे न चिरकालोवट्ठाइ भविस्सइ ।**

**(ति.)** तथा **इदं च मे दुःखं**-शारीरं मानसं च **न चिरकालोपस्थायि भविष्यति** ।

आयुषोऽल्पत्वात् । इदं च सोढं संयमानतिचरणेन कर्मनिर्जरया स्वर्गापवर्गाय । असोढं वानन्तदुःखाय नरकाय । अतः किं गृहाश्रमेण' ? इति चतुर्थम् ।।४।।

**(स.)** अथ चतुर्थस्थानमाह—तथेदं च मे दुःखं न चिरकालोपस्थायि भविष्यति, इदं चानुभूयमानं मम श्रामण्यमनुपालयतो दुःखं शारीर-मानसं कर्मफलं परीषहजनितं चिरकालमुपस्थातुं शीलं न भविष्यति, श्रामण्यपालनेन परीषहनिराकरणात् कर्मनिर्जरणात् संयमराज्यस्य प्राप्तिः, इतरथा महानरकादौ विपर्ययः, अतः किं गृहाश्रमेण ?-इति सम्प्रत्युपेक्षितव्यमिति चतुर्थं स्थानम्. ।।४।।

**(सु.)** तथा 'इदं च मे दुःखं न चिरकालोपस्थायि भविष्यति, इदं चानुभूयमानं मम श्रामण्यमनुपालयतो दुःखं शारीर-मानसं कर्मफलं परीषहजनितं, न चिरकालमुपस्थातुं शीलं भविष्यति, श्रामण्यपालनेन परीषहनिराकृतेः कर्म्मनिर्ज्जरणात्, संयमराज्यप्राप्तेः, इतरथा महानरकादौ विपर्ययः, अतः किं गृहाश्रमेण ?-इति संप्रत्युपेक्षितव्यमिति चतुर्थं स्थानम् ।।४।।

**(५) ओमजणपुरक्कारे ।**

**(ति.)** तथा **अवम-जनपुरस्कारः**-उत्प्रव्रजितेन हि अवमजनस्यापि अभ्युत्थानादिकः पुरस्कारः कर्तव्यः । अधार्मिकराजराज्ये तु शेषजनवत् सोऽपि वेष्टिं कार्यते । खरकर्मस्वपि नियोज्यते । इति प्रथममेवाधर्मफलम् । प्रव्रज्यां च पालयन् राजामात्यादिभिः पूज्यते। अतः किं गृहाश्रमेण ? 'इति पञ्चमम् ।।५।।

**(स.)** अथ पञ्चमस्थानमाह-'ओमजणपुरक्कार इति' न्यूनजनपूजा, प्रव्रजितो हि धर्मप्रभावाद् राजामात्यादिभिरभ्युत्थानासनाञ्जलिप्रग्रहादिभिः पूज्यते, उत्प्रव्रजितेन तु न्यूनजनस्यापि स्वव्यसनगुप्तयेऽभ्युत्थानादि कार्यम्, अधार्मिकराजविषये वा वेष्टिप्रायात् क्रकर्मणो नियमत एवेहैव चेदमधर्मफलम्, अतः किं गृहाश्रमेण ?-इति सम्प्रत्युपेक्षित-व्यमिति पञ्चमं स्थानम्. एवं सर्वत्र योजनीयम्. ।।५।।

**(सु.)** तथा ओमजणपुरस्का(क्का)रमिति न्यूनजनपूजा, प्रव्रजितो हि धर्मप्रभावाद् राजामात्यादिभिरभ्युत्थानासनाञ्जलिप्रग्रहादिभिः पूज्यते, उत्प्रव्रजितेन तु न्यूनजनस्यापि स्वव्यसनगुप्तयेऽभ्युत्थानादि कार्य, अधार्मिकराजविषये च वेष्टिप्रयोक्तुः खरकर्मणो नियमत एवेदमधर्मफलं, अतः किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति पञ्चमं स्थानं, एवं सर्वत्र क्रिया योजनीया ।।५।।

**(६) वंतस्स पडियाइयणं।**

**(ति.)** तथा **वान्तस्य प्रत्यापानम्**-भुक्तोज्झितपरिभोग इत्यर्थः । वान्ताश्च भोगाः प्रव्रज्याङ्गीकरणेन । तेषां पुनरादानं वान्ताहारभोजनकल्पम्, अधमजनस्यापि निन्दनीयं, दुर्गतिव्याधिजनकं च । ततः किमेतेनेति षष्ठम् ।।६।।

**(स.)** अथ षष्ठं स्थानमाह-वान्तस्य प्रत्यापानं भुक्तोज्झितपरिभोग इत्यर्थः, अयं च श्व-शृगालादिक्षुद्रप्राणिभिराचरितः सतां निन्द्यः, पुनर्व्याधिदुःखजनकः, वान्ताश्च भोगाः प्रव्रज्याङ्गीकरणेन, एतत्प्रत्यापानमेवं भूतमेवं चिन्तनीयमिति षष्ठं स्थानम्. ।।६।।

**(सु.)** तथा वान्तस्य प्रत्यापानं भुक्तोज्झितपरिभोग इत्यर्थः, अयं च श्व-शृगालादि-क्षुद्रसत्त्वाचरितः सतां निन्द्यो व्याधिदुःखजनकः, वान्ताश्च भोगाः प्रव्रज्याङ्गीकरणेन, एतत्प्रत्यापानमप्येवंभूतमेव चिन्तनीयमिति षष्ठं स्थानम् ।।६।।

**(७) अहरगइ-वासोवसंपया ।**

**(ति.) अधरगतिवासोपसम्पत्**-अधरगतिर्नरकगतिस्तिर्यग्गतिश्च । तत्र वासाय उपसम्पत्-अङ्गीकरणम् । तदेतदुत्प्रव्रजनं तदधोगतिगतौ सत्यङ्कारकल्पम् । ततः किमेतेन ? इति सप्तमम् ।।७।।

**(स.)** अथ सप्तमस्थानमाह—तथाधोगतिवासोपसम्पत्, अधोगतिर्नरकगतिस्तिर्य-ग्गतिर्वा, तस्यां वसनमधोगतिवासः, एतन्निमित्तभूतं कर्म गृह्यते, तस्योपसम्पत्, सामीप्येनाङ्गीकरणं यदेतदुत्प्रव्रजनमेवं चिन्तनीयमिति सप्तमं स्थानम्. ।।७।।

**(सु.)** तथा अधोगतिः-नरकतिर्यग्गतिः, तस्यां वसनं अधोगतिवासः, एतन्निमित्तभूतं कर्म गृह्यते, तस्योपसंपत्-सामीप्येनाङ्गीकरणं यदेतदुत्प्रव्रजनं, एवं चिन्तनीयमिति सप्तमं स्थानम् ।।७।।

**(८) दुल्लभे य खलु भो गिहीणं धम्मे गिहवासमज्झे वसंताणं ।**

**(ति.) दुर्लभः खलु गृहिणां धर्मः गृहपाशमध्ये वसताम्**-गृहे पाशकल्पाः-कलत्र-पुत्रादयः, तन्मध्ये वसताम्, अनादिभवाभ्यासाददवरकं बन्धनम् । उक्तं च -

अहह ! गृही किमु कुशली, वध्वा संसारसागरे क्षिप्तः ।
यदि बत लभते पोतं, तेनापि निमज्यते सुतराम् ।।१।। इत्यष्टमम् ।।८।।

**(स.)** अथाष्टमं स्थानमाह—भो इत्यामन्त्रणे, गृहिणां गृहस्थानां धर्मः परमनिर्वृति-जनको दुर्लभ एव, किं कुर्वतां गृहिणां ? गृहपाशमध्ये वसताम्, अत्र गृहशब्देन

पाशकल्पाः पुत्र-कलत्रादयो गृह्यन्ते, तन्मध्ये वसतामनादिभवाभ्यासादकारणं स्नेहबन्धनमेत-च्चिन्तनीयमित्यष्टमं स्थानम्. ।।८।।

**(सु.)** तथा दुर्ल्लभः खलु भो ! गृहिणां धर्म्म इति प्रमादबहुलत्वाद् दुर्ल्लभ एव, भो ! इत्यामन्त्रणे, गृहस्थानां परमनिर्वृत्तिजनको धर्मः, किंविशिष्टानाम् ?-इत्याह-गृहवासमध्ये वसतामित्यत्र गृहशब्देन पाशकल्पाः पुत्रकलत्रादयो गृह्यन्ते, तन्मध्ये वसतामनादि-भवाभ्यासादकारणं स्नेहबन्धनं, एतच्चिन्तनीयमित्यष्टमं स्थानम् ।।८।।

**(९) आयंके से वहाय होइ ।**

**(ति.) आतङ्कस्तस्य वधाय भवति**-आतङ्कः-सद्यो घाती विसूचिकादिरोगः । तस्य गृहिणो धर्मबन्धुरहितस्य दुर्गतिरूपाय विनाशाय भवति । स च दुर्गतिरूपो विनाशः । उत्प्रव्रजितस्यानेकेषु भवेषु भावि 'इति नवमम् ।।९।।

**(स.)** अथ नवमस्थानमाह-तथा आतङ्कः सद्योघाती विषू(सू)चिकादिरोगः, से इति तस्य गृहिणो धर्मबन्धुरहितस्य वधाय विनाशाय भवति, तथाविधवध-श्चानेकवधहेतुरेवं चिन्तनीयमिति नवमं स्थानम्. ।।९।।

**(सु.)** तथा आतङ्कस्तस्य वधाय भवति, आतङ्कः-सद्योघाती विशू(सू)चिकादिरोगः, से-तस्य गृहिणो धर्मबन्धुरहितस्य, वधाय-विनाशाय भवति, तथा वधश्चानेकवधहेतुः, एवं चिन्तनीयमिति नवमं स्थानम् ।।९।।

**(१०) संकप्पे से वहाय होइ ।**

**(ति.) सङ्कल्पस्तस्य वधाय भवति**-इष्टानिष्टवियोगसंयोगजो मानसो विकल्पः। तस्योत्प्रव्रजितस्य साधोर्विकलीभूतस्य चित्तवैकल्यापत्तेः भूतादिग्रहग्रहणे वा दुर्गतौ पातः स्यात्-इति दशमम् ।।१०।।

**(स.)** अथ दशमं स्थानमाह—तथा संकल्प इष्टाऽनिष्ट-विप्रयोगप्राप्तेर्यो मनः-सम्बन्ध्यातङ्कः, स तस्य गृहिणः, तथा चेष्टा-योगान्मिथ्याविकल्पाभ्यासेन प्रग्रहादि-प्राप्तेर्वधाय भवत्येतच्चिन्तनीयमिति दशमं स्थानम्. ।।१०।।

**(सु.)** तथा संकल्पः तस्य वधाय भवति, संकल्पः-इष्टानिष्ट-प्रयोगसंप्रयोगप्राप्तिजो मानस आतङ्कः, तस्य गृहिणः, तथा चेष्टायोगात् मिथ्याविकल्पाभ्यासेन ग्रहादिप्राप्तेर्वधाय भवति इत्येतच्चिन्तनीयमिति दशमं स्थानम् ।।१०।।

**(११) सोवक्केसे गिहिवासे निरक्केसे परियाए ।**

**(ति.)** तथा **सोपक्लेशो गृहिवासः**-उपक्लेशाः-कृषि-पाशुपाल्य-वाणिज्यादि-

क्रियानुगता-पण्डितजनगर्हिताः शीतोष्णश्रमादयः । घृत-लवण-तैल-तण्डुल-चिन्ता-दयश्च । **निरूपक्लेशः पर्यायः**-प्रव्रज्यारूपः । अनारम्भी चिन्तापरिवर्जितः श्लाघ्यो विदुषामित्येवं चिन्तनीयम्-इत्येकादशम् ।।११।।

**(स.)** अथैकादशं स्थानमाह—गृहवासो गृहाश्रमः सोपक्लेशः, सह उपक्लेशेन वर्तते यः स सोपक्लेशः, उपक्लेशाः कृषि-पाशुपाल्य-वाणिज्याद्यनुष्ठानगताः पण्डितजनगर्हिताः शीतोष्णश्रमादयो घृत-लवणचिन्तादयश्चेत्येवं चिन्तनीयमित्येकादशं स्थानम्. ।।११।।

**(सु.)** तथा सोपक्लेशो गृहवास इति सहोपक्लेशैः सोपक्लेशो गृहिवासो-गृहाश्रमः, उपक्लेशाः-कृषि-पाशुपाल्य-वाणिज्याद्यनुष्ठानानुगताः पण्डितजनगर्हिताः शीतोष्णश्रमादयः, घृत-लवणचिन्तादयश्चेत्येवं चिन्तनीयमित्येकादशं स्थानम् ।।११।।

**(१२) बंधे गिहिवासे, मुक्खे परियाए ।**

**(ति.)** तथा, **बन्धो गृहवासः**-सदा बन्धहेत्वनुष्ठानादूर्णनाभकीटवत् । **मोक्षः पर्यायः** प्रव्रज्यारूपः । अनवरतं कर्मनिगडविगमात् मुक्तवदित्येवं चिन्तनीयं द्वादशम् ।।१२।।

**(स.)** अथ द्वादशं स्थानमाह—पर्याय एभिरेवोपक्लेशै रहितः, दीक्षापर्यायोऽनारंभी चिन्तापरिवर्जितः श्लाघनीयो विदुषामिति चिन्तनीयमिति द्वादशं स्थानम्. ।।१२।।

**(सु.)** तथा निरुपक्लेशः पर्याय इति, एभिरेवोपक्लेशै रहितः प्रव्रज्यापर्यायः, अनारम्भी कुचिन्तापरिवर्ज्जितः श्लाघनीयो विदुषामित्येवं चिन्तनीयमिति द्वादशं स्थानम् ।।१२।।

**(१३) सावज्जे गिहिवासे निरवज्जे परियाए ।**

**(ति.)** तथा, **सावद्यो गृहवासः**-सपापः प्राणातिपात-मृषावादादिप्रवृत्तेः । **निरवद्यः पर्यायः**-अपापः-अहिंसादिपालनात्मकत्वात्-इति त्रयोदशम् ।।१३।।

**(स.)** अथ त्रयोदशं स्थानमाह—तथा बन्धो गृहवासः, सदा तद्धेत्वनुष्ठानात् कोशकारकीटवदित्येवं चिन्तनीयमिति त्रयोदशं स्थानम्. ।।१३।।

**(सु.)** तथा बन्धो गृहवासः सदा तद्धेत्वनुष्ठानात्, कोशकारकीटकवत् इत्येतच्चिन्तनीयं इति त्रयोदशं स्थानम् ।।१३।।

**(१४) बहुसाहारणा गिहीणं कामभोगा।**

**(ति.)** तथा, **बहुसाधारणा गृहिणां कामभोगाः**-चौर-राजकुलादिसामान्याः । कोऽर्थस्तैरप्य-पहार्याः-इति चतुर्दशम् ।।१४।।

**(स.)** अथ चतुर्दशं स्थानमाह-तथा पर्यायो मोक्षो निरन्तरं कर्मनिगडानामपगमनेन मुक्तवदित्येवंचिन्तनीयमिति चतुर्दशं स्थानम्. ।।१४।।

**(सु.)** तथा मोक्षः पर्यायोऽनवरतं कर्मनिगडविगमान्मुक्तवदित्येवं चिन्तनीयमिति चतुर्द्दशं स्थानम् ।।१४।।

**(१५) पत्तेयं पुन्नपावं ।**

**(ति.) प्रत्येकं पुण्यपापम्**-माता-पितृ-कलत्र-पुत्रादिनिमित्तमप्यनुष्ठितं पुण्यपापं प्रत्येकं पृथक् पृथग् यद् येनानुष्ठितं, तत् तस्य कर्तुरेव भवति-इति पञ्चदशम् ।।१५।।

**(स.)** अथ पञ्चदशं स्थानमाह—अत एव गृहवासः सावद्यः सपापः प्राणातिपात-मृषावादादीनां पञ्चानामाश्रवाणां सेवनादिति चिन्तनीयमिति पञ्चदशं स्थानम्. ।।१५।।

**(सु.)** अत एव सावद्यो गृहवास इति सावद्यः-सपापः प्राणातिपातमृषावादादि-प्रवृत्तेरित्येतच्चिन्तनीयमिति पञ्चदशं स्थानम् ।।१५।।

**(१६) अणिच्चे खलु भो मणुयाण जीविए, कुसग्गजलबिंदुचंचले।**

**(ति.) अनित्यं खलु**-अनित्यमेव । **मनुष्याणां जीवितम्** । **कुशाग्रबिन्दुचञ्चलम्**-सोपद्रवत्वादनेकोपद्रवविषयत्वात् । अत्यन्तासारम् । तदलं गृहाश्रमेण'-इति षोडशम् ।।१६।।

**(स.)** अथ षोडशं स्थानमाह—पर्याय एवमनवद्योऽपापोऽहिंसादिपालनात्मकत्वादेत-च्चिन्तनीयमिति षोडशं स्थानम्. ।।१६।।

**(सु.)** एवमनवद्यः पर्याय इत्यपाप इत्यर्थः, अहिंसादिपालनात्मकत्वादेतच्चिन्त-नीयमिति षोडशं स्थानम् ।।१६।।

**(१७) बहुं च खलु भो पावं कम्मं पयडं ।**

**(ति.)** तथा, **बहुं च खलु**-बह्वेव । **भोः ! पापम्-क्लिष्टम्** । **कर्म**-चारित्रमोहनीयादि। **प्रकृतम्**-निर्वर्तितं मया । न हि प्रभूतक्लिष्टकर्मरहितानाम् एवं चारित्रत्यागबुद्धिर्भवति ।।१७।।

**(स.)** अथ सप्तदशं स्थानमाह—बहुसाधारणा गृहिणां कामभोगा इति, गृहिणां गृहस्थानां कामभोगाः साधारणाश्चोरराजकुलादिसामान्याः, पूर्ववदेतच्चिन्तनीयमिति सप्तदशं स्थानम्. ।।१७।।

**(सु.)** तथा बहुसाधारणा गृहिणां कामभोगा इति, बहुसाधारणाः-चौर-राजकुलादिसामान्या गृहिणां-गृहस्थानां कामभोगाः पूर्ववत्, एतच्चिन्तनीयमिति सप्तदशं स्थानम् ।।१७।।

**(१८) पावाणं च खलु भो ! कडाणं कम्माणं पुव्विं दुच्चिन्नाणं दुप्पडिकंताणं वेयइत्ता मुक्खो, नत्थि अवेइत्ता, तवसा वा झोसइत्ता। अट्ठारसमं पयं भवइ ।**

**(ति.)** तथा **पापानां च**, चकारात् पुण्यरूपाणां च । **खलु भोः ! कृतानां** च मनो-वाक्-काय-योगैरोधतो निर्वर्त्तितानाम् । खलुशब्दात् कारितानामनुमतानां च । **कर्मणाम्**-ज्ञानावरणीयादीनाम् । **पूर्वम्**-अन्यजन्मनि । **दुश्चरितानाम्**-मिथ्यात्वा-ऽविरति-कषाययोगैराचीर्णानां परतीर्थाद्याराधन-मद्यपान-दौःशील्या-ऽनृतलक्षणानां, तेषामेव **दुःप्रतिक्रान्तानाम्**-दुरालोचितानाम्, अनालोचितानां वा । भावतोऽदत्तमिथ्यादुःकृतानां, **वेदयित्वा**नुभूय फलमिति शेषः । **मोक्षो** भवति । **नास्त्यवेदयित्वा**-अनेन सकर्मणां मोक्षव्यवच्छेदमाह। **तपसा** वात्युग्रेण **क्षपयित्वा** । अतस्तप एव श्रेयो, यतः सर्वकर्मक्षपणेन मोक्षावाप्तिः । तत् किं दुर्गतिदायिना गृहाश्रमेण' ?इति प्रत्युपेक्षणीयम् । अष्टादशं पदं भवति ।।१८।।

**(स.)** अथाष्टादशं स्थानमाह-तथा प्रत्येकं पुण्यपापमिति. मातापितृकलत्रादि-निमित्त-मप्यनुष्ठितं पुण्यपापं प्रत्येकं पृथक्-पृथक्, येनानुष्ठितं तस्य कर्तुरेव तदिति भावार्थः, एवमष्टादशं स्थानम्. ।।१८।।

**(सु.)** तथा प्रत्येकं पुण्यपापमिति, माता-पितृ-कलत्रादिनिमित्तमप्यनुष्ठितं पुण्यपापं प्रत्येकं प्रत्येकं-पृथक् पृथक् येनानुष्ठितं, तस्य कर्तुरेवैतदिति भावार्थः । एवमष्टादशं स्थानम् ।।१८।।

एतदन्तर्गतो वृद्धाभिप्रायेण शेषग्रन्थः समस्तोऽत्रैव, अन्ये तु व्याचक्षते-सोपक्लेशो गृहिवास इत्यादिषु षट्सु स्थानेषु सप्रतिपक्षेषु स्थानत्रयं गृह्यते, एवं च बहुसाधारणा गृहिणां काम-भोगा इति चतुर्दशं स्थानं, प्रत्येकं पुण्यपापमिति पञ्चदशमं स्थानं, शेषाण्यभिधीयन्ते,

तथाऽनित्यं खल्वित्यनित्यमेव नियमतो भो ! इत्यामन्त्रणे मनुष्याणां-पुंसां जीवितमायुः, एतदेव विशेष्यते-कुशाग्रजलबिन्दुचञ्चलं सोपक्रमत्वादनेकोपद्रव-विषयत्वादत्यन्तासारं, तदलं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति षोडशं स्थानम् ।

तथा बहुं च खलु भोः ! पापं कर्म्म प्रकृतं बहु च, चशब्दात् क्लिष्टं च, खलुशब्दोऽवधारणे, बद्धं च पापकर्म्म चारित्रमोहनीयादि, प्रकृतं-निर्वर्तितं मयेति गम्यते, श्रामण्यप्राप्तावप्येवं क्षुद्रबुद्धिप्रवृत्तेः, **नहि प्रभूतक्लिष्टकर्म्मरहितानामेवमकुशला बुद्धिर्भवति**, अतो न किञ्चिद् गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति सप्तदशं स्थानम् ।

पावाणं चेत्यादि, पापानां च-अपुण्यरूपाणां, चशब्दात् पुण्यरूपाणां च, खलु भोः ! कृतानां कर्म्मणां, खलुशब्दः कारितानुमतविशेषणार्थः, भो इति शिष्यामन्त्रणे, कृतानां-मनो-वाक्-काय-योगैरोघतो निर्वर्त्तितानां कर्मणां-ज्ञानावरणीयाद्यसातावेदनीयादीनां, प्राक्-पूर्वमन्यजन्मसु दुश्चरितानां-प्रमादकषायज-दुश्चरितजनितानि, दुश्चरितानि कारणे कार्योपचारात्, दुश्चरितहेतूनि वा दुश्चरितानि, कार्ये कारणोपचारात्, एवं दुष्पराक्रान्तानां-मिथ्यादर्शनाविरतिजदुष्पराक्रान्तजनितानि दुष्पराक्रान्तानि, हेतौ फलोपचारात्, दुष्पराक्रान्तहेतूनि वा दुष्पराक्रान्तानि, फले हेतूपचारात्, इह च दुश्चरितानि मद्यपानाश्लीलानृतभाषणादीनि, दुष्पराक्रान्तानि तु वध-बन्धनादीनि, तदमीषां एवं-भूतानां कर्मणां वेदयित्वाऽनुभूय, फलमिति वाक्यशेषः, किं ?, मोक्षो भवति-प्रधानपुरुषार्थो भवति, नास्त्यवेदयित्वा-न भवति अननुभूय, अनेन सकर्मकमोक्षव्यवच्छेदमाह-इष्यते च स्वल्पकर्मोपेतानां, कैश्चित् सहकारिनिरोधतस्तत्फलादानवादिभिस्तत्, तदपि नास्त्यवेदयित्वा मोक्षः, तथारूपत्वात् कर्मणः, स्वफलादाने कर्मत्वायोगात्, तपसा वा क्षपयित्वा-अनशनप्रायश्चित्तादिना वा विशिष्टक्षायोपशमिक-शुभभावरूपेण तपसा प्रलयं नीत्वा, इह च वेदनमुदयप्राप्तस्य व्याधेरिवानारब्धोपक्रमस्य क्रमशः, अन्यानिबन्धन-परिक्लेशेन, तपःक्षपणं तु सम्यगुपक्रमेणानुदीर्णोदीरणदोषक्षपणवद्, अन्यनिमित्तमुप-क्रमेणापरिक्लेशमित्यतस्तपोऽनुष्ठानमेव श्रेय इति, न किञ्चिद्गृहा-श्रमेणेति संप्रत्यु-पेक्षितव्यभित्यष्टादशं पदं भवति-अष्टादशं स्थानं भवति ।।१८।।

**भवइ य इत्थ सिलोगो --**

**जया चयइ(ई) धम्मं, अणज्जो भोगकारणा ।**
**से तत्थ मुच्छिए बाले, आयइं नावबुज्झइ ।।चू.१.१।।**

**(ति.)** भवति चात्र श्लोकः-तत्र अद्यश्लोकः इह जात्या एक वचनं, ततश्चोक्तावुक्त-सङ्गहपरा जातिरिति [जया-] यदा-अष्टादशसु व्यावर्तनकारणेषु सत्स्वपि त्यजति । धर्मम्-चारित्रलक्षणम् । अनार्य इव, अनार्यः-म्लेच्छचेष्टितः । भोगकारणात्-भोगनिमित्तम् । स-धर्मत्यागी । तत्र-भोगेषु । मूर्च्छितः-गृद्धः । बालः-अज्ञः । आयतिम्-आगामिकालम् । नावबुध्यते ।।चू.१.१.।।

**(स.)** भवति चात्र श्लोकः अत्र' इत्यष्टादशस्थानानां संबन्धे, उक्ता-ऽनुक्तसङ्ग्रहपर

इत्यर्थः, श्लोक इति य जातिपरो निर्देशः, ततश्च श्लोकजातिः अनेकभेदा भवति-इति प्रभूतश्लोकोपन्यासेऽपि न विरोधः 'जया' इति-यदा चैवमष्टादशसु स्थानेषु व्यावर्त्तनकारणेषु सत्स्वपि, यो बालोऽज्ञो धर्मं चारित्रलक्षणं जहाति त्यजति, स आयतिमागामिकालं नावबुद्ध्यते सम्यग् नावगच्छति, किम्भूतो बालः ? अनार्य इव अनार्यो म्लेच्छचेष्टितः, किमर्थं धर्मं त्यजति ?-इत्याह-भोगकारणाय शब्दादिभोगनिमित्तं, किम्भूतो बालः ? तत्र मूर्छितः, तेषु भोगेषु मूर्च्छितो गृद्धः. ।।चू.१.१.।।

**(सु.)** भवति चात्र श्लोकः, अत्रेति अष्टादशस्थानार्थव्यतिकरे, उक्तानुक्तार्थसंग्रहपर इत्यर्थः, श्लोक इति च जातिपरो निर्देशः, ततश्च श्लोकजातिरनेकभेदा भवतीति प्रभूतश्लोकोपन्यासेऽपि न विरोधः- जया य' इति-यदा चैवमष्टादशसु व्यावर्त्तनकारणेषु सत्स्वपि जहाति-त्यजति धर्मं-चारित्रलक्षणं, अनार्य इत्यनार्य इव, अनार्यो-म्लेच्छचेष्टितः, किमर्थम् ?-इत्याह-भोगकारणात्-शब्दादिभोगनिमित्तं स धर्मत्यागी, तत्र-तेषु भोगेषु मूर्च्छितो गृद्धो बालोऽज्ञः, आयतिं-आगामिकालं नावबुध्यते-न सम्यगवगच्छतीति ।।चू.१.१।।

**जया ओहाइंओ[1] होइ इंदो वा पडिओ छमं ।**
**सव्वधम्मपरिब्भट्ठो, स पच्छा परितप्पइ ।।चू.१.१.२।।**

**(ति.)** यदा अवधावितो भवति-संयमसुखविभूतेः उत्प्रव्रजित इत्यर्थः । इन्द्र इव पतितः क्षमाम् । सर्वधर्मेभ्यः-पूर्वासेवितेभ्यः, लौकिकेभ्यो गौरवादिभ्यः परिभ्रष्टः । स पश्चाद्-ईषन्मोहापगमे । परितप्यते-'आः किमिदमकार्यं मयानुष्ठितम् ?-इत्यनुतापं करोति।।१.१.२।।

**(स.)** एतदेव दर्शयति-जया' इति-यदा चावधावितोऽपसृतो भवति यः, कोऽर्थः संयमसुखविभूतेः सकाशादुत्प्रव्रजित इत्यर्थः, तदा इन्द्रो वा देवराज इव, क्षमां पतितः, स्वविमान-विभवभ्रंशेन भूमौ पतित इति भावः. किम्भूतो यः? सर्वधर्मपरिभ्रष्टः, सर्वधर्मेभ्यः क्षान्त्यादिभ्यः आसेवितेभ्योऽपि यावत्प्रतिज्ञमननुपालनात्, लौकिकेभ्यो वा गौरवादिभ्यः परिभ्रष्टः सर्वतश्च्युतः, पतितो भूत्वा पश्चान्मनाग् मोहस्यान्ते स परितप्यते, किमिदं मया कार्यं कृतमित्यनुतापं करोति. ।।चू.१.२।।

**(सु.)** जया उ इति, यदाऽवधावितोऽपसृतो भवति संयमसुखविभूतेः, उत्प्रव्रजित इत्यर्थः, इन्द्रो व' इति-देवराज इव पतितः क्ष्मां—क्ष्मां गतः, स्वविभवभ्रंशेन भूमौ

१. 'ओहाविओ' इत्यन्यत्र मुद्रितम्, टीकास्वत्र तिसृषु अपि 'अवधावितः' इति विवृतम् ।

पतित इति भावः, क्ष्मा-भूमिः, सर्वधर्मपरिभ्रष्टः-सर्वधर्मेभ्यः—क्षान्त्यादिभ्यः आसेवितेभ्योऽपि यावत्प्रतिज्ञमननुपालनात्, लौकिकेभ्योऽपि वा गौरवादिभ्यः परिभ्रष्टः-सर्वतश्च्युतः, स पतितो भूत्वा पश्चान्मनाग् मोहावसाने परितप्यते, 'किमिदमकार्यं मयानुष्ठितम्?-इत्यनुतापं करोतीति ।।चू.१.२।।

**जया य वंदिमो होइ, पच्छा होइ अवंदिमो ।**
**देवया व चुया ठाणा, स पच्छा परितप्पई ।।चू १.३।।**

**(ति.)** यदा प्रव्रजितः सन् वन्द्यो भवति । पश्चाद्-उत्प्रव्रजितः अवन्द्यः । शेषं स्पष्टम् ।।चू.१.३।।

**(स.)** जया ! इति-यदा च यः संयमवान् सन् नरेन्द्रादीनां वन्द्यो भवति, स पश्चादुन्निष्क्रान्तः संयमरहितः सन्नवन्द्यो भवति, पश्चात् स परितप्यते च, किंवत् ? स्थानच्युता सती इन्द्रवर्जा देवतेव, परितापार्थः पूर्ववत्. ।।चू.१.३।।

**(सु.)** जया य'इति, यदा च वन्द्यो भवति श्रमणपर्यायस्थो नरेन्द्रादीनां, पश्चाद् भवति उन्निष्क्रान्तः सन्नवन्द्यः, तदा देवता इव काचिदिन्द्रवर्जा स्थानच्युता सती, स पश्चात् परितप्यते इति एतत् पूर्ववदेवेति ।।चू.१.३।।

**जया य पूइमो होइ, पच्छा होइ अपूइमो ।**
**राया व रज्जपब्भट्ठो, स पच्छा परितप्पई ।।चू.१.४।।**

**(ति.)** प्राग्वत् ।।चू.१.४।।

**(स.)** जया' इति-यदा च पूज्यो भवति लोकानां वस्त्रपात्रादिभिः, कुतः ? साधुधर्ममाहात्म्यात्, स उत्प्रव्रजितः सन्नपूज्यो भवति लोकानामेव, क इव ? राज्य (प्र) भ्रष्टो महतो भोगात्, वियुक्तो राजेवापूज्यो भवति, पुनः पश्चात् स परितप्यते च पूर्ववत्.।।चू.१.४।।

**(सु.)** जया व'(अ)'इति, यदा च पूज्यो भवति वस्त्रपात्रादिभिः श्रामण्य-सामर्थ्याल्लोकानां, पश्चाद् भवत्युत्प्रव्रजितोऽपूज्यो लोकानामेव, तदा राजेव राज्यपदभ्रष्टो, महतो भोगाद् वियुक्तः (विप्रमुक्तः) स पश्चात् परितप्यत एवेति पूर्ववदेवेति ।।चू.१.४।।

**जया य माणिमो होइ, पच्छा होइ अमाणिमो ।**
**सिट्ठीव कब्बडे छूढो, स पच्छा परितप्पई ।।चू.१.५।।**

**(ति.)** माणिमः-मान्यः । कर्बटे-क्षुद्रसन्निवेशे ।।चू.१.५।।

**(स.)** जया' इति-यदा च मान्यो भवत्यभ्युत्थानाज्ञाकरणादिना माननीयः स्याच्छीलादिप्रभावेन, पश्चाच्छीलादि-परित्यागेनामान्यः स्यात्, किंवत् ? श्रेष्ठिवत् श्रेष्ठीव, यथा श्रेष्ठी कर्बटे क्षिप्तो महाक्षुद्रसन्निवेशे क्षिप्तोऽमान्यो भवति, पुनः पश्चात् परितप्यते, तद्वच्छीलादिपरित्याग्यपि. ।।चू.१.५।।

**(सु.)** जया य' इति, यदा च मान्यो भवति अभ्युत्थाना-ऽऽज्ञाकरणादिना माननीयः शीलप्रभावेण, पश्चाद् भवत्यमान्यस्तत्परित्यागेन, तदा श्रेष्ठीव कर्बटे-महाक्षुद्रसन्निवेशे क्षिप्तोऽमात्यः स(पश्चा)त् परितप्यत, इति, एतत् समानं पूर्वेणेति ।।चू.१.५।।

**जया य थेरओ होइ, समइक्कंतजुव्वणो ।**
**मच्छु व्व गलं गलित्ता, स पच्छा परितप्पई ।।चू.१.६।।**

**(ति.)** यदा च संयमं त्यक्त्वा भुक्तभोगः समतिक्रान्तयौवनः स्थविरो भवति । तदा वयःपरिणामे विपाककटवो भोगाः, इति चिन्तयन् मत्स्य इव । गलम्-बडिशम् । गिलित्वा कर्मलोहकण्टकविद्धः । स पश्चात् परितप्यते ।।चू.१.६।।

**(स.)** जया' इति-यदा च स्थविरो भवति मुक्तसंयमो वयसः परिणामेन, एतद्विशेष-प्रदर्शनायाह-किम्भूतः स्थविरः ? समतिक्रान्तयौवन एकान्तस्थविरभावः, तदा भोगानां विपाककटुकत्वात् परितप्यते, क इव ? मत्स्य इव, यथा मत्स्यो बडिशं गिलित्वाभिगृह्य तथाविधकर्मलोहकण्टकविद्धः सन् पश्चात् परितप्यत इति, एतदपि पूर्वेण समानम्. ।।चू.१.६।।

**(सु.)** जया य' इति, यदा च स्थविरो भवति, स त्यक्तसंयमो वयःपरिणामेन, एतद्विशेषप्रदर्शनायाह-समतिक्रान्तयौवनः, एकान्तस्थविर इति भावः, तदा विपाककटुक-त्वाद् भोगानां, मत्स्य इव गलं-बडिशं, गिलित्वाऽभिगृह्य, तथाविधकर्मलोहकण्टकविद्धः सन् स पश्चात् परितप्यत इत्येतदपि समानं पूर्वेणेति ।।चू.१.६।।

**जया य कुकुडुंबस्स, कुतत्तीहिं विहम्मई ।**
**हत्थी व बंधणे बद्धो, स पच्छा परितप्पई ।।चू.१.७।।**

**(ति.)** यदा च उत्प्रव्रजितस्य जातकुकुटुम्बस्य सम्बन्धिनीभिः कुतप्तिभिः-आत्मपरसन्तापकारिणीभिः । विहन्यते-विषयभोगान् प्रति विघातं नीयते । कुटुम्बबन्धनेन बद्धः । उत्तरार्द्धं स्पष्टम् ।।चू.१.७।।

**(स.)** एतदेव स्पष्टयति–जया' इति-यदा च कुकुटुम्बस्य कुत्सितकुटुम्बस्य, कुतप्तिभिः कुत्सितचिन्ताभिरात्मनः सन्तापकारिणीभिः, विहन्यते विषयभोगान् प्रति विघातं नीयते, तदा स मुक्तसंयमः सन् परितप्यते पश्चात्, क इव ? यथा हस्ती कुकुटुम्ब-बन्धनबद्धः परितप्यते.।।चू.१.७।।

**(सु.)** एतदेव स्पष्टयति–जया य कुकुडुंबस्स' इत्यादि, कुकुटुम्बस्य-कुत्सित-कुटुम्बस्य, कुतप्तिभिः-कुत्सितचिन्ताभिः, आत्मनः संतापकारिणीभिर्विहन्यते-विषयभोगान् प्रति विघातं नीयते तदा स मुक्तसंयमः सन् परितप्यते पश्चात्, क इव?-यथा हस्ती कुकुटुम्ब-बन्धनबद्धः परितप्यते ।।चू.१.७।।

**पुत्त दार[1]परिक्किन्नो, मोहसंताणसंतओ ।**
**पंकोसन्नो जहा नागो, स पच्छा परितप्पई ।।चू.१.८।।**

**(ति.)** उत्प्रव्रजितो विषयासक्तः कलत्रपुत्रादिभिः, परि-समन्तात्, कीर्णो-विक्षिप्तः। मोहसन्तानसन्ततः-दर्शनमोहनीयकर्मप्रवाहेण व्याप्तः । पङ्कावसन्नो यथा नागः कर्दमावमग्नो वनगज इव । स पश्चात् परितप्यते 'हा हा किं मयेदमसमञ्जसं चेष्टितम्' इति ।।चू.१.८।।

**(स.)** पुनराह-पुत्त...इति-मुक्तसंयमः पश्चात् परितप्यते, हा हा किं मयेदमसमञ्जस-मनुष्ठितं, किम्भूतः ? पुत्रदारपरिकीर्णः, विषयसेवनात् पुत्र-कलत्रादिभिः सर्वतो विक्षिप्तः पुनः किम्भूतः ? मोहसन्तानसन्ततो दर्शनमोहनीयादि-कर्मप्रवाहेण सन्तप्तः, क इव परितप्यते ? यथा नागो हस्ती पङ्कावसन्नः कर्दममग्नः सन् परितप्यते. ।।चू.१.८।।

**(सु.)** एतदेव स्पष्टयति पुत्रदार...इति, पुत्र दारपरिकीर्णो-विषयसेवनात् पुत्रकलत्रादिभिः सर्व्वतो विक्षिप्तो मोहसन्तानसन्ततो-दर्शनादिमोहनीयकर्म्मप्रवाहेण

---

१. अन्यत्र 'परीकिन्नो', मुद्रितम् चूर्णौ अपि 'परिक्किण्णो' इति तद् सुष्ठु प्रतिभाति, यतः (ति) टीकायां 'परि कीर्णो इति विवृतम्, अन्यत्रा विवृतं तथैव ।

व्याप्तः, क इव-पङ्कावसन्नो यथा नागः-कर्दमावमग्नो वनगज इव स पश्चात् परितप्यते-'हा ! हा ! किं मयेदं असमञ्जसमनुष्ठितमिति ।।चू.१.८।।

**अज्जं याहं गणी हुंतो, भावियप्पा बहुसुओ ।**
**जइ हं रमंतो परियाए, सामण्णे जिणदेसिए ।।चू.१.९।।**

**(ति.)** कश्चन सचेतनत(न)रः परमेवं परितप्यते इत्याह—अद्ययावद् । अहं गणी-आचार्यः । अभविष्यम् भावितात्मा-संवेगरङ्गरङ्गितात्मकः । बहुश्रुतः-सम्पूर्णागमः । यद्यहम् । अरमिष्ये । पर्याये श्रामण्ये-श्रमणसम्बन्धिनि । जिनदेशिते ।।चू.१.९।।

**(स.)** कश्चित् सचेतनो नर एवं च परितप्यत इत्याह—अज्ज' इति-अहमद्य तावदस्मिन् दिवसे गणी स्यामाचार्यो भवेयं, यदि पर्याये प्रव्रज्यारूपेऽरमिष्यं रतिमकरिष्यम्, किंविशिष्टे पर्याये ? श्रामण्ये श्रमणसम्बन्धिनि, पुनः किम्भूते ? जिनदेशिते तीर्थकरप्ररूपिते, न शाक्यादिरूपे, किम्भूतोऽहं ? भावितात्मा, प्रशस्तयोगभावनाभिर्भावित आत्मा यस्य सः, पुनः किम्भूतः ? बहुश्रुतः, उभयलोकहितबह्वागमयुक्त इति. ।।चू.१.९।।

**(सु.)** कश्चित् सचेतनो नर एवं च परितप्यत इत्याह-अज्ज इति अद्य तावदहं-अद्य-अस्मिन् दिवसेऽहमित्यात्मनिर्देशे, गणी स्यां-आचार्यो भवेयं, भावितात्मा-प्रशस्तआगम(योग)भावनाभिः, बहुश्रुत-उभयलोकहित-बह्वागमयुक्तः, यदि किं स्यात्? इत्याह-यदि अहमरमिष्यं-रतिमकरिष्यं, पर्याये-प्रव्रज्यारूपे, सोऽनेकभेद इत्याह-श्रामण्ये-श्रमणानां सम्बन्धिनि, सोऽपि शाक्यादिभेदभिन्न इत्याह-जिनदेशिते-निर्ग्रन्थसम्बन्धिनीति ।।चू.१.९।।

**देवलोयसमाणो य, परियाओ महेसिणं ।**
**रयाणमरयाणं तु, महानरय[1]सालिसो ।।चू.१.१०।।**

**(ति.)** अवधानोत्प्रेक्षिणः स्थिरीकरणार्थमाह—(देवलोय...इति) स्पष्टः । नवरम् । अरतानाम्-विषयाभिलाषिणाम् । पुनर्महानरकसदृशः-मानसदुःखातिरेकात् ।।चू.१.१०।।

**(स.)** अवधानोत्प्रेक्षिणः स्थिरीकरणार्थमाह—देव...इति-महर्षीणां सुसाधूनां पर्याये संयमे रतानामासक्तानां, पर्यायो देवलोकसमानः, अयमर्थः-यथा देवलोके देवा

१. 'सारिसो' इत्यपि मुद्रितमन्यत्र ।

नाटकादिव्यापृताः सन्तोऽदीनमनसस्तिष्ठन्ति, तथा सुसाधवोऽपि ततोऽधिकभावतः प्रत्युपेक्षणादि-क्रियाव्यापृता अदीनमनसस्तिष्ठन्ति, कथम् ? उपादेयविशेषत्वात् प्रत्युपेक्षणादेः, तथा पर्यायेऽरतानाञ्च—भावतः सामाचार्यामसक्तानां, चशब्दाद्-विषयाभिलाषिणाञ्च, भगवल्लिङ्गविडम्बकानां क्षुद्रप्राणिनां पर्यायो महानरकसदृशो रौरवादितुल्यः, तत्कारणत्वान्मानस-दुःखातिरेकात्, तथा विडम्बनाच्चेति. ।।चू.१.१०।।

**(सु.)** अवधानोत्प्रेक्षिणः स्थिरीकरणार्थमाह—देवलोकसमाणो...इति, देवलोक-समानस्तु-देवलोकसदृश एव पर्यायः-प्रव्रज्यारूपो महर्षीणां-सुसाधूनां, रतानां-सक्तानां, पर्याय एवेति गम्यते, एतदुक्तं भवति, यथा देवलोके देवाः प्रेक्षणकादिव्यापृता अदीनमनसः तिष्ठन्ति, एवं सुसाधवोऽपि ततोऽधिकं भावतः प्रत्युपेक्षणादिक्रियायां व्यापृताः, उपादेयविशेषतत्वात् प्रत्युपेक्षणादेरिति देवलोकसमान एव पर्यायो महर्षीणां रतानामिति। अरतानां च-भावतः सामाचार्यसक्तानां च, चशब्दात् विषयाभिलाषिणां च भगवल्लिङ्गविडम्बकानां क्षुद्रसत्त्वनां महानरकसदृशो-रौरवादितुल्यस्तत्कारणत्वा-न्मानस-दुःखातिरेकात् तथा विडम्बनाच्चेति ।।चू.१.१०।।

**अमरोवमं जाणिय सुक्खमुत्तमं, रयाणं परियाइ तहारयाणं ।**
**नरओवमं जाणिय दुक्खमुत्तमं, तम्हा रमिज्जा परियाइ पंडिए ।।चू.१.११।।**

**(ति.)** एतदुपसंहारेणैव निगमयन्नाह-अमरोपमं ज्ञात्वा सौख्यमुत्तमं रतानां पर्याये-प्रव्रज्यारूपे । तथा अरतानां व्रतपर्याये नरकोपमं ज्ञात्वा दुःखमुत्तमम् । तस्मात् पण्डितः-सुख-दुःखज्ञः । प्रव्रज्यापर्याये रमेत । येन दिव्यसुखभागी भवति ।।चू.१.११।।

**(स.)** एतच्चोपसंहारेणैव निगमयन्नाह-अमर...इति-पण्डितः शास्त्रज्ञः, पर्याय उक्तरूपे संयमे रमेत सक्तिं कुर्यात्, किं कृत्वा ? अमरोपमं देवसदृशं सौख्यं प्रशमसौख्यं प्रशस्तं ज्ञात्वा विज्ञाय, केषामित्याह-पर्याये रतानां दीक्षायां सक्तानां, सम्यक्प्रत्युपेक्षणादि-क्रियाद्यङ्गे, पुनः किं कृत्वा ? पर्याय एवा-ऽरतानां नरकोपमं नरकतुल्यमुत्तमं प्रधानं दुःखं च ज्ञात्वा. ।।चू.१.११।।

**(सु.)** एतदुपसंहारेणैव निगमयन्नाह—अमर...इति, अमरोपमं उक्तन्यायाद् देवसदृशं ज्ञात्वा-विज्ञाय सौख्यमुत्तमं-प्रधानं प्रशमसौख्यं, केषाम् ?-इत्याह-रतानां पर्याये-सक्तानां सम्यक्प्रत्युपेक्षणादिक्रियाव्यङ्ग्ये श्रामण्ये, तथा अरतानां पर्याय एव, किम्?-

इत्याह-नरकोपमं-नरकतुल्यं, ज्ञात्वा दुःखमुत्तमं-प्रधानं, उक्तन्यायात्, यस्मादेवं रताऽरतविपाकः, तस्माद् रमेतासक्तिं कुर्यात्, क्वेत्याह-पर्याये उक्तस्वरूपे पंडितः-शास्त्रार्थज्ञ इति ।।चू.१.११।।

**धम्माउ भट्ठं सिरिओ अवेयं, जन्नग्गिविज्झायमिवऽप्पतेयं ।**
**हीलंति णं दुव्विहियं कुसीलं, दाढुद्[1]धियं घोरविसं व नागं ।।चू.१.१२।।**

**(ति.)** पर्यायच्युतस्यैहिकं दोषमाह- धर्माद् भ्रष्टम्-उत्प्रव्रजितम् । श्रियोऽपेतम्-अपगतश्रीकम् । यज्ञाग्निमिव यज्ञावसानविध्यातम् । अल्पतेजसं, अल्पशब्दोऽभाववचनः, निस्तेजसं भस्मप्रायमित्यर्थः। उद्धृतदाढं घोरविषं नागमिव । एवं दुर्विहितम्-दुष्टानुष्ठानम् । कुशीलं हीलयन्ति-अवज्ञया परिहरन्ति ।।चू.१.१२।।

**(स.)** अथ चारित्रभ्रष्टस्येहलोकसम्बन्धिदोषमाह–धम्मा...इति-कुशीलास्तत्सङ्गोचिता लोका, एनमुन्निष्क्रान्तं हीलयन्ति 'पतितस्त्वमिति, पङ्क्तितोऽपसारणादिना कदर्थयन्ति, किम्भूतमेनं ? धर्मात् साधुधर्माद् भ्रष्टं च्युतं, पुनः किम्भूतमेनं ? श्रिया अपेतं लक्ष्म्या वर्जितं, कमिव हीलयन्ति ? यज्ञाग्निमग्निष्टोमाद्यनलं, विध्यातमिव यागप्रान्ते, अल्पतेजसम्, अल्पशब्दस्याभाववाचित्वात्, तेजःशून्यं भस्मसदृशमित्यर्थः, किम्भूतमेनं? दुर्विहितम्, उन्निष्क्रमणादेव दुष्टानुष्ठायिनं, पुनः कमिव हीलयन्ति ? उद्धतदंष्ट्रमुत्खात-दाढं घोरविषमिव रौद्रविषमिव नागं सर्पम्. ।।चू.१.१२।।

**(सु.)** पर्यायच्युतस्यैहिकं दोषमाह–धम्माउ इति, धर्म्मात् श्रमणधर्माद् भ्रष्टं-च्युतं, श्रियोऽपेतं-तपोलक्ष्म्या अपगतं, यज्ञाग्निमग्निष्टोमाद्यनलं विध्यातमिव यागावसानेऽल्पतेजसं, अल्पशब्दोऽभावे, तेजःशून्यं भस्मकल्पमित्यर्थः, हीलयन्ति-कदर्थयन्ति 'पतितस्त्वम्' इति पङ्क्त्यपसारणादिना, एनं-उन्निष्क्रान्तं दुर्विहित-मुन्निष्क्रमणादेव दुष्टानुष्ठायिनं कुशीलाः, तत्संयोगो(सङ्गो)चिता लोकाः, स एव विशेष्यते-दाढुड्ढिअं' इति, प्राकृतशैल्यादुद्धृतदंष्ट्रं-उत्खातदंष्ट्रं, घोरविषमिव-रौद्रविषमिव, नागं-सर्प्पं, यज्ञाग्नि-सर्प्पोपमानं लोकनीत्या प्रधानभावादप्रधानभाव-ख्यापनार्थमिति ।।चू.१.१२।।

१. सुमति० वृत्तिग्रंथे 'दाढुड्ढिअं' पाठो मूलत्वेन, विवृत्त श्च तथैव । चूर्णौ 'दाढुद्धितं' पाठः ।

**इहेव धम्मो अयसो अकित्ती, दुन्नामधेयं च पिहुज्जणम्मि ।**
**चुयस्स धम्माउ अहम्मसेविणो, संभिन्नवित्तस्स य हिट्ठओ गई ।।चू.१.१३।।**

**(ति.)** इदानीमुत्प्रव्रजितस्य ऐहिकामुष्मिकापायमाह —इहैव-इहलोके एव । अधर्मोऽयं-पापात्मा । अयशः-असाधुवादः । अकीर्तिः-निन्दनीयता । दुर्नामधेयं च-अग्राह्यनामता पृथग्जने-सामान्यलोकेऽपि, आस्तां विशिष्ट-लोके । च्युतस्य धर्मात्-उत्प्रव्रजितस्य । अधर्मसेविनः-कलत्रादिनिमित्तं षट्कायोपमर्दकारिणः । सम्भिन्नवृत्तस्य-खण्डितचारित्रस्य । अधस्ताद् गतिः-नरकेषूपपादः ।।चू.१.१३।।

**(स.)** एवमस्य भ्रष्टशीलस्य सामान्यत इहलोकसम्बन्धिनं दोषं कथयित्वेहलोक-परलोकसंम्बधिनं दोषमाह—इहेव'इति-धर्माच्च्युतस्य धर्मादुत्प्रव्रजितस्यैतानि भवन्ति. कानि ?-इत्याह-इह लोक एवाधर्मो भवति. अयमधर्म इति, पुनरयशोऽपराक्रमेण कृतं न्यूनत्वं भवति, तथाऽकीर्तिरदानपुण्यफलप्रवादरूपा, तथा दुर्नामधेयं च कुत्सितनामधेयं भवति, क्व ?-इत्याह-पृथग्जने सामान्यलोकेऽपि. आस्तां विशिष्टलोके, किंविशिष्टस्य? धर्माच्च्युतस्य अधर्मसेविनः कलत्रादीनां निमित्तं षड्जीवनिकायस्योपमर्दकारिणः, पुनः किंविशिष्टस्य ? सम्भिन्नवृत्तस्य खण्डितचारित्रस्य, क्लिष्टकर्मबन्धादधस्ताद्गति-र्नरकेषूपपातो भवति. ।।चू.१.१३।।

**(सु.)** एवं भ्रष्टशीलस्यौघत ऐहिकं दोषमभिधायैहिकामुष्मिकमाह—इहेव...इति, इहैव-इहलोक एवाधर्म्म इति, अयमधर्म्मः फलेन दर्शयति-यदुतायशः-अपराक्रमकृतं न्यूनत्वं, तथाऽकीर्त्तिरदान-पुण्यफलप्रवादरूपा, तथा दुर्नामधेयं च-पुराणः पतित इति कुत्सितनामधेयं च भवति, क्व ?-इत्याह-पृथग्जने-सामान्यलोकेऽपि, आस्तां विशिष्टलोके, कस्य ?-इत्याह-च्युतस्य-धर्मादुत्प्रव्रजितस्येतिभावः, तथाऽधर्मसेविनः-कलत्रादिनिमित्तं षट्कायोपमर्दकारिणः, तथा संभिन्नवृत्तस्य चाखण्डनीयखण्डित-चारित्रस्य च क्लिष्टकर्मबन्धाद् अधस्ताद्गतिः-नरकेषु अवपात (षूपपात) इति ।।चू.१.१३।।

**भुंजित्तु भोगाइं पसज्झ चेयसा, तहाविहं कट्टु असंजमं बहुं ।**
**गइं च गच्छे अणभिज्झियं दुहं, बोही य से नो सुलहा पुणो पुणो ।।चू.१.१४।।**

**(ति.)** अस्यैव विशेषापायमाह—स-उत्प्रव्रजितः । भुक्त्वा भोगान्-शब्दादीन् ।

प्रसह्य-बलात् । चेतसा-उपलक्षणत्वात् वाचा कायेन च । तथाविधं असंयमम्-कृष्याद्यारम्भम्, असंतोषाद् बहुं कृत्वा गतिं च गच्छति । अनभिध्याताम्-अनिष्टाम् । दुःखाम्-दुःखजननीम् । बोधिश्च-जिनधर्मावाप्तिः । तस्य-निःक्रान्तस्य । न पुनः सुलभा-प्रभूतेष्वपि जन्मसु दुर्लभैव, प्रवचनविराधकत्वात् ।।चू.१.१४।।

**(स.)** अथास्यैवोत्प्रव्रजितस्य विशेषतः कष्टमाह—भुञ्जितु'इति-स उत्प्रव्रजित एवंविधां गतिं गच्छति, किं कृत्वा ? भोगान् भुक्त्वा, केन ? प्रसह्य चेतसा धर्मनिरपेक्षतया प्रकटेन चित्तेन, पुनः किं कृत्वा ? तथाविधमज्ञानोचितफलं, बहुमसन्तोषात् प्रभूतमसंयमं कृष्याद्यारम्भरूपं कृत्वा. किम्भूतां गतिम् ? अनभिध्यातामनिष्टां, पुनर्दुःखां प्रकृत्यैवासुन्दरां, दुःखजननीं पुनरस्योत्प्रव्रजितस्य बोधिर्जिनधर्मप्राप्तिर्न सुलभा भवेत्. पुनः पुनः प्रभूतेष्वपि जन्मसु दुर्लभा एव स्यात्. कथं ? प्रवचनविराधकत्वात्. ।।चू.१.१४।।

**(सु.)** अस्यैव विशेषाऽपायमाह—भुंजित्तु इति, स-उत्प्रव्रजितो, भुक्त्वा भोगान्-शब्दादीन्, प्रसह्य चेतसा-धर्म्मनिरपेक्षतया, प्रकटेन चित्तेन तथाविधं अज्ञोचितफलं कृत्वाऽभिनिर्व्वर्त्या-ऽसंयमं कृष्याद्यारम्भरूपं बहुं-असन्तोषात् प्रभूतं स इत्थंभूतो मृतः सन् गतिं च गच्छत्यनभिध्यातां-अभिध्याता-इष्टा न तामनिष्टामित्यर्थः, काचित् सुखाऽप्येवंभूता भवति, अत आह-दुःखां-प्रकृत्यैवासुन्दरां दुःखजननीं, बोधिश्चास्य जिनधर्मप्राप्तिश्चास्योन्निष्क्रान्तस्य न सुलभा पुनः पुनः-प्रभूतेष्वपि जन्मसु दुर्ल्लभैव, प्रवचनविराधकत्वादिति ।।चू.१.१४।।

**इमस्स ता नेरइयस्स जंतुणो, दुहोवणीयस्स किलेसवत्तिणो ।**
**पलिओवमं झिज्झइ[1] सागरोवमं, किमंग ! पुण मज्झ इमं मणोदुहं ।।चू.१.१५।।**

**(ति.)** कश्चिदुत्पन्नदुःखोऽप्येतदनुचिन्त्य नोत्प्रव्रजेदित्याह—अस्य तावन्ममैव जन्तोः नैरयिकस्य दुःखोपनीतस्य-दुःखहेतुभिः कर्मभिरुपनीतस्य नैरयिकत्वं प्रापितस्य क्लेशवर्तननरकस्थस्यैव पल्योपमं क्षीयते । सागरोपमं च कर्मानुमानेन । किमङ्ग ! पुनर्ममेदम्-संयमारतिनिःपन्नम् । मनोदुःखम्-अल्पकालिकत्वात् । क्षिप्रं क्षेप्यतीति मत्वा नोत्प्रव्रजति ।।चू.१.१५।।

**(स.)** यस्मादेवं, तस्मादुत्पन्नदुःखोऽप्येतदनुचिन्त्य नोत्प्रव्रजेत्, इत्याह-इमस्स...इति-

१. छिज्जइ'इति मुद्रितमन्यत्र ।

एतच्चिन्तनेन साधुना नोत्प्रव्रजितव्यम्, एतत् किमित्याह-अस्य तावदित्यात्मनिर्देशे, आत्मनो नारकस्य जन्तोर्नरकप्राप्तस्य पल्योपमं सागरोपमं च क्षीयते, यथा-कर्मप्रत्ययं पूर्णं भवति. किमङ्ग पुनर्ममेदं संयमारतिनिष्पन्नं मनोदुःखं तथाविधप्रबलक्लेश-वृत्तिरहितमेतत् क्षीयत एव, किम्भूतस्यास्य जन्तोः ? दुःखोपनीतस्य सामीप्येन प्राप्तदुःख-क्लेशवृत्तेरेकान्तक्लेशचेष्टितस्य. ।।चू.१.१५।।

**(सु.)** यस्मादेवं, तस्मादुत्पन्नदुःखोपि, एतदनुचिन्त्य नोत्प्रव्रजेत् इत्याह-- इमस्स...इति, अस्य तावदित्यात्मनिर्देशे, नारकस्य जन्तोः नरकमनुप्राप्तस्येत्यर्थः, दुःखोपनीतस्य-सामीप्येन प्राप्तदुःखस्य, क्लेशवृत्तेरेकान्तक्लेशचेष्टितस्य सतो, नरक एव पल्योपमं क्षीयते सागरोपमं च यथाकर्म्मप्रत्ययं, किमङ्ग पुनर्ममेदं संयमारतिनिष्पन्नं मनोदुःखं तथाविधक्लेशधृति(दोष)रहितं ?, एतत् क्षीयत एव, एतच्चिन्तनेन नोत्प्रव्रजितव्यमिति ।।चू.१.१५।।

**न मे चिरं दुक्खमिणं, भविस्सइ, असासया भोगपिवास जंतुणो ।**
**न चे सरीरेण इमेण वेसंई[1], अविस्सई जीवियपज्जवेण मे ।।चू.१.१६।।**

**(ति.)** विशेषेणैतदेवाह-न मम चिरम्-प्रभृतकालम् । दुःखमिदम्-संयमारतिलक्षणं भविष्यति । अशाश्वता-प्रायो यौवनकालभाविनी । भोगपिपासा जन्तोर्भोगतृष्णाया । अशाश्वतत्त्वे कारणान्तरमप्येतत् । न चेत् शरीरेणानेन-वृद्धेनापि सता । अपैष्यति । यदि न यास्यति तथापि हे जीव ! किमाकुलस्त्वम् । अपैष्यति जीवितपर्यायेण मम-जीवनव्यपगमेन निश्चितं यास्यत्येव-नोत्प्रव्रजति ।।चू.१.१६।।

**(स.)** विशेषेणैतदेवाह—न'इति मे मम चिरं प्रभृतकालमिदं दुःखं संयमविषये-ऽरतिलक्षणं न भविष्यति, किमितीत्याह-प्रायो यौवनकालावस्थायिनी भोगपिपासा विषयतृष्णा जन्तोः प्राणिनोऽशाश्वती, अशाश्वतीत्व एव कारणान्तरमाह-न चेच्छरीरेणानेन विषयतृष्णा **अपयास्यति,** यदि शरीरेणानेन कारणभूतेन वृद्धस्यापि सतो विषयेच्छा **नापयास्यति,** तथापि किमाकुलत्वं? यतोऽपयास्यति जीवितस्यापगमेन मरणेनेत्येवं निश्चितं स्यात्. ।।चू.१.१६।।

**(सु.)** विशेषेणैतदेवाह—न मे...इति, न मम चिरं-प्रभूतकालं दुःखमिदं-संयमारतिलक्षणं

१. टीकान्तरे 'अविस्सइ' पाठो मूलत्वेन गृहीतः, विवृतश्च 'अपयास्यति' इति । चूर्णौ 'वियस्सती' पाठः, 'विगच्छिहिति' चूर्णितम्.

भविष्यति, किमित्याह-अशाश्वती-प्रायो यौवनकालावस्थायिनी भोगपिपासा-विषयतृष्णा, जन्तोः-प्राणिनः, अशाश्वतीत्व एव कारणान्तरमाह-न चेच्छरीरेणानेनापयास्यति-न यदि शरीरेणानेन करणभूतेन वृद्धस्यापि सतोऽपयास्यति, तथापि किमाकुलत्वं ?, यतोऽपयास्यति जीवितपर्ययेण-जीवितस्य व्यपगमेन-मरणेनैवं निश्चितः स्यादिति ।।चू.१.१६।।

**जस्सेव अप्पा, ओ हविज्ज निच्छिओ, चइज्ज देहं न हु धम्मसासणं ।**
**तं तारिसं नो पयलंति इंदिया, उप्पायवाया व सुदंसणं गिरिं ।।चू.१.१७।।**

**(ति.)** अस्यैव फलमाह—यस्य-साधोः । एवम्-उक्तप्रकारेण । आत्मा तुरेवार्थे, आत्मैव । निश्चितः-दृढः, क्वचिद् विघ्ने परकृते इन्द्रियकृते वा उपस्थिते । त्यजेद् देहं, न तु धर्मशासनम्-धर्माज्ञाम् । तं तादृशम्-निश्चितम् । न प्रचलयन्ति । संयमाद् इन्द्रियाणि । उत्पातवाता इव सुदर्शनं गिरिम्-मेरुपर्वतं स्थानात् ।।चू.१.१७।।

**(स.)** अथास्यैव साधोः फलमाह-जस्स...इति-इन्द्रियाणि चक्षुरादीनि, तं पूर्वोक्तं तादृशं, धर्मे निश्चितं साधुं, संयमस्थानान्न प्रचालयन्ति न प्रकम्पयन्ति, दृष्टान्तमाह-के कमिव ? यथोत्पातवाताः सुदर्शनं गिरिं मेरुपर्वतं न कम्पयन्ति, तं साधुं कं ? यस्य साधोरेवमुक्तप्रकारेणात्मैव निश्चितो दृढः स क्वचिद् विघ्न उत्पन्ने देहं त्यजेत्, परं न तु शासनं न पुनर्धर्माज्ञाम्. ।।चू.१.१७।।

**(सु.)** अस्यैव फलमाह—जस्सेव...इति, यस्येति-साधोरेवमुक्तेन प्रकारेणात्मा, तु-तुशब्दस्यैवकारार्थत्वादात्मैव भवेन्निश्चितो दृढः यः, स त्यजेद् देहं क्वचिद् विघ्न उपस्थिते, न तु धर्मशासनं-न पुनर्धर्माज्ञामिति, तं च तादृशं धर्म्मे निश्चितं न प्रचालयन्ति-संयमस्थानान्न प्रकम्पयन्ति इन्द्रियाणि-चक्षुरादीनि । निदर्शनमाह-उपपातवाता इव-संपतत्पवना इव सुदर्शनं गिरिं-मेरुं, एतदुक्तं भवति-यथा मेरुं वाता न चालयन्ति, तथा तमपीन्द्रियाणीति ।।चू.१.१७।।

**इच्चेव संपस्सिय बुद्धिमं नरो, आयं उवायं विविहं वियाणिया ।**
**काएण वाया अदु माणसेणं, तिगुत्तिगुत्तो जिणवयणमहिट्ठिज्जासि ।।चू.१.१८।।**

**त्ति बेमि**

**(ति.)** उपसंहरन्नाह-इत्येवम्-अध्ययनोक्तं दुःप्रजीवित्वादि सम्यग् दृष्ट्वा बुद्धिमान् नरः । आयम्-उत्प्रव्रजननिषेधलाभम् । अस्यैव उपायम्-कारणभूतं श्रीस्थूलभद्रादि-चरितचिन्तनं श्रुताभ्यासादिकं विविधं विज्ञाय । कायेन वाचा अथ मानसेन । अनेन त्रयेण त्रिगुप्तिगुप्तो जिनवचनमधितिष्ठेत् । इति ब्रवीमि इतिपूर्ववत् ।।चू.१.१८।।

**श्रीतिलकाचार्यवृत्तौ प्रथमचूलिका समाप्ता ।।**

**(स.)** अथोपसंहारमाह-इच्चेव...इति-बुद्धिमान् नरः सम्यग्बुद्ध्या सहितो मानवः कायेन वाचा वचनेनाथ मनसा त्रिभिरपि करणैर्यथाप्रवृत्तैस्त्रिगुप्तिभिर्गुप्तः सन् जिनवचनं तीर्थकरस्योपदेशमधितिष्ठेत्, यथाशक्ति तदुक्तैकक्रियापालने तत्परो भूयात्, भावायसिद्धौ तत्त्वतो मुक्तिसिद्धेः, किं कृत्वा ? इत्येवमध्ययने कथितं दुष्प्रजीवित्वादि सम्प्रेक्ष्यादित आरभ्य यथावद् दृष्ट्वा, पुनः किं कृत्वा ? आयं सम्यग्ज्ञानादेर्लाभमुपायं च ज्ञानादिसाधन-प्रकारं विविधमनेकप्रकारं ज्ञात्वा, ब्रवीमीति पूर्ववत्. ।।चू.१.१८।।

**इति श्रीदशवैकालिकशब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्यायविरचितायां प्रथमचूलिका समाप्ता. १. श्रीरस्तु.**

**(सु.)** उपसंहरन्नाह-इच्चेव...इति, इत्येवमध्ययनोक्तं दुष्प्रयोगजीवित्वादि संप्रेक्ष्याऽऽदित आरभ्य, यथा यद्दृष्ट्वा बुद्धिमान् नरः सम्यग् बुद्ध्युपेत आयमुपायं विविधं विज्ञाय, आयः-सम्यग्ज्ञानादेरुपायः तत्साधनप्रकारः कालविनयादिः, विधोऽनेकप्रकारः, तं ज्ञात्वा, किम् ?-इत्याह-कायेन वाचाऽथवा मनसा-त्रिभिरपि करणैर्यथाप्रवृत्तैः, त्रिगुप्तिगुप्तः सन् जिनवचनमर्हदुपदेशमधितिष्ठेत् यथाशक्त्या तदुक्तैकक्रियापालनपरो भूयाद् भावायसिद्धौ तत्त्वतो मुक्तिसिद्धेः ।।चू.१.१८।। ब्रवीमीति पूर्ववत् ।।

**सुमति०वृत्तौ समाप्तं रतिवाक्याध्ययनमिति चूला १ ।।**

## ।। अथ द्वितीया चूलिका विविक्तचर्या ।।

**चूलियं तु पवक्खामि, सुयं केवलिभासियं ।**
**जं सुणित्तु सपुन्नाणं, धम्मे उप्पज्जई मई ।।चू.२.१।।**

**(ति.)** अधुना द्वितीया व्याख्यायते । इदमादिसूत्रं, तस्याः । चूलिकां तु प्रवक्ष्यामि। श्रुतं केवलिभाषितम्-केवलिना श्रीसीमन्धरस्वामिना श्रीमुखेन भाषितम् । यत् श्रुत्वा सपुण्यानाम्-प्राणिनाम् । धर्मे उत्पद्यते मतिः । [1]इयं गाथा अन्यकर्तृकीव लक्ष्यते ।।चू.२.१।।

**(स.)** चूलिअं' इति, व्याख्याता प्रथम चूलिका, अथ द्वितीयाऽऽरभ्यते-पूर्वचूलिकायां सीदतः साधोः स्थिरीकरणमुक्तम्, इह त्ववसरप्राप्ता 'विविक्ता चर्या' उच्यत इत्ययं सम्बन्धः, अहं चूलिकां प्रवक्ष्यामि, तुशब्दविशेषितां भावचूडां, प्रकर्षेणावसरप्राप्ताभिधान-लक्षणेन कथयिष्यामि, किम्भूतां चूलिकां ? श्रुतं श्रुतज्ञानं, चूडा हि श्रुतज्ञानं वर्त्तते, कारणे कार्यस्योपचारात्, एतच्च केवलिना भाषितम्, अनन्तर एव केवलिना प्ररूपितमिति विशेषणं सफलम् ।

यत एवं वृद्धवादः श्रूयते, कयाचिदार्ययाऽसहिष्णुः कूरगडुकप्रायः साधुश्चातुर्मास-कादावुपवासं कारितः, स तदाराधनया मृतः, मृते च तस्मिन् साध्व्या ज्ञातम्, अहमृषि-घातिका जाता, तत उद्विग्ना सती तीर्थकरं पृच्छामीति जातबुद्धिः, ततस्तस्या गुणावर्जितया देवतया साध्वी सीमन्धरस्वामिसमीपे मुक्ता, तया च भगवाना-लोचनामाश्रित्य पृष्टः, भगवानाह-त्वं तु न दुष्टचित्ता, ततोऽघातिका, ततो भगवता चूलाद्वयं तस्यै दत्तं, देवतया च ततः स्वस्थानमानीता साध्वी, अत इदमेव विशेष्यते, तत् श्रुत्वाकर्ण्य सपुण्यानां कुशलानुबन्धि पुण्ययुक्तानां प्राणिनामचिन्त्य-चिन्तामणिकल्पे धर्मे चारित्रधर्मे मतिरुत्पद्यते-भावतः श्रद्धा जायते, अनेन चारित्रं चारित्रबीजं चोपजायत इति, एतदुक्तं भवति. एतद्धिप्रतिज्ञासूत्रम् ।।चू.२.१।।

**(सु.)** व्याख्यातं प्रथमचूडाध्ययनम्, अधुना द्वितीयमारभ्यते, अस्यौघतः सम्बन्धः प्रतिपादित एव, विशेषतस्त्वनन्तराध्ययने सीदतः स्थिरीकरणमुक्तं, इह तु विविक्तचर्योच्यत इत्ययमभिसम्बन्धः- चूलियं'इति, चूडां-प्राग् व्यावर्णितशब्दार्थां, तुशब्दविशेषितां भावचूडां,

---

१. चूर्णौ गाथेयं विद्यते. विवृता च विस्तरतः,

प्रवक्ष्यामीति-प्रकर्षेणावसरप्राप्ताभिधानलक्षणेन कथयामि, श्रुतं केवलिभाषितमिति, इयं हि चूडा श्रुतं-श्रुतज्ञानं वर्त्तते, कारणे कार्योपचाराद्, एतच्च केवलिभाषितं-अनन्तरमेव केवलिना प्ररूपितमिति सफलं विशेषणं, एवं च वृद्धवादः-

"कयाचिदार्ययाऽसहिष्णुः कूरगडुकप्रायः संयतश्चातुर्मासिकादौ उपवासं कारितः, स तदाराधनया मृत एव, ऋषिघातिकाऽहमित्युद्विग्नाऽसौ, 'तीर्थकरं पृच्छामि' इति गुणावर्जितदेवतया नीता श्रीसीमन्धरस्वामिपादान्तिके, परिपृष्टो भगवान्, अदुष्टचित्ता-ऽघातिकेत्यभिधाय भगवतेमां चूडां ग्राहितेति,"

इदमेव विशेष्यते-यां श्रुत्वा-आकर्ण्य सपुण्यानां-कुशलानुबन्धिपुण्ययुक्तानां प्राणिनां, धर्मे-अचिन्त्यचिन्तामणिकल्पे चारित्रधर्म्मे, उत्पद्यते मतिः—संजायते भावतः श्रद्धा, अनेन चारित्रं चारित्रबीजं चोपजायत इत्येतदुक्तं भवति, एतद्धि प्रतिज्ञासूत्रं।।चू.२.१।।

**अणुसोयपट्ठिए बहुजणम्मि, पडिसोयलद्धलक्खेण ।**
**पडिसोयमेव अप्पा, दायव्वो होउकामेणं ।।चू.२.२।।**

**(ति.)** इह चर्यागुणा वाच्याः । तत्प्रवृत्तौ मूलसूत्रमिदमाह—अनुश्रोतःप्रस्थिते-नदीपूरप्रवाहपतितकाष्ठवत् । विषयरसप्रवाहवाहिते बहौ जने तथा प्रस्थानेन भवोदधिगामिनि विषयविरक्तिरूपः प्रतिश्रोतो लब्धसंयमलक्षेण । प्रतिश्रोत एव-विषयाद्य-पाकृत्य संयमलक्ष्याभिमुख एव । आत्मा दातव्यः-प्रवर्त्तितव्यो भवोदधिपरित्यागात् । मुक्ततया भवितुकामेन-साधुना न क्षुद्रचरितान्युदाहरणीकृत्यासन्मार्गप्रवणं चेतः कार्यम्। उक्तं च -

निमित्तमासाद्य, यदेव किञ्चन, स्वधर्ममार्गं, विसृजन्ति बालिशाः ।
तपःश्रुतज्ञानधनाः हि साधवो, न यान्ति कृच्छ्रे, परमेऽपि विक्रियाम् ।।१।।
[वंशस्थविलम्]

तथा -

कपालमादाय, विपन्नवाससा, वरं द्विषद्वेश्मसमृद्धिरीक्षिता ।
विहाय लज्जां न तु धर्मवैशसे, सुरेन्द्रतार्थेऽपि समाहितं मनः ।।२।। [वंशस्थविलम्]

समाधानं प्रापितं चेतः

पापं समाचरति वीतघृणो जघन्यः, प्राप्यापदं सघृण एव विमध्यबुद्धिः ।

प्राणात्ययेऽपि न तु साधुजनस्ववृत्तं, वेलां समुद्र इव लङ्घयितुं समर्थः ।।३।।

[वसन्ततिलका]

**(स.)** इह चाध्ययने चर्यागुणा अभिधेयाः, तस्य प्रवृत्तौ मूलपाद-भूतमिदमाह- अणु...इति-एवंविधेन साधुना, आत्मा जीवः प्रतिस्रोत एव दुरपाकरणीयमप्यपाकृत्य विषयादिसंयमलक्ष्याभिमुखमेव दातव्यः प्रवर्तितव्यः, न क्षुद्रचरितान्युदाहरणी-कृत्यासन्मार्गप्रवणं चेतोऽपि कर्तव्यम्, अपि त्वागमैकप्रवणेनैव भवितव्यं, किम्भूतेन साधुना ? भवितुकामेन संसारसमुद्रपरिहारेण मुक्ततया भवितुकामेन, पुनः किम्भूतेन साधुना ? प्रतिस्रोतोलब्धलक्षेण द्रव्यतस्तस्यामेव नद्यां कथंचिद् देवतासान्निध्यात् प्रतीपस्रोतः प्राप्तलक्षेण, भावतस्तु विषयादिवैपरीत्यात् कथञ्चित् प्राप्तसंयमलक्षेण, क्व सति ? बहुजने तथाविधादभ्यासात् प्रभूतलोकेऽनुस्रोतःप्रस्थिते सति नदीपूर-प्रवाहपतितकाष्ठवत्, विषयकुमार्गद्रव्य-क्रियानुकूल्येन प्रवृत्ते सति तथाप्रस्थानेनो-दधिगामिनि सति.।।चू.२.२.।।

**(सु.)** इह चाध्ययने चर्यागुणा अभिधेयाः, तत् प्रवृत्तौ मूलपादभूतमिदमाह— अणुसोए' इति अनुश्रोतःप्रस्थिते-नदीपूरप्रवाहपतितकाष्ठवद् विषयकुमार्ग-द्रव्यक्रियानु-कूल्येन प्रवृत्ते बहुजने तथाविधाभ्यासात् प्रभूतलोके, तथाप्रस्थानेनोदधिगामिनि, किम्?-इत्याह-प्रतिश्रोतोलब्धलक्ष्येण-द्रव्यतस्तस्यामेव नद्यां कथञ्चिद् देवतानियोगात् प्रतीपश्रोतःप्राप्तलक्ष्येण, भावतस्तु विषयादिवैपरीत्यात् कथञ्चिदवाप्तसंयमलक्ष्येण, प्रतिश्रोत एव दुरपाकरणीयमप्यपाकृत्य विषयादि, संयमलक्ष्याभिमुखमेवात्मा-जीवो दातव्यः-प्रवर्त्तयितव्यो, भवितुकामेन-संसारसमुद्रपरिहारेण मुक्ततया भवितुकामेन साधुना, न क्षुद्रजनाचरितान्युदाहरणीकृत्या-ऽसन्मार्गप्रवणं चेतोऽपि कर्तव्यम् अपित्वागमैकप्रवणेनैव भवितव्यमिति, उक्तं च-

"निमित्तमासाद्य यदेव किञ्चन, स्वधर्ममार्गं विसृजन्ति बालिशाः।

तपःश्रुतज्ञानधनास्तु साधवो, न यान्ति कृच्छ्रे परमेऽपि विक्रियाम् ।।१।।

तथा-कपालमादाय विपन्नवाससा, वरं द्विषद्वेश्मसमृद्धिरीक्षिता ।

विहाय लज्जां न तु धर्म्मवैशसे, सुरेन्द्रसार्थेऽपि समाहितं मनः ।।२।।

तथा-

पापं समाचरति वीतघृणो जघन्यः, प्राप्यापदं सघृण एव विमध्यबुद्धिः।

प्राणात्ययेऽपि न तु साधुजनः स्ववृत्तं, वेलां समुद्र इव लङ्घयितुं समर्थः ।।३।।" इत्यलं प्रसंगेनेति ।।चू.२.२।।

**अणुसोयसुहो लोओ, पडिसोओ [1]आसवो सुविहियाणं ।**
**अणुसोओ संसारो, पडिसोओ तस्स उत्तारो ।।चू.२.२।।**

**(ति.)** अधिकृतमेव समर्थन्नाह—निम्नाभिसर्पणवद् विषयेषु प्रवर्तनम् अनुश्रोतः । तत्सुखो लोकः । प्रतिश्रोतः । तद्विपरीतः, **आश्रवः**-प्राणातिपातविरत्यादिप्रतिज्ञारूपः। सुविहितानाम्-साधूनाम् । इहाश्रवशब्देन प्रतिज्ञाऽभिधीयते । तथा चाभिधानचिन्तामणिः-

संवित् सन्धाऽऽस्थाऽभ्युपायः, संप्रत्याङ्भ्यः परश्रवः ।

अङ्गीकारोऽभ्युपगमः, प्रतिज्ञाऽऽगूश्च सङ्गरः ।।२७८।।

अनुश्रोतः-शब्दादिविषयानुकूल्यं, संसारकारणत्वात् संसारः । यथा-विषं मृत्युः, दधि-त्रपुषी प्रत्यक्षो ज्वरः । प्रतिश्रोतः उक्तरूपः । तस्मात् संसारादुत्तारहेतुत्वाद् उत्तारः । यथा-तन्दुलान् वर्षति पर्जन्य इति ।।चू.२.२.।।

**(स.)** अधिकृतमेव स्पष्टयन्नाह-अणुसोअ...इति-अनुस्रोतःसुखो लोक उदकनिम्नाभिसर्पणवत्, कथं ? यतो लोकः प्रवृत्त्यानुकूलविषयादिसुखो गुरुकर्मत्वात्, अथ प्रतिस्रोत एतस्माद् विपरीतः, **आश्रव** इन्द्रियजयादिरूपः परमार्थपेशलः काय-वाङ्-मनोव्यापारः **आश्रमो** वा व्रतग्रहणादिरूपः, सुविहितानां साधूनां, अथोभयफलमाह-अनुस्रोतः संसारः शब्दादिविषयानुकूल्यं संसार एव, कारणे कार्योपचारात्, यथा विषं मृत्युः, दधि-त्रपुसी प्रत्यक्षो ज्वरः, प्रतिस्रोत उक्तलक्षणः, तस्येति पञ्चम्यर्थे षष्ठी, सुपां सुपो भवन्ति' इति वचनात्, तस्मात् संसारादुत्तारः, उत्तरणमुत्तारः, हेतौ फलोपचारात्, यथायुर्घृतं, तन्दुलान् वर्षति पर्जन्यः ।।चू.२.३।।

**(सु.)** अधिकृतं स्पष्टयन्नाह—अणुसोय...इति, अनुश्रोतःसुखो लोकः उदक-निम्नाभिसर्प्पणवत् प्रवृत्त्याऽनुकूल-विषयादिसुखो लोकः, कर्मगुरुत्वात्, प्रतिश्रोत एव

१. 'आसमो.' इति चूर्णिपाठः, 'विसयविणियत्तणं... आसमो णाम तवोवणत्थाणं' - इति द्वौ अर्थौ विवृतौ ।

तस्माद् विपरीत, आश्रवः-इन्द्रिय-विजयादिरूपः परमार्थपेशलः काय-वाङ्-मनोव्यापारः, आश्रमो वा-व्रतग्रहणादिरूपः सुविहितानां-साधूनां, उभयलोके फलमाह-अनुश्रोतः संसारः शब्दादिविषयानुकूल्यं संसार एव, कारणे कार्योपचाराद्, यथा "विषं मृत्युः, दधि त्रपुषी प्रत्यक्षो ज्वरः," प्रतिश्रोत उक्तलक्षणः, तस्येति पञ्चम्यर्थे षष्ठी" सुपां सुपो भवन्ति' [ ] इति वचनात्, तस्मात् संसारादुत्तारः उत्तरणमुत्तारो, हेतौ फलोपचारात्, यथा-"आयुर्घृतं, तन्दुलान् वर्षति पर्जन्य" इति ।।चू.२.३।।

**तम्हा आयारपरक्कमेणं, संवरसमाहिबहुलेणं ।**
**चरिया गुणा य नियमा, हवंति साहूण दट्ठव्वा ।।चू.२.४।।**

**(ति.)** तस्मादाचारपराक्रमेण-आचारे ज्ञानाचारादौ, पराक्रमः प्रवृत्तिर्यस्य स तथा तेन। संवरे-आश्रवनिरोधे । समाधिः-एकाग्रता, अनाकुलत्वं वा । बहुलम्-प्रचुरं यस्य स तथा तेन । चर्या-अनियतवासादिका । गुणाः-मूलगुणोत्तरगुणाः । नियमाः-पिण्डशुद्ध्यादीनां स्वकुलासेवननियोगाः । भवन्ति । साहूण' इति तृतीयार्थे षष्ठी, साधुना द्रष्टव्याः । कोऽर्थः चर्यादयः ? सम्यगासेव्याः प्ररूपणीयाश्च ।।चू.२.४।।

**(स.)** तम्हा...इति-यस्मादेतदेवं पूर्वोक्तं तस्मात् साधुनैवंविधेनाप्रतिपाताय विशुद्धये च साधूनां चर्या भिक्षुभावसाधना बाह्याऽनियतवासादिरूपा, गुणाश्च मूलगुणोत्तरगुणाः, नियमाश्चोत्तरगुणादीनामेव पिण्डविशुद्ध्यादीनां स्वकालासेवननियोगा द्रष्टव्या भवन्ति, एते चर्यादयः साधूनां द्रष्टव्या भवन्ति, सम्यग्ज्ञानासेवनप्ररूपणारूपेण, किम्भूतेन साधुना ? आचारपराक्रमेण, आचारे ज्ञानादौ पराक्रमः प्रवृत्तिर्बलं यस्य स तेन, पुनः किम्भूतेन साधुना ? संवरसमाधिबहुलेन, संवर इन्द्रियादिविषये, समाधिरनाकुलत्वं बहुलं प्रभूतं यस्य स संवर-समाधिबहुलस्तेन. ।।चू.२.४।।

**(सु.)** तम्हा...इति, यस्मादेतदेवमनन्तरोदितं तस्मादाचारपराक्रमेणेत्याचारे-ज्ञानादौ पराक्रमः-प्रवृत्तिबलं यस्य स तथाविध इति, गमकत्वाद् बहुव्रीहिः, तेनैवंभूतेन साधुना संवरसमाधिबहुलेनेति-संवरे-इन्द्रियादिविषये समाधिः-अनाकुलत्वं बहुलं-प्रभूतं यस्य स तथाविध इति, समासः पूर्ववत्, तेनैवंविधेन सताऽप्रतिपाताय विशुद्धये च, किम्?-इतित्याह-चर्या-भिक्षुभावसाधनी बाह्याऽनियतवासादिरूपा गुणाश्च-मूलोत्तरगुणरूपाः, नियमाश्च-उत्तरगुणानामेव पिण्डविशुद्ध्यादीनां स्वकालासेवननियोगा भवन्ति, साधूनां

द्रष्टव्या इति, एते चर्यादयः साधूनां द्रष्टव्या भवन्ति, सम्यग्ज्ञानासेवन-प्ररूपणारूपेणेति ।।चू.२.४।।

**अनिएयवासो समुयाण चरिया, अन्नायउंछं पयरिक्कया[1] य ।**
**अप्पोवही कलहविवज्जणा य, विहारचरिया इसिणं पसत्था ।।चू.२.५।।**

**(ति.)** चर्यामाह-अनियतवासः-मासकल्पादिना । समुदानचर्या-अनेकत्र याचितभिक्षाचरणम्। अज्ञातोञ्छम्-प्राग्वद्, विशुद्धोपकरणविषयम् । **प्रविरिक्तता-** विजनैकान्तसेविता । अल्पोपधित्वम्-अनुल्बणस्तोकोपधिसेवित्वम् । कलहविवर्जना च । विहारचर्या-विहरणस्थितिः, विहरणमर्यादा । ऋषीणां प्रशस्ता-व्याक्षेपाभावात् ।।चू.२.५।।

**(स.)** अथ चर्यामाह-अनिएअ' इति-ऋषीणामेवम्भूता विहारचर्या विहरणस्थिति-र्विहारमर्यादा प्रशस्ता भवति. व्याक्षेपस्याभावात्, आज्ञापालनेन भावचारित्रपालनाच्च पवित्रा, एवम्भूता कथम् ?-इत्याह-अनियतवासो मासकल्पादिना, अनिकेतवासो वा अगृह उद्यानादौ वासः, तथा समुदानचर्याऽनेकत्रयाचितभिक्षाचरणं, तथाऽज्ञाते उञ्छं विशुद्धोपकरणग्रहणविषयं, **'पइरिक्कया य'** विजनैकान्तसेविता चाल्पोपधित्वमनुल्बण-युक्तस्तोकोपधिसेवित्वं, कलहविवर्जना च, तद्वासिजनभण्डनविवर्जनं श्रवणकथादिनापि वर्जनमित्यर्थः, विहारचर्या ऋषीणां प्रशस्ता इत्युक्तम्. ।।चू.२.५।।

**(सु.)** चर्यामाह—अनिएइति, अनियतवासो मासकल्पादिना अनिकेतवासो वा-अगृहे-उद्यानादौ वासः, तथा समुदानचर्या-अनेकत्रयाचितभिक्षाचरणं, अज्ञातोञ्छं-विशुद्धोपकरण-ग्रहणविषयं, **'पइरिक्कया य'**-विजनैकान्तसेविता च, अल्पोपधित्वं-अनुल्बणयुक्तस्तोकोपधिसेवित्वं, कलहविवर्जना च-तथा तद्वासिजनभण्डनविवर्जना, विवर्जनं विवर्जना श्रवणकथादिनापि वर्जनमित्यर्थः । विहारचर्या-विहरणस्थितिः, विहरणमर्यादा, इयमेवंभूता ऋषीणां-साधूनां, प्रशस्ता-व्याक्षेपाभावादाज्ञापालनेन भावचरणसाधनात् पवित्रेति ।।चू.२.५।।

**आइन्नोमाणविवज्जणा[2] य, ओसन्नदिट्ठाहडभत्तपाणे ।**
**संसट्ठकप्पेण चरिज्ज भिक्खू, तज्जायसंसट्ठ जई जइत्ता ।।चू.२.६।।**

१. 'वृत्त्यन्तरे' पइरिक्कया' मूलपाठः । २. आइन्नओमाण, इत्यन्यत्र मुद्रितम् ।

**(ति.)** चर्याविशेषोपदेशमाह—आकीर्णावमानवर्जना च-आकीर्णम्-राजकुल-सङ्खड्यादि, अवमानम्-दुर्भिक्षादि, आकीर्णे हस्तपादादिलूषणदोषात्, अवमाने अलाभा-ऽऽधाकर्मादिदोषात् । उत्सन्नं शब्दः प्रायोऽर्थे, प्रायो दृष्टं सन् आहृतं दृष्टाहृतं च तत् भक्तपानम्, इदं साधूनां प्रशस्तम्, अत्र प्रथमार्थे सप्तमी । संसृष्टकालेन-हस्तमात्रकादि-संसृष्टविधिना चरेद् भिक्षुः । अन्यथा पुरःकर्मादिदोषात् । तज्जातसंसृष्टे-आमगोरस-मधुम्रक्षणादिसंसृष्टे हस्तमात्रकदौ । यतिर्यतेत-यत्नं कुर्याद्, न गृह्णीयादित्यर्थः । संसर्जनादिदोषप्रसङ्गात् ।।

**(स.)** अथ तद्विशेषस्योपदर्शनायाह-आइन्न...इति-आकीर्णा-ऽवमानविवर्जना च विहारचर्या ऋषीणां प्रशस्तेति, आकीर्णञ्चाऽवमानविवर्जना च विहारचर्या ऋषीणां प्रशस्ता, तत्राकीर्णं राजकुल-सङ्खड्यादि, अवमानं स्वपक्ष-परपक्षप्राभृ(भू)त्यजं लोकाबहुमानादि, अस्य विवर्जनम्, आकीर्णे हस्त-पादादिलूषणदोषो भवेत्, अवमानेऽलाभा-ऽऽधाकर्मादिदोषो भवेत्, तथोत्सन्नदृष्टाहृतं प्राय उपलब्धमुपनीतम्, उत्सन्नशब्दः प्रायोवृत्तौ वर्तते, यथा 'देवा ओसन्नं सायं वेयणं वेयंति', किमेत् ?-इत्याह-भक्तपान-मोदना-ऽऽरनालादि, इदं चोत्सन्नदृष्टाहृतं यत्रोपयोगः शुद्ध्यति, त्रिगृहान्तरादारत इत्यर्थः, एवम्भूतमुत्सन्नदृष्टाहृतं भक्तपानमृषीणां प्रशस्तमिति योगः. तथा भिक्षुः साधुः संसृष्टकल्पेन हस्तमात्रकादिसंसृष्टविधिना चरेदित्युपदेशः, अन्यथा पुरःकर्मादिदोषः स्यात्, संसृष्टमेव विशिनष्टि, तज्जातसंसृष्ट इति, आमगोरसादिसमान-जातीयसंसृष्टे मात्रकादौ यतिर्येतत यत्नं कुर्यात्, अतज्जातसंसृष्टे सम्मार्जनादिदोषः स्यादित्यनेनाष्टभङ्गसूचनं, तद्यथा-'संसट्ठे हत्थे संसट्ठे मत्ते सावसेसे दव्वे.' अथ प्रथमो भङ्गः श्रेयान्, शेषाः स्वयं चिन्त्याः. ।।चू.२.६।।

**(सु.)** विहारचर्या ऋषीणां प्रशस्ता 'इत्युक्तं, तद्विशेषोपदर्शनायाऽऽह—आइण्ण...इति-आकीर्णमवमानविवर्ज्जना च विहारचर्या ऋषीणां प्रशस्तेति, तत्राकीर्णं-राजकुलसंखड्यादि, अवमानं-स्वपक्ष-परपक्षप्राभूत्यजं लोकाबहुमानादि, अस्य विवर्ज्जनं, आकीर्णे हस्तपादादिलूषणदोषाद्, अवमाने अलाभा-ऽऽधाकर्मादिदोषादिति, तथोत्सन्नदृष्टाहृतं—प्राय उपलब्धमुपनीतं, उत्सन्नशब्दः प्रायो वृत्तौ वर्त्तते, यथा "देवा उस्सन्नं सायं वेयणं वेयंति",[ ] किम् ?-इत्याह-भक्तपानं-ओदना-ऽऽरनालादि, इदं चोत्सन्नदृष्टाहृतं, यत्रोपयोगः शुद्ध्यति, त्रिगृहान्तरादारत इत्यर्थः, "भिक्खग्गाही एगत्थ-कुणइ, बीओ अ दोसु उवजोगमिति" [ ] वचनाद्, इत्येवम्भूतमुत्सन्नं

दृष्टाहृतं भक्तपानमृषीणां प्रशस्तमिति योगः, तथा संसृष्टकल्पेन-हस्तमात्रकादि-संसृष्टविधिना चरेद् भिक्षुरिति उपदेशः, अन्यथा पुरःकर्म्मादिदोषात्, संसृष्टमेव विशिनष्टि-तज्जातसंसृष्ट इत्यामगोरसादिसमान-जातीयसंसृष्टे हस्तमात्रकादौ यतिर्यतेत—यत्नं कुर्याद्, अतज्जातसंसृष्टे संसर्जनादि-दोषादिति, अनेनाष्टभङ्गसूचनं, तद्यथा-"संसट्ठे हत्थे संसट्ठे मत्ते सावसेसे दव्वे" [ ] इत्यादि, अत्र प्रथमो भङ्गः श्रेयान्, शेषाश्च चिन्त्या इत्यादि ।।चू.२.६।।

**अमज्जमंसासि अमच्छरीया, अभिक्खणं निव्विगयंगया य ।**
**अभिक्खणं काउसग्गकारी, सज्झाय-जोगे पयओ हविज्जा ।।चू.२.७।।**

**(ति.)** उपदेशाधिकार एवेदमाह—अमद्यपो, अमांसाशी ।

अत्राह परः-आरनाला-ऽरिष्ठानि, सन्धानानि, ओदनाद्यपि प्राण्यङ्गत्वान्मांसमिति त्याज्यम् । तदसत् । अमीषां मद्यमांसत्वायोगात् । लोक-शास्त्रयोरप्रसिद्धत्वात् सन्धानप्राण्यङ्ग-तुल्यता च नेह साध्वी । अतिप्रसङ्गदोषात् गोसम्भवत्वाद् दुग्धवद् गोमूत्रपानं, स्त्रीत्वतुल्यतया कलत्रवत् मातृगमनं प्रसङ्क्ष्यति । तत इत्यलं प्रसंगेनाक्षरगम-निकामात्रप्रक्रमात् ।

तथा च । अमच्छरी च-न [१]परसम्पद्द्वेषी च स्यात् । अभीक्ष्णम्-पुनः पुनःनिर्विकृति-काङ्गता-परिभोगोचिता अपि षड्विकृतयः पुष्टकारणाभावं विनान्तर्भोक्तव्याः । बहिरपि अभ्यङ्गो न कार्यः । अभीक्ष्णं कायोत्सर्गकारी-धर्मध्यानार्थम् । स्वाध्याये-पञ्चप्रकारे वाचनादौ, योगे-आचाम्लादौ । प्रयतो भवेत्-प्रयत्नं कुर्यात् । अन्यथोन्मादप्रसङ्गात् ।।चू.२.७।।

**(स.)** उपदेशाधिकार एवेदमाह-अमज्ज...इति-साधुरमद्य-मांसाशी भवेदित्युक्तिः, कोऽर्थ? अमद्यपोऽमांसाशी च स्यात्, एते च मद्य-मांसे लोका-ऽऽगमप्रसिद्धे एव, ततश्च यत् केचन कथयन्ति-आरनालादिष्वपि सन्धानदोषादोदनाद्यपि प्राण्यङ्गत्वात् त्याज्यमिति, तदसत्. अमीषां मांस-मद्यत्वस्यायोगात्, लोक-शास्त्रयोरप्रसिद्धत्वात्, सन्धानप्राण्यङ्गत्व-तुल्यत्वचोदनं त्वसाध्वतिप्रसङ्गदोषात्, द्रव्यत्व-स्त्रीत्वतुल्यतया मूत्र-पान-मातृगमनादि-प्रसङ्गादित्यलं प्रसङ्गेन, अक्षरगमनिका-मात्रप्रक्रमात्. पुनः

१. परस्परप्रद्वेषी २.६-१०, अयं मूलपाठः १० टिप्पण्यामपि ।।

साधुरमत्सरी च स्यात्, न परसम्पदा द्वेषी स्यात्, तथाभीक्ष्णं वारंवारं पुष्टकारणस्याभावे निर्विकृतिकश्च निर्गतविकृतिपरिभोगश्च भवेत्. अनेन परिभोगोचितविकृतीनामप्यकारणे प्रतिषेधमाह, तथाभीक्ष्णं वारंवारं गमनागमनादिषु विकृतिपरिभोगे वेत्यन्ये, किम् ?-इत्याह-कायोत्सर्गकारी भवेत्, ईर्यापथप्रतिक्रमणमकृत्वा न किञ्चिदन्यत् कुर्यात्, तदशुद्धतापत्तेरिति भावः. तथा स्वाध्याययोगे वाचनादीनामुपचारव्यापारे आचाम्लादौ प्रयतोऽतिशयेन यत्नवान् भवेत्, तथैव तस्य सफलत्वात्, विपर्यये तून्मादादिदोष-प्रसङ्गादिति.।।चू.२.७।।

**(सु.)** उपदेशाधिकार एवेदमाह—अमज्ज...इति, अमद्य-मांसाशी भवेदिति योगः, अमद्यपः अमांसाशी च स्यात् एते च मद्यमांसे लोकागमप्रतीते एव, ततश्च यत् केचनाभिदधति-आरनालादिष्वपि संधानाद् ओदनाद्यपि प्राण्यङ्गत्वात् त्याज्यमिति, तदसत्, अमीषां मद्यमांसत्वायोगात्, लोकशास्त्रयोरप्रसिद्धत्वात्, संधानप्राण्यङ्गत्व-तुल्यत्वचोदना त्वसाध्वी, अतिप्रसङ्ग-दोषात्, द्रवत्व-स्त्रीत्वतुल्यतया मूत्रपान-मातृगमनादिप्रसङ्गात् इत्यलं प्रसङ्गेन । अक्षरगमनिकामात्रप्रक्रमात्, तथा अमत्सरी च-न परसंपद्द्वेषी च स्यात्, तथा अभीक्ष्णं-पुनः पुनः पुष्टकारणाभावे निर्विकृतिकश्च-निर्गतविकृतिपरिभोगश्च भवेद्, अनेन परिभोगोचितविकृतीनामप्यकारणे प्रतिषेधमाह। तथाऽभीक्ष्णं गमनागमनादिषु, विकृतिपरिभोगेऽपि चान्ये । किम् ?-इत्याह-कायोत्सर्गकारी भवेद् ईर्यापथप्रतिक्रमणमकृत्वा न किञ्चिदन्यत् कुर्यात्, तदशुद्धतापत्तेरितिभावः । तथा स्वाध्याययोगे-वाचनाद्युपचारव्यापारे आचाम्लादौ प्रयतोऽतिशय-यत्नवान् भवेत् तथैव तस्य सफलत्वात्, विपर्यये उन्मादादिदोष-प्रसङ्गादिति ।।चू.२.७।।

**न पडिन्नविज्जा सयणासणाइं, सिज्जं निसिज्जं तह भत्तपाणं ।**
**गामे कुले वा नगरे व देसे, ममत्तभावं न कहिं पि कुज्जा ।।चू.२.८।।**

**(ति.)** किञ्च--न प्रतिज्ञापयेत्-मासकल्पसमाप्तौ गच्छन् । 'भूयोऽभ्यागतस्य ममैवैतानि दातव्यानि, नान्यस्य' इति प्रतिज्ञां गृहस्थं न कारयेत् । किम् ?-आश्रित्याह। शयनासने, शय्याम्-वसतिं, निषद्याम्-स्वाध्यायभूमिम् । तथा भक्तपानम्-खण्डखाद्य-द्राक्ष्यापानादि। एवं कृते ममत्वदोषात् । सर्वत्रैव ममत्वप्रतिषेधमाह । गामे कुले इत्यादि स्पष्टम् ।।चू.२.८।।

**(स.)** ण' इति-किञ्च साधुर्मासादिकल्पसमाप्तावन्यत्र गच्छन् सन्, इति गृहस्थं न प्रतिज्ञापयेन्न प्रतिज्ञां कारयेत्, इतीति किं ? पुनरागतस्य ममैतानि दातव्यानि, एतानि कानि ?-इत्याह-शयनं संस्तारकादि, आसनं पीठकादि, शय्या वसतिः, निषद्या स्वाध्यायादिभूमिः, तथा तेन प्रकारेण तत्कालेऽवस्थाया औचित्येन भक्तं खण्डखाद्यादि, पानं च द्राक्षादि न प्रतिज्ञापयेन्ममत्वदोषात्, अथ सर्वत्र ममतादोष-परिहारमाह-ग्रामे शालिग्रामादौ, कुले वा श्रावककुले, नगरेऽयोध्यादौ, देशे च मध्यदेशादौ ममेदमिति ममत्वभावं स्नेहमोहं न क्वचिदुपकरणादिष्वपि कुर्यात्, कुतो न स्नेहं कुर्यात् ? स्नेहमूलत्वाद् दुःखादीनामिति. ।।चू.२.८।।

**(सु.)** किञ्च न 'पडिण्णवेज्ज'...इति, न प्रतिज्ञापयेन्मासादिकल्पपरिसमाप्तौ गच्छन् भूयोऽप्यागतस्य मम एवैतानि दातव्यानि 'इति न प्रतिज्ञां कारयेद् गृहस्थं, किमाश्रित्येत्याह-शयनासने शय्यां निषद्यां तथा भक्तपानमिति, तत्र शयनं-संस्तारकादि, आसनं-पीठकादि, शय्या-वसतिः, निषद्या-स्वाध्यायादिभूमिः, तथा-तेन प्रकारेण तत्कालावस्थानोचितेन, भक्तपानं-खण्डखाद्यक-द्राक्षापानकादि न प्रतिज्ञापयेत्, ममत्वदोषात्, सर्वत्र एतन्निषेधमाह—ग्रामे-शालिग्रामादौ, कुले वा-श्रावककुलादौ, नगरे-साकेतादौ, देशे वा-मध्यदेशादौ ममत्वभावं ममेदमिति, स्नेहमोहं न क्वचिदुपकरणादिष्वपि कुर्यात् तन्मूलत्वाद् दुःखादीनामिति ।।चू.२.८।।

**गिहिणो वेयावडियं न कुज्जा, अभिवायण-वंदण-पूयणं वा ।**
**असंकिलिट्ठेहिं समं वसिज्जा, मुणी चरित्तस्स जओ न हाणी ।।चू.२.९।।**

**(ति.)** उपदेशाधिकार एवाह—गृहिणो वैयावृत्यम्-शयनासनार्पण-गृहरक्षण-कल्पस्थक-खेलनादिकं न कुर्यात्। गृहिणस्तस्य च दोषप्रसङ्गात् । अभिवादनम्-वाग्नमस्कारक्रिया । वन्दनम्-गुणस्तुतिः। पूजनम्-वस्त्रादिभिः । असंक्लिष्टैः-गृहिवैयावृत्यकरणादिसंक्लेशरहितैः । साधुभिः समं वसेत् मुनिः । चारित्रस्य यतो न हानिः ।।चू.२.९।।

**(स.)** पुनरुपदेशाधिकार एवमाह—गिहिण इति-मुनिर्गृहिणो गृहस्थस्य वैयावृत्त्यं गृहिभावस्योपकाराय तत्कर्मस्वात्मनो[1] व्यापृत्तभावं न कुर्यात्, स्वपरोभयाश्रेयः-समायोजनदोषात्, अभिवादनं वाचा नमस्काररूपं, वन्द कायप्रणामलक्षणं. पूजनं वा

१. कर्मसु आत्मनो'इति विग्रहः कार्यः ।

वस्त्रादिभिः समभ्यर्चनं गृहिणो न कुर्यादुक्तदोष-प्रसङ्गादेव. तथैतद्दोषपरिहाराय एवमसङ्क्लिष्टैर्गृहिवैयावृत्त्यादिकारणसङ्क्लेशरहितैः साधुभिः समं वसेन्मुनिः, यतो येभ्यः साधुभ्यः सकाशाच्चारित्रस्य मूलगुणादिलक्षणस्य हानिर्न स्यात्. ।।चू.२.९।।

**(सु.)** उपदेशाधिकार एवाह—गिहिणो' इति, गृहिणो-गृहस्थस्य वैयावृत्त्यं-गृहिभावोपकाराय तत्कर्मस्वात्मनो व्यावृत्तभावं न कुर्यात्, स्वपरोभयाश्रेयः-समायोजनदोषात्, तथाऽभिवादनं-वाङ्नमस्कार-रूपं, वन्दनं-कायप्रणामलक्षणं, पूजनं च-वस्त्रादिभिः समभ्यर्चनं वा, गृहिणो न कुर्यात्, उक्तदोषप्रसङ्गादेव, तथैतद्दोष-परिहारायैव असंक्लिष्टैः-गृहिवैयावृत्त्यादिकरण-संक्लेशरहितैः साधुभिः समं वसेन्मुनिः चारित्रस्य-मूलगुणादिलक्षणस्य यतो-येभ्यः साधुभ्यः सकाशान्न हानिः, संवासतस्तदकृत्यानुमोदनादिनेत्यनागतविषयं चेदं सूत्रं, प्रणयनकाले संक्लिष्टसाध्व-भावादिति ।।चू.२.९।।

**न या लभिज्जा निउणं सहायं, गुणाहियं वा गुणओ समं वा ।**
**इक्को वि पावाइं विवज्जयंतो, विहरिज्ज कामेसु असज्जमाणो ।।चू.२.१०।।**

**(ति.)** विशेषेणाह—न यदि लभेत । निपुणं सहायं गुणाधिकं वा गुणैः समं वा । एकोऽपि पापानि विवर्जयन् विहरेत्, कामेषु असज्जमानः-सङ्गमगच्छन्, न तु पापमित्रेषु पार्श्वस्थादिषु सङ्गं कुर्यात् । अन्यैरप्युक्तम् -

वरं विहर्त्तुं सह पन्नगैर्भवेच्-छठात्मभिर्वा रिपुभिः सहोषितम् ।
अधर्मयुक्तैश्चपलैरपण्डितैः, न पापमित्रैः सह वर्त्तितुं क्षमम् ।।१।। वंशस्थविलम्
इहैव हन्युर्भुजगा हि रोषिता, धृतासयश्छिद्रमवेक्ष्य चारयः ।
असत्प्रवृत्तेन जनेन सङ्गतः, परत्र चैवेह च हन्यते जनः ।।२।। वंशस्थविलम्

तथा -

परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत् ।
आत्मानं योऽभिसन्धत्ते, सोऽन्यस्मै स्यात् कथं हितः ? ।।३।।

तथा -

ब्रह्महत्या सुरापानं, स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुरेभिश्च सहं सङ्गतम् ।।४।। इत्यलं प्रसङ्गेन ।।

**(स.)** अत्रासङ्क्लिष्टैः समं वसेदित्युक्तं, पुनर्विधिविशेषमाह-ण...इति-साधुः कालदोषाद् यदि कथञ्चिन्निपुणं संयमानुष्ठानकुशलं सहायं परलोकसाधने द्वितीयं न लभेत्, किम्भूतं सहायं ? गुणाधिकं वा ज्ञानादिगुणैरधिकं वा, गुणैः समं वा, वाशब्दाद् गुणहीनमपि जात्यकाञ्चनकल्पं विनीतं वा, तदा किं कुर्यात् ?-इत्याह-तदैकोऽपि संहननादियुक्तः पापानि पापकारणान्यसदनुष्ठानानि विवर्जयन्, विविधमनेकैः प्रकारैः सूत्रोक्तैः परिहरन् सन् विहरेदुचितविहारेण, किं कुर्वन् ? कामेष्विच्छाकामादिषु, असज्यमानः सङ्गमगच्छन्, एकोऽपि विहरेत्, परं न तु पार्श्वस्थादिपापमित्रसङ्गं कुर्यात् तस्य दुष्टत्वात्, तथान्यैरप्युक्तं-

"वरं विहर्तुं सह पन्नगैर्भवेच्छठात्मभिर्वा रिपुभिः सहोषितुम् ।

अधर्मयुक्तैश्च परैरपण्डितैर्न पापमित्रैः सह वर्त्तितुं क्षमम् ।।१।।

इहैव हन्युर्भुजगा हि रोषिता धृतासयश्छिद्रमवेक्ष्य चारयः ।

असत्प्रवृत्तेन जनेन सङ्गतः परत्र चैवेह विहन्यते जनः ।।२।।

तथा-

परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत् ।

आत्मानं योऽतिसन्धत्ते सोऽन्यस्मै स्यात् कथं हितः ।।३।।

तथा-

ब्रह्महत्या सुरापानं, स्तेयं गुर्वङ्गनागमः ।

महान्ति पातकान्याहुरेभिश्च सह सङ्गतम् ।।४।। इत्यलं प्रसङ्गेन.।।चू.२.१०।।

**(सु.)** 'असंक्लिष्टैः समं वसेत्' इत्युक्तं, अत्र विशेषमाह— ण या, इति कालदोषान्न यदि लभेत—न यदि कथञ्चित् प्राप्नुयात्, निपुणं-संयमानुष्ठानकुशलं, सहायं-परलोकसाधनद्वितीयं, किंविशिष्टम् ?-इत्याह-गुणाधिकं वा-ज्ञानादिगुणोत्कटं वा, गुणतः समं वा-तृतीयार्थे पञ्चमी, गुणैस्तुल्यं वा, वाशब्दाद्धीनमपि जात्यकाञ्चनकल्पं विनीतं वा, ततः किम् ?-इत्याह-एकोऽपि संहननादियुक्तः पापानि-पापकारणान्य-सदनुष्ठानानि, विवर्ज्जयन्-विविधं-अनेकैः प्रकारैः सूत्रोक्तैः परिहरन्, विहरेदुचितविहारेण, कामेष्विच्छाकामादिषु, असज्यमानः-सङ्गमगच्छन्, एकोऽपि विहरेत्, न तु पार्श्वस्थादि-पापमित्रसङ्गं कुर्यात्, तस्य दुष्टत्वात्, तथा चान्यैरप्युक्तं-

"वरं विहर्त्तुं सह पन्नगैर्भवेच्छठात्मभिर्वा रिपुभिः सहोषितुम् ।
अधर्मयुक्तैश्चपलैरपण्डितैर्न पापमित्रैः सह वर्त्तितुं क्षमम् ।।१।।
इहैव हन्युर्भुजगा हि रोषिताः, धृतासयश्छिद्रमवेक्ष्य चाऽरयः ।
असत्प्रवृत्तेन जनेन संगतः, परत्र चैवेह च हन्यते जनः ।।२।।"

तथा-

"परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत् ।
आत्मानं योऽभिसंधत्ते, सोऽन्यस्मै स्यात् कथं हितः ? ।।३।।"

तथा-

"ब्रह्महत्या सुरापानं, स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुरेभिश्च सह संगमम् ।।४।।" इत्यादि ।।५०९।।

**संवच्छरं वा वि परं पमाणं, बीयं च वासं न तहिं वसिज्जा ।**
**सुत्तस्स मग्गेण चरिज्ज भिक्खू, सुत्तस्स अत्थो जह आणवेइ ।।चू.२.११।।**

**(ति.)** विहारकालमानमाह—संवत्सरशब्देन वर्षासु चातुर्मासिको ज्येष्ठावग्रह उच्यते। अपिशब्दाद् ऋतुबद्धकाले मासकल्पः, एकत्रोकृष्टं निवासकालमानमेतत् । द्वितीयं च वर्षं वर्षणं वर्षाकालं न तत्र वसेत् । यत्रैको वर्षाकालः कृतः, तत्र द्वितीयतृतीयो परिहृत्य चतुर्थः कल्पते । चकाराद् यत्रैको मासकल्पः कृतः, वर्षां विना तत्र मासद्वयं विमुच्यान्यः पुनः कल्पते । तथा सूत्रस्य मार्गेण-आगमादेशेन । चरेद् भिक्षुः । तथापि नौघतः श्रुतग्राही स्यात् । अपि तु सूत्रस्वार्थः-पूर्वापरविरुद्धः पारमार्थिकोत्सर्गापवादगर्भः। यथा आज्ञापयति-नियुङ्क्ते तथा वर्तेत । अपवादपदे च वृद्धस्य ग्लानस्य वा नित्यवासोऽपि त्रिधाकृते क्षेत्रे वसति-हिंडि-स्थण्डिलानि मासद्वय-द्वयं परिहृत्य क्रमेण परिशीलयतो न दोषः । अभावे त्वेषां निर्मायस्य, निर्ममस्य, अशक्तस्य, एकत्र स्थितस्यापि न दोषः।।चू.२.११।।

**(स.)** अथ सूत्रार्थावसरः-संवत्सरं' इति-साधोः संवत्सरं वर्षासु चातुर्मासिकं ज्येष्ठावग्रहं विहारकालमाह-द्वितीयं नैकत्र क्षेत्रे वसेदपिशब्दान्मासमपि परं प्रमाणमृतु-बद्धकाले द्वितीयं, तत्र क्षेत्रे न वसेत्, यत्रैको वर्षाकल्पः कृतस्तत्रोत्कृष्टतो द्वितीयो

वर्षाकल्पो न कार्यः, एवं मासकल्पोऽपि द्वितीय एकक्षेत्रे उत्सर्गतो न कार्य ऋतुबद्धे काले, कुतः ? गृहस्थादिसङ्गदोषात्, द्वितीयं तृतीयं वा वर्षं मासं वा परिहृत्य तत्र क्षेत्रे वसेदपि, किं बहुना ? सर्वत्रैव सूत्रमार्गेण चरेद् भिक्षुरागमादेशे वर्तेतेति भावः. तथापि न ओघत एव यथाश्रुतग्राही स्यात्, अपि तु सूत्रस्यार्थः पूर्वापराऽविरोधितन्त्र-युक्तिघटितः पारमार्थिकोत्सर्गापवादगर्भो यथाज्ञापयति नियुङ्क्ते तथावर्तेत, नान्यथा, यथेहापवादतो नित्यवासेऽपि वसतावेव प्रतिमासादि साधूनां संस्तारगोचरादि परिवर्त्तेत नान्यथा शुद्धापवादायोगादित्येवं वन्दनप्रतिक्रमणादिष्वपि तदर्थं प्रत्युपेक्षणेनानुष्ठानेन वर्तेत, न तु तथाविधलोकेहायातं परित्यजेत्, आशातनाप्रसङ्गात्. ।।चू.२.११।।

**(सु.)** विहारकालमानमाह—संवच्छरं इति, संवत्सरं वाप्यत्र संवत्सरशब्देन वर्षासु चातुर्मासिको ज्येष्ठावग्रह उच्यते, तमपि, अपिशब्दात् मासमपि, परं प्रमाणं-वर्षाऋतुबद्धयोरुत्कृष्टमेकत्र निवासकालमानमेतत्, द्वितीयं च वर्षं चशब्दस्य व्यवहित उपन्यासः, द्वितीयं वर्षं च वर्षासु, चशब्दान्मासं च ऋतुबद्धे न तत्र क्षेत्रे वसेत्, यत्रैको वर्षाकल्पो मासकल्पश्च कृतः, अपि तु सङ्गदोषाद् द्वितीयं तृतीयं च परिहृत्य वर्षादिकालं ततस्तत्र वसेदित्यर्थः, सर्वथा, किं बहुना ?, सर्वत्रैव सूत्रस्य मार्गेण चरेद् भिक्षुरागमादेशेन वर्त्तेतेति भावः, तत्रापि नौघत एव यथाश्रुतग्राही स्यात्, अपि तु सूत्रस्यार्थः-पूर्वापराविरोधितन्त्रयुक्ति-घटितः पारमार्थिकोत्सर्गापवादगर्भो यथा-ऽऽज्ञापयति—नियुङ्क्ते तथा वर्त्तेत, नान्यथा, यथेहापवादतो नित्यवासेऽपि वसतावेव प्रतिमासादि साधूनां संस्तारकगोचरादिपरिवर्त्तेन, नान्यथा, शुद्धापवादायोगात्, इत्येवं वन्दन-प्रतिक्रमणादिष्वपि तदर्थं प्रत्युपेक्षणेन अनुष्ठानेन वर्त्तेत, न तु तथाविधलोकहेर्या तं परित्यजेत्, तदाशातनाप्रसङ्गादिति ।।चू.२.११।।

**जो पुव्वरत्तावररत्तकाले, संविक्खई[1] अप्पगमप्पगेणं ।**
**किं मे कडं किच्चमकिच्चसेसं, किं सक्कणिज्जं न समायरामि ? ।।चू.२.१२।।**

**(ति.)** एवं विविक्तचर्यावत यः सुन्दरगुणोवापायमाह—यः साधुः । पूर्वरात्रा-ऽपररात्रकाले-रात्रौ प्रथम-चरमप्रहरयोः । सम्प्रेक्षते । आत्मानमात्मना । कथम् ?-इत्याह-किं मया कृतम्-शक्त्यनुरूपं तपश्चरणादि । किं च मे कृत्यशेषम् उद्वृत्तम् ।

---

१. संपिक्खई इति (स.)-टीकायां मूलग्रन्थः, तथा 'संपेहए' इति (सु.) टीकायां मूलग्रन्थः, विवृतं च'संप्रेक्षते' इति टीकासु । 'सारक्खती'इति चूर्णिपाठः, 'पालयति' इति चूर्णितम् ।

किं शकनीयम्-वयोऽवस्थानरूपं, वैयावृत्यादि । न समाचरामि।। ।।चू.२.१२।।

**(स.)** एवं विशुद्धविविक्तचर्यावतोऽसीदनगुणोपायमाह-जो इति-यः साधुर्भवेत् स पूर्वरात्रा-ऽपररात्रकाले रात्रौ प्रथम-चरमप्रहरयोरित्यर्थः, सम्प्रेक्षते सूत्रोपयोगनीत्यात्मानं कर्मभूतमात्मनैव करणभूतेन प्रेक्षते, कथं प्रेक्षत ?-इत्याह-किं मे कृतमिति, छान्दसिकत्वात् तृतीयार्थे षष्ठी, 'किं मया कृतं शक्तेरनुरूपं तपश्चरणादियोगस्य, किञ्च मम कृत्यशेषं कर्तव्याच्छेषमुचितं, पुनः किञ्च शक्यं वयोऽवस्थानुरूपं वैयावृत्याद्यहं न समाचरामीति, तस्याकरणे हि तत्कालनाश इति. ।।चू.२.१२।।

**(सु.)** एवं च विविक्तचर्यावतोऽसीदनगुणोपायमाह—जो 'इति यः साधुः पूर्वरात्रा-ऽपररात्रकाले, रात्रौ प्रथम-चरमयोः प्रहरयोरित्यर्थः, संप्रेक्षते सूत्रोपयोगनीत्या, आत्मानं कर्मभूतं, आत्मनैव करणभूतेन, कथम् ?-इत्याह-किं मे कृतमिति, छान्दसत्वात् तृतीयार्थे षष्ठी, किं मया कृतं ? शक्त्यनुरूपं तपश्चरणादियोगस्य, किं च मम कृत्यशेषं-कर्त्तव्यशेषं उचितं ?, किं शक्यं-वयोऽवस्थानुरूपं वैयावृत्त्यादि, न समाचरामि-न करोमि, तदकरणे हि तत्कालं नाशयति ।।चू.२.१२।।

**किं मे परो पासइ किंच अप्पा, किं वाहं खलियं न विवज्जयामि ।**
**इच्चेव सम्मं अणुपासमाणो, अणागयं नो पडिबंध कुज्जा ।।चू.२.१३।।**

**(ति.)** तथा—किञ्च किं मम स्खलितं परः स्वपक्ष-परपक्षलक्षणः पश्यति । किं वा आत्मा क्वचित्-मनाक् संवेगापन्नः । किं वा-ऽहम् ओघत एव स्खलितं न विवर्जयामि। इत्येवं सम्यगनुपश्यन् । अनागतम्-आगामिकाले । यः प्रतिबन्धं संयमविषयं न करोति ।।चू.२.१३।।

**(स.)** किं' इति तथा किं मम स्खलितं, परः स्वपक्ष-परपक्षलक्षणः पश्यति ? किं वात्मा क्वचिन्मनाक् संवेगं प्राप्तः ? किं वाहमोघत एव स्खलितं न विवर्जयामि' इत्येवं सम्यगनुपश्यन्ननेनैव प्रकारेण स्खलितं ज्ञात्वागमोक्तेन विधिना भूयः पश्यन्ननागतं न प्रतिबन्धं कुर्यात् साधुः, य आगामिकालविषयं नासंयमप्रतिबन्धं करोतीति. ।।चू.२.१३।।

**(सु.)** तथा—किं मे' इति , किं मम [स्खलितं] परः-स्वपक्ष-परपक्षलक्षणः पश्यति, किंवाऽऽत्मा क्वचिन्मनाक् संवेगापन्नः ?, किं वाऽहं ओघत एव स्खलितं न विवर्जयामि' इत्येवं सम्यगनुपश्यन्ननेनैव प्रकारेण स्खलितं ज्ञात्वा सम्यगागमोक्तेन विधिना भूयः

पश्येत् अनागतं न प्रतिबन्धं कुर्यात्-आगामिकालविषयं नासंयमप्रतिबन्धं करोति ।।चू.२.१३।।

**जत्थेव पासे कइ दुप्पउत्तं, कायेण वाया अदु माणसेणं ।**
**तत्थेव धीरो पडिसाहरिज्जा, आइन्नो[1] खिप्पमिव खलीणं ।।चू.२.१४।।**

**(ति.)** कथम् ?-इत्याह—यत्रैव पश्येत् क्वचित्-संयमस्थाने धर्मोपधिप्रेक्षणादौ । दुःप्रयुक्तम्-दुर्व्यवस्थितात्मानम् । केन ? कायेन, वाचा अथ मानसेन । तत्रैव-संयमस्थानम् । धीरः प्रतिसंहरेत्-सम्यग् विधिना प्रतिपद्येत । यथा जात्यादिभिराकीर्णः-जात्योऽश्वः । क्षिप्रमेव खलीनम्-[2]कविकं प्रतिपद्यते । एवं साधुदुःप्रयुक्तत्वत्यागेन खलिनकल्पं सम्यग् विधिं प्रतिपद्यते ।।चू.२.१४।।

**(स.)** कथं ?-इत्याह-जत्थेव'इति-साधुर्यत्रैव क्वचित् संयमस्थानावसरे धर्मोपधि-प्रत्युपेक्षणादौ, दुष्प्रयुक्तं दुर्व्यवस्थितमात्मानमिति गम्यते, पश्येत् पश्यत्युक्तवत् परमात्मदर्शनद्वारेण, केन ?-इत्याह-कायेन, वाचा, अथ मानसेन मन एव मानसं, करणत्रयेणेत्यर्थः, तत्रैव तस्मिन्नेव संयमस्थाने, धीरो बुद्धिमान्, प्रतिसंहरेत् प्रतिसंहरति, यः स्वात्मानं सम्यग् विधिं प्रतिपद्यत इत्यर्थः, अत्र दृष्टान्तमाह-यथा जवादिभिर्गुणैराकीर्णो व्याप्तो जात्योऽश्व इति गम्यते, असाधारणविशेषणात्, तच्चेदं-क्षिप्रमिव खलिनं शीघ्रं, कविकमिव, यथा जात्योऽश्वो नियमितगमननिमित्तं शीघ्रं खलिनं प्रतिपद्यत एवं यो दुष्प्रयोगत्यागेन खलिनकल्पं सम्यग्विधिं, एतावतांशेन दृष्टान्तः. ।।चू.२.१४।।

**(सु.)** कथम् इत्याह-जत्थेव...इति—यत्रैव पश्यत्युक्तवत्परात्मदर्शनद्वारेण, क्वचित्-संयमस्थानावसरे धर्म्मोपधिप्रत्युपेक्षणादौ, दुष्प्रयुक्तं-दुर्व्यवस्थितमात्मानमिति गम्यते, केनेत्याह-कायेन वाचा, अथ मानसेन-मन एव मानसं, करणत्रयेणेत्यर्थः, तत्रैव-तस्मिन्नेव संयमस्थानावसरे धीरो-बुद्धिमान्, प्रतिसंहरेत्-प्रतिसंहरति य आत्मानं, सम्यग्विधिं प्रतिपद्यत इत्यर्थः, निदर्शनमाह-आकीर्णो जवादिभिर्गुणैर्जात्योऽश्व इति गम्यते, असाधारणविशेषणात्, तच्चेदं-क्षिप्रमिव-शीघ्रमेव खलिनं-कविकमिव, यथा जात्योऽश्वो नियमितगमननिमित्तं शीघ्रं खलिनं प्रतिपद्यते, एवं यो दुष्प्रयोगपरित्यागेन खलिनकल्पं सम्यग्विधिं, एतावताऽंशेन दृष्टान्त इति ।।चू.२.१४।।

१. आइन्नओ खिप्पमिव क्खलीणं-इत्यन्यत्र मुद्रितम् । २. अश्वमुखस्थम् १० टि. ।।

**जस्सेरिसा जोग जिइंदियस्स, धिईमओ सप्पुरिसस्स निच्चं ।**
**तमाहु लोए पडिबुद्धजीवी, सो जीवइ[1] संजमजीविएणं ।।चू.१.१५।।**

**(ति.)** यः पूर्वरात्रापररात्रेत्यधिकारोपसंहारार्थमाह–यस्येदृशाः-स्वहितालोचन-प्रवृत्तिरूपाः । योगाः-मनो-वाक्-कायव्यापाराः । जितेन्द्रियस्य धृतिमतः सत्पुरुषस्य। नित्यं तमाहुर्लोके विद्वांसः प्रतिबुद्धजीवितम्-प्रमादनिद्रारहितजीवितम् । सः-एवं गुणयुक्तः सन् साधुः, [2]जीवति संयमजीवितेन।।

**(स.)** यः पूर्वरात्रेत्याद्यधिकारोपसंहारायाह-जस्से...इति-विद्वांसस्तं साधुमेवंभूते लोके प्राणिसंघाते, नित्यं सर्वकालं सामायिकप्रतिपत्तेरारभ्या-ऽऽमरणं प्रतिबुद्धजीविनमाहुः कथयन्ति, कोऽर्थः ? प्रतिबुद्धजीविनं प्रमादरहितजीवितशीलं, स एवंगुणयुक्तः सन् जीवति संयमजीवितेन कुशलाभिसंधिभावात् सर्वथा संयमप्रधानजीवितेन, तं साधुं कं ? यस्य साधोरीदृशाः स्वहितालोचनप्रवृत्तिरूपा योगा मनो-वाक्-कायव्यापारा भवन्ति, किम्भूतस्य साधोः ? जितेन्द्रियस्य वशीकृतस्पर्शनादीन्द्रियसमूहस्य, पुनः किंभूतस्य यस्य ? धृतिमतः संयमे धैर्यसहितस्य, पुनः किम्भूतस्य यस्य ? सत्पुरुषस्य प्रमादजयान्महापुरुषस्य. ।।चू.१.१५।।

**(सु.)** यः पूर्वरात्र इत्याद्यधिकारोपसंहारामाह–यस्य साधोरीदृशाः स्वहितालोक(च)न-प्रवृत्तिरूपा योगा मनो-वाक्-काय-व्यापारा, जितेन्द्रियस्य–वशीकृतस्पर्शनादीन्द्रिय-कलापस्य, धृतिमतः-संयमे सधृतिकस्य, सत्पुरुषस्य-प्रमादजयात् महापुरुषस्य, नित्यं-सर्वकालं सामायिकप्रतिपत्तेरारभ्यामरणान्तं, तमाहुर्लोके प्रतिबुद्धजीविनं-तमेवंभूतं साधुमाहुः-अभिदधति विद्वांसो, लोके-प्राणिसंघाते, प्रतिबुद्धजीविनं-प्रमादनिद्रा-रहितजीवितशीलं, स एवंगुणयुक्तः सन् जीवति संयमजीवितेन-कुशलाभिसंधिभावात् सर्व्वथा संयमप्रधानेन जीवितेनेति ।।चू.१.१५।।

**अप्पा खलु सययं रक्खियव्वो, सव्विंदिएहिं सुसमाहिएहिं ।**
**अरक्खिओ जाइपहं उवेइ, सुरक्खिओ सव्वदुहाण मुच्चइ त्ति बेमि ।।चू.२.१६।।**

**(ति.)** शास्त्रार्थमुपसंहरनुपदेशसर्वस्वमाह–आत्मा खलु सततं रक्षितव्यः । सर्वेन्द्रियैः-स्पर्शनादिभिः । सुसमाहितैः-निवृत्तस्वविषयव्यापारैः । अरक्षितो जातिपथम्-

१. जीवई'इति मुद्रितः पाठः । २. जीवितं १.३-६ ।।

संसारमार्गम् उपैति । सुरक्षितः सर्वदुःखेभ्यो विमुच्यते-मोक्षं महानन्दपदं समासादयति। इति-समाप्तौ ।।चू.१.१६।। ब्रवीमीति पूर्ववत् ।।

**इति श्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिका समाप्ता ।।**

**(स.)** अथ शास्त्रमुपसंहरन्नुपदेशसर्वस्वमाह-अप्पा'इतिएवंविधेन साधुनात्मा, खलुशब्दो विशेषणार्थः, **शक्तौ सत्यां परोऽपि, सततं सर्वकालं रक्षितव्यः** पालनीयः, परलोकसम्बन्धिकष्टेभ्यः, कथम् ?-इत्युपायमाह—यतः किम्भूतेन साधुना ? सर्वेन्द्रियैः स्पर्शनादिभिः, सुसमाहितेन निवृत्तविषयव्यापारेण, अरक्षण-रक्षणयोः फलमाह—अरक्षितः सन्नात्मा पन्थानं जन्ममार्गं संसारमुपैति सामीप्येन गच्छति, अथ सुरक्षितः पुनरात्मा यथागममप्रमादेन सुष्ठु रक्षितः सन् सर्वदुःखेभ्यः शारीर-मानसेभ्यो विमुच्यते, विविधमनेकैः प्रकारैरपुनर्ग्रहणपरम-स्वास्थ्यापादनलक्षणैर्मुच्यते विमुच्यते, ब्रवीमीति पूर्ववत्. ।।चू.२.१६।। **इति श्रीदशवैकालिक शब्दार्थवृत्तौ श्रीसमयसुन्दरोपाध्याय-विरचितायां द्वितीयचूलिका समाप्ता**

**(सु.)** शास्त्रमुपसंहरन्नाह-उपदेशसर्वतत्त्वमाह—अप्पा...इति आत्मा खल्विति-खलुशब्दो विशेषणार्थः, शक्तौ सत्यां परोऽपि, सततं-सर्वकालं, रक्षितव्यः-पालनीयः पारलौकिकापायेभ्यः, कथम् ?-इत्युपायमाह-सर्वेन्द्रियैः-स्पर्शनादिभिः सुसमाहितेन-निवृत्तविषयव्यापारेणेत्यर्थः, अरक्षण-रक्षणयोः फलमाह-अरक्षितः सन् जातिपन्थानं-जन्ममार्गं संसारमुपैति-सामीप्येन गच्छति । सुरक्षितः पुनर्यथागममप्रमादेन सर्वदुःखेभ्यः-शारीर-मानसेभ्यो, विमुच्यते-विविधं-अनेकैः प्रकारैः अपुनर्ग्रहण-परमस्वास्थ्या-ऽऽपादनलक्षणैर्मुच्यते विमुच्यते ।।चू.२.१६।। इति ब्रवीमीति पूर्ववत् ।।

**इति सुमति० वृत्तौ विविक्तचर्यानाम्नी द्वितीयचूला समाप्ता २ ।।**

**।। समाप्तेयं दशवैकालिकस्य लघुटीका ।।**

## ।। प्रशस्तिः ।।

### अथ तिलकाचार्यवृत्तिप्रशस्तिमाह-

तीर्थे **वीरप्रभोः सुधर्मगण**भृत्, सन्तानलब्धोन्नतिः,
चारित्रोज्वल**चन्द्रगच्छ**जलधि-प्रोल्लासशीतद्युतिः ।
साहित्यागमतर्कलक्षणमहा-विद्यापगासागरः,
**श्रीचंद्रप्रभसूरि**रद्भुतमति-र्वादीभसिंहोऽभवत् ।।१।। शार्दूलविक्रीडितम्

तत्पट्टलक्ष्मीश्रवणावतंसाः, **श्रीधर्मघोषप्रभवो** बभूवुः ।
यत्पादपद्मे कलहंसलीलां, दधौ नृपः **श्रीजयसिंहदेवः** ।।२।। उपजातिः

तत्पट्टोदयशैलशृङ्गमभजत्, तेजस्विचूडामणिः
**श्रीचक्रेश्वरसूरि**रित्यभिधया, कोऽप्यत्र भानुर्नवः ।
सम्प्राप्ताभ्युदयः सदैव तमसा, नो जातु विच्छायितो,
नैवोच्चण्डरुचिः कदाचिदपि न, प्राप्तापरागस्ततः ।।३।। शार्दूलविक्रीडितम्

विललस स्वैरं, तत्पट्टप्रासादचन्द्रशालायां ।
श्रीमान् **शिवप्रभुगुरुः,** संयमकमलाकृता शक्तिः ।।४।। आर्या

श्री**शिवप्रभ**सूरिणां, तेषां शिष्योऽस्मि मन्दधीः ।
नाम्ना **श्रीतिलकाचार्यः,** श्रुताराधनगृद्धिभाक् ।।५।। आर्या

एतां सोऽहं, विषम**दशवै-कालिक**ग्रन्थटीकां,
तत्पादाब्ज-स्मरणमहसा, मूढधीरप्यकार्षम् ।

तद् यत् किञ्चिद्-रभसवशतो, दब्धमस्यामशुद्धम्,
तत्संशोध्यं, मयि कृतकृपैः, सूरिभिः सत्त्वविद्भिः ।।६।। मन्दाक्रान्ता

टीकां रचयता चैतां, यन्मया सुकृतं कृतम् ।
भवे भवेऽहं तेन स्यां, श्रुताराधनतत्परः ।।७।।

विक्रमनृपात् **त्रयोदश-शतमित**संवत्सरेषु ।
यातेषु टीका विनिर्ममोऽसौ, गच्छति **चतुरुत्तरे** वर्षे ।।८।। आर्या

सिष्या नः शस्यचारित्राः, सर्वशास्त्राब्धिपारगाः ।
अस्यां सहायकं चक्रुः, **श्रीपद्मप्रभसूरयः** ।।९।।

शिष्योऽस्माकमिमां टीकां, **यशस्तिलक**पण्डितः ।
अलिखत् प्रथमादर्शे, शोधयित्वार्थतत्त्ववित् ।।१०।।

**दशकालिक**टीकासौ, सकलाप्यामूलचूलमेकाग्रैः ।
**श्रीपालचन्द्र**सूरिभि-रस्मच्छिष्यैरशोधयत् ।।११।। आर्या

इह श्लोकसहस्त्राणां, सप्तकं सर्वसङ्ख्यया ।
प्रत्यक्षरेण सङ्ख्याय, निश्चिकाय कविः स्वयम् ।।१२।।

यावद् विजयते तीर्थं, श्रीमद्वीरजिनेशितुः ।
तावदेषा मरालीव, खेलतात् कृतिमानसे ।।१३।।

## ।। खम्भातताडपत्रीयप्रतलेखनप्रशस्तिः ।।

७००० ग्रन्थाग्रं सप्तसहस्त्राणि सकलमपि सम्पूर्णानि ।
शुभमस्तु सर्वजगतः, परहिनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं, सर्वत्र सुखीभवतु लोकः ।।छ।।

यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ।।१।।

अग्नौ रक्षेज्जले रक्षेद् रक्षेत् शिथिलबंधनम् ।
कष्टेन लिख्यते शास्त्रं, पुत्रवत् प्रतिपालयेत् ।।२।।

श्री**प्रज्ञातिलक**सूरीणां **दशवैकालिक**पुस्तकमिदं ।
पं. **माणिक्यतिलकेन** शोधितं । मंगलं महाश्रीः ।

सुखमनुपमं स श्री**नेमि**स्तनोति तनूमतां,
दिशि दिशि गता यस्य स्फाराः शरीरमरीचयः ।
भुवनमहिते **राजीमत्या** विवाहमहोत्सवे
मदनजयिनः संराजन्ते शरा इव तेजिताः ।।१।। हरिणी

अतुच्छगाम्भीर्यनिवासभूमिर्नदीनभावप्रथितः पृथिव्याम् ।
**ऊकेशवंशो**ऽस्ति पयोधिकल्पश्चित्रं तु जागर्त्ति जिनो यदन्तः ।।२।। उपजातिः

तस्मिन्नादिमपुरुषावुभावभूतां नितान्तकान्तगुणौ ।
प्रथमो **दाहडनामा** वरणिगनामा द्वितीयश्च ।।३।। आर्या

तत्राभूद् भूतहिता **वाल्हेविर्वरणि**गस्य सद्गृहिणी ।
आनखशिखाग्रमग्र्यैः, परिपूर्णा विमलगुणानिवहैः ।।४।।

तस्यामभूद् **वरणिगस्य** सुतः सुतीर्थ-वित्तव्ययार्जितयशाः किल **देवचंद्रः** ।
एकं बभूव खलु **देवसिरिः** कलत्रं, तस्य प्रशस्यामपरं ननु **देमते**ति ।।५।।

वसन्त०

**देवचन्द्रस्य देवश्री**-कुक्षिजस्तनुजोऽजनि ।
**थिरचन्द्रः** कलासान्द्रः सुता **नायक**नामिका ।।६।।

तस्यैव **देमत**कलत्रसमुद्भवोऽभूत्, प्रज्ञाचणः **सलखणः** प्रथमस्तनूजः ।
आचारचारुरपरो धनदेवनामा, गाम्भीर्यधैर्यशममुख्यगुणावुभो च ।।७।। वसन्त०

**थिरदेवि**रभूद् भार्या, **थिरचंद्र**स्यातिविश्रुतौदार्या ।
असपत्नगुणं पत्नीयुगलं जज्ञे सलखणस्य ।।८।। आर्या

आद्या **सूहवदेविः, सहदेवि**श्चापरा परार्थपरा ।
धनदेवस्य च समजनि, सधर्मिणी **धाहिणि**र्धीरा ।।९।। आर्या

**थिरदेवी**दयितायां, **थिरचन्द्र**स्याभवन्नथांगरुहाः ।
ऐरावतदंता इव चत्वारो निर्मलात्मनः ।।१०।।

आद्यस्तेषु समस्तशस्तगुणवर्गः **पासणागः** सुधी-
र्धर्मोद्धारकृ**दामणाग** इति विख्यातो द्वितीयस्तथा ।
शान्तः **शान्तिकुमार** इत्यधिगतो बुद्ध्या तृतीयः पुन-
स्तुर्यः संयमधुर्यधी**र्महणसिंहः** सिंहशूरोऽस्त्यहो ! ।।११।। शार्दूलविक्रीडतम्

**राजीमती**ति तेषां, भगिनी भग्नातिमात्रमोहबला ।
यन्मानसे मरालीलीलायितमातनोति कृपा ।।१२।। आर्या

**पाहिणिः पासणागस्य**, गेहिनी गुणमन्दिरम् ।
आमश्रीरामणागस्य, दाराश्चाचारपारगाः ।।१३।।

**शान्ता** शान्तिकुमारस्य **पाल्हुके**ति सधर्मिणी ।
कलाकलापसम्पन्ना मूर्तिश्चान्द्रमसी यथा ।।१४।।

सुतवती दुहिताद्वयमादिमा, **सलखणस्य** च **सूहव**गेहिनी ।
अभिधया प्रथमाऽजनि **छाहिणीः**, समपरा त्वपरा ननु **रूपिणिः** ।।१५।।

द्रुतविलम्बितम्

द्वितीया प्रेयसी तस्य, **सहदेवि**रजीजनत् ।
**वोढारं ललितादेव्याः, पासवीरं** तनूद्भवम् ।।१६।।

**धनदेवस्य** च दयिता, **दाहिणि**नाम्नी सुतत्रयमसूत ।
धर्मार्थकामनाम्नः पुरुषार्थांस्त्रीन् क्रिया यद्वत् ।।१७।। आर्या

**नेमाकः** प्रथमस्तेषु, प्रथमो धर्मकर्मणि ।
द्वितीयोऽप्यद्वितीयोऽस्ति, क्षमी **लक्ष्मीधरा**भिधः ।।१८।।

तार्तीयीकः सुकृतद्रुमालवालः पुनः **सहजपालः** ।
एषां धर्मैकरसा स्वसाऽथ **माल्हे**ऽभिधानाऽस्ति ।।१९।। आर्या

**नागमते**ति कलत्रं **नेमाक**स्यास्ति निर्मलचरित्रम् ।
**लक्ष्मीधरस्य** दयिता **लक्ष्मश्रीः** सकलजन्तुहिता ।।२०।। आर्या

सीतेव विमलशीला, **सीतादेवी**ति **सहजपालस्य** ।
विनयालङ्कृतहृदया, दयाविलासान्विता दयिता ।।२१।। आर्या

अङ्गजाः **पासणागस्य**, परोपकरणोल्बणाः ।
सम्भवो **धनसिंहश्चासपालश्चे**ति सन्त्यमी ।।२२।।

**लाहिणि-पातू**संज्ञं जिनचरणाराधने सदाभिज्ञम् ।
भगिनीयुगलं जज्ञे विज्ञममीषां मतिप्राज्ञम् ।।२३।। आर्या

**अह्गभूरामणागस्य, केलिसिंहः** कलागृहम् ।
तस्यास्ति शीलसम्पन्ना, **कमलश्रीः** सधर्मिणी ।।२४।।

**फूदी** समस्ति किल **शांतिकुमार**पुत्री, **नेमा**सुता मतिमती ननु **रत्नदेविः** ।
**लक्ष्मीधरस्य** दयिता खलु **नायके**ति, बद्धादरा सुकृतकर्मणि पर्वणीव ।।२५।।

वसन्ततिलका

**इतश्च-**

सद्धर्मकर्मसु रतः सहृदा**मणागः**, पादाम्बुजं निजगुरोरुपसेवमानः ।
शुश्राव भावपरिचुम्बितचित्तवृत्तिर्ज्ञानानुभावमिति बुद्धिधनः कदापि ।।२६।। [व.ति.]

**तद्यथा-**

मोहान्धकारहरणैकदिवाकरस्य संसारवारिनिधिदुर्द्धरवडवाग्नेः ।
चारित्रराजसचिवस्य शिवस्य बन्धो-र्ज्ञानस्य कः किल गुणौघवदावदः स्यात् ? ।।२७।। [व.ति.]

दुष्षमादोषतश्चैतत्, पुस्तकाधीनतां गतम् ।
तल्लेखनमतः पुण्यद्रुमहोहदसोदरम् ।।२८।।

अथाऽऽ**मणागो** निजवल्लभायाः, **आमश्रियः** श्रेयसपुण्यहेतोः ।
व्यलेखयत् श्री**दशकालिकस्य**, वृत्तिं समग्रश्रुतसाररूपाम् ।।२९।। उपजातिः

भुवनानलेंदु १३१४ संख्ये विक्रमसंवत्सरे प्रवृत्ते च ।
सङ्घसमक्षमिदानीं, तद्व्याख्यां कारयामास ।।३०।। युग्मम् ।। आर्या

राजहंसाविमौ यावत्, क्रीडतः पुष्करान्तरे ।
वाच्यमानं बुधैस्तावदिदं नन्दतु पुस्तकम् ।।३१।।

मङ्गलं महाश्रीः ।।छ।। शुभं भवतु ।। प्रशस्तिः समाप्ता ।।छ।।

**अथ समयसुन्दरवृत्तिप्रशस्तिमाह-**

हरिभद्रकृता टीका वर्तते विषमा परम् । मया तु शीघ्रबोधाय शिष्यार्थं सुगमा कृता. १.

**चंद्रकुले** श्री**खरतर**-गच्छे **जिनचन्द्र**सूरिनामानः । जाता युगप्रधानास्तच्छिष्यः **सकलचन्द्र**गणिः.२.

तच्छिष्य**समयसुन्दर**-गणिना च **स्तम्भतीर्थपुरे** चक्रे । **दशवैकालिकटीका** शशिनिधिशृङ्गारमितवर्षे. ३.

अर्थस्यानवबोधेन मतिमान्द्यान्मतिभ्रमात् । जिनाज्ञाविपरीतं यत्तन्मिथ्यादुष्कृतं मम. ४.

ममोपरि कृपां कृत्वा शोधयन्तु बुधा इमाम् । परोपकरणे यस्मात् त्परा उत्तमा नराः.५.

टीकाकरणतः पुण्यं यन्मयोपार्जितं भवेत् । तेनाहमिदमिच्छाभि बोधिरत्र परत्र मे. ६.

**शब्दार्थवृत्ति**टीकायाः श्लोकमानमिदं स्मृतम् । सहस्रत्रयमग्रे च पुनः सार्धचतुःशतम्. ७.

**इति श्रीदशवैकालिकशब्दार्थवृत्तिप्रशस्तिः सम्पूर्णा.**

**अथ दीपिकोपसंहारः-**

अत्र श्रीदशवैकालिककारकशय्यंभवसूरेस्तत्पुत्रमनकमुनेश्च सम्बन्धसूचकं द्रुमपुष्पिकाध्ययननिर्युक्तिगाथाद्विकं, यथा-

**सेज्जंभवं** गणहरं जिणपडिमादंसणेण पडिबुद्धं ।

**मणगपिअरं** दसका-लिअस्स निज्जूहगं वंदे ।।१।।

मणगं पडुच्च **सेज्जं-भवेण** निज्जूहिआ दसज्झयणा ।

वेआलिआइ ठविआ तम्हा दसकालिअं नाम ।।२।।

तच्छेषसंबंधसूचकं चूलिकाद्वयनिर्युक्तिगाथाद्विकमिद्म-

छहिं मासेहिं अहीअं, अज्झयणमीणं तु अज्झमणगेणं।

छम्मासा परिआओ अह कालगओ समाहीए ।।३।।

आणंदणंसुपायं काही **सिज्जंभवा** तहिं थेरा ।

**जसभद्दस्स** य पुच्छा कहणा य विचालणा संघे ।।४।।

एतद्गाथाचतुष्कार्थः **श्रीहरिभद्र**सूरिविरचितवृत्तेरवसेयः, अथात्र किञ्चित् कथानकमुच्यते-

यदा शय्यंभवाचार्यः प्रव्रजितस्तदा तस्य गृहिणी गर्भिण्यासीत्. जातश्च तस्याः पुत्रः क्रमेण, नामास्य कृतं मनक इति, यदा च सोऽष्टवार्षिको जातः, तदा स मातरं पृच्छति, क्व मम पिता ? सा भणति' तव पिता प्रव्रजितः, ततः स पितृसकाशे गंतुमना लब्धवृत्तान्तश्चम्पायां गतः, आचार्येण संज्ञाभूमिं गतेन स दृष्टः, तेन च वन्दित आचार्यः, उभयोश्च मिथः प्रेक्षमाणयोः स्नेहो जातः, आचार्यः 'पृच्छति कस्तव पिता ? स भणति' शय्यंभव इति, ततः सूरिणा भणितं 'किमर्थमत्रागतोऽसि? तेनोक्तं- 'प्रव्रजिष्यामि', यदि यूयं जानीथ तदा कथयत 'क्वास्ति मम पितेति, सूरिणोक्तं स मम मित्रमेकशरीरीभूतः, ततः प्रव्रज त्वं मत्पार्श्वे ? प्रतिपन्नं च तेन, ततः स प्रव्राजितस्तत्रैव सूरिणा, आगतस्तेन सहोपाश्रये, उपयोगं दत्तवानाचार्यः' कियदायुरस्येति, ज्ञातं चातः परं षण्मासा आयुरस्येति, उत्पन्ना च बुद्धिराचार्यस्य, अस्य स्त्रोकायुषः किं कर्तव्यमिति, विममर्श च -

"चउदसपुव्वी कम्हि वि कारणे समुप्पन्ने निज्जूहइ, अपच्छिमो पुण चउदसपुव्वी अवस्समेव निज्जूहइ, मम वि इमं कारणं समुप्पन्नं, तओ अहमवि निज्जूहामि, ताहे आढत्तो निज्जूहिउं जाव थोवावसेसे दिअसे इमे दसज्झयणा निज्जूढा."

उद्धृतानि विकालवेलायां पाश्चात्यचतुर्घटिकारूपायां स्थापितान्येकत्र कृतानीति, ततः षड्भिर्मासैरधीतमध्ययनमिदं दशवैकालिकाख्यः श्रुतस्कन्धो **मनकेन**, ततः समाधिना स कालं गतः, तस्मिन् स्वर्गते आराधितमनेनेति **शय्यंभवा** आनन्दाश्रुपातमकार्षुः, ततस्तत्प्रधानशिष्येण **यशोभद्रेण** कारणे पृष्टे, प्रोक्तं भगवता संसारस्वरूपम्, ततो **यशोभद्रादयो** 'गुरुवद् गुरुपुत्रे वर्त्तितव्यमिति न्यायमार्गः. स चास्माभिर्नाचरित इति पश्चात्तापं चक्रुः, अथ **शय्यंभवे**नाल्पायुषमेनमवेत्य मयेदं शास्त्रमुद्धृतं. किमत्र युक्तम्? इति सङ्घाय निवेदिते विचारणा कृता. यदुत कालदोषात् प्रभूतसत्त्वानामिद-मेवोपकारकमतस्तिष्ठत्वेतदिति नोपसंहृतं प्रवचनगुरुणेति. इति **श्रीसमयसुन्दरो-पाध्यायविरचितश्रीदशवैकालिकशब्दार्थवृत्त्युपसंहारः संपूर्णः, ।। श्रीरस्तु ।।**

**(लघुटीकाप्रणेतृणां सुमतिसाधुसूरीणां प्रशस्तिः-)**

महात्तराया **याकिन्या**, धर्मपुत्रेण चिन्तिता ।
आचार्य**हरिभद्रेण**, टीकेयं **शिष्यबोधिनी** ।।१।।

**दशवैकालिके** टीकां विधाय यत् पुण्यमर्जितं तेन ।
मात्सर्यदुःखविरहाद् गुणानुरागी भवतु लोकः ।।२।।

दशकालिकानुयोगात्, सूत्रव्याख्या पृथक्कृता ।
**हरिभद्राचार्य**कृतान्मोहाद् भक्त्याऽथवा मया ।।३।।

श्रीमद्**बोधक**शिष्येण, श्रीमत्**सुमतिसूरि**णा ।
विद्वद्भिस्तत्र नोद्वेगो, मयि कार्यो मनागपि ।।४।।

यस्माद् व्याख्याक्रमः प्रोक्तः, सूरिणा **भद्रबाहुना** ।
**आवश्यकस्य निर्युक्ता**, व्याख्याक्रमविपश्चिता ।।५।।

सूत्रार्थः प्रथमो ज्ञेयो, निर्युक्तिमिश्रितः ततः ।
सर्वैर्व्याख्याक्रमैर्युक्तो, भणितव्यस्तृतीयकः ।।६।।

प्रमादकार्यविक्षेपचेतसां तदयं यया ।
क्रियया अवबोधार्थं, साधूनां तु पृथक् कृतः ।।७।।

लब्ध्वा मानुष्यकं जन्म, ज्ञात्वा सर्व्वविदां मतम् ।
प्रमाद-मोहसंमूढा, वैकल्प्यं ये नयन्ति हि ।।८।।

जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुते ।
संसारसागरे रौद्रे, ते भ्रमन्ति विडम्बिताः ।।९।।

ये पुनर्ज्ञान-सम्यक्त्व-चारित्रविहितादराः ।
भवाम्बुधिं समुल्लङ्घ्य, ते यान्ति पदमव्ययम् ।।१०।।

ये भव्यान् प्रतिबोध्य जैनवचनैः स्याद्वादसंभूषितैर्-
निर्वाणाश्रितचेतसो विदधिरे स(त्साधुमार्गश्रिता)न् ।

साधूनां विधिना च सूरिपदवीमारोपयाञ्चक्रिरे,
ते श्रीम**ज्जिनदेव**सूरिचरणा रक्षन्तु सङ्घं सदा ।।११।।

समाप्ता श्रीदशवैकालिकटीकेति ।। ग्रंथाग्रं ३५००, मंगलमस्तुलेखकपाठकयोः ।
संवत् १६६२ वर्षे वैशाखवदि ४ भौमे लिखितं । शुभं भवतु ।।

प्रत्यन्तरे -

मूलं दयादानमुखाश्चतस्रः, शाखाः प्रशाखा नियमव्रतानि ।
पुष्पाणि संपत्प्रकराः फलं तु, मोक्षो भवेद् धर्मसुरद्रुमस्य ।।११।।

इति दशवैकालिकलघुटीका समाप्ता ।।छ।। शुभं भवतु ।। मंगलमस्तु ।। श्रीगुरुभ्यो नमः ।। परमगुरुभ्यो नमः ।। मंगलमस्तु ।। संवत् १५१६ वर्षे माघ वदि १ गुरौ अद्ये हि श्रीघोघावेलाकूले महाराजाधिराजपातसाहश्रीकुतबदीनमहिम्मदराज्ये व्यापारी तन्नियुक्तः सं० सोमदत्तपंचकुलप्रतिपत्तौ ।। श्रीमद्धर्मभृतां वरिष्टतपसां पू० सत्यविशालप्रभृतीनां महात्मनां तेषामध्ययनार्थं पुस्तकमिदमलिखापयत् द्युम्नेन स्वार्थं तथा परोपकाराय ।। [श्रीगणेशाय ।। श्रीवक्रतुंडाय ।।] शुभं भवतु ।।

श्रीआणंदविमलसूरिगुरुभ्यो नमः पं० वीरविमलगणि ।

इति भगवच्छय्यंभवश्रुतकेवलिनिर्यूढं **श्रीमत्सुमतिसाधुसूरिणा** भवविरहाङ्कित-बृहट्टीकोद्धृतवृत्त्युपेतं

श्रीदशवैकालिकं समाप्तम् ।

**इति श्रीदशवैकालिकसूत्रं टीकात्रिक समेतं समाप्तम्.**



ધમ્મો મંગલમુક્કિટ્ઠં, અહિંસા સંજમો તવો ।
દેવા વિ તં નમંસંતિ, જસ્સ ધમ્મે સયા મણો ॥૧॥

: પ્રકાશક :
પૂ. આ. શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા
અમદાવાદ



BHARAT GRAPHICS - Ahmedabad-1
Ph. : 079-22134176, M : 9925020106